श्री श्रीअयोध्या

नं. ४२



श्रीश्री सीताराम श्रीश्री सीताराम श्रीश्री सीताराम श्रीश्री सीताराम श्रीश्री सीताराम

व्याला हिंस्रपशवः सर्पा हिंस्राः पशवो व्यालरक्षसाः ॥१९॥ उच्छिष्टम् अशुचिं प्रमत्तं असावधानं तान् रक्षो व्यालान् ॥२०॥
धनमेघप्रुक्तं २१ इतीव पूर्वोक्तमार्गोपदेशप्रकारेणैव द्विजैः ॥ कृतस्वस्त्ययनः कृतमंगलाशीर्वादः ॥२२॥ इति

रक्षांसि पुरुषादानि नानारूपाणि राघव ॥ वसन्त्यस्मिन् महारण्ये व्यालाश्च रुधिराशनाः ॥१९॥ उच्छिष्टं वा प्रमत्तं वा तापसं धर्मचारिणम् ॥ अदन्त्यस्मिन् महारण्ये तान्निवारय राघव ॥२०॥ एष पन्था महर्षीणां फलान्याहरतां वने ॥ अनेन तु वनं दुर्गं गन्तुं राघव ते क्षमम् ॥२१॥ इतीव तैः प्राञ्जलिभिस्तपस्विभिर्द्विजैः कृतस्वस्त्ययनः परंतपः ॥ वनं सभार्यः प्रविवेश राघवः सलक्ष्मणः सूर्य इवाभ्रमण्डलम् ॥२२॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये चतुर्विंशतिसहस्रिकायां संहितायाम् अयोध्याकाण्डे एकोनविंशोत्तरशततमः सर्गः ॥११९॥ सीताराम सीता

श्रीमज्जनकीरमणपदपंकजपरिचरणपरायणशिवलालपाठकपादानुयायिभूदेवरामसंगृहीते
श्रीमद्रामायणीयविषमपदव्याख्याने अयोध्याकाण्डे समाप्तिमगमत् शुभमस्तु ॥१॥ सीताराम ॥

रा०व्या०म्र० १२ १३ सर्वंन्यवेदयदित्यस्यैव प्रपंचः प्रीतिदानमित्यादि प्रीत्या दीयत इति प्रीतिदानं कर्मणि ल्युट् १४ मानुषेषु मनुष्यलोकेषु १५ १
४३ शर्वरीं पुण्यां शुभ्रां शशिनिभाननां सीतां दृष्ट्वा प्रीतः उवास १६ हुताग्निकान् आपृच्छेतां वनगोचरान्

तत्रसासमलंकृत्यसीतासुरसुतोपमा प्रणम्यशिरसातस्मैरामंत्वभिमुखीययौ १२ तथाविभू
षितांसीतांददर्शवदतांवरः राघवःप्रीतिदानेनतपस्विन्याजहर्षच १३ न्यवेदयत्ततस्सर्वं
सीतारामायमैथिली प्रीतिदानंतपस्विन्यावसनाभरणस्रजम् १४ प्रहृष्टस्त्वभवद्रामो
लक्ष्मणश्चमहारथः मैथिल्याःसत्क्रियांदृष्ट्वामानुषेषुसुदुर्लभाम् १५ ततस्तांश
र्वरींप्रीतःपुण्यांशशिनिभाननाम् अर्चितस्तापसैःसिद्धैरुवासरघुनंदनः १६ तस्यां
रात्र्यांव्यतीतायामभिषिच्यहुताग्निकान् आपृच्छेतांनरव्याघ्रौतापसान्वनगोच
रान् १७ तावूचुस्तेवनचरास्तापसाधर्मचारिणः वनस्यतस्यसंचारंराक्षसैःसमभिप्लुतम् १८

चीमित्यर्थः १७ वनस्यकंदमूलफलाहरणार्थंसंचारं देशंराक्षसैः समभिप्लुतं व्याप्तं तदुत्तमित्यूचुरितिसंबंधः १८ । राम ४३

कलशैर्घृताः उद्धृकलशाः सहिताः परस्परं मिलिताः ५ ऋषीणामिति ऋषिभिरित्यर्थः कपोतांगावत पारावतकंठवद्रु
ताः मेचकः श्यामेर क्रेरुणो कं चेतितिकोशः ६ अन्यपरागायेतरवैःते पिसमंततः घनीभूता हि अथ अप्र पांतिरालत्वा

एते वै ह्यभिषेकाय मुनयः कलशैर्घृताः सहिता उपवर्तंते मिलिता ह्युत वल्कलाः ५ ऋषी
णामग्निहोत्रेषु हुतेषु विधिपूर्वकम् कपोतांगारुणो धूमो दृश्यते पवनोत्थितः ६ अल्पप
रागहित रवौ घनीभूतः समंततः विश्लक्ष्ण पियदेशेन प्रकाशंति वेदिकाः ७ रजनीचरस
त्वानि प्रचरंति समंततः तपोवनमृगा ह्येते वेदितीर्थेषु शेरते ८ संवृतानि प्रासीतेन
स्रात्रसमत्वेकृता ज्योत्स्नाप्रावरणः चंद्रो दृश्यते भ्युदितोंवरे ९ गम्यतामनुज्ञानामिरा
मस्थानचरीभव कथ्यसे साहिमधुरं त्वयाहमपितोषिता १० अलंकुरु च तावत्त्वं शस्त्रं
मममैथिलि प्रीतिजननमेवत्से दिव्यालंकारशोभिनि ११

सांद्रीभूता एव तत्र हेतुः विश्लक्ष्णपिदे
शेन प्रकाशंति वेदिकाः उत्तिन प्रकाशंते इत्यर्थः ७ वेदीतीर्थेषु अग्निहोत्रवेदिसंबंधातुराणी क्षेत्ररूपाश्रमदेशेषु तीर्थ
शब्दः आप क्षेत्र वाची ८ ९ अनुचरीभव अनुसृप भव १० अलंकुरु आत्मानमिति शेषः प्रीतिजननम् अलं
सदिव्य स्वस्वरूपानुभावनेनेति शेषः ११

टी० वा० अ० ५३ ५४ इत्यार्षे अष्टादशोत्तरशततमः सर्गः ११८ ॥ १ स्वयंवरं वृत्तं स्वयंवरो वृत्तः स्वयंवरशब्दोऽर्धर्चादिः २ उपोढलक्ष्मीयं शा
६०२

मम चैवानुजा साध्वी ऊर्मिला शुभदर्शना ॥ भार्यार्थे लक्ष्मणस्यापि पित्रा दत्ता मम स्वयम् ॥ ५३ ॥
एवं दत्तास्मि रामाय तदा तत्र स्वयंवरे ॥ अनुरक्ता च धर्मेण पतिं वीर्यवतां वरम् ॥ ५४ ॥ इत्यार्षे
श्रीरामायणे वाल्मीकीये अयोध्याकांडे अष्टादशोत्तरशततमः सर्गः ॥ ११८ ॥ अनसूया
तु धर्मज्ञा श्रुत्वा तां महतीं कथाम् पर्यष्वजत बाहुभ्यां शिरस्याघ्राय मैथिलीम् १ व्यक्ताक्ष
रपदं चित्रं भाषितं मधुरं त्वया यथा स्वयंवरं वृत्तं तत्सर्वं हि श्रुतं मया २ रमेऽहं कथया ते
दृढं मधुरभाषिणि रविरस्तं गतः श्रीमानुपोह्य रजनीं शुभाम् ३ दिवसं परिकीर्णानामा
हारार्थं पतत्रिणाम् संध्याकाले विलीनानां निद्रार्थं श्रूयते ध्वनिः ४

प ३ दिवसं व्याप्याहारार्थं परितः कीर्णानां संचरतां निलीनानां निलीयमानानां पतत्रिणां ध्वनिः श्रूयते इति संबंधः ४
राम ६०२

॥ ८ मी धनुर्दर्शनकांक्षिणौ । भ्रातरौ रामाय दैविकं देवदत्तं धनुर्द्रष्टुं यतिविम्बा मित्रः पितरं प्रोवाच इति संबंधः ४६ ४७ पूरयामास

प्रोवाच पितरं तत्र भ्रातरौ रामलक्ष्मणौ । उत्तौ द्रष्टुं राघवौ सौ धनुर्दर्शनकांक्षिणौ ४६ धनु
र्दर्शय रामाय राजपुत्राय दैविकम् । इत्युक्तस्तेन विप्रेण तद्धनुः समुपानयत् ४७ निमेषांतर
मात्रेण तदानम्य सवीर्यवान् । ज्यां समारोप्य झटिति पूरयामास वीर्यवान् ४८ तेन पूरयता वे
गान्मध्ये भग्नं महद्धनुः । तस्य शब्दोऽभवद्भीमः पतितस्याशनेर्यथा ४९ ततोऽहं तत्र रामाय पि
त्रा सत्याभिसंधिना । उद्यता दातुमुद्यम्य जलभाजनमुत्तमम् ५० दीयमानां न तु तदा प्रतिज
ग्राह राघवः । अविज्ञाय पितुश्छंदमयोध्याधिपतेः प्रभोः ५१ ततः श्वशुरमामंत्र्य वृद्धं द
शरथं नृपम् । मम पित्रा त्वहं दत्ता रामाय विदितात्मने ५२

सगज्जं कृत्वा कृष्टवान् ४८ ४९ उत्तमे
जलभाजनमुद्यम्य पित्राहं रामाय दातुमुद्यतेति संबंधः ५० छंदमभिप्रायम् ५१ ५२ २ ५२ ५२ ५२

 महाप्रज्ञे दत्तय स्तेतमभवितः पूर्वज सदेवगतस्पतदा शत्रुजयस्तमथी धनुर्लोभायतपः करागाकाले वियतेसर्वे देवैरिति
पि

महापहे तदातस्य वरुणेन महात्मना दत्तं धनुर्वरं प्रीत्या तूणी चाक्षय्य सायकौ ३९ अथ ते चा
ज्यंसमनुध्येष्य ब्रह्मन्नो नापि चगौरवात् तन्न प्राक्रान्तमपि तु स्व मे थ्वं नराधिपाः ४० तद्ध
नुः प्राप्यमे पित्रा व्याहृत्तं सत्यवादिना समवायेन रौ द्राणां पूर्वमा मं अपार्थिवान् ४१
च इदं धनुरु द्यम्य सज्जेयः कुरुते नरः तस्मै मे दुहिता भार्या भविष्यति निसंशयः ४२
तच्च दृष्ट्वा धनुः श्रेष्ठं गौरवाद्गिरिसंनिभम् अभिवाद्यान्रुपाजग्मुरशक्तास्तस्य तोलने ४३
सुदीर्घस्याद्य कालस्य राघवोयं महाद्युतिः विश्वामित्रेण सहितो यज्ञं द्रष्टुं समागतः ४४
लक्ष्मणेन सह भ्रात्रा रामः सत्यपराक्रमः विश्वामित्रस्तु धर्मात्मा मम पि त्रास पूजितः ४५

वरुणाः श्रीवत्तेन महात्मना दत्तो ३९ गौरवात् भारवत्वात् ४० ४१ नहेसस्य उति पित्राव्याहृत्तमिति पूर्वेणसंबंधः ४२
तोलने चालने अभि वाद्य नमस्कृत्य ४३ ४४ ४५

३१ वद्देव्यै संतानेच्छावत्यै देव्यै संभाविता संवर्द्धिता ३३ पतिसंयोगसुलभं पाणिग्रहोचितम् ३४ सदृशात् पक्षे च वरवर्गजनात् कन्यायाः पिता इंद्रसमोपि प्रविशिष्टितो लोके प्रधर्षणाम् सम्मानादि रूपं क्लेशमाप्नोति किमुता

दत्ता चास्मीष्टवद्देव्यै ज्येष्ठायै पुण्यकर्मणा तया संभाविता चास्मि स्निग्धया मातृसौहृदात् सोहृदा
त् ३३ पतिसंयोगसुलभं वयो दृष्ट्वा तु मे पिता चिन्तामभ्यगमद्दीनो वित्तनाशादिवाधनः
३४ सदृशाच्चापकृष्टाच्च लोके कन्यापिता जनात् प्रधर्षणामवाप्नोति शक्रेणापि समो
भुवि ३५ तां धर्षणामदूरस्थां संदृश्यात्मनि पार्थिवः चिन्तार्णवगतः पारं नाससादाप्लवो
यथा ३६ अयोनिजां हि मां ज्ञात्वा नाध्यगच्छत्स चिन्तयन् सदृशं चानुरूपं च महीपालः
पितामम ३७ तस्य बुद्धिरियं जाता चिन्तयानस्य संततम् स्वयंवरं तनूजायाः करिष्यामीति धीम
तः ३८

धिकादिति शेषः ३५ अदूरस्थां निकटप्राप्तां धर्षणां कन्यानिमित्ततिरस्कारं आत्मनि संदृश्य संभाव्य अप्लवः पो
तहीनः ३६ सदृशं अभिजनविद्यावृत्तादिना तुल्यं अनुरूपं वपुः सौन्दर्यादिना योग्यं वरमिति शेषः ३७ ३८ राम

टी० वा० स० २७ क्षेत्रमंडलं यागोपयोगिमंडलाकारं क्षेत्रं कृषतस्तस्य पुरोजगतीं भित्वोत्थिता एतावन्मात्रेणाहं नृपतेर्जनकस्य सुता २८
४०० मुष्टिविक्षेपतत्परः या जाता ओषधयो देवेभ्य इत्यादिमंत्रोक्तप्रकारेणौषधिमुष्टिविकिरणतत्परः दलपर्यैः च

मिथिलाधिपतिर्वीरो जनको नाम धर्मवित् स्वकर्मरापभिरतोन्यायतः प्राप्तिमेदिनीम् २७
तस्य लांगलहस्तस्य कृषतः क्षेत्रमंडलम् स्पृष्टं किलोत्थिता भित्वा जाता तेन नृपतेस्सुता २८ स
समां दृष्ट्वा नरपतिर्मुष्टिविक्षेपतत्परः पांसुगुंठितसर्वांगीं विस्मितो जनको भवत् २९
अनपत्येन च स्नेहादंकमारोप्य च स्वयम् ममेयं तनयेत्युक्त्वा स्नेहोमयिनि पातितः ३०
अंतरिक्षे च वागुक्ता प्रतिमामामानुषी किल एवमेतन्नरपते धर्मेण तनया तव ३१ ततः
प्रहृष्टो धर्मात्मा पिता मे मिथिलाधिपः अवाप्तो विपुलामृद्धिं मामवाप्य नराधिपः ३२

शब्दौत्पत्ये ३० प्रतिमामामानुषीप्रतिमया स्वरूपेणामानुषीमनुष्यवाक् तुल्यागंतरिक्षे उक्ता तां वाचमाह ए
वमिति एतन्ममेयं तनयेत्येतत् एवं श्रवदैवपतोहेतोः हे नरपते धर्मेणान्यायेन एषा त्वत्क्षेत्रे जाता त्वा
न्नवनेन पेयः ३१ मामवाप्य प्रजाभूमेरिति प्रोक्तः महत्त्वाभोत्तरं तस्य महती समृद्धिर्जातेत्यर्थः ३२ राम ४००

प्रोभयि ष्पसीसनेनत्वसूजयाभर्तुरपिपूजा व्रतेति सूचितम् २० त्रिपल्वाम्प्रतिम्नहानधिकारेण प्रीति दानमिस्पुक्ते लक्ष्मु
देशेन [illegible] ब्राह्मणादिभ्यो दत्तमतपे चैत्सा स्रो: द्र क्ष्मे प्रीत्यानिवेदितं तस्येति किं वक्तव्य मितिभागवते प्रीति दानमनसे

श्रीरागेणादिव्येनलिप्ताङ्गीजनकात्मजे प्रोभयिष्पसिमितारंयथाश्रीर्विष्णुमव्ययम् २०
मावत्रमेगुणांचमूवाणानिस्वजलम्पा मेथिर्भीपतिजग्राहप्रीतिदानमनुत्तमम् २१ प
लिङ्गहाचतंसीताप्रीतिदानेपशस्विनी श्लिष्टांजलिपुटाधीरामनुपास्ततपस्विनी म २२
तथासीतामुपासीनामनसूया दृढव्रता वचनंप्रष्टुमारेभे कथांकाञ्चिदनुप्रियाम् २३
स्वयंवरेकिलप्राप्ता त्वमनेनयशस्विनी राघवेणेतिमेसीते कथाश्रुतिमुपागता २४ ।
तां कथां श्रोतुमिच्छामि विस्तरेण च मैथिलि यथानुभूतं कार्त्स्न्येन तन्मे त्वं वक्तुमर्हसि २५
एवमुक्तातुतां सीतां तापसीं धर्मचारिणीम् श्रूयतामिति चोक्त्वा वै कथयामास तां कथाम्
२६
प्रायाहतिवो ध्यं २१ श्लिष्टांजलिपुटा रचितांजलिपुटा २२ तथानु तथानंतरं प्रियां कांचित्कथां श्रोतुकामा वचनं प्रष्टुमा

पाठ २३ श्रुति श्रीतपसाम् २४ २५ २६

रा० वा० प्र० तद्बलं संश्रित्य आश्रित्य छंदये वरं वरयेत्यर्थः शुचिव्रते १४ विस्मिता जाता आश्चर्यं प्राप्ता तपसो माहात्म्यं दृष्ट्वा नमस्यापि वर
३९९ दाने सामर्थ्यमिति मंद विस्मया मंदस्मिता कृतं भवत्या अनुग्रहेणैव सर्वं मे पूर्णं न किंचित्प्रार्थनीयमस्तीति भावः १५

वं

नियमैर्विविधैराप्तं तपो हि महदस्ति मे तत्संश्रित्य बलं सीते छंदये त्वां शुचिव्रते १४ उपपन्नं च
युक्तं च वचनं तव मैथिलि प्रीता चास्म्युचितं किं ते करवाणि ब्रवीहि मे १५ तस्यास्तद्वचनं श्रु
त्वा विस्मिता मंदविस्मया कृतमित्यब्रवीत्सीता तपोबलसमन्विताम् १६ सा त्वेवमुक्ता ध
र्मज्ञा तया प्रीततराभवत् सफलं च प्रहर्षं ते हन्त सीते करोम्यहम् १७ इदं दिव्यं वरं माल्यं व
स्त्रमाभरणानि च अंगरागं च वैदेहि महार्हमनुलेपनम् १८ मया दत्तमिदं सीते तव गात्राणि
शोभयेत् अनुरूपमसंक्लिष्टं नित्यमेव भविष्यति १९

तेषु प्रकर्षेण स्थितं निष्ठमेव दिव्यं वैभवं तत् सृजनेन स्वात्मनि

सफलं फलजनकं करोमि सर्पिः हंते हि हर्षे १७ अंगरागो अंगसंजननकरं महार्हं दिव्यमनुलेपनं गंधद्रव्यकल्कं १८ शोभ
येत् शोभयिष्यति अनुरूपं त्वदेकोचितं नित्यमेवासंक्लिष्टं उपभोगेऽपि म्लानिरहितत्वादि दोषरहितं भविष्यति १९ १९ राम ३९९

तदपि मात्रं तु प्रासनमपि मे ध्रुवं मे हृदन्तमेवास्ति ८ पञ्चस्वेतात्मीयैर्वै ध्रुवैर्गैः वाक्यैः पतिशुश्रूषणाया धान्यमुपदिष्टं
तच्चमे न विस्मृतं न स्त्रस्यार्थः ९ सावित्री तत्सवतः पत्नी तथा वर्तते सावित्री समानव्रतिः त्वं पतिशुश्रूषयादिवं या

पाणिग्रहणकाले च यत्सुराग्निसन्निधौ अनुष्ठितं जनन्या मे बाल्ये तदपि मे ध्रुवम् ८ न वि
स्मृतं तु मे सर्वैर्वाक्यैः स्वधर्मचारिणि पतिशुश्रूषणान्नार्यास्तपो नान्यद्धि पठ्यते ९ सावि
त्री पतिशुश्रूषां कृत्वा स्वर्गे महीयते तथा वर्तितव्यमाता त्वं पतिशुश्रूषणादिवम् १० वरिष्ठा
सर्वनारीणां यथा चन्द्रादि विदेवता रोहिणी न विना चन्द्रं मुहूर्तमपि दृश्यते ११ एवंविधाश्च साध्व
यः स्त्रियो भर्तृदृढव्रताः देवलोके महीयन्ते पापेन स्वेन कर्मणा १२ नालोकसमासेह द्धा प्रलोके
सीतयावचः श्रिरसा ग्राह्यचो वाचमेपितलोहर्षपूरितः १३

तेषु स्त्रिः पातिव्रत्यमहिम्नास्वर्गस्पृहणीयत्वादिति भावः १० रोहिणीविनाचन्द्रमुहूर्तमपि न दृश्यते एवं पतिसा
हित्ये पतिशुश्रूषाप्रभाचरतिभावः ११ एवंरास्त्रियो रुंधत्यादयः १२ हर्षयेसुनंस्त्वं पिउतापर्यवेकल्प्यपाः १३

तद्विधाः उक्तनिकृष्टगुणवत्यः २७ दृष्टो लोकः परोऽवरश्च याभिस्ताः २८ समयः आचारः २९ इति सप्तदशोत्तरशतत

प्राप्नुवंत्ययशश्चैव धर्मभ्रंशं च मैथिलि॥ अकार्यवशमापन्नाः स्त्रियो याः खलु तद्विधाः॥२७
त्वद्विधास्तु गुणैर्युक्ता दृष्टलोकपरावराः॥ स्त्रियः स्वर्गे चरिष्यंति यथा पुण्यकृतस्तथा॥२८
तदेवमेनं त्वमनुव्रता सती पतिव्रतानां समयानुवर्तिनी॥ भव स्वभर्तुः सहधर्मचारिणी॥
यशश्च धर्मं च ततः समाप्स्यसि॥२९॥ इत्यार्षे रामायणे वाल्मीकीये अयोध्याकांडे सप्तदशो
त्तरशततमः सर्गः॥ ११७॥ सा त्वेवमुक्ता वैदेही अनसूयानसूयया॥ प्रतिपूज्य वचो मंदं प्रवक्तु
मुपचक्रमे १ नैतदाश्चर्यमार्याया यन्मां त्वमनुभाषसे विदितं तु ममाप्येतद्यथा नार्याः पति
र्गुरुः २

मः सर्गः ११७ अनसूयया एवमुक्ता सा अनसूया असूयारहिता वैदेही वचः अनसूयाया इति शेषः १ अनुभाषसे शिक्षयसि र

तदेव दर्शयति यद्यपीति एष भर्त्ता यद्यपि वृत्तवर्जितः सदाचाररहितः तथा एवानार्यो पूज्यो भवेत्तथापि मया माम्
द्विधया अद्वैधं द्वैधीभावरहितं यथा तथा उपवर्त्तव्यः गुणवत्वान्निर्दिशति त्वमेवं विहाय तत्सम्पाद्य उपचरामि यदुक्त

यद्यप्येष भवेद्भर्त्ता ममार्यो वृत्तवर्जितः अद्वैधमुपवर्त्तव्यस्तथाप्येष मया भवेत् ३ किं
पुनर्यो गुणश्लाघ्यः सानुक्रोशो जितेन्द्रियः स्थिरानुरागो धर्मात्मा मातृवर्ती पितुः प्रि
यः ४ यां वृत्तिं वर्त्तते रामः कौशल्यायां महाबलः तामेव नृपनारीणामन्यासामपि व
र्त्तते ५ सकृद्दृष्टास्वपि स्त्रीषु नृपेण नृपवत्सलः मातृवद्वर्त्तते वीरो मानमुत्सृज्य धर्म
वित् ६ आगच्छन्त्याश्च विजनं वनमेवं भयावहम् समाहितं हि मे श्वश्र्वा हृदये यत्
स्थिरं मम ७

यः गुणश्लाघ्यत्वादिविशेषसाध्वतिरिति किं पुनर्वक्तव्यं मातृवर्ती मातृसेवारतः पितुः
प्रियः पितुः प्रीतिविषयः ४ नृपनारीणामित्यत्र सप्तम्यर्थे षष्ठी ५ नृपेणादरस्थेन मानं अहं महा
प्रभुरित्यभिमानं त्यक्त्वेत्यर्थः ६ श्वश्र्वा कौशल्यया यत् पातिव्रत्यधर्माचरणं समाहितम् उपदिष्टं तन्मे हृदि स्थिरं वर्त्तते ७

रा०वा०अ० मानेराजसुताहेकर्पंवनेगच्छसि यमित्येवरुपंवने अवरुद्धंवनवासे पित्रानियुक्तम् २२ शुभेऽनुकूलः अशुभः प्रतिकूलः २३
३९७ आर्यस्वभावानां पूज्यस्वभावानां २४ अतो विशिष्टं भर्तुः श्रेष्ठं बांधवमित्येवं धुं सर्वत्र योग्यं सर्वावस्थानुसरणशीलं ममपीने

त्यक्त्वासातिजने सीते मानमर्हसि चमानिनि अवरुद्धं वने रामं दिक्पालं त्वमनुगच्छसि
२३ नगरस्थो वनस्थो वा शुभो वा यदि वाशुभः यासां स्त्रीणां प्रियो भर्ता तासां लोका
महोदयाः २३ दुःशीलः कामवृत्तो वा धनैर्वा परिवर्जितः स्त्रीणामार्यस्वभावानां पर
मं दैवतं पतिः २४ नातो विशिष्टं पश्यामि बान्धवं विमृशन्त्यहम् सर्वत्र योग्यं वैदेहि तपः
कृतमिवाव्ययम् २५ न त्वेवमवगच्छन्ति गुणदोषमसत्स्त्रियः कामवक्तव्यहृदया भर्तृ
नाथाश्चरन्ति याः २६

पश्यामि तपः कृतमिव तद्योऽनुष्ठानमिव भावे निष्ठा २५ याः कामवक्तव्यहृदयाः कामाधीनहृदयाः गत्याधीनो न वक्त
व्यो विस्तरमः भर्तृनाथाः भर्तृणां नियामिकाः यद्वा भर्तृन् नाथन्ते याचन्ते परपुरुषकांक्षिणपत्या चरन्ति स्वेच्छयाः इत्यर्थः

रामा ३९७

अस्य मुनेः समीरितं वचनं यतः श्रुतं अत आत्मनः श्रेयोर्थमभिगच्छ १६ १७ शिथिलां श्लथसंधिबंधां वलितां संजातवलिं

राजपुत्री श्रुतं त्वेतन्मुनेरस्य समीरितम् श्रेयोर्थमात्मनः शीघ्रमभिगच्छ तपस्विनीम् १६
सीता चैतद्वचः श्रुत्वा राघवस्य हितैषिणः तामत्रिपत्नीं धर्मज्ञामभिचक्राम मैथिली १
७ शिथिलां वलितां वृद्धां जरापांडुरमूर्धजाम् सततं वेपमानांगीं प्रवाते कदलीं यथा
१८ तां तु सीतां महाभागामनसूयां पतिव्रताम् अभ्यवादयदव्यग्रा स्वं नाम समुदा
हरत् १९ अभिवाद्य च वैदेही तापसीं तामनिंदिताम् बद्धांजलिपुटा हृष्टा पर्यपृ
च्छदनामयम् २० ततः सीतां महाभागां दृष्ट्वा तां धर्मचारिणीम् सांत्वयंत्यब्रवीद्दृष्ट्या
दिष्ट्या धर्ममवेक्षसे २१

१८ स्वं नाम समुदाहरत् अभिवादनांगत्वेनेति शेषः १९ अनामयं आरोग्यं
२० धर्मचारिणीं भर्तृसमानधर्मचारिणीं धर्ममवेक्षसे यातिकस धर्ममवधानेन समीक्षसे दिष्ट्या भाग्यम् २१ २१

देवकार्यनिमित्तमिति यस्य यते चमाण्डव्यऋषिणा प्रातर्विधवा भवेति कस्यांचिदृषिपत्न्यामनसूयात सा रव्याश्शप्तायां प्रातरेवमाभूदिति तया प्रतिशापे दत्ते व्याकुलैर्देवैः प्रार्थितानसूया दशरात्रावधिकालत्वमेकरात्रित्वेन कृत्वा देवकार्यं कृ

देवकार्यनिमित्तं च यया संत्वरमाणया । दशरात्रं कृता रात्रिः सेयं मातेव तेनघ १२ ता
मिमां सर्वभूतानां नमस्कार्यां तपस्विनीम् । अभिगच्छतु वैदेही वृद्धामक्रोधनां सदा
१३ अनसूयेति या लोके कर्मभिः ख्यातिमागता १४ एवं ब्रुवाणं तमृषिं तथेत्युक्त्वा
स राघवः । सीतामुवाच धर्मज्ञामिदं वचनमुत्तमम् १५

तवतीसख्यावैधव्यं च परिहृतवतीति गा यासेयं मातेव ते पूज्येति शेषः १२ प्राक्कर्मभिः अनन्यशक्तैः परानुग्रहार्थत
पोविशेषैः अनसूया असूयारहिता इति लोके ख्यातिमागता तामिमां वैदेही अभिगच्छत्विति संबंधः १३ १४ १५

तं देशमनुप्राप्तां वृद्धां पत्नीं अनसूयानाम्नीं सर्वविप्रैः सत्कृतां आमंत्र्य संबोध्य सांत्वयामास प्रीत्या सीतां दर्शयामास ७ अनेन सर्वसत्कृतसा ध्यातो ब्रह्मभागधेयमूर्तिं परात्परपरमात्मप्रियां वैदेहीं प्रतिगृह्णीष्वेत्यब्रवीदिति पर्यायः ८

पत्नीं च समनुप्राप्तां वृद्धामामंत्र्य सत्कृताम् सांत्वयामास सर्वज्ञः सर्वभूतहिते रतः ७ अनसूयां महाभागां तापसीं धर्मचारिणीम् प्रतिगृह्णीष्व वैदेहीमब्रवीदृषिसत्तमः ८ रामाय चाचचक्षे तां तापसीं धर्मचारिणीम् दश वर्षाण्यनावृष्ट्या दग्धे लोके निरंतरम् ९ यया मूलफले सृष्टे जाह्नवी च प्रवर्तिता उग्रेण तपसा युक्ता नियमैश्चाप्यलंकृता १० दश वर्षसहस्राणि यया तप्तं महत्तपः अनसूया व्रतैस्तात प्रत्यूहाश्च निवर्तिताः ११

रामाय चाख्यामास च ख्यातत्वेन च कथितवान् तदेव दर्शयति दशे

त्यादि ९ मूलफलेरनसूया गां जीवनायेति शेषः जाह्नवी गंगा च प्रवर्तिता दश वर्षमनावृष्ट्या भूमेर्निर्जलत्वात्तेषां लोकानां पोषमेव सिद्धिवैभवेनानायिता स्वाश्रम इति शेषः ११ अनसूयाकृतैर्व्रतैः प्रत्यूहाः अस्यास्तां तपोविघ्नाश्च नि

प० वा० स्र० तमेवाह इहेति मेम पार्श्वे वंधसामान्येषच्छी सामेऽस्य तिः मां नित्यमनुशोचतस्तानन्वेतीति विपरीतकारोति तेन च समापि
 शोकोवर्द्धतइति भावः २ तस्य भरतस्य तेन स्कंधावारनिवेशेन सेनानिवेशेन हयहस्तिकरीषैश्च भूमेर्भृशमुप

इह मे भरतो दृष्टो मातरश्च सनागराः । सा च मेऽस्य तिरन्वेति तान्नित्यमनुशोचतः २ स्कं
धावारनिवेशेन तेन तस्य महात्मनः । हयहस्तिकरीषैश्च उपमर्दः कृतोऽभृशम् ३
तस्मादन्यत्र गच्छामि इति संचिन्त्य राघवः । प्रातिष्ठत सवैदेह्या लक्ष्मणेन च संग
तः ४ सोऽत्रेराश्रममासाद्य तं ववंदे महायशाः । तं च स भगवानत्रिः पुत्रवत्प्रत्यपद्य
त ५ स्वयमातिथ्यमादिश्य सर्वमस्य सुसत्कृतम् । सौमित्रिं च महाभागां सीतां च समं
सांत्वयत् ६

मर्दः कृतः भूमेरशुचिता कृतेत्यर्थः ३ ४ ते च जगत्कारणमपि रामं पुत्रवत् प्रालिंगनमूर्धाघ्राणादिभिः
प्रत्यपद्यत गृहीतवान् वात्सल्यमकरोदिति भावः ५ स्वयमादिश्य विसृज्य शुश्रूषां सर्वमातिथ्यं सुसत्कृतं कृत्वा समं सांत्वयत्
उद्धिक्रमेण परिपूर्णेन च दृष्ट्या प्रत्यपद्यत ६

राम तस्माद्देशात् प्रीतं ऋषिगणं अनुगमनात् अनुगमनेन संसाध्य प्रस्थाप्य कुलपतिमृषिमभिवाद्य सम्यक् प्रीतैस्तैः अनुगमनं उपदिष्टः स्वर्यान्यस्मैतादृशः तत्प्रस्थाप्य स्वनिलयं वासाय स्वमिसंपेदे इति संबंधः २५ तत्राममपि न

रामः संसाध्य ऋषिगणमनुगमनात्तस्माद्देशात्कुलपतिमभिवाद्य ऋषिम्॥ सम्यक्प्रीतैस्तैरनुगमनमुपदिष्टार्थः पुण्यं वासाय स्वनिलयमभिसंपेदे॥ २५॥ आश्रमं त्वृषिविरहितं प्रभुः क्षणमपि न जहौ स राघवः॥ राघवं हि सततमनुगतास्तापसाश्चार्षचरिते धृतगुणाः॥ २६॥ इत्यार्षे श्रीरामायणे वाल्मीकीये अयोध्याकांडे षोडशोत्तरशततमः सर्गः॥ ११६॥ राघवस्त्वपयातेषु तपस्विषु विचिन्तयन्। न तत्रारोचयद्वासं कारणैर्बहुभिस्तदा॥ १

जहौ सीतारक्षणार्थमिति भावः। आर्षे ऋषिसंबंधि चरिते यस्तत्र इत्यादि राम बहुसन्ति धृतगुणाः निविष्टान्तःकरणाः केचित्तापसाः सततं निरन्तरं राघवमनुगतास्तान् हित्वा नु गतास्तान् वनाश्रमान् नरं जग्मुः २६
इति षोडशोत्तरशततमः सर्गः॥ ११६ विचिन्तयन् वक्ष्यमाणलक्षणामुपाधिः १

ए० वा० अ० २० पुरा प्रवर्त्तते प्रवर्तिष्यति अपत्रस्त्वयि सयुक्तस्यापि सदा सावधानस्यापि सकलत्रस्य इहाश्रमे संदेहः संदेहवानेव
३०४ वासः अत्यर्थं प्राप्याश्च २१ समर्थस्यापि रक्षोनिग्रहे समर्थस्यापि दुःखं दुःखजनकः २२ अवरोद्धुं रक्षां सिनिवारयि

बहुमूलफलं चित्रमविदूरादितो परम् कारावस्याश्रमं मे वाहं गमिष्ये सगणाः पुनः
२० खरस्त्वय्यपि चायुक्तं पुरा तात प्रवर्त्तते सकलत्रस्य संदेहो नित्यं युक्तस्य राघव २
१ समर्थस्यापि हि सतो वासो दुःखं इहाद्य ते २२ इत्युक्त्वंतं वहुधा राजपुत्रस्तपस्वि
नम् नशशाकोत्तरैर्वाक्यैरवरोद्धुं समुत्सुकम् २३ अभिनंद्य समापृच्छ्य समा-
धाय च राघवं स जगामाश्रमं त्यक्त्वा कुलैः कुलपतिः सह २४

ष्यामि मा भैष्टेत्यादिवचनैर्निवारयितुं न शशाक तत्र हेतुः समुत्सुकमिति कार्यं प्रति वसत्यीयान्यदेशगमने सोद्युक्त्वा
च २३ अभिनंद्य स्तुत्वा समाधाय तत्वियोगखिन्नं समाधाय स्वकुलैः ऋषिसंघैः २४ गतीतांतमाम्पोनमः
राम ३०४

अथप्राप्तैः पापजनकैरऋषिभिः पदार्थैस्तापसान्संप्रयुज्यविकुर्वंति अपयानंतिमृदूनयतिघ्नंति ५ अथवृद्धं अविदितंयथा
भवतितथानिद्रादौ अवलोपयचतिर्मायमाप्रिनिष्यचतदालिंगनेनात्य चेत सोविचेतसस्तापसान्नाप्रायंतोरमंते १६

अथप्राप्तैरऋषिभिः संप्रयोज्य च तापसान् प्रतिघ्नंसपरानक्षिपं मायया पावरत्तस्थिता
न् १५ तेषुतेष्वाश्रमस्थानेष्ववृद्धमवं नीवृच रमंतेतापसोत्तत्र नाशायंतोस्वचे
तसः १६ अथवह्निपतिस्रुग्भांडानि नीन्सिंचेतिवारिणा कलेप्राथंस्वयमद्वतिहव
नेसमुपस्थिते १७ तेदुरात्मभिराविष्टानाश्रमान्मजिहासवः गमनायान्यदेश
स्य चोद्यतंत्वप्रयोमिथः १८ तासुरारामधारीरीमुपहिंसांतपस्विषु दर्शयंतिहिदु
ष्टात्तिसक्ष्यामस्त्विममाश्रमम् १९

स्रुग्भांडानस्रुगादियज्ञसंभारान् अवह्निपंति अवस्केदयंतिश्रमदा
भाः १७ प्रतिहासवः परित्यक्तुमिच्छवः मिथोमिलिताः १८ धारीरीमुपहिंसाप्रारावियोगरूपां शरादर्शयंतिदर्शयि
ष्यंति अतइमम् आश्रमंत्यक्ष्यामः १९

 कल्याणासत्वायाः कल्याणस्वभावायाः कल्याणाभिरुचेश्चैव देह्याः स्वलक्षणे स्वभावविपर्यासः कुतः स्यात् ९ तन्
 निमित्तं त्वत्तोऽहेतोरिदं वक्ष्यमाणमुपद्रवजातं रक्षोभ्यः समागतमिति शेषः १० कथं तदाह एवमिति उत्पाद्य नि

कुतः कल्याणासत्वायाः कल्याणाभिरतेः सदा स्वलक्षणे ताततवै देह्यात्तपस्विबविप्रो
षितः ९ तन्निमित्तमिदं तावत्तापसान्यभिवर्त्तते रक्षोभ्यस्तेन हिंसिताः कथयंति
ऽभ्ययः कृपाः १० एवमारावरजकं खितवरो नामहिंसकः उत्पाद्यतापसान्स
र्वान्जनस्थाननिकेतनात् ११ दुष्टश्च जितकाशी चन्द्रासः प्रस्यादकः प्रब
लिप्रश्वपापश्च त्वां च ताततन मरुष्यते १२ त्वं सदा प्रभृति ह्यस्मिन्नाश्रमे ताततव
तसंतदा प्रभृति रक्षांसि विप्र कुर्वंति तापसान् १३ दर्शयंति हि बीभत्सैः क्रूरैर्भीषण
कैरपि नानारूपैर्विरूपैश्च रूपैरसुखदर्शनैः १४

ष्कारम १ ११ जितकाशी जितसंग्रामः त्वां च न
मष्यते प्रवृत्तमाख्यानेन सहते इत्यर्थः १२ विप्र कुर्वंति विप्रकुर्वंति १३ तमपकारं दर्शयति दर्शयंतीति बीभत्सैः
जुगुप्सितवेषैः रूपैरात्मानं दर्शयतीत्यन्वयः १४

स्वात्मनि शंकितः स्वस्मिन् संजातशंकः कुलपतिं शरभङ्गस्वामिनं ४ हे भगवन् मयि पूर्ववृत्तं पूर्वं राजवृत्तेन दृश्यते कच्चित् विकृतं यादृश दृश्यते कच्चित् येन तपस्विनो विक्रियन्ते तत्कारणानि वेदयितुमर्हथ इति शेषः ५ अवरजस्य लक्ष्मणस्य नानुरूपं च

तेषामौत्सुक्यमालक्ष्य रामः स्वात्मनि शंकितः कृतांजलिरुवाचेदम् ऋषिं कुलपतिं ततः ४ न कच्चिद्भगवन् किंचित् पूर्ववृत्तमिदं मयि दृश्यते विकृतं येन विक्रियन्ते तपस्विनः ५ प्रमादाच्चरितं किंचित् कच्चिन्नावरजस्य मे लक्ष्मणस्यर्षिभिर्दृष्टं नानुरूपमिवात्मनः ६ कच्चिच्छुश्रूषमाणा वः शुश्रूषणपरा मयि प्रमदाभ्युचितां वृत्तिं सीता युक्तं न वर्तते ७ अथर्षिर्जरया वृद्धस्तपसा च जरां गतः वेपमान इवोवाच रामं भूतदयापरम् ८

रितं प्रयुक्ताचरणं प्रमादाज्जातं किंचित् ऋषिभिर्न दृष्टं कच्चित् ६ वः शुश्रूषमाणा शुश्रूषणप्र पापाद्यादिना युष्मान् सेवमाना अधुना मत्शुश्रूषानुरोधात् प्रमदोचितां युष्मासु प्रयुक्तां वृत्तिं शुश्रूषविपर्यासेन वर्तते कच्चित् ७ जरया तपसा च वृद्धः स्थविर एवार्थः ८

यत्कार्यं राज्यपरिपालनफलं यद्धयासनं वस्त्रपुष्पफलादिकं पादुकाभ्यां प्रथमं निवेद्य पश्चाद्यावच्चकार सर्वं कृतमिति
शेषः २७ इति पंचदशशततमः सर्गः ॥११५॥ सोद्वेगमथौत्सुक्यं आश्रमांतरगमनौत्सुक्यं लक्षयामास इंगिताकारादि

तदाहि यत्कार्यमुपैति किंचिदुपायनं चोपहृतं महार्हम् सपादुकाभ्यां प्रथमं निवेद्य
चकार पश्चाद्भरतो यथावत् ॥२७॥ इत्यार्षे रामायणे वाल्मीकीये अयोध्याकांडे
पंचदशोत्तरशततमः सर्गः ॥११५॥ प्रतियाते तु भरते वसन्रामस्तपोवने लक्षयामास सो
द्वेगमथौत्सुक्यं तपस्विनाम् १ येत्र चित्रकूटस्य पुरस्तात्तापसाश्रमे राममाश्रित्य नि
रतास्तानलक्षयदुत्सुकान् २ नयनैर्भृकुटीभिश्च रामं निर्दिश्य शंकिताः अन्यो
न्यमुपजल्पंतः शनैश्चक्रुर्मिथः कथाः ३

मिथिति शेषः १ पुरस्तात्पूर्वं चित्रकूटस्य आश्रमे राममाश्रित्य
निरताः सानंदास्तानुत्सुकान् रामनेत्युत्सुकान् लक्षयत् राम इत्यनुषंगः आश्रमे संधिरार्षः २ कथम् लक्षयत् तत्राह
नयनैरित्यादिना रामं निर्दिश्य पश्चाद्रूपं शंकिताः रामः किं मे स्यात इति भीताः नयनादिभिः यद्वशान्योन्यमुपजल्पंतः शाह

प्रहृष्टे पुलकितगात्रे मुदितेसंजातमानसहर्षे २१ २२ अवसत्तधीर धीमान् २३ २४ बालव्यजनेनसहितंछत्रंसभरतः

अभिषिक्तेतुकाकुत्स्थेप्रहृष्टेमुदितेजने प्रीतिर्मम परा भूयो बभवेद्राज्यचतुर्दशाम २१
एवंतुविलपन्दीनोभरतःसमहायशाः नंदिग्रामेकरोद्राज्यंदुःखितोमंत्रिभिःसह
२२ सवल्कलजटाधारीमुनिवेशधरःप्रभुः नंदिग्रामेवसद्वीरःससैन्योभरतस्तदा
२३ रामागमनमाकांक्षन्भरतोभ्रातृवत्सलः भ्रातुर्वचनकारीचप्रतिज्ञापारगस्तदा २४ सवालव्यजनंछत्रंधारयामासतत्स्वयम् भरतःशासनंसर्वपादुकाभ्यांन्यवेदयत् २५ ततस्तुभरतःश्रीमानभिषिच्यार्यपादुके तदधीनस्तदाराज्यंकारयामास
सर्वदा २६

सर्वंशासनेसंकल्पंपादुकाभ्यांन्यवेदयत् उक्तविशेषणंछत्रंस्वयमेवधारयामास २५ आर्यपादुके अभिषिच्य राज्याभिषेकमार्यपादुकयोःकृत्वेत्यर्थः तदधीनःपादुकापरतंत्रः २६ २६

इमौपादुकारूपौआर्यपादौ शार्यस्यममनाथस्यपादधारकौअतोममतावतिमान्यौराज्येऽयेक्षिप्तोममगुरोर्धर्मव्यवहारोऽनयो
रेवस्थितोऽत याभ्यांपादुकाभ्यांक्षिप्रंछत्रंधारयतः धारयतां लोटोलङ्वत्कौदसः १६ ग्र ये राज्यरूपः सं न्यासोनि क्षेप्तोनि

छत्रंधारयतत्क्षिप्रमार्यपादाविमौमतौ याभ्यांराज्येस्थितोधर्मः पादुकाभ्यांगुरोर्मम १६
मात्रातुमयिसंन्यासोनिक्षिप्तःसौहृदादयम तमिमंपालयिष्यामिराघवागमनंप्रति
१७ क्षिप्रंसंयोजयित्वातुराघवस्यपुनःस्वयम चरणौतौतुरामस्यद्रक्ष्यामिसहपा
दुकौ १८ ततोनिक्षिप्तभारोहंराघवेणसमागतः निवेद्यगुरवेराज्यंभजिष्येगुरु
वर्तिताम १९ राघवायचसंन्यासंदत्त्वेमेवरपादुके राज्यंचेदमयोध्यांचधूतपा
पोभवाम्यहम २०

क्षिप्रः राघवागमनंप्रतितावत्पर्यंतम १७ संयोजयित्वाचरणयोः पादुके १८ समागतो
मिलितःनिवेद्यसमर्प्यगुरुवर्तितांगुरुसुचितशुश्रूषां १९ धूतपापशब्देनकैकेयीनिमितमपयशउच्यते २०

घ

तदनाहृतं भरतेनाकृताह्वानमपि ११ १२ १३ एतदयोध्याराज्यं मम भ्रात्रा न्यासवत् समीचीनवस्तुनि क्षेपवन्मयि

वलं च तदनाहृतं राज्याम्बरथसंकुलम् प्रपेदे भरते याते सर्वे च पुरवासिनः ११ रथस्थः स तु धर्मात्मा भरतो भ्रातृवत्सलः नंदिग्रामं ययौ तूर्णं शिरस्याधाय पादुके १२ ततस्तु भरतः क्षिप्रं नंदिग्रामं प्रविश्य सः अवतीर्य रथात्तूर्णं गुरूनिदमुवाच ह १३ एतद्राज्यं मम भ्रात्रा दत्तं संन्यासवत्स्वयम् योगक्षेमवहे चेमे पादुके हेमभूषिते १४ भरतः शिरसा कृत्वा संन्यासं पादुके ततः अब्रवीद्दुःखसंतप्तः सर्वं प्रकृतिमंडलम् १५

दत्तं स्थापितं न्यासस्यापि राज्यस्य रक्षणे भारः पादुकाधीनं मे न मदधीनमित्याह योगे इत्यादि १४ पादुके संन्यासं पादुकात्मकं सद्वस्तु न्यासं शिरसा कृत्वा शरणं प्रत्येति यावत् वेदाः प्रमाणमितिवत्साधुः १५ ५१

तदेवाह गतश्चेति ३ ४ ५ बंधुलुब्धस्य बंधुजनपरिपालनेऽधिकस्पृहावतः आर्यप्रपन्नं नानुमन्येत त्वद्वचनमिति शे

गतश्च हि दिवं राजा वनस्थः स च राघवः रामं प्रतीहितो राज्याय पत्तहि राजा महायशाः ३ एत
च्छ्रुत्वा शुभं वाक्यं भरतस्य महात्मनः अब्रुवन्मंत्रिणः सर्वे वसिष्ठश्च पुरोहितः ४ म
हेश्रोक्त्वा च तीर्थं च पद्दुक्तं भरत त्वया वचनं भ्रातृवात्सल्याद् अनुरूपं तवैव तत् ५
नित्यं ते बंधुलुब्धस्य तिष्ठतो भ्रातृसौहृदे मार्गमार्यं प्रपन्नस्य नानुमन्येत कः पुमान्
६ मंत्रिणां वचनं श्रुत्वा यथाभिलषितं प्रियम् अब्रवीत्सारथिं वाक्यं रथो मे युज्यता
मिति ७ प्रहृष्टवदनः सर्वा मातॄः समभिवाद्य च आरुरोह रथं श्रीमान् शत्रुघ्नेन समन्वि
तः ८ आरुह्य तु रथं शीघ्रं शत्रुघ्नभरतावुभौ ययतुः परमप्रीतौ वृतौ मंत्रिपुरोहितैः ९ अ
ग्रतो गुरवः सर्वे वसिष्ठप्रमुखा द्विजाः प्रययुः प्राङ्मुखाः सर्वे नंदिग्रामो यतो भवेत् १० १०

षः ६ यथाभिलषिते स्वाभिलषितमनतिक्रम्य प्रवृत्तं ७ ८ ९ नंदिग्रामो यतो भवेत् येन मार्गेण तत्र प्राप्तो भवेत्तेन प्रययुः १०

२८ तदा भरतः उज्झितप्रभं सर्वत्र विभक्तं विगतसंस्कारं सुरैः हृतसूक्ष्ममभास्करं दिनमिव तत्पुरं निरीक्ष्य सुदुःखितो बाष्पं मुमोचेति
संबंधः एवं हि श्रूयते आदेवासुरे युद्धे ऽसुरैर्देवाः पराजिताः राहुणा च भानुः पातितः ते दादिवा रात्रिविभागरहिते कालेऽस्थ

॥शून्यो ध्वांतसंप्रविष्टेव विवेशाभवनं पितुः॥ तेन हीनां नरेंद्रेण सिंहहीनां गुहामिव॥२८॥
तदा तदंतःपुरमुज्झितप्रभं सुरैरिवोत्कृष्टमभास्करं दिनम्॥ निरीक्ष्य सर्वत्र विभक्तमात्म
वान्मुमोच बाष्पं भरतः सुदुःखितः॥२९॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकां
डे चतुर्दशोत्तरशततमः सर्गः॥११४॥ ततो निक्षिप्य मातॄः स अयोध्यायां दृढव्रतः भर
तः शोकसंतप्तो गुरूनिदमथाब्रवीत् १ नंदिग्रामं गमिष्यामि सर्वानामंत्रयेत्र वः तत्र दुः
खमिदं सर्वं सहिष्ये राघवं विना २

स्वलोकात्स्वलोकं गतैर्देवैः प्रार्थितस्य ब्रह्मणोऽनियोगाद्वत्रिः सप्तरात्रं सूर्याधिपत्यं चकारेति कथा २९ इति चतुर्दशा
धिकशततमः सर्गः॥११४ अयोध्यायां तेन सह गमनं वारितं राघवेण विना दुःखं राघवविश्लेषजनितदुःखमिति यावत् २

दि० वा० पू० २१ २२ २३ मम भ्रात्रा सहेति शेषः सासारा वेगवद्वृष्टिसहिताः अर्जुनी पृ ठ क् पक्षसंवेधिनी २४ महोत्सव इवागतो गं उद द खव च
३८०

पानप्रवरघोषश्च मृदंगपटहस्वनैः प्रमत्तगजनादश्च महांश्च रथनिस्वनः नेदानीं श्रूय
ते पुर्यामस्यां राममेव विवासिते २१ चंदनागरुगंधाश्च महार्हाश्च वनस्रजः गते रामे हि तरु
णाः संतप्ता नोपभुंजते २२ बहिर्यात्रां न गच्छंति चित्रमाल्यधरा नराः नोत्सवाः
संप्रवर्त्तंते रामशोकार्दिते पुरे २३ सा हि नूनं मम भ्रात्रा पुरस्यास्य द्युतिर्गता नहि राज
त्ययोध्येयं सासारेवार्जुनी क्षपा २४ कदा नु खलु मे भ्राता महोत्सव इवागतः जन
यिष्यत्ययोध्यायां हर्षं ग्रीष्म इवांबुदः २५ तरुणैश्चारुवेषैश्च नरैरुन्नतगामिभिः
संपतद्भिरयोध्यायां न विभांति महापथाः २६ इति ब्रुवन्सारथिना दुःखितो भरतस्तदा।
एवं बहुविधं जल्पन्निवेशावसतिं पितुः २७

अयोध्यायां मे भ्राता कदा हर्षं जनयिष्यतीति संबंधः २५ उन्नतगामिभिः संतोषादुन्नतगामिभिः महापथाः राजमार्गाः २६ २७
३८०

वकाभूमितलां विदीर्णां च स्वल्पां भिन्नपात्रैर्युक्तां भग्नां भग्नस्तंभां उपवक्रोदकां समाप्तोदकाम् १५ विपुलां विशालां विततां
धनुषि समारोपिताम् पक्षपाशांधनुष्को घोऽस्यां बंधनार्थापाशावुतांतरस्विनां वीराणां वाणैर्विनिकृत्तां छिन्नां

वकाभूमितलां निम्नां वकापात्रैः समावृताम् उपवक्रोदकां भग्नां प्रपां निपतितामिव
१५ विस्तीर्णां विततां चैव पक्षपांशुतरस्विनाम् भूमौ वाणैर्विनिकृत्तां पतितां ज्यामिवा
शुधात् १६ सहसा युद्धशौण्डेन हयारोहेण वाहिताम् निहतां पतितसैन्येन वरूथामिव पाति
ताम् १७ भरतस्तु रथस्थः सन् श्रीमान् दशरथात्मजः वाहयन्तं रथश्रेष्ठं सारथिं वाक्य
मब्रवीत् १८ किं नु खल्वद्य गंभीरो मूर्छितो न निशाम्यते यथापुरमयोध्यायां गीत
वादित्रनिस्वनः १९ वारुणीमदगंधश्च माल्यगंधश्च मूर्छितः धूपेनागरुगंधश्च न
प्रवाति समंततः २०

ध्वामाशुधात् धनुषः पतितां ज्यामिव स्थितां १६ सहसा बलात्कारेण वाहितां प्रधावितां पतिसैन्येन नि
हतामतएव पातिताम् १७ १८ यथापुरं यथापूर्वं १९ मदकरो गंधः मूर्छितो व्याप्तः २०

स्थानानां सह सा चरितां चरितां सुरापदस्ये सति महीं प्राप्तां संहृतो द्युतिविस्तारो यस्यास्तां ११ पुष्पानद्धां पुष्पापेतां द्रुतदावाग्निवि
प्लुष्टां वेगवद्दावाग्निना व्याप्तां १२ संमूढः जनसंचाररहितः निगमः पन्थाः यस्यां तां निगमो निश्चिप्ते देशे पथि वणिक्पथ

सहसा चरितां स्थानान्महीं पुराप्तं तयोद्धृताम् संहृतद्युतिविस्तारां तारां तारामिवाद्रिव च्युताम् ११ पुष्पानद्धां वसन्तान्ते मत्तभ्रमरताडिताम् द्रुतदावाग्निविप्लुष्टां क्रान्तां वनलतामिव १२ संमूढनिगमां सर्वां संक्षिप्तविपणापणां चक्रेन्त्रप्रोषितद्रव्यां ग्रामिवाम्बुधेर्वृताम् १३ शीतपानोत्तमैर्भग्नैः शरावैरभिसंवृताम् हतशौण्डामिव ध्वस्तां पानभूमिमसंस्कृताम् १४ रम्यासीता

वोरति कोशः संक्षिप्ताविपणापणाः परस्पवीथ्यो यस्यां ताम् १३
शीतपानोत्तमैः शीतामद्यो त्तमैर्भग्नैः शरावैरभितः संवृतां हतशौण्डा हतमद्यपां ध्वस्ताम् असंस्कृतां पानभूमिमिव स्थि
ताम् १४

समुत्थितो प्रचण्डमारुत तेन समुत्थिता उद्धत एव सफेनोच्छलत्स्वनाभूर्मिमिव सम्भूत्वा ततस्स दृष्टौ रूपं प्राप्य पश्चात्म प्रोन्नमारुतेन उर ध्वस्ये
धूतौ कम्पिता मत्त एव निस्वनोमाकारस्य जलौर्मिमिव स्थितौ ७ यत्राप्यधेः स्फा दिभिः गव भिरूपैः प्रशान्तैः सुप्ताकाले याग

सफेनोच्छलत्तरङ्गाभूत्वा सागरस्य समुत्थितानाम् प्रशान्तमरुतो धूतां जलोर्मिमिव निस्वनाम् ७
सत्कोद्वासाद्यु धैः सहैरभिरूपैः प्राजकैः सुप्ताकाले च निर्वृत्ते वेदिं तत्तरङ्गामिव ८ गोष्ठ
मध्ये स्थितान् स्मा भूमि चरन्तीं नवेतराम् गो व घोषपरिच्छन्नां गवां पत्नीमिवोसकाम्
९ प्रभाकराघैः सुलिप्तैः शुभ्रवर्णैर्भिरिवोत्तमैः विद्रुमाभामिर्जीसैर्नो गवां मुक्तावल्यौ
मिव १०

कालेनिर्वृत्तिसमाख्ये सति ८ गोष्ठो व्रजे तत्र स्थितां गो व घोषाणां गवां स्थितिपेया व घोषास्य च्छन्नां गवत्त एवातीत त्वोत
सुकां नवेतराम चरन्तीमभ्यस्यन्तीं गवां तरुणा वत्सानां पत्नीमिव स्थिताम् ७ प्रभाकराघैः पद्मरागाद्यैः १० १०

टी० वा० रा० रघुशत्रोः खंदुमप्रियांपत्नीं प्रियां दिव्यैश्वर्येतात्पर्यकां सतएव प्रज्वलितप्रभां ध्रुमुदितेन महेताराद्युतापीडितमर्त्ये कांसतएव
३८७ राकांग्रसमहासांतेही तोमिवस्थितम ३ शातयवधादस्यो समंध्रु ध्वंकतुपंचसलिलेयस्यास्तां भ्रू योमत्स्वविप्राक ४ वि

रघुश्रेष्ठः प्रियां पत्नीं शिखामिव ज्वलितप्रभाम् महेत्ताभ्र स्थिते नैकां रोहिणीमिव पी-
ड़िताम् ३ कस्यो हमधु ध्वमलिलो धर्मोत्तमविहंगमाम् लीनमीनझषग्राहां कू-
र्मांगिरि नदीमिव ४ विधूमामिव हेमाभाम ध्वराग्नेः समुत्थिताम् हविरभ्युदितां
पश्चाच्छिखां विश्लिष्टनष्टां गताम् ५ विध्वस्तकवचोरुग्गांगजवाजिरथध्वजाम्
हतप्रवीरमापन्नां चमूमिव महाहवे ६

धूमामतएव हेमाभांश्च ध्वराग्नेः समुत्थितां शिखामिव पूर्वं रामस्थितिसमये जाज्वल्यमानरूपतया स्थिताम् पश्चाद्रामवि-
वासनकाले हविरभ्युक्षितां परोहोमीयपदः सिक्तां अतएव विश्लथं गतां शिखामिव स्थितां शिखामिस स्थापवृत्तिः ५

६ राम राम
३८७

२२ शृंगिवेरपुरादिति निर्गमितेति शेषः २३ २४ विध्वस्ता रामवियोगदुःखेन पीडिते सर्वैः निष्प्रकाशा निर्गतशोभा निराकारा २५
इति त्रयोदशोत्तरशततमः सर्गः ११३ उपयानं समीपगमनं तेन १ विडालादिभिश्चरितां तोलसं चारवतीं १ शासमंतालीना

ततो रथमुपजलेन संपूर्णोतिसंतोषिससहयो धवः॥ शृंगिवेरपुरं रम्यं प्रविवेश ससैनिकः॥२२॥ शृंगि
वेरपुरात्सूप अयोध्यां संददर्श ह॥२३॥ अयोध्यामनु तां दृष्ट्वा पित्रा भ्रात्रा विवर्जितां
भरतो दुःखसंतप्तः सारथिं चेदमब्रवीत॥२४॥ सारथे पश्य विध्वस्ता सायोध्या न प्रका
शते निराकारा निरानंदा दीना प्रतिहतस्वना २५॥इत्यार्षे रामायणे अयोध्याकांडे त्र
योदशोत्तरशततमः सर्गः॥११३॥ स्निग्धगंभीरघोषेण स्यंदनेनोपयान् प्रभुः अयोध्यां
भरतः क्षिप्रं प्रविवेश महायशाः १ विडालोलूकचरितामालीननरवारणाम् तिमि
राभ्याहतां कालीमप्रकाशां निशामिव २

नीलीनलग्नानि नराणां वारणानि क वाटानि यस्यां तां तिमिरेणाल

भ्याहतां प्राप्तां अतएव कालीं कृष्णवर्णा सर्वसंबंधिनीं ततएवाप्रकाशां निशामिव स्थितां अयोध्यां प्रविवेशेत्यन्वयः २

च तु

ए०वा० १७० १५ आर्यं श्रेष्ठं मनौरि त्रेत्वयि तिष्ठेदिति यन्न चित्रं अत्र दृष्टान्तं निम्नेतिष्ठेदिति वत् निम्नेतितिष्ठत्सृष्टं तं १६ १७ आमंत्रयि

३८६

एतछ्रुत्वा शुभं वाक्यं भरतस्य महात्मनः भरद्वाजस्तु भरतं मुनिर्वाक्यमुदाहरत् १५ नैतच्चि
त्रं नरव्याघ्र शीलवृत्तविदां वरे यदार्यं त्वयि तिष्ठेत्तु निम्नोत्सृष्टमिवोदकम् १६ अमृतः
स महाबाहुः पिता दशरथस्तव यस्य त्वमीदृशः पुत्रो धर्मात्मा धर्मवत्सलः १७ तमृषिं
तु महाप्राज्ञमुक्तवाक्यं कृताञ्जलिः आमंत्रयितुमारेभे चरणावुपगृह्य च १८ ततः
प्रदक्षिणं कृत्वा भरद्वाजं पुनः पुनः भरतस्तु ययौ श्रीमानयोध्यां सह मंत्रिभिः १९ या
नैश्च शकटैश्चैव हयैर्नागैश्च सा चमूः पुनर्निवृत्ता विस्तीर्णा भरतस्यानुयायिनी २० तत
स्ते यमुनां दिव्यां नदीं तीर्त्वोर्मिमालिनीम् ददृशुस्तां पुनः सर्वे गंगां शिवजलां नदीम् २१

तुमारेभे आमंत्रणं कृतवान् १८ १९ २० भरतमनुसरत् सेनानुयायिनी प्रकारमाह ततस्ते इति यमुनां तीर्त्वा गंगां तत्ते सर्वे गंगां
ददृशुरिति संबंधः शिवजलां शिवं च दर्शनमात्रेण सकलपापहं तत् जलं मधुरजलम् २१ एम३८६

८ परमप्रीतः सत्यपरिपालनविषये इतिशेषः पादुके केयोनिमित्तेममपितुः प्रतिज्ञाचतुर्दशवर्षाणिअरण्येवस्तव्यमितितामेवपितुः प्रतिज्ञां
पालयिष्यामीतिसंबंधः १० एवमुक्तः रामेणेतिशेषः ११ प्रयच्छप्रतिनिधित्वेनेति शेषः अप्राप्तप्राप्तिर्योगः प्राप्तस्यपरिपाल

एवमुक्तः सतुतदाभरद्वाजेनधीमता प्रत्युवाचभरद्वाजंभरतोधर्मवत्सलः ८ सत्याच्यमानो
गुरुणामयाचदृढविक्रमः राघवः परमप्रीतोवशिष्ठंवाक्यमब्रवीत् ९ पितुः प्रतिज्ञोत्ता
मेवपालयिष्यामितत्त्वतः चतुर्दशाहिवर्षाणियाप्रतिज्ञापितुर्मम १० एवमुक्तोमहाप्रा
ज्ञोवसिष्ठः प्रत्युवाचह वाक्यज्ञोवाक्यकुशलोराघवंवचनंमहत् ११ एतेप्रयच्छसं
हृष्टः पादुकेहेमभूषिते अयोध्यायांमहाप्राज्ञयोगक्षेमकरेतव १२ एवमुक्तोवशिष्ठेन
राघवः प्राङ्मुखःस्थितः पादुकेहेमविकृतेममराज्यायतेददौ १३ निवृत्तोहम् मनुज्ञातो
रामेणसुमहात्मना अयोध्यामेवागच्छामिगृहीत्वापादुकेशुभे १४ सीतारामाभ्यानमः

नंक्षेमः हेमविकृते हेम्नाविचित्रितपादुके ममराज्यायममराज्यरक्षार्थंत्वय्यनुग्रहार्थमित्यर्थः १३ १४ १५ १३ १४

रा० वा० प्र०
३८५

मंत्रपूजिताः अमोघ कार्यविचारनैपुण्यपूजिताः २ श्रीजानकीरमणदृष्टयोर्जलक्रीडादिरम्यां मंदाकिनीं श्रीरामनिवासत्वेन
महाप्रभावं चित्रकूटगिरिं च प्रदक्षिणं कुर्वाणाः संतः प्राङ्मुखा ययुः ३ द्रुतगतिविलपना नाधातून् ६ तस्यापि वनि
व तस्य चित्रकूटस्योत्तरपार्श्वेन ययौ ४ यत्र यमुनादक्षिणकूले अत एव चित्रकूटस्यादूरात् अनेन यमुनादक्षिणतटे पि

वशिष्ठो वामदेवश्च जाबालिश्च दृढव्रतः अग्रतः प्रययुः सर्वे मंत्रिणो मंत्रपूजिताः २
मंदाकिनीं नदीं रम्यां प्राङ्मुखास्ते ययुस्तदा प्रदक्षिणं च कुर्वाणाश्चित्रकूटं महा
गिरिम् ३ पश्यन्धातुसहस्राणि रम्याणि विविधानि च प्रययौ तस्य पार्श्वेन ससै
न्यो भरतस्तदा ४ अदूराच्चित्रकूटस्य ददर्श भरतस्तदा आश्रमं यत्र स मुनिर्भरद्वाजः कृ
तालयः ५ स तमाश्रममागम्य भरद्वाजस्य बुद्धिमान् अवतीर्य रथात्पादौ ववंदे रघुनंद
नः ६ ततो हृष्टो भरद्वाजो भरतं वाक्यमब्रवीत् अपि कृत्यं कृतं तात रामेण च समागतः ७

चिह्नं भरद्वाजाश्रम इति ज्ञायते अत एव भरद्वाजामंत्रणोत्तरं ततस्तिर्यमुनोत्तीर्णेति वक्ष्यति संप्रति तत्र स्थिति स्तु रामभरतयोः संवादेरि
ष्य द्वारा कृटिति श्रोतुमिति बोध्यं ५ ६ कृत्यं कर्तव्यं कृतम् अपि प्रश्ने कृतमिवाह रामेणाचेति १ १ १ १ १ १ १ १ १

प्राप्तोसि ते शापकरणायेति शेषः २८ संपरिगृह्य शिरसेति शेषः ३ उत्तमनागमूर्द्धनि उत्तमोपवाह्यगजमस्तके तत्कालाभिषिक्ते राजाधिरोहणाधियेति शेषः सर्वलोकप्रख्यापनार्थमेतत् २९ ३० ३१ इति द्वादशोत्तरशततमः सर्गः ११२

मातरं रक्ष कैकेयीं मा रोषं कुरु तां प्रति मया च सीतया चैव शप्तोसि रघुनंदन इत्युक्त्वा
श्रुपरीताक्षो भ्रातरं विससर्ज ह २८ स पादुके ते भरतः प्रतापवान्स्वलंकृते संपरि
गृह्य धर्मवित् प्रदक्षिणं चैव चकार राघवं चकार चैवोत्तमनागमूर्धनि २९ अथा
नुपूर्व्यात्प्रतिपूज्य तं जनं गुरूंश्च मंत्रीन्प्रकृतीस्तथानुजौ व्यसर्जयद्राघववंशवर्धनः
स्थितः स्वधर्मे हिमवानिवाचलः ३० तं मातरो बाष्पगृहीतकंठ्यो दुःखेन नामंत्रयि
तुं हि शेकुः स त्वेव मातॄनभिवाद्य सर्वा रुदन्कुटीं स्वां प्रविवेश रामः ३१ ॥ इत्यार्षे रामा
यणे अयोध्याकांडे द्वादशोत्तरशततमः सर्गः ॥ ११२ ॥ ततः शिरसि कृत्वा तु पादुके भरत
स्तदा आरुरोह रथं हृष्टः शत्रुघ्नेन समन्वितः १

पूर्वसर्गे लोकत्राणाय गजमस्तके स्थापयित्वा पुनः
सादरं ततस्त्वारोप्य रथमस्तके कृतेत्यर्थः १११ १ १ १

 अत्र रामेण प्रतिभरतकृतं पादुकाशापर्णं वशिष्ठनियोगानंतरं मे वेसबगंतव्यं एते प्रयच्छ संदृष्टः पादुके हेमभूषिते इति

 उपरि भरताज्ञं प्रतिभरतेनानुघमानत्वात् २१ स रामः पादुके ऽधिरुह्य ते तो ऽवरुह्य भरताय प्रायच्छत् २२ २३ २४

अधिरोहार्य पादाभ्यां पादुके हेमभूषिते एते हि सर्वलोकस्य योगक्षेमं विधास्यतः २१
सोऽधिरुह्य नरव्याघ्रः पादुके ह्यवरुह्य च प्रायच्छत्सुमहातेजा भरताय महात्मने २२
स पादुके संप्रणम्य रामं वचनमब्रवीत् ३३ चतुर्दश हि वर्षाणि जटाचीरधरो ह्य
हम् फलमूलाशनो वीर भवेयं रघुनंदन २४ तवागमनमाकांक्षन्वसन्वै नगराद्ब
हिः तव पादुकयोर्न्यस्य राज्यतंत्रं परंतप २५ चतुर्दशे हि संपूर्णे वर्षेऽहनि रघूत्तम न
द्रक्ष्यामि यदि त्वां तु प्रवेक्ष्यामि हुताशनम् २६ तथेति च प्रतिज्ञाय तं परिष्वज्य सादरम्
शत्रुघ्नं च परिष्वज्य वचनं चेदमब्रवीत् २७

राज्यतंत्रं राज्यव्यापारं न्यस्य त्वदुपाधिनि वेद्य २५

चतुर्दशे वर्षे संपूर्णे पंचदशवर्षाद्यदिवसे यदि त्वां न द्रक्ष्यामि तदाग्निं प्रवेक्ष्यामि २६ २७

२ यं बुद्धिर्मद्वनवासविरोधिनी स्त्रीपत्वेनांगीकृतस्थापनविषया आगता जाता सा स्वजात्या भाविकी गरुसेवप्राप्ता यो विनयः शिक्षातज्जन्या च अतो अप्राप्नुत्सह सेनितरां श्लोकोसि १६ क्षमा लैः प्रधानसचिवैर्मे त्रिभिः कारयश्च जयेति शेषः १७ अथमातृणां च या पीडा तानी पराङ्गतिरस्कृते पुत्राह लक्ष्मीरित्यादि पितुः प्रतिज्ञां न लंघयमिति शेषः १८

आगता त्वामियं बुद्धिः स्वजात्यैर्नयिकी च या अप्राप्नुत्सह सेनातरा स्वितं पृथिवीमपि १६
क्षमा लैक्ष्म्यसु दृष्टिश्च बुद्धिमन्दिश्च मे त्रिभिः सर्वकार्याणि सम्यञ्च सुमहान्त्यपि कारय
१७ लक्ष्मीश्च दूदयेषा दृष्टिमवान् प्रीतितोस्त्स्पेत गतीप्यास्ता रावेत् तोलभति स्वाम
हे पितुः १८ कामाद्वा तात लोभाद्वा मात्रा तुभ्यमिदं कृतम् न तन्मनसि कर्तव्यं वर्तितव्यं
च मातृवत् १९ एवं ब्रुवाणं भरतः कौशल्यासुतमब्रवीत् तेजसादित्यसंकाशः प्रतिपच्चे
दुदर्शनम् २०

कामात्त्वद्विषयस्नेहात् लोभात् त्वद्व्याजेन राज्यकरणात् लोभात् तुभ्यमितिषष्ठ्यर्थे चतुर्थी
तव मात्रा यदिदं कृतं तत्त्वानिष्ठमपि मनसि न कर्तव्यं मदानुज्ञयेति शेषः १९ तेजसादित्यसंकाशमित्यनेन परैरप्रध
ष्यत्वं प्रतिपच्चन्द्रदर्शनमित्यनेन सर्वैरपि पूज्यतया दृश्यमानत्वं वर्द्धिष्णुत्वं च द्योत्यते २०

राजधर्मं प्रजापरिपालनरूपं कुलधर्मानुसंततिं ज्येष्ठाभिषेकरूपकुलधर्मस्यानुक्रमणम् इमं प्रेक्ष्य विचार्य मम मातुः कैकेय्याः याच्ञां याचनां कर्तुमर्हसि १० यथाकालं कृतां स्वस्वरक्षां प्राप्तिं दर्शयति रञ्जयितुमिति ११ काक

राजधर्ममिमं प्रेक्ष्य कुलधर्मानुसंततिम् कर्तुमर्हसि काकुत्स्थ मम मातुश्च याचनाम्
१० रक्षितुं सुमहद्राज्यमहमेकस्तु नोत्सहे पौरजानपदांश्चापि रक्तान् रञ्जयितुं तथा ११
ज्ञातयश्च हि योधाश्च मित्राणि सुहृदश्च नः त्वामेव प्रतिकांक्षन्ते पर्जन्यमिव कर्षकाः १२ इ
दं राज्यं महाप्राज्ञ पालय प्रतिपद्य हि शक्तिमानसि काकुत्स्थ लोकस्य परिपालने १३
इत्युक्त्वा न्यपतद्भ्रातुः पादयोर्भरतस्तदा भृशं संप्रार्थयामास राममेवं प्रियंवदः १४ त
मङ्के भ्रातरं कृत्वा रामो वचनमब्रवीत् श्यामं नलिनपत्राक्षं मत्तहंसस्वरः स्वयम् १५

हाय रक्तान् ११ हियत त्वामेव प्रतीक्षन्ते १२ अत इदं राज्यं प्रतिपद्य स्वीकृत्य कस्मिंश्चित्स्यापय पयहि वीक्यात्तेकारेष
यं मदीय इति स्वीकारमाने लोकस्य समस्तस्य पालने शक्तिमानसि १३ एवं उक्तप्रकारम् १४ स्वयमङ्के कृत्वेत्य

संगताः एकमत्यं प्राप्ताः ४ पितरं यद्यवेक्षसे पितुः सुखं यदीच्छसीत्यर्थः ५ सदानृणम् अनृणं कृत समीचीनानुष्ठानेन प्राप्तवतीति

ततस्त्व षिगणाः क्षिप्रं दशग्रीववधैषिणः भरतं राजशार्दूलमित्यूचुः संगता वचः ४
कुलेजात महाप्राज्ञ महावृत्त महायशः ग्राह्यं रामस्य वाक्यं ते पितरं यद्यवेक्षसे ५
सदानृणमिमं रामं वयमिच्छामहे पितुः अनृणत्वाच्च कैकेय्याः स्वर्गं दशरथो गतः
६ एवमुक्त्वानुवचनं गन्धर्वाः समहर्षयः राजर्षयश्चैव तथा सर्वे स्वां स्वां गतिं गताः ७
ह्लादितस्तेन वाक्येन शुभेन शुभदर्शनः रामः संहृष्टवदनस्तानृषीनभ्यपूजयत ८
त्रस्तगात्रस्तु भरतः स वाचा सज्जमानया कृताञ्जलिरिदं वाक्यं राघवं पुनरब्रवीत् ९

अनृणमित्यर्थः अनृणत्वात् तत्प्रतिज्ञापेतिशेषः ६ ७ अभ्यपूजयत् सम्यक् धर्मतो रक्षितवेतरत्तत्त्ववानित्यर्थः ८ त्रस्तगात्र उद्वि
ग्नगात्रः सज्जमानया स्खलन्त्या ९

एवं भरते सर्वमेव कल्याणं राज्यपरिपालनादिरूपं संभावयामीति शेषः ३० ३१ वितीर्णं तमाहितमित्यादिना यो रञ्जनमात्यापि पुनर्भरते प्रत्याह वृत इति तद्वचनं रम्याः कैकेय्या वचनं मया कृतं मोचयानेन मोचय मानेन एवं मदुक्तकरणेन त्वमपि पितरम नृतान्मोचयेति ध्वनिः ३२ इत्येकादशोत्तरशततमः सर्गः भ्रातृभ्यां भ्रात्रोः संगमं प्रेक्ष्य विस्मिता अप्रभूवन्निति शेषः १ अन्त

ज्ञात्वाभिभरतं शान्ते गुरुसत्कारकारिणाम् सर्वमेवात्र कल्याणं सत्यसन्धे महात्मनि ३० अ
नेन धर्मशीलेन वनात्प्रत्यागतः पुनः भ्रात्रा सह भविष्यामि पृथिव्याः पतिरुत्तमः ३१
वृतो राजा हि कैकेय्या मया तद्वचनं कृतम् अनृतान्मोचयानेन पितरं तं महीपतिम् ३२
इत्यार्षे रामायणे अयोध्याकांडे एकादशोत्तरशततमः सर्गः ॥ १११ ॥ तमप्रतिमतेजो
भ्यां भ्रातृभ्यां रोमहर्षणम् विस्मिताः संगमं प्रेक्ष्य समुपेता महर्षयः १ अन्तर्हिता मुनिगणाः सि
द्धाश्च परमर्षयः तौ भ्रातरौ महाभागौ काकुत्स्थौ प्रशशंसिरे २ स धन्यो यस्य पुत्रौ द्वौ धर्म
ज्ञौ धर्मविक्रमौ श्रुत्वा वयं हि संभाषामुभयोः स्पृहयामहे ३

र्हिताः तयोः संगमं द्रष्टुमागताः
अदृश्यरूपा आकाशस्थाः सिद्धादेवजातिविशेषाः परमर्षयो देवर्षयः २ धर्मविक्रमौ धर्मप्राप्तौ वयमुभयोः संभाषां संभाषितं

[illegible] १२२ पं ३

परिषदः सभ्याः २४ नयाचे नयाचितवान् नानुशासामि एवं कुर्वतिनानुशिष्टवान् परमधर्मज्ञं नानुजानामि वनवासायेति शेषः नाभिजानामीति पाठे आर्यं वनवासो युक्तं नज्ञातवानस्मीत्यर्थः २५ अहमेव प्रतिनिधिर्भवेति शेषः २६ तस्य भ्रातुः भरतस्य २७ मन्त्रीवत्तापि विक्रीतं मूल्यं गृहीत्वा दत्तं आहितं आधिरूपेणार्प्यत्तं क्रीतं मूल्यं दत्वा गृहीतं लोपयितुं न शक्यं

अथोत्थाय सजल्लेषु सभ्येषु भरतो वाक्यमब्रवीत् श्रावयेन्तु मे परिषदो मे त्रिरणाः श्रेणयस्त
था २४ न याचे पितरं राज्यं नानुशासामि मातरम् आर्यं परमधर्मज्ञं नानुजाना
मि राघवम् २५ प्रदिष्ठं वा प्रवत्स्यं कर्तव्यं च पितुर्वचः अहमेव निवत्स्यामि चतुर्द
श वने समाः २६ धर्मात्मा तस्य सत्येन भ्रातुर्वाक्येन विस्मितः उवाच नः तं पौर
जानपदं जनम् २७ विक्रीतमाहितं क्रीतं यत्पित्रा जीवता मम न तल्लोपयितुं शक्यं मया
वा भरतेन वा २८ उपाधिर्न मया कार्यो वनवासे जुगुप्सितः युक्तमुक्तं च कैकेय्या पित्रा मे सुकृ

४२ भट्टि

मित्यर्थः २८ उपाधिः प्रतिनिधिः मया शक्तेन जुगुप्सितो निन्दितः प्रतिनिधिर्न कार्य इत्यर्थः हीनकल्पं न सेवेत पुरुषो विभवे सतीति वचनादिति भावः असमर्थो हि कर्ता रि सविहितः उक्तौ कृतौ च युक्तत्वे वर रूप करणापाकरणा पित्रा इह पकरर कत्वाच्च २९

रा०वा०अ०
३०१

मानुशास्थनानुशिषेत्यर्थः १९ काकुत्स्थंरामंप्रतिराघवोभवान्भरतःसम्यग्वदतीतिजानीमः २० एषोपिमहाभागोरामःपितुर्वचसि
तिष्ठतितदपिसम्यगेव अतएनंव्यावर्तयितुंनशक्ताःस्मेत्यन्वयः २१ रामोवचनमब्रवीदितिभरतंप्रतीतिशेषः धर्मचक्षुषांधर्म

आसीनस्त्वेवभरतः पौरजानपदंजनम् उवाचसर्वतःप्रेक्ष्यकिमार्यंनानुशासथ १९ ते
तमूचुर्महात्मानंपौरजानपदाजनाः काकुत्स्थमभिजानीमःसम्यग्वदतिराघवः २०
एषोपिहिमहाभागःपितुर्वचसितिष्ठति अतएवनशक्ताःस्मव्यावर्त्तयितुमंजसा २१
तेषामाज्ञायवचनंरामोवचनमब्रवीत् एवंनिबोधवचनंसुहृदांधर्मचक्षुषाम् २२
एतच्चैवोभयंश्रुत्वासम्यक्संपश्यराघव उत्तिष्ठत्वंमहाबाहोमांचस्पृशतथोदकम् २३

दर्शिनोनिबोधश्रृणु २२ उभयंत्वद्विषयंमद्विषयंचवचनंश्रुत्वासम्यग्विचार्यविचारेणापिकर्तव्यंनिश्चेतुमशक्तश्चेत्संपश्यो
क्तंकुर्विति शेषः तदाहउत्तिष्ठेतिद्विजविप्राविहितंव्रतरूपकंशनप्रायश्चित्तमाह मांचस्पृशतथोदकं उदकस्पर्शमाचमनम् २३

निरालोकः अधोमुखःस्थितानन्नः धनहीनः उत्तमर्णेनरुद्धोदत्वातद्गृहद्वारि धर्मधमर्णो वेतेधकोत्तमर्णो धनहीन इत्यर्थः
यथा प्रोतेन तद्वद्रह्माये यावन्मामनु वचनमेमं कृत्वा प्रतियास्यति तिष्ठयो ध्यामित्यर्थः १४ सतुभरतः राममवेक्षंतं प्रती
क्षमाणं सुमंत्रं प्रेक्ष्य दुर्मनाः सन् कुशोत्तरं कुशास्तरणं स्वयमेवोपस्थाप्य शास्त्रीयभूमावेवास्थितः प्रत्युपवेशन

शनाहारो निरालोको धनहीनो यथा द्विजः शेषे पुरस्ताच्छालायावन्मांप्रतियास्यति १४ सतुराममवेक्षंतं सुमंत्रंप्रेक्ष्यदुर्मनाः कुशोत्तरमुपस्थाप्य भूमावेवास्थितः स्वयम् १५ तमुवाचमहातेजारामोराजर्षिसत्तमः किंमांभरतकुर्वाणंतातप्रत्युपवेक्ष्यसे १६ ब्राह्मणो ह्येकपार्श्वेननरान्रोद्धुमिहार्हति नतुमूर्द्धाभिषिक्तानांविधिःप्रत्युपवेशने १७ उत्तिष्ठनरशार्दूलहित्वैतद्दारुणंव्रतम् पुरवर्यामितःक्षिप्रमयोध्यांयाहिराघव १८

मनुष्ठितवानित्यर्थः १५ किंकुर्वाणं किमन्याय्यं कुर्वाणं १६ ब्राह्मणाः धना
दिनाविपोजितः इति शेषः एकपार्श्वेन एकमार्गशयनेन प्रत्युपवेशनधर्मोपलक्षणमेतत् राज्ञामेतादृशानिर्बं
धो योग्यो नेत्यर्थः १७ तस्मादुत्तिष्ठेति १८

रा०वा०अ० मातापितरौ यदुपकारं तनये कुरुतः ताभ्यां कृतमुपकाररूपं वस्तु यत्तन्न सुप्रतिकरं सुप्रत्युपकारमित्यर्थः
३८
८ तदेवाह यथेति दीपान्नादिप्रदानेन उच्छादनमुद्वर्तनं तैलादिना क्रीडनं एतैर्यत्ताभ्यां कृतं तत्तन्न सुप्रतिकरमित्यन्वयः १० जनयिता उ

एवं मधुरमुक्तः सन् गुरुणा राघवः स्वयम् । प्रत्युवाच समासीनं वसिष्ठं पुरुषर्षभः ॥ ८ ॥
यन्मातापितरौ वृत्तं तनये कुरुतः सदा । न सुप्रतिकरं तत्तु मात्रा पित्रा च यत्कृतम् ॥ ९ ॥
यथाशक्तिप्रदानेन स्वापनोच्छादनेन च । नित्यं च प्रियवादेन तथा संवर्धनेन च ॥ १० ॥
स हि राजा दशरथः पिता जनयिता मम । आज्ञातं यन्मया तस्य न तन्मिथ्या भविष्यति ॥ ११ ॥
एवमुक्तस्तु रामेण भरतः प्रत्यनन्तरम् । उवाच विपुलोरस्कः सूतं परमदुर्मनाः ॥ १२ ॥
इह मे स्थण्डिले शीघ्रं कुशानास्तर सारथे । आर्यं प्रत्युपवेक्ष्यामि यावन्मे न प्रसीदति ॥ १३ ॥

त्पादकः न तु गौणः पिता यदाज्ञापयत् वनवासरूपं यद्वचनं तदाज्ञातः पूर्वं तेन प्रतिज्ञातं नान्यथा चापयिष्यामीति प्रतिज्ञातानां भवदादेशानां पितृवचनस्य च करणमधुनात्वं तत्र उचितमिति भावः ११ प्रत्यनन्तरं समीपवर्तिनं १२ उपवेक्ष्यामि उपवेक्ष्यामीत्यर्थः १३

वे ३८

तस्मात्प्रज्ञादानाद्धेतोराचार्यः गुरुरुच्यते पितुरपि सगतीयानित्यर्थः तदुक्तं मायत्ते वेन श्राचार्यस्त्रिरुच्यो ऽस्य रूप्तांसहिविघा
त स्तं जनयति त च्छ्रेष्ठं जन्म शरीर मेव मातापितरौ जनयतः शरीर्यत्स्व भावं सर्वयोनिसुलभं प्राकृतं सत्यजं शरीरमिति
३ नातिवर्तेनातिवर्तेथाः सद्धतिमंशोन भवतीत्यर्थः ४ परिषदः श्रात्ता तत्समूहाः श्रेणयः पौरजनाः न्यपाः मौउलि

पिता ह्येनं जनयति पुरुषं पुरुषर्षभ प्रज्ञां ददाति चाचार्यस्तस्मात्स गुरुरुच्यते ३ स
तेऽहं पितुराचार्यस्तव चैव परंतप मम त्वं वचनं कुर्वन्नातिवर्तेः सतां गतिम् ४ इमा हि
॥॥ ते परिषदः श्रेणयश्च द्विजास्तथा एषु तात चरन्धर्मं नातिवर्तेः सतां गतिम् ५ वृद्धाया
धर्मशीलाया मातुर्नार्हस्यवर्तितुम् अस्या हि वचनं कुर्वन्नातिवर्तेः सतां गतिम् ६ भरत
स्य वचः कुर्वन्याचमानस्य राघव आत्मानं नातिवर्तेस्त्वं सत्यधर्मपराक्रमः ७ ॥॥

प
श्च

काः एषु रक्षारूपं धर्मं चरन्वर्तित्वा सतां गतिं पूर्वेषां राज्ञां मार्गं नातिवर्तेथा इत्यर्थः ५ मातुः शुश्रूषणे वचनकरणे च अवर्ति
तुं नार्हसि पितुः शातगुणां माता गौरवेणातिरिच्यत इति स्मृतेरिति भावः ६ आत्मानं त्वां प्रति राज्यप्रत्यर्पणापूर्वं प्रतिनिवर्ति
तुं याचमानस्य भरतस्य वचः कुर्वन्नित्यर्थः ७

रा०वा०रा० पूर्वजे विद्यमाने ऽवरः कनिष्ठो नाभिषिच्यते ॥ पितुर्ज्येष्ठ एवाभिषिच्यते ३६ कुलधर्मं कुलक्रमागतं ज्येष्ठाभिषेकधर्मं विहंतुं नासि प्रभूतरा श्लोऽशभूता वीतरदेशां ३७ इति दशाधिकशततमः सर्गः ११० मनुमारभ्य एतावत्पर्यंतं ज्ये

३१७

इक्ष्वाकूणां हि सर्वेषां राजा भवति पूर्वजः ॥ पूर्वजेनावरः पुत्रो ज्येष्ठो राज्ये ऽभिषिच्यते ३६ स राघवाणां कुलधर्ममात्मनः सनातनं ना ॥ नाद्य विहातुमर्हसि ॥ प्रभूतरत्नामनुशाधि मेदिनीं प्रभूतराष्ट्रां पितृवन्महायशाः ॥ ३७ ॥ इत्यार्षे रामायणे वाल्मीकीये अयोध्याकाण्डे दशोत्तरशततमः सर्गः ॥ ११० ॥ वसिष्ठः स तदा राममुक्त्वा राजपुरोहितः ॥ अब्रवीद्धर्मसंयुक्तं पुनरेवापरं वचः १ पुरुषस्येह जातस्य भवन्ति गुरवस्त्रयः ॥ आचार्यश्चैव काकुत्स्थ पिता माता च राघव २

ष्ठेनैव राज्यं परिपाल्यते इति श्रुतेपि तदं नंगीका
रमात्तो व्यापितृवचनादपि गुरोर्मम वचनं गरीयः इति वक्तुमुपक्रमते वसिष्ठ इति राजपुरोहितः राज्ञः पुरोहितं तच्चिंतं प्रतीतिरा

३१७

रघोः पुत्रः प वृद्धादिनामचतुष्टयेन प्रथितः प्रसिद्धः २९ पः शीघ्रगाः त द्वी र्यंव प्रिष्ठ श्रापा द्वृद्दत्स त्वे शाश्वस्य कल्माष

रघोस्तु पुत्रस्तेजस्वी प्रवृद्धः पुरुषादकः कल्माषपादः सौदास इत्येवं प्रथितो भुवि
२९ कल्माषपादपुत्रोऽभूच्छंखणस्त्विति निः श्रुतेपस्तु र दीर्घमाला घमहसेनो
मनीनशात् ३० शीघ्रगास्ततु पुत्रोऽभूच्छुरः श्रीमान्सुदर्शनिः सुदर्शनस्याग्निवर्णः
अग्निवर्णस्य शीघ्रगः ३१ शीघ्रगस्य मरुः पुत्रो मरोः पुत्रः प्रसुश्रुकः प्रसुश्रुकस्य
पुत्रोऽभूदंबरीषो महामतिः ३२ अंबरीषस्य पुत्रोऽभून्नहुषः सत्यविक्रमः नहुषस्य च ना
भागः पुत्रः परमधार्मिकः ३३ अजः पुत्रस्तु व्रतश्चैव नाभागस्य सुतावुभौ अजस्य चैव
धर्मात्मा राजा दशरथः सुतः ३४ तस्माज्ज्येष्ठोऽभिदायादो राम इत्यभिविश्रुतः तद्दुहा
त्मा वकं रज्याम वेद्मास्वजनागन्नप। ३५

पादस्य प्रागममासाद्य मनीनशात् नाशं प्रापितवान् सौदासत्वात्कल्मा
षपादेन स्वपुत्र एव विनाशित इत्यर्थः ३० ३१ ३२ ३३ ३४ दायादः सुतः दायादोऽसुतबोध बौतस्मात्स्वकं राज्यं गहाता ३५

रा०बा०पु० २१ अनुमान्य संपूज्य २२ ततो गृहमागम्य पद्मपत्रसमानाक्षं पुत्रं व्यजायत अजनयत् २३ २४ गर्भश्चानयत् स्वपत्न्यैरिति शेषः
३१८

सतामभ्यवदत् प्रीतो वरेण्यं पुत्रजन्मनि । पुत्रस्ते भविता देवि महात्मा लोकविश्रुतः २१ धा
र्मिकश्च सुभीमश्च वंशकर्त्ता रिपुसूदनः । श्रुत्वा प्रदक्षिणं कृत्वा मुनिं तमनुमान्य च २२
पद्मपत्रसमानाक्षं पद्मगर्भसमप्रभम् । ततः सा गृहमागम्य देवी पुत्रं व्यजायत २३ स
पत्न्या तु गरस्तस्यै दत्तो गर्भजिघांसया । गरेण सह तेनैव जातः स सगरोऽभवत् २४ स
राजा सगरो नाम यः समुद्रमखानयत् । दृष्ट्वा पर्वणि वेगेन त्रासयानं इमाः प्रजाः २५
असमंजस्तु पुत्रोऽभूत् सगरस्येति नः श्रुतम् । जीवन्नेव स पित्रा तु निरस्तः पापकर्मकृत् २६
अंशुमानस्य पुत्रोऽभूदसमंजस्य वीर्यवान् । दिलीपोऽंशुमतः पुत्रो दिलीपस्य भगीरथः २७
भगीरथात् ककुत्स्थश्च काकुत्स्था येन तु स्मृताः । ककुत्स्थस्य तु पुत्रोऽभूद्रघुर्येन तु राघवाः २८

दृष्ट्वा दीक्षितोऽभूत् वा वेगेन खननवेगेन त्रासयानः उद्वेजयन् २५ २६ २७ येन रघुणा राघवपदवाच्याः २८ सीताराम

ध्रुवसंधेः सुसंधेस्स्ववंशतः कथनात् ज्येष्ठस्य राज्यस्याप्रासित्वमुक्तं १४ १५ यस्य प्रतिराजानः ते शत्रवः उदपद्यंत सो ऽभवदित्यन्वयः
१६ तान्हैहयादिचतुर्विधशत्रून् युद्धे स्वसैन्यं प्रतिव्यूह्य वासयित्वापि शत्रुबाहुल्यात् तज्जयो ऽशक्य इति बुद्ध्वा प्रवासितः स

मांधातुस्तु महातेजाः सुसंधिरुदपद्यत सुसंधेरपि पुत्रौ द्वौ ध्रुवसंधिः प्रसेनजित् १४ यशस्वी
ध्रुवसंधेस्तु भरतो रिपुसूदनः भरतात्तु महाबाहोरसितो नाम जायत १५ यस्यैते प्रतिराजान उ
दपद्यंत शत्रवः हैहयास्तालजंघाश्च शूराश्च शशबिंदवः १६ तांस्तु सर्वान्प्रतिव्यूह्य युद्धे।
राजा प्रवासितः स च शैलवरे रम्ये बभूवाभिरतो मुनिः १७ द्वे चास्य भार्ये गर्भिण्यौ बभूव।
तुरिति श्रुतिः तत्र चैका महाभागा भार्गवं देववर्चसम् १८ ववंदे पद्मपत्राक्षी कांक्षि॥
णी पुत्रमुत्तमम् एका गर्भविनाशाय सपत्न्यै गरलं ददौ १९ भार्गवश्च्यवनो नाम हिम
वंतमुपाश्रितः तमृषिं साभ्युपागम्य कालिंदी त्वभ्यवादयत २०

जातप्रवासो बभूव प्राक्तनजयोद्रेको नहिमवद्गिरिं तपसे जगामेत्यन्वयः १७ इतिश्रुतिः प्रसिद्धिः १८ १९ २० २० २०

रा०बा०७० तस्य सा दत्ता त्रिपृत्वात समृद्धा चतुः समुद्रवसना मही दत्ता मनुना पित्रेति शेषः ७ विश्रुतः प्रसिद्धः ८ सतां वरे श्रेष्ठे यस्मिन्ननरण्ये राज्यं कुर्वति कश्चना अवृष्टिर्नवा नाभून्न जातो दुर्भिक्षं वा ९ १० स त्रिशंकुः सत्यवचनात् स्वीयप्रतिज्ञानवत्तोवि

३७६

यस्यायं प्रथमं दत्ता समृद्धा मनुना मही तमिक्ष्वाकुमयोध्यायां राजानं विद्धि पूर्वकम् ७ इ
क्ष्वाकोस्तु सुतः श्रीमान् कुक्षिरित्येव विश्रुतः कुक्षेरथात्मजो वीरो विकुक्षिरुदपद्यत ८
विकुक्षेस्तु महातेजा बाणः पुत्रः प्रतापवान् बाणस्य च महाबाहुरनरण्यो महातपाः ९ य
स्मिन्नवृष्टिर्भूवास्मिन् दुर्भिक्षं सतां वरे अनरण्ये महाराजे तस्करो वापि कश्चन १० अ
नरण्यान्महातेजाः पृथुराजा बभूव ह तस्मात् पृथोर्महातेजास्त्रिशंकुरुपपद्यत ११ स स
त्यवचनाद्वीरः सशरीरो दिवं गतः त्रिशंकोरभवत्सूनुर्धुंधुमारो महायशाः १२ धुंधुमा
रान्महातेजा युवनाश्वो व्यजायत युवनाश्वसुतः श्रीमान् मांधाता समपद्यत १३ ३

श्वामित्रस्य तपःशक्तिज्ञानाच्च १२ धुंधुमारात् युवनाश्व इति त्रिशंकुसुतो युवनाश्वः स्यन्यत्र श्रूयमाणो कस्योत
रविषये यद्यप्युवनाश्व एव महातेजाः प्रभवत्वात् धुंधुमार संज्ञां लभते यद्वान्य त्रिशंकुसुत इत्यपत्यं त्वौत्र

३७७

ननु पयि व्याः सलिलेनिमग्नत्वात्कुदैवत्तान्यमवनिस्या कोऽक्षाप्रामाहइति सनारायणात्ततो ब्रह्मनासारं ध्याद एहोभू
त्वोव सुधां पृथिवीं प्रोज्जहारसलिलादुद्धृतवत् परिस्थापयामास सर्गः स एव नारायणो ब्रह्ममूर्तिः कृतात्मभि
स्तपोलब्धज्ञानप्राप्तिमद्भिः पुत्रैर्दक्षादिभिः सह सर्वं जगदसृजत् सृष्टवान् वक्ष्यमाणोत्तरकांडे सेतिहासपुराणे
पुरा लोकानामाश्रयात्स्वयमेव हि महार्णवे प्रयातो प्रसुमो लं पूर्वमजीजनः पद्मे दिव्ये के से काश्रये नाभ्यामस्याद्य

स वराहस्ततो भूत्वा प्रोज्जहार वसुंधराम् असृजच्च जगत्सर्वं सह पुत्रैः कृतात्मभिः ४ आका
शप्रभवो ब्रह्मा शाश्वतो नित्य अव्ययः तस्मान्मरीचिः संजज्ञे मरीचेः कश्यपः सुतः ५ वि
वस्वान्कश्यपाज्जज्ञे मनुर्वैवस्वतः स्मृतः स तु प्रजापतिः पूर्वमिक्ष्वाकुस्तु मनोः सुतः ६

मामपि प्रजापतिं त्वया कर्म महिति हैनिवेशितमिति ४ एवमनुपोद्घातं कृत्वा प्रकृतमाह आका शप्रभव इत्यादिना
आकाशमेतात्का प्रातेप्रकाशात इत्याकाशः स प्रभो नारायणः प्रभवः कारणं यस्य स ब्रह्मा शाश्वतो द्विपरार्धपर्यंतजन्मा
दिरहितत्वात् शाश्वतः महाप्रलयावधि ध्वंसरहितत्वेन नित्यः तदवध्यपक्षपरहितत्वादव्ययः सदेकरसः अस्मिन्
शाश्वतत्वनित्यत्वाव्ययत्वान्यापेक्षिकाणीत्यर्थः तस्मात्तु ब्रह्मणः ५ तत्र मन्वंतरनामान सीत्स्थित् मनोः देवे इक्ष्वाकुः
६

एवं वशिष्ठमुनिर्भगवतोजाबालिविषयकं कोपं प्रशमयन् स्वाभिमतं ज्योत्पत्तिं वक्तुमादिकारणमारम्भरावज परं परमाह कुद्धमित्यादिना नागतिं परलोकगमनं ततआगमनं च प्रश्नेनजाबालेरास्तिकत्वमुक्तं भवति १ लोकनाथे सनैनं सर्वं प्रवर्त्तते च ध्वनयति २ लोकसमुत्पत्तिमाहसर्वमिति पूर्वाहांते यद् तं सर्वं जगत्सराहादौ सलिलमे

क्रुद्धमाज्ञाय रामं तु वशिष्ठः प्रत्युवाच ह जाबालिरपि जानीते लोकस्यास्य गतागतिम् १
निवर्त्तयितुकामस्तु त्वामेतद्वाक्यमब्रवीत् इमां लोकसमुत्पत्तिं लोकनाथ निबोध मे २
सर्वं सलिलमेवासीत्पृथिवी तत्र निर्मिता ततः समभवद्ब्रह्मा स्वयंभूर्दैवतैः सह ३

वएकार्णवोदकमेवासीत्तदा पृथिव्यादिकं नासीदिति प्रोषः तत्र सलिले पृथिवी निर्मिता नारायणेनेति शेषः ततो नारायणात्स्वयंभूर्ब्रह्मा समभवत् नाभिपद्मादिति शेषः दैवतैः सहेति अग्निर्वाम्भुत्वात्सर्वमाविष्टादि सृष्टमित्याद्यैवत्तान्यथा मवलिष्यः ननु सर्वनाम्नः प्रधानपरामर्शित्वात्कथमिह नारायणपरामर्श इति चे न्नदृश्येतराजमातेगा तस्यैवामातुरंगमाद्यस्यादावप्रधानपरामर्शित्वादृश्येनतस्यैवोत्सर्गिकत्वात् ३ रामन्३१६
त

इति धिक्कृतो जाबालिः स्वाविषयकोपशमनायाह इतीति प्रथमं परमार्थे ३७ तदेवाह नेति किंचनपरलोकादिनास्तीति न
किंतु अस्त्येव काले पारलौकिकव्यवहारकाले काले लौकिकव्यवहारकाले एवं च सर्वमतज्ञेन कालविशेषे
न प्रयावागव्यवहारेऽपि न तस्य नास्तिकत्वं भवतीति भावः ३८ स चापि कालः लौकिकव्यवहारप्रयोजनः तत्प्रयोजकमा

इति वृत्तं वचनं सतो वै एवंमहात्मानमदीनसत्वम् ॥ उवाच पथ्यं पुनरास्तिकं च सत्यं च वंशानु
नयं च विप्रः ॥ ३७ न नास्तिकानां वचनं ब्रवीम्यहं न नास्तिकोऽहं न च नास्ति किंचन ॥ समीक्ष्य
कालं पुनरास्तिकोऽभवं भवेय काले पुनरेव नास्तिकः ॥ ३८ स चापि कालोऽयमुपागतः शनैः
यथा मया नास्तिकवागुदीरिता ॥ निवर्त्तनार्थं तव राम कारणात्प्रसादनार्थं च मयैतदीरित
म् ॥ ३९ ॥ इत्यार्षे रामायणे वाल्मीकीये अयोध्याकाण्डे नवोत्तरशततमः सर्गः ॥ १०९ ॥ सीताराम

हनि वर्त्तनार्थमिति निवर्त्तनरूपं प्रयोजनमुद्दिश्य कारणात्त्वदीयास्तिकत्वाद्युतिप्रापस्य लोकेतिप्रसिद्धिसंपादनरूपका
रणात्नास्तिकवागुक्ता तादृशवाक्यं श्रुत्वा क्रुद्धस्य तव प्रसादनार्थं चैतत्न नास्तिकानामिसाद्युदीरित ३९ इति नवाधि
कशततमः सर्गः १०९

बौद्धादयोपि वैनिशाकरतीयास्तत्राह यथाहीति चोरोयथा निरा कीरतीयः स वेदवाह्यत्वेन प्रसिद्धो बुद्धो बुद्धमतानुसा
रीत थाहि तथैव निराकरणीयः अत्रास्मिंल्लोके नास्तिकं चार्वाकमपि तथागतं विद्धि बुद्धतुल्यं विद्धि तस्मात्प्रजानां
यः शक्यतमः अवैदिकत्वेन परिहर्तुं शक्यः तेन नास्तिकेन बुधः अभिमुखो न स्यात् तत्संभाषणादिकं न कुर्वीत इत्यर्थः ३४

यथा हि चोरस्स तथा हि बुद्धस्तथागतं नास्तिकमत्र विद्धि तस्माद्धि यः शक्यतमः प्रजानां न
नास्तिकेनाभिमुखो बुधः स्यात् ३४ त्वत्तो वराः पूर्वतरे जनाश्च शुभानि कर्माणि बहूनि
चक्रुः जित्वा सदेमं च परं च लोकं तस्मात् द्विजाः स्वस्ति हुतं कृतं च ३५ धर्मे रताः सत्पु
रुषैः समेतास्तेजस्विनो दानगुणप्रधानाः अहिंसका वीतमलाश्च लोके भवन्ति पूज्या मु
नयः प्रधानाः ३६

ऐहिकामुष्मिकफलं तत्साधने धर्मे शिष्टाचारं प्रमाणयति त्वत्त इति त्वत्तः पूर्व
तरे जनाः पराश्च सात्विकाः यः च बहूनि शुभानि कर्माणि चक्रुः ते इमं च परं च लोकं जित्वा तदावर्तन्त इति शेषः सदा वर्त
मानत्वेप्यहं तवादिरूपेण दृश्यमानत्वात् तस्मात् द्विजाः स्वस्ति अग्निहोत्रं सत्यादिकं कृतं तपोदानादि कृतं तेभ्यः पादिकु
र्वन्ति वेदप्रामाण्यादेव ३५ तथा धर्मे रताः निष्ठावन्तो ये प्रधानाः श्रेष्ठाः मुनयो वसिष्ठाद्याः ते पूज्या भवन्ति लोके
नत्वाद्दृशा इत्यर्थः ३६

पराक्रमं चोद्यायसाद्दितपः पतदमानि त्रिदिवस्य पंथानमाहुः संतः ३१ यतस्त्वतेन सद्वचनेनैव विप्रा एवमर्थमेकोदयं
मुख्यंफलं वं तस्य यथावदाज्ञाय प्रत्युत्वा संश्रतिपद्य सुत्यतुकूलं तर्कैर्निर्णीयते धर्मं प्रमत्ताः सावधाना यथावच्चरंतोऽ

सत्यं च धर्मं च पराक्रमं च भूतानुकंपां प्रियवादितां च द्विजातिदेवातिथिपूजनं च पंथान
माहुस्त्रिदिवस्य संतः ३१ तेनैवमाज्ञाय यथावदर्थमेकोदयं संप्रतिपद्य विप्राः धर्मं चरंतः
सकलं यथावत्कांक्षंति लोकागममप्रमत्ताः ३२ निंदाम्यहं कर्म कृतं पितुस्तद्यस्त्वाम
गृह्णाद्विषमस्थबुद्धिं बुध्यानयैवंविधयाचरंतं सुनास्तिकं धर्मपथादपेतम् ३३

तिष्ठतः लोकागमं तत्प्रोक्तपाप्तिं कांक्षंति ३२ यतो निंदामीति यन्नसाध्यन्नपदोक्तया एवंविधया प्रत्यदैकस्
मात्ता वादि चार्वाकमतानुसारिण्याचरंतं लोकनाशकं अतएव नास्तिकत्वादिरूपता युक्तं विषमस्थबुद्धिं
सवेदिकदुर्मार्गप्रतिष्ठितबुद्धिं त्वां यो मे पिता अगृह्णात् पाजकत्वेनांगीकृतवान् तत्पितुः कर्म निंदामि ३३

रा०वा०अ०पु० वनवासमित्यादि श्लोकद्वयमेकं वाक्यं २६ संतुष्टपंचवर्गः मूलादिभिस्तुष्टपंचेंद्रियवर्गः लोकयात्रां पितृवचनपालनरूपव्यवहारं प्रवर्त्तये अव्याहतरूपेणानुवर्त्तयामीत्यर्थः अकुहः अकपटः श्रद्दधानः आस्तिकः २७ शुभकर्मकर्त्तव्यमित्यत्र हेतुमाह अग्निरित्यादि कर्मणां स्वस्वकर्मणां फलभागिनः अग्न्यादिकं कर्मफलत्वेन

३७४

वनवासं वसन्नेवं शुचिर्नियतभोजनः पुण्यैः पुष्पफलैः पुण्यैः पितॄन् देवांश्च तर्पयन् २६ संतुष्टपंचवर्गोहं लोकयात्रां प्रवर्त्तये अकुहः श्रद्दधानः सन् कार्याकार्यविचक्षणः २७ कर्मभूमिमिमां प्राप्य कर्तव्यं कर्म यच्छुभम् अग्निर्वायुश्च सोमश्च कर्मणां फलभागिनः २८ शतं क्रतूनामाहृत्य देवराट् त्रिदिवं गतः तपांस्युग्राणि चास्थाय दिवं याता महर्षयः २९ अमृष्यमाणः पुनरुग्रतेजा निशम्य तं नास्तिकवाक्यहेतुम् अथाब्रवीत्तं नृपतेस्तनूजो विगर्हमाणो वचनानि तस्य ३०

प्राप्नुवंतः अतः तैरपि शुभकर्मैव कर्त्तव्यमिति भावः २८ २९

नास्तिकवाक्यहेतुं नास्ति परो लोक इति वचनोपपादकं यदि भुक्तमिहान्येनेत्यादि युक्तरूपं तर्करूपेति शास्त्रप्रमाणमसहमानः नास्तिकमिति शेषः उग्रतेजा नृपतेस्तनूजस्तस्य वचनानि विगर्हमाणः अथ पुनस्तमब्रवीदिति संबंधः ३०

राम ३७४

१ धृपापसत्यस्य सर्वीर्यतापनत्वमाह भूमिरिति प्रार्थयंति सत्यं वेतमिति शेषः समनुवर्तंते शिष्टाः इति शेषः यदेवं ततः सत्यमे
व भजेत तत्परः २२ यस्माद्वानवधार्य प्रकृतत्वेन निश्चित्य समोक्ष्यति प्रक्रिरेवकरः करतापेवाते वी केव रि देभद्रं राज्यं हिनि
ष्प्रयेन कुरु ष्वेति मिश्रं हि श्रेष्ठमिव स्यात् तदनार्यमन्याय्यमेव स्यात् भवेत् २३ प्रसक्तं परित्यज्य दातिष्ठ प्रोक्तं प्र व ततः कु

भूमिः कीर्तिर्यशो लक्ष्मीः पुरुषं प्रार्थयंति हि सत्यं समनुवर्तंते सत्यमेव भजेत ततः २२ श्रेष्ठं
ह्यनार्यमेव स्यात् यद्भवानवधार्य माम् आह युक्तिकरैर्वाक्यैरिदं भद्रं कुरुष्व ह २३ क
थं ह्यहं प्रतिज्ञाय वनवासमिमं गुरोः भरतस्य करिष्यामि वचो हित्वा गुरोर्वचः २४ स्थि
रप्रज्ञा प्रतिज्ञातां प्रतिज्ञां गुरुसन्निधौ प्रहृष्टमानसा देवी कैकेयी चाभवत्तदा २५

वित्यंतस्योत्तरमभिधाय राज्यत्वे प्रतिगृहीते पिभरतेन प्रसादितस्य तस्योत्तरमाह कथमिति गुरोः पुरत इति शेष २४
कैकेयी चेति एवं च तस्याहर्षदस्य पुनरहर्षत्वमस्यंत मनुचितमिति भावः २५

रा० वा० ११० ३७३

सर्वं सत्ये दृढस्थितौ हेतुमाह ॥ सत्यसंधस्य सत्यप्रतिज्ञाविषयसत्यसहितस्य चलस्य चञ्चलस्वभावस्य सतस्तैर्व विवरणं स्थिरचेतसः ई८ प्रासत्यसतः स्तैर्देवाः पितरो यदि च्छन्ति न गृह्णन्तीतीति नः श्रुतं १८ प्रत्यगात्मनो जीवात्मनि दृश्यप्रत्यक्षं इमं सत्यं सत्यपालनरूपं धर्मं अहं ध्रुवं सर्वधर्मेषु मुख्यं पश्यामि यस्य भारः सत्यपालनरूपः पूर्वैः सत्पुरुषैराचीर्णः आचरितः तदर्थमप्यभिनन्द्यते श्लाघ्यते १९ नन्वयं धर्मो राज्यपालनमेवकिमितिनाभिनन्द्यते तत्राह क्षात्रमिति धर्मसंहितं धर्मयुक्तं

॥ सत्यसंधस्य सततं ... लस्या स्थिरचेतसः । नैव देवा न पितरः प्रतीच्छन्तीति नः श्रुतम् १८ प्र
त्यगात्ममिमं धर्मं सत्यं पश्याम्यहं ध्रुवम् । भारः सत्पुरुषैश्चीर्णस्तदर्थमभिनन्द्यते १९ क्षा
त्रं धर्ममहं त्यक्ष्ये ह्यधर्मं धर्मसंहितम् । क्षुद्रैर्नृशंसैर्लुब्धैश्च सेवितं पापकर्मभिः २० का
येन कुरुते पापं मनसा संप्रधार्य तत् । अनृतं जिह्वया चाह त्रिविधं कर्म पातकम् २१

तिभासमानं वस्तुतोऽधर्मं क्षुद्रादिभिः सेवितं क्षात्रं धर्मं पित्राज्ञाभङ्गेन राज्यकरणरूपं अहं त्यक्ष्ये इत्यर्थः २० ॥ सत्यपापस्य शारीरं साध्यत्वेपि कायिकवाचिकमानसिकसकलपापप्रसक्तिरित्याह कायेनेति ॥ दौमनसा संप्रधार्य विवेकं कर्तुं ध्यात्वेति तत्पापं निश्चित्य ततः अनृतं ॥ धर्मजनकं तत्कर्तव्यत्वेन जिह्वया ततो महापभूते ९९रुपेशु ख्याहत ततः कायेन कुरुते अतः पातकं कर्मक्रियारूपं पापं त्रिविधं कायिकवाचिकमानसिकरूपं त्रिविधपापजनकमित्यर्थः २१

सीक २

एवं नास्तिके वृत्तीश्वरे श्रद्धा धर्मवेद प्रमाणापेक्षायपि दत्तमिष्टाद्दिनादीनि प्रतिपादयन्तो वेदाः सत्यप्रतिष्ठानाः स
त्यादीश्वरे तत्त्वात्मश्रद्धात्स वेदा विभूतीता इति वतु दोषप्रोक्तकलेकराहित्येन तत्प्रतिपादितदानादीनां फलं सेवा
दृष्टं पुनिन च सर्वत्राशामात्रपुष्ट्या रहिताः किन्तु स्वतः प्रमाणभूताएवेति भावः तस्मात्सत्यस्येश्वरवाचकत्वात्सत्ये
नेतद्भेदात्सत्यपालनतत्परो भवेदित्यर्थः १४ वेदोक्तधर्माधर्मफलस्य प्रत्यक्षमनुभूयमानत्वेन तत्र मानात्तप

दत्तमिष्टं हुतं चैव तप्तानि च तपांसि च वेदाः सत्यप्रतिष्ठानास्तस्मात्सत्यपरो भवेत् १४
एकः पालयते लोकमेकः पालयते कुलम् मज्जत्येको हि निरये एकः स्वर्गे महीयते १५
सोहं पितुर्निदेशं तु किमर्थं नानुपालये सत्यप्रतिश्रवः सत्यं सत्येन समयीकृतः १६ नैव लो
भान्न मोहाद्वा न चाज्ञानात्तमोन्वितः सेतुं सत्यस्य भेत्स्यामि गुरोः सत्यप्रतिश्रवः १७

सिद्धमित्याह एक इति लोकराज्यं कुलं स्वकुलं मज्जत्येको निरये नरके स्वर्गेऽपि सुखे अनेन वेदोक्तधर्माधर्मफलानुभवोद
र्शितः १५ सत्यप्रतिश्रवः सत्यसन्धः सत्येन समयीकृतः तद्धि वचनेन देवि राज्ञा यदभिकांक्षितं कस्मिंश्चित्प्रतिज्ञाने चेति प्राप्य
न प्रतिज्ञाकृतवान्सोहं सत्यं पितुर्निदेशं किमर्थं नानुपालये पालयिष्याम्येव १६ लोभाद्राज्यस्य लोभात् मोहादज्ञानस्य विस्मरणा
त् प्रतिज्ञात्यागे दोषस्याज्ञानाद्वा [illegible] कोन प्राप्स्यामीत्यज्ञानात्मकतमसा गुरोः पूर्वं सत्यप्रतिश्रवः प्राप्यपूर्वं कृतप्रतिज्ञः

तस्मात्त्वदुपदिष्टस्य मार्गस्य सर्वलोकनाशकत्वेन शास्त्रीयमार्गविलंघनमेवोचितमित्याह सत्यमिति अनृशंसं भूतानुकंपा प्रधानं सनातनं अनादि शास्त्रसिद्धं राजवृत्तं चं सत्यमेव सत्यव चनमेव च रघुवंश्यो राजा चारित्ररूपम् इति राजवृत्तं सत्यात्मकं तस्मात्ते यो राज्यमपि सत्यात्मकं सत्यप्रधानमित्यर्थः न केवलं राज्यमेवापि तु सर्वो लोकः सत्ये प्रतिष्ठितः १० सत्यमेव हि मेनिरे सत्यलोका

सत्यमेवानृशंसं च राजवृत्तं सनातनम् तस्मात्सत्यात्मकं राज्यं सत्ये लोकः प्रतिष्ठितः १० ऋ षयश्चैव देवाश्च सत्यमेव हि मेनिरे सत्यवादी हि लोकेस्मिन् परमं गच्छति क्षयम् ११ उद्विजन्ते यथा सर्पान्नरादनृतवादिनः धर्मः सत्यपरो लोके मूलं सर्वस्य चोच्यते १२ स त्यमेवेश्वरो लोके सत्ये पद्मा प्रतिष्ठिता सत्यमूलानि सर्वाणि सत्यान्नास्ति परं पदम् १३

सत्यवक्ता लोके परमं क्षयं स्थानमिति शेषः परमं स्थानं ब्रह्मलोकं ११ अनृतवादिनो नरात् तथोद्विजंते जनाः इति शेषः यथा सर्पात् सत्यप रो श्रेष्ठः यस्य सः धर्मः सर्वस्य मूलमुच्यते १२ लोके ईश्वरः नियंता व्यवस्थापक इति यावत् सत्यमेव सत्यपद्मा व्यवस्थिता इति प्रसिद्धं इत्यर्थः पद्मा लक्ष्मीः सत्ये प्रतिष्ठिता सत्यमूलानि सर्वाणि सत्येनेन तस्य जगज्जन्मादि कारणत्वेन लक्षणां मुक्तेः परं पदमित्यनेन प्राप्यत्वमपि तस्यैवोक्तं भवति १३

अधर्ममित्यादि श्लोकद्वयमेकं वाक्यं अयमहं अद्य मं हित्वा अद्य मया धनं वैदिकधर्मस्तु त्यक्त्वा लोकसंकरकारकं क्रियाविधिविवर्जि
तं वैदिकक्रियया वेदविधिना च विवर्जितमिमं त्वदुक्तम् अधर्मं धर्मवेषेण धर्मत्वेनाभिपत्स्ये स्वीकरिष्यामि तदा दुर्वृत्तो लोकदू
षणो परलोकदूषणमार्गावलंबी नैमाचेत्तयानः ज्ञानवान् पुरुषः को लोके बहुमन्येत न कोपीत्यर्थः ॥ ७ ॥ अथाहं हीनप्रति

अधर्मं धर्मवेषेण यदीमं लोकसंकरम् । अभिपत्स्ये शुभं हित्वा क्रियाविधिविवर्जितम् ॥ ६ ॥
कश्चेतयानः पुरुषः कार्याकार्यविचक्षणः । बहुमन्येत मां लोके दुर्वृत्तं लोकदूषणम् ॥ ७ ॥
कस्य दास्याम्यहं वृत्तं केन वा स्वर्गमाप्नुयाम् । अनया वर्तमानोहं वृत्त्या हीनप्रतिज्ञया ॥ ८ ॥
कामवृत्तस्त्वयं लोकः कृत्स्नः समुपवर्तते । यद्वृत्ताः सन्ति राजानस्तद्वृत्ताः सन्ति हि प्रजाः ॥ ९ ॥

ज्ञया चतुर्दशवर्षाविधिवनवासप्रतिज्ञारहितया अनया पत्यस्व दोपतदा तिष्ठ परोपकारं पवृत्तः कुर्विति त्वदुक्तया वृत्त्या व
र्तमानः सन् वृत्तं त्वदुक्ताचरणं कस्य दास्यामि कस्मै उपदेक्ष्यामि केन वा स्वर्गसाधनेन स्वर्गसाधनेन स्वर्गमाप्नुयामित्यन्वयः
॥ तदुक्ताचरणे सर्वजनस्यापि परलोकहानिः स्यादित्याह कामवृत्त इति त्वया उपदिष्टमार्गोऽति अयं नत्वहं अथमतः कामवृ
तो यथेच्छाचारी स्यात्तदनुरूपं कृत्स्नो लोकस्तथा समुपवर्तते समुपवर्तेतेत्यर्थः कुतः यद्वृत्ता इति ॥ ९ ॥

भवान्मेविप्रियकामार्थी प्रियमिलाषतीति तेप्रदत्तवानुक्तवान तत्कार्यसंकाशं कार्यत्वेनप्रतीयमानं अप्रारामाप्रयुक्तत्वात्तपथ्य वद्भासमानं परमार्थतो पथ्यं दुःखोदर्कमकार्यं कर्तुमनर्हमित्यर्थः २ एवं वचनं दूषयित्वात दक्तारं दूषयति निर्मर्याद इति निर्मर्यादः उत्पथवर्तीभिन्नचारित्रदर्शनः वेदविहिताचाराद्भिन्नाचारप्रतिपादकमतप्रवर्त्तकः सत्सु मानं

भवान्मेविप्रियकामार्थं वचनं यदिहोक्तवान् अकार्यं कार्यसंकाशमपथ्यं पथ्यसंमितम्
२ निर्मर्यादस्तु पुरुषः पापाचारसमन्वितः मानं न लभते सत्सु भिन्नचारित्रदर्शनः ३
कुलीनमकुलीनं वा वीरं पुरुषमानिनम् चारित्रमेव व्याख्याति शुचिं वा यदि वाऽशुचिम् ४ अनार्यत्वार्यसंस्थानः शौचाद्धीनस्तथाऽशुचिः लक्षण्यवदलक्षण्यो दुःशीलः शीलवानिव ५

पूजां न लभते ३ सज्जनानां जनस्य रूपं चारित्रेणैव ज्ञायत इत्याह कुलीनमि ति वीरं पुरुषमानिनं अवीरं वा चारित्रं वेदानुमताचारः व्याख्याति ख्यापयति ४ त्वदुक्ताचारव्यवहर्त्ता अनार्यप्यार्य संस्थानः तत्सदृशः शौचाद्धीनोपि शुचिरिव भासमानः अलक्षण्यः लक्षणहीनोपि लक्षण्यवत् लक्षणयुक्तवद्भासमानः दुःशीलोपि शीलवानिव भासमानो भवति ५

९ वं वैदिकं चारमदूष्यं नहि धापकेशास्त्रं दूषयति दानेति यजस्व देहीत्येवं पराव्ये दाद योगे पाः दानसंवननाः दानापवशीकरणोपायाः मेधाविभिः द्रव्यसहराकुशलत्वबुद्धिभिः कृताः प्रतोनते प्रमाणामितिभावः १६ परं रहे हि कास्परंपरलोक प्रपोजनं किंचिद्धर्माद्यिनास्तीति बुद्धिं कुरु परोक्षं स्वनुमानशब्दादिगम्यं पृष्ठतः कुरु त्यज १७ सतां प्रत्यक्षसिद्धं सेवतत्वं बुद्धिं सर्वलो

दानसंवनना ह्येते ग्रंथा मेधाविभिः कृताः॥ यजस्व देहि दीक्षस्व तपस्तप्यस्व संत्यज॥१६॥ स नास्ति परमित्येतत्कुरु बुद्धिं महामते॥ प्रत्यक्षं यत्तदातिष्ठ परोक्षं पृष्ठतः कुरु॥१७॥ सतां बुद्धिं पुरस्कृत्य सर्वलोकनिदर्शिनीं॥ राज्यं त्वं प्रतिगृह्णीष्व भरतेन प्रसादितः॥१८॥ इत्यार्षे रामायणे वाल्मीकीये अयोध्याकांडे ऽष्टोत्तरशततमः सर्गः॥१०८॥ जाबालेस्तु वचः श्रुत्वा रामः सत्यात्मनां वरः उवाच परया सूक्त्या स्वबुद्ध्या चाविपन्नया १ सीता(?)...

कनिदर्शिनीं सर्वजनसंमतां पुरस्कृत्य भरतेन प्रसादितः राज्यं प्रतिगृह्णीष्वेति संबंधः १८ इत्यष्टोत्तरशततमः सर्गः १०८। तदेतत्सर्वं उपपत्तिरामः जाबालेरिति सत्यात्मनां सत्यस्वभावानां वरः श्रेष्ठो ऽविपन्नया धर्मादचलितया स्वबुद्ध्या युक्तः सन् सूक्त्या वेदलक्षणानुवचनावलंबनेनोवाच १

त्या।

१

ग० पु० प्रे०
२१०

सन्नैतिः पत्रत्वे प्रभूते युगेतत्र यंत्रत्रते पुगतो लयंप्राप्तः भूतानां मत्स्यानां एषा वृत्तिः अयमेव भावः त्वं तु मिथ्याभूतेन पितृश्राद्धि सं
धन पीड्यसे इत्यर्थः १२ अर्थधर्मपराः प्रसह्य सौख्यं विहाय केवलाधि धर्मसंपादनपराः तांस्तान् क्रोशसि इतरान् केवलप्रस
सुखानुभवपरान् क्रोशसि नीत्यर्थः तेहि अर्थधर्मपराः इह तत्संपादनविषये दुःखं प्राप्यमेवतात समयं प्राप्य विनाशं प्रा
मेजिरे इति संबंधः १३ नन्वेवं श्राद्धं द्याचारात् संगातिस्तत्राह अथ केति अथ का श्राद्धं पितृदैवत्ये प्रति सांवत्सरिकं इस

गतः सन् पतितस्त्रातस्त्वं पत्रत्वे नवै ११ तिरश्चाम्भूतानां त्वं तु मिथ्या विहन्यसे १२ अर्थध
र्मपराश्चैव तांस्तांश्च क्रोशसे चामितेतरान् तेहि दुःखमिह प्राप्य विनाशं प्राप्य समेजिरे १३ अथ
का पितृदैवत्यमिदं पश्यतो जनः अन्नस्योपद्रवे प्राप्ते तोहि किं करिष्यति १४ यदि
भुक्तमिहान्येन देहमन्यस्य गच्छति दद्याच्छ्रवणतः श्राद्धं न तस्य फलमेव भवेत् १५

विप्रस्तत्र प्रवृत्तो यो यं जनः तस्मा अन्नस्य संभोगस्य धनस्योपद्रवे नाशे करोति परस्पविचारस्तामेव विचार्य युक्तिमाह मत्तो
होति १४ उक्तमेवार्थं तर्कमुखेन दृढयति यदीति भुक्तमिति अन्येन भुक्तमन्यस्य देहं गच्छति यदि तदा श्रवणतः श्राद्धं दद्यात् प
पिण्ड गच्छति मुद्दिश्य पात्रं भोजयेत् तदन्नं पथिकस्य पाथेयं भवेत् न तु तथास्ति १५

श्वासमात्रे पूर्वापरानामिव श्वतोनात्र सज्जनाः सज्जते ६ पित्र्यं राज्यमितिरामाभिप्रायेणोक्तिः कापथं वनमार्गमित्रा लिकसेव्यं मार्गं च दुःखं दुःखप्रदं विषमं योवनानुचितं बहुकंटकं अत्र कोपद्रवसहितं ७ एकवेणीधरत्वं विरहिणीचिह्नतां त्वाला मार्गं च दुःखं दुःखप्रदं ... बीजमात्रं निमित्तकारणमात्रं न तु उपादानं तत्र हि उपादानं किं तत्राह ऋतुम स ८ ९ ३ ऋक्तसेवं धामावमुपसंहरतिनिते इति १० बीजमात्रं निमित्तकारणमात्रं न

एवमेवमनुध्यायतोः पितामातोर्गृहं वसु श्वासमात्रे काकुत्स्थ सञ्जातेनात्र सज्जनाः ६ पित्र्यं राज्यं समुत्सृज्य नाहं सिन्नरोत्तम आस्थातुं कापथं दुःखविषमं बहुकंटकम् ७ समच्छाया मयो ध्यायामात्मानमभिषेचय एकवेणीधरा हित्वा नगरीं संप्रतीक्षते ८ राजभोगाननुभवन्महाहीन्यार्थिवात्मज विहरत्वमयोध्यायां याप्राकृत्रिविष्टपे ९ नतेकश्चिद्दूषणः पः तं च तस्य न कश्चन अन्यो राजात्वमप्यन्यत्तस्मात्कुरु यदुच्यते १० बीजमात्रं पिता जंतोः शुक्लं शोणितमेव च संयुक्तमृतुमन्मात्रां पुरुषस्येह जन्म तत् ११

मात्रेति ऋतुमसामात्राग मे धृतं से युक्तं परस्परमिलितं शुक्लं शोणितं च तदिहलोके पुरुषशरीरस्य जन्म उपादानकारणं भवतीत्यर्थः एवं च शुक्लशोणितयोगादारब्धं पंचभूतसमूह एव पुरुषश्चेतनोऽनतस्य केन चित्संबंध इत्याशयः ११

रा० वा० १४० ३६९

इति सप्तोत्तरशततमः सर्गः भरतं आश्वासयंतं भरताश्वासनं कुर्वंतं रामं धर्मापेतं वैदिकधर्मविरुद्धं १ साधुरस्य युक्तिमदिदं वच उवाचेति पूर्वेणान्वयः २ इदं श्राद्धादिपरिघवेत्यादि प्राकृतस्य पामरस्य नरस्येव निरर्थिका एवं बुद्धिः पितृवचः पालनीयमित्येवं रू

॥ इत्यार्षे रामायणे वाल्मीकीये अयोध्याकांडे सप्तशततमः सर्गः ॥ १०७ ॥ आश्वासयंतं भरतं जाबालिर्ब्राह्म णोत्तमः उवाच रामं धर्मज्ञं धर्मापेतमिदं वचः १ साधु राघव मा भूत्ते बुद्धिरेवं निरर्थिका प्राकृतस्य नरस्येव ह्यार्यबुद्धेस्तपस्विनः २ कः कस्य पुरुषो बंधुः किमाप्यं कस्य केनचित् यदेको जायते जंतुरेक एव विनश्यति ३ तस्मान्माता पिता चेति राम सज्जेत यो नरः उन्मत्त इव स ज्ञेयो नास्ति कश्चिद्धि कस्यचित् ४ यथा ग्रामांतरं गच्छन्नरः कश्चित्क्वचिद्वसेत् उत्सृज्य च तमावासं प्रतिष्ठेतापरेऽहनि ५

पामरस्येव बुद्धेः तपस्विनस्ते माभूत् २ कुतो माभूदित्यत्र पितापुत्रसंबंधस्यैवमिथ्यात्वादित्याह क इति कस्यचित्पुरुषस्य केनचित्संबं धेन किमाप्यं न किमपीत्यर्थः संबंधाभावादिति भावः संबंधाभावे हेतुमाह यदेक इति ३ यः सज्जेत स उन्मत्त इव ज्ञेयः ४ ५

राम ३६९

एवंपितृपरलोकसाधनंप्रतीतादिति[illegible]वृत्तः १४ १५ १६ भरत साम्राज्याधिपत्यमिव त्वमप्यवनाधिपत्यं संपादयति त्वमित्यादि राजरा

एवंराजर्षभः सर्वैर्विहितो राजनंदन तस्मात्त्राहि नरश्रेष्ठ पितरं नरकात्प्रभो १४ अयोध्यां गच्छ भरत प्रकृतीरनुरंजय शत्रुघ्नसहितो वीर सह सर्वैर्द्विजातिभिः १५ प्रवेक्ष्ये दंडकारण्यमहमप्यविलंबयन् आभ्यां तु सहितो राजन्वैदेह्या लक्ष्मणेन च १६ त्वंराजा भव भरत स्वयं नराणां वन्यानामहमपि राजराण्मृगाणाम् गच्छ त्वं पुरवरमद्य संप्रहृष्टः संहृष्टस्त्वहमपि दंडकान्प्रवेक्ष्ये १७ छायां ते दिनकरभाः प्रबाधमानं वर्षत्रं भरत करोतु मूर्द्ध्नि शीताम् एतेषामहमपि काननद्रुमाणां छायां तामतिशयिनीं सुखं श्रयिष्ये १८ शत्रुघ्नः कुशलमतिस्तु ते सहायः सौमित्रिर्मम विदितः प्रधानमित्रम् चत्वारस्तनयवरा वयं नरेंद्रं सत्यस्थं भरत चराम मा विषादम् १९

ट् रंजकः त्रि[illegible]क[illegible]मत्वमित्यर्थः १७ दिनकरभा इति द्वितीया बहुवचने वर्षत्रं छत्रं शीतां छायामित्यन्वयः १८ चराम करवामेत्यर्थः १९

श्र

अप्रतिद्वंद्वः अप्रतिबंधः केनापि निवारयितुमशक्य इत्यर्थः ८ तथेत्येव पितरं निवर्त्तत एव ९ ऋणान्मोचय राजानं त्वाभिषेचनेन
कैकेय्या ऋणाद्राजानं मोचयेत्यर्थः मत्कृते मत्प्रीत्यर्थं अभिनंदय नंदयतु निंदयतेः तस्यार्थस्य श्रैष्ठ्यो को वा उपकार कत्वादिति व्यंग्यं

सोहं वनमिदं प्राप्तो निर्जनं लक्ष्मणान्वितः सीतया चाप्रतिद्वंद्वः सत्यवादे स्थितः पितुः ८ भवानपि तथेत्येव पितरं सत्यवादिनम् कर्त्तुमर्हति राजेंद्रं क्षिप्रमेवाभिषेचनात् ९ ऋणान्मोचय राजानं मत्कृते भरत प्रभुम् पितरं त्राहि धर्मज्ञ मातरं चाभिनंदय १० श्रूयते हि पुरा तात श्रुतिर्गीता यशस्विना गयेन यजमानेन गयेष्वेव पितॄन्प्रति ११ पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः तस्मात्पुत्र इति प्रोक्तः पितॄन्यः पाति वा सुतः १२ एष्टव्या बहवः पुत्रा गुणवंतो बहुश्रुताः तेषां वै समवेतानामपि कश्चिद्गयां व्रजेत् १३

१० श्लोकस्यावशेष कत्वे संमतिमाह श्रूयत इति गयेषु गयाप्रदेशेषु यजमानेन यागं कुर्वता पितॄन्प्रति पितृप्रीतिमुद्दिश्य ११
तां श्रुतिमाह पुन्नाम्न इति सुत्संतरमाह पितॄनिति पितॄन् तद्धितेश्य ते च पूर्त्तादिनास्वर्गलोकं प्राप्य पाति रक्षतीत्यर्थः १२ एष्टव्याः प्राप्तव्याः १३

स

गच्छ पापितस्य सामान्यधर्मे तथा विशेषेण प्रतिज्ञात्मकेन वाधितत्त्वात्तत्परस्पाकरणे राज्ञः इति सा हानिकृतो महानधर्मः स्या
दित्याह पुरेति तत्र वष्ट्याञ्ज निष्ठ्यत्तेत्तसि राज्यं दास्यामीति प्रतिज्ञातवानित्यर्थः ३ ननु स्त्रीषु नर्मविवाहे च वृत्त्यर्थे प्राणसंक
टे गोब्राह्मणार्थे हिंसायां नानृतं स्याज्जुगुप्सितमिति स्मृतिः कौशल्यायां विद्यमानायां कैकेयी विवाहस्य नर्मविवाह

पुरा भ्रातः पिता नः स मातरं ते समुद्वहन् मातामहे समाश्रौषीद्राज्यशुल्कमनुत्तमम् ३ दे
वासुरे च संग्रामे जनन्यै तव पार्थिवः संप्रहृष्टो ददौ राजा वरमाराधितः प्रभुः ४ ततः सा
संप्रतिश्राव्य तव माता यशस्विनी याचत नरश्रेष्ठं द्वौ वरौ वरवर्णिनी ५ तव राज्यं नर
व्याघ्र मम प्रव्राजनं तथा तच्च राजा तथा तस्यै नियुक्तः प्रददौ वरम् ६ तेन पित्राहमप्यत्र नि
युक्तः पुरुषर्षभ चतुर्दश वने वासं वर्षाणि वरदानिकम् ७

त्वात् इति नाहानिर्न दोषापेत्यत आह देवासुरे
चेति एवं उपकारस्य प्रत्युपकाररूपत्वादेतद्दानेन महान् दोष इति भावः वरं वरद्वयं ४ ततो हेतोः संप्रतिश्राव्य प्रतिज्ञां कारयित्वा ५
६ उपवदेउ कास्येवने चतुर्दशवर्षाणि वरदानिकं वरदाननिमित्तकं वासं नियुक्तः तं प्रतिश्रुतिरित्यर्थः ७

ताम्यता म्लायता गमनाय प्रयोध्यां प्रतीति शेषः ३३ तत्स्थैर्यं पितृवचनस्थितिस्थैर्यं समं युगपत् ३४ नैगमयूथवल्लभाः निगमः प्रवेशनं तत्र भवा नैगमाः पौरा इत्यर्थः निगमो निगमः पथे वेदे पुरे पथि वणिक्पथे इति वैजयन्तीति यूथवल्लभाः तत्तद्गणमुख्या वि

तथा हि रामो भरतेन ताम्यता याच्यमानः शिरसा महीपतिः॥ न चैव चक्रे गमनाय सत्त्ववान् मतिं पितुस्तद्वचने प्रतिष्ठितः॥३३॥ तदद्भुतं स्थैर्यमवेक्ष्य राघवे समं जनो हर्षमवाप दुःखितः॥ न यात्ययोध्यामिति दुःखितोऽभवत् स्थिरप्रतिज्ञत्वमवेक्ष्य हर्षितः॥३४॥ तमृत्विजो नैगमयूथवल्लभास्तथा विसंज्ञाश्रुकलाश्च मातरः॥ तथा ब्रुवाणं भरतं प्रतुष्टुवुः प्रणम्य रामं च ययाचिरे सह॥३५॥ इत्यार्षे रामायणेऽयोध्याकांडे षट्शततमः सर्गः॥ १०६॥ पुनरेवं ब्रुवाणं तु भरतं भरताग्रजः प्रत्युवाच ततः श्रीमान् ज्ञातिमध्येऽतिसत्कृतः १ उपपन्नमिदं वाक्यं यत्त्वमेवमभाषथाः जातः पुत्रो दशरथात्कैकेय्यां राजसत्तमात् २

सं ज्ञा विसंज्ञा अश्रुकलाः अश्रुबिन्दवः ३५ इति षडुत्तरशततमः सर्गः रामो राजनियोगपालनमेव परमो धर्मो बहूनां सुखसाधनत्वादित्याशयेनावददित्याह पुनरिति १ इदं ज्येष्ठे भवति तिष्ठति कनीयानहं कथं भूमिं पालयिष्यामीत्युक्तमनु

पालनेनाराज्यपरिपालननिमित्तं तरसा बलेन लोकान् शत्रुलोकान् मरुद्भिरिवास्माभिः सह वासव इन्द्र इव त्वं विजित्य तां पालयेति शेषः
२७ तस्यां गोकरणाय प्रोत्साहयति अरण्यानीत्यादिना जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायत इति स्मृतेः ब्राह्मणपदम्

अभिषिक्तस्त्वमस्माभिरयोध्यापालने व्रज विजित्य तरसा लोकान् मरुद्भिरिव वासवः २७
अरण्ये निवसन् तापान् कुर्वन् दुर्हृदः साधु निर्दहन् सुहृदस्तर्पयन् कामैस्त्वमेवात्रानुशाधि
माम् २८ अयोध्यामुदिताः सन्तु हृदत्तेभिषेचनात् अद्य भीताः पलायन्तां मत्तो दिशो
दश २९ आक्रोशं मम मातुश्च प्रमृज्य पुरुषर्षभ अद्य तत्रभवन्तं च पितरं रक्ष किल्विषात्
३० शिरसा त्वाभियाचेऽहं कुरुष्व करुणां मयि बान्धवेषु च सर्वेषु भूतेष्विव महेश्वरः ३१
अथवा पृष्ठतः कृत्वा वनमेव भवानितः गमिष्यति गमिष्यामि भवता सार्धमप्यहम् ३२

पलायन्तामिति भावः अयोध्यायां स्थित्वेति शेषः २८ २९ आक्रोशं निन्दां तत्रभवन्तं पूज्यं ३० त्वां त्वामभियाचे बान्धवेषु च करु
णां कुर्विति सम्बन्धः ३१ पृष्ठतः कृत्वा तिरस्कृत्य मम प्रार्थनामिति शेषः ३२

 ननु प्राप्तेः २ क्लेशसाध्यधर्म एवांतरंगत्वात्तत्राह अथेति पक्षांतरे २१ श्रेष्ठत्वादपि तदाचरणीयमित्याह चतुर्णामिति सर्वेषामाश्रमाणां गार्हस्थ्यपा
 ल्यत्वादितिभावः २२ श्रुतेन विद्यया बालोऽवरः ऊनमानान्तसंपाद्येन स्थानेन कनिष्ठभ्रातृत्वेन च बालः २३ हीनबुद्धि हस्यपां मुराणः

अथ क्लेशजमेवत्वं धर्मं चरितुमिच्छसि धर्मेण चतुरो वर्णान्पालयन्क्लेशमाप्नुहि २१
चतुर्णामाश्रमाणां हि गार्हस्थ्यं श्रेष्ठमाश्रमम् आहुर्धर्मज्ञ धर्मज्ञास्तं कथं त्यक्तुमर्हसि २२
श्रुतेन बालः स्थानेन जन्मना भवतो ह्यहम् स कथं पालयिष्यामि भूमिं भवति तिष्ठति २३
हीनबुद्धिगुणो बालो हीनः स्थानेन चाप्यहम् भवता च विनाभूतो न वर्तयितुमुत्सहे २४ ३
इदं निखिलमव्यग्रं राज्यं पित्र्यमकंटकम् अनुशाधि स्वधर्मेण धर्मज्ञ सह बांधवैः २५ २
इहैव त्वाभिषिंचंतु सर्वाः प्रकृतयः सह ऋत्विजः सवसिष्ठाश्च मंत्रवन्मंत्रकोविदाः २६

त्वा बुद्धिसद्गुणरहितः हीनस्थानेन चोपलक्षितः अत एव बालः भवता विनाभूतः भोक्तुं वर्तयितुं नोत्सहे किं पुनः राज्यं कर्तुमित्यर्थः
२४ २५ सह संभूय मंत्रविदिति संबोधनम् २६

धीरविगर्हितेपितुः कृतेदुष्कृतेकर्मणिमाअभिपत्ताप्राप्तुंनार्हतीत्यर्थः १६ सर्वमित्त्रातुं इदं सर्वं मदुक्तं भवाननुमन्यतामितिशेषः १७ पितु
र्वनवासस्यगर्हितत्वमाह क्वचेति १८ ननु वानप्रस्थाश्रमः क्षत्रियस्याप्युक्तइत्यत्राह एषहीति एवं च तस्याश्रमो राज्यपरिपा
लनोत्तरं वार्धकेउचितइतिभावः १९ प्रत्यक्षप्रत्यक्षसुखसाधनं धर्मं प्रजापरिपालनरूपमुत्सृज्य संशयस्थमप्रत्यक्षत्वा

तदुपस्थंभवानत्तुमाभवान्दुष्कृतेपितुः ।अभिपत्ताकृतंकर्मलोकेधीरविगर्हितम् १६
कैकेयींमांचतातंचसुहृदोबांधवांश्चनः पौरजानपदान्सर्वांन्त्रातुंसर्वमिदंभवान् १७
क्वचारण्यंक्वचक्षात्रंक्वजटाःक्वचपालनम् ईदृशंव्याहतंकर्मनभवान्कर्तुमर्हति १८
एषहिप्रथमोधर्मःक्षत्रियस्याभिषेचनम् येनशक्यंमहाप्राज्ञप्रजानांपरिपालनम्
१९ कश्चप्रत्यक्षमुत्सृज्यसंशयस्थमलक्षणाम् ।आयतिस्थंचरेद्धर्मंक्षत्रबंधुरनिश्चि
तः २०

त् अलक्षणां अशुभलक्षणां आयतिस्थं उत्तरकालःप्राप्यं अनिश्चितं क्षत्रियेणाप्राप्यमिदमेवानुष्ठेयमिति केनापि
प्रमाणेनानिश्चितं धर्मं क्षत्रबंधुः क्षत्राणां बंधुः क्षत्रियकुलेत्पन्नः कश्चरेत् न कोपीत्यर्थः २० २० २० २० २०

रा०वा०१९० ३६४

मातृवत्पितापि न्याय्यकारीत्याह गुरुरिति क्रियावान् यज्ञादिक्रियावान् प्रेतः सन् दैवतं संसदि ११ एवं गुरुत्वादिहेतुभिः पूज्यं पितरं न परिगर्हेत यद्यपि वस्तुतो गर्ह्य एवेत्याह को हीति को हि धर्मवित् धर्मार्थयोः धर्मार्थाभ्यां हीनं कामवशात् वानमिति यावत् १२ अंतकाले मतिकाले मुह्यंतीति विपरीतबुद्धिं प्राप्नुवंतीति पुराश्रुतिः पुरातनी गाथा प्रत्यक्षा सत्या १३ क्रोधात्

गुरुः क्रियावान्वृद्धश्च राजा प्रेतः पितेति च तातं न परिगर्हेथा दैवतं चेति संसदि ११ को हि धर्मार्थयोर्हीनमीदृशं कर्म किल्बिषम् स्त्रियाः प्रियचिकीर्षुः सन् कुर्याद्धर्मज्ञ धर्मवित् १२ अन्तकाले हि भूतानि मुह्यन्तीति पुराश्रुतिः राज्ञैवं कुर्वता लोके प्रत्यक्षा सा श्रुतिः कृता १३ साध्वर्थमभिसंधाय क्रोधान्मोहाच्च साहसात् तातस्य यदतिक्रान्तं प्रत्याहरतु तद्भवान् १४ पितुर्हि समतिक्रान्तं पुत्रो यः साधु मन्यते तदपत्यं मतं लोके विपरीतमतोऽन्यथा १५

विषमदृष्टेर्वा यद्वा साध्वीं सुतां कैकेयीं क्रोधात् मोहात् कैकेयीविषयात् साहसात् अविमृश्यकारित्वात् तातस्य यदतिक्रांतं पद्धर्मातिक्रमणं तत्साध्वर्थमभिसंधाय समीचीनार्थमनुसंधाय भवान् प्रत्याहरतु निवर्त्तयतु १४ तदेवोपपादयति पितुर्हीति अतिक्रांतमतिक्रमस्तत् साधु मन्यते विपरीताचरणं न साधु प्रत्यात् पातं पादयति तदपत्यं मतं पितुरपतनहेतुत्वात् १५ रामं ३६४

प्रभावाभवकोविदं भूतानामुत्पत्तिविनाशज्ञं त्वां दुःखमासादयितुमभिभवितुं नार्हति ७ एवं च त्वामेवं विधं दुःखेय यपित पीडयति ति
पापिमा दुष्टापि पीडयत्येवेति त्वस्योभवमा प्रोक्त इसस्योत्तरमेतत्सर्वं तम् ७ मांकारणात्मदुः त्यनिमित्ततः सेनिष्ठं मवसंमतमेव

न त्वामेवं गुरौ युक्तं प्रभवाभवकोविदम् अविषह्यतमं दुःखमासादयितुमर्हति ७ प्रोषिते
मयि यत्पापं मात्रा मत्कारणात्कृतम् क्षुद्रयातदनिष्टं मे प्रसीदतु भवान्मम ८ धर्मवं
धेनबद्धोस्मि तेनेमां नेह मातरम् हन्मि तीव्रेण दंडेन दंडार्हां पापकारिणीम् ९ कथं द
शरथाज्जातः शुद्धाभिजनकर्मणः जानन्धर्ममधर्मिष्ठं कुर्यां कर्म जुगुप्सितम् १०

अतो भवान्प्रसीदतु मदनेन राज्यपरिग्रहेणतिति यावत् ८ धर्मबंधेन धर्मरूपेणाबंधनेन इह ईदृशापराधविषये स्त्रीसं
बंधितर्याभिरागत्तवदे विणी अत एवं दंडार्हां ९ अधर्मिष्ठं कर्म अधर्मप्रचुरत्वाद्यापहरणरूपमिस्यर्थः जुगुप्सितं लोकग
र्हितम् १०

रा० वा० अ०
३६४

बहूनां संमतोपि धर्मविषये रामवदेवावर्तितव्यमिति इष्टोन्मूलोपि लोकमर्यादामनुसरन्तान च ज्ञानसंशयापन्नः धर्मान्यप
कृसि एवं च सर्वं ज्ञात्वा दाशकाम ... चलन दुःखमिति भावः ३ यथा मनस्तस्य जीवन् स्वस्य यथा जीवसि यामस्त इति वाक्या
ग्राह्य आर्षि को वो ध्यः यथाम त स्रक्त देहग्रामादेहव आदिमिरसंबद्ध स्य जीवन्नपि तैरसंबद्धः नित्य शुद्ध चिद्सुखचिदात्मनो
ऽनित्या शुचि दुःखजेन देहेनत्त दीये श्वासे वेधात यथा च जीवन् स्वकर्मानुरूपं संसरतीति याम तोपि स्वकर्मानुरूपे परत्रसं

न त्वां पश्याम्यहं दुःखं प्रीतिर्जनिष्यते संमतश्चापि बहूनां तेनोपचक्रमितं प्रयान् ३
यथा मनस्तस्य जीवेन्न यामतितयामति यस्यैष बुद्धिर्लोभस्स्यात्परितप्येत केन सः ४ प
रं वरं ज्ञो पश्यस्या याचा त्वमनुज्ञाधिप स एवमुक्तस्तेनाप्यन विषीदितुमर्हति ५ श्रम
होपमसत्त्वस्त्वं महात्मा सत्यसंगरः सर्वज्ञः सर्वदर्शी च बुद्धिमांश्चासि राघव ६ ६ ६ ६

सरति किंच यथाऽसति प्रविद्यमानो रागो न जायते तथा सति विद्यमानेपि रागो न युक्तः यथा वा सति साध्वी दृष्यो न युक्तस्तथा
ऽसति ग्र सा धावपि दृष्टो न युक्तः यस्य राघ उक्ता पविषयको बुद्धिर्लोभः स्यात् स महात्मा केन परितप्येत न केनापि हे तुने त्यर्थः
४ परावरज्ञः स प्रपंचात्मतत्त्वज्ञः विषीदितुमित्यार्थे विषीतुमित्यर्थः ५ श्रमरईश्वरः सत्यप्रतिज्ञः सत्त्वोपाधित्त हृत शुद्धसत्त्वश्चा
न स्त्वं प्रग्रो यमश्राव्द प्रयोगो लो कश्लाघायाऽईश्वरत्वमेवेत्यर्थः सर्वज्ञः सर्वविषयकचिच्छक्तिमान् सर्वदर्शी सर्वसाक्षी

राम ३६४

गते ह्लिलिते गृध्रे रामेति वदति रामविहगे ... कुर्वन्नाह

प्राप्तवनसापात्या न्याप्यत्वेहेतुः सदामान्य इत्यादि ४२ कर्मणातद्रुचित व्यापारेण ४३ ४४ नःपितुर्वृत्तेप्रभेनिशाम्यपश्चीलोच्यतेन सउत्तमांगतिं
गत इति त्वात्वमात्मानंस्वभावेनधार्मिकत्वादिलक्षणेनानुतिष्ठ योजयेत्यर्थः ४५ यवीयसंयवीयांसम ४६ इतिपंचाधि

नमयाशासनंतस्यत्यक्तुंन्याय्यमरिंदम सत्वयापिसदामान्यःसवैबंधुःसनःपिता ४२ तद्वचः पि
तुरेवाहंसंमतंधर्मचारिणाम कर्मणापालयिष्यामिवनवासेनराघव ४३ धार्मिकेणा
नृशंसेननरेणगुरुवर्तिना भवितव्यंनरव्याघ्रपरलोकंजिगीषता ४४ आत्मानमनुतिष्ठ
त्वंस्वभावेननरर्षभ निशाम्यतुशुभंवृत्तंपितुर्दशरथस्यनः॥४५॥इत्येवमुक्त्वावचनंम
हात्मापितुर्निदेशप्रतिपालनार्थं यवीयसंभ्रातरमर्थवच्चप्रभुर्मुहूर्ताद्विरराममरामः॥४६॥ इ
त्यार्षेरामायणेऽयोध्याकांडेपंचशततमसर्गः॥ १०५॥ एवमुक्त्वातुविरतेरामेवचनमर्थवत्
ततोमंदाकिनीतीरेरामंप्रकृतिवत्सलम १ उवाचभरतश्चित्रंधार्मिकोधार्मिकंवचः कोहि
स्यादीदृशोलोकेयादृशस्त्वमरिंदम २

कशततमःसर्गः १०५ ग्रथभरतःस्वत्रधर्मीवद्धेनेनरामस्यावृत्तिंशापयतेएवमि
ति १ चित्रंउक्तिविशेषोपपन्नत्वाद्विस्मयजनकम यादृशोयादृशात्माहात्म्यवान २

रा०वा०प्र० उपसंहरति न स इति संतां सत्कृतः सद्भिः पूज्यमानः ३६ ब्रह्मलोकविहारिणीं तल्लोकविहारार्हां दैवीमृद्धिं देवसंबंधिसंपदं ३७ अ
३६३ नवानधीतात्मविद्यः ब्रह्मलोकं प्राप्स्यामि इति शोकोऽनुचित इति भावः ३८ बहुविधाद् प्रारब्धमरणमहिवासनादिविषयभेदेन

न स शोच्यः पितस्तात स्वर्गतः सत्कृतः सताम् ३६ स जीर्णामिमान्तु संदेहं परित्यज्य पितामहि । दैवीमृद्धिमनु
प्राप्तो ब्रह्मलोकविहारिणीम् ३७ तेनैवंविधः कश्चित्सोऽनुशोचितुमर्हति त्वद्विधो महि
धप्रज्ञा पिस्मृतवान्बुद्धिमान्नरः ३८ एते बहुविधाः शोका विलापरुदितास्तथा वर्जनीया
हि धीरेण सर्वावस्थासु धीमता ३९ स स्वस्थो भव माशोको यात्वा चावस तां पुरीं तथापित्वानि
युक्तोसि विप्रेणावदतां वर ४० यत्राहमपि तेनैव नियुक्तः पापकर्मणा तत्रैवाहं करिष्या
मि पितुरार्यस्य शासनम् ४१

बहुप्रकाराः शोकोन्मानसः विलापरुदितेत्येतत्कार्ये ३९ स्वस्थः शोकरहितः माशोकः त्वां
परिभवत्विति शेषः यात्वा गत्वा तां पुरीमयोध्यामावस त्वं अधितिष्ठ कुत एवं चिन्नियोगस्तत्राह तथेति विप्रेणा सत्यवक्रावत्ता
४० यत्र यस्मिन्कृत्ये तत्रैव प्रावृतः सन्निति शेषः ४१

 ३ उपसंहरति नसइति सं तां सत्कृतः सद्भिः पूज्यमानः ३६ ब्रह्मलोकविहारिणीं ब्रह्मलोकविहारार्हां दैवीमृद्धिं देवसंबंधि संपदं ३७ श्रु

 तवान धीतात्मविद्यः ब्रह्मलोकं प्राप्तस्यास्य ते शोको ऽनुचित इति भावः ३८ बहुविधा दप्रारब्धमरणमहिवातत्तादिविषयभेदेन

ता

न सशोच्यः पिता तात स्वर्गतः सत्कृतः सताम् ३६ स जीर्णं मानुषं देहं परित्यज्य पिता हि नः दैवीमृद्धिमनु
प्राप्तो ब्रह्मलोकविहारिणीम् ३७ तं तु नैवंविधः कश्चित्प्राज्ञः शोचितुमर्हति त्वद्विधो मद्वि
धश्चापि श्रुतवान्बुद्धिमत्तरः ३८ एते बहुविधाः शोका विलापरुदिते तथा वर्जनीया
हि धीरेण सर्वावस्थासु धीमता ३९ स स्वस्थो भव मा शोको यात्वा चावस तां पुरीं तथा पित्रा नि
युक्तोसि वशिना वदतां वर ४० यत्राहमपि तेनैव नियुक्तः पुण्यकर्मणा तत्रैवाहं करिष्या
मि पितुरार्यस्य शासनम् ४१

बहुप्रकाराः शोको मानसः विलापरुदिते तत्कार्ये ३९ स्वस्थः शोकरहितः मा शोकः त्वा
परिभवत्विति शेषः यात्वा गत्वा तां पुरीमयोध्यामावस तत्र अधितिष्ठ कुत एवं चेन्नियोगस्तत्राह तथेति वशिना सत्यवशावर्तिना
४० यत्र यस्मिन्देशे तत्रैव प्राप्ततः सन्निति शेषः ४१

उक्तार्थान्तो कस्थितेः प्रकृतोपयोगमाह एवमिति एवं पूर्वैराद्यैरन्यैर्गतिः प्राप्तः मार्गः पितृपैतामहः पितृपितामहसेवधी ध्रुवः
पुत्रादिभिरप्युपगंतव्यत्वेन निश्चितः प्रस्थमागमिष्यति क्रमोत्वे घनेनास्तियमापन्नः स्वयमपि ते प्राप्तः पित्रादीन् कथं
शोचेत ३० उक्तमर्थमुपसंहरति पयस इति पयस इति सप्तम्यर्थे षष्ठी वा प्राव्द्रस्वार्थे ग्रनिवर्तिनि स्रोतसीव वयस्ति प्रा

एवं पूर्वैर्गतो मार्गः पितृपैतामहो ध्रुवम् तमापन्नः कथं शोचेद्यस्य नास्ति व्यतिक्रमः ३० पयसः
पतमानस्य स्रोतसो वानिवर्तिनः आत्मा मास्त्वविनियोक्तव्यः सुखभाजः प्रजाः स्मृताः ३१ धर्मात्मा
स तु भैः सर्वैः क्रतुभिश्चाप्तदक्षिणैः स्वर्गद्वारं यथाप्राप्तः पिता नः पृथिवीपतिः ३२ भृत्यानां
भरणात्सम्यक्प्रजानां परिपालनात् अर्थदानाच्च धर्मेण पिता नस्त्रिदिवं गतः ३३ कर्मभिः
सुप्रभैरिष्टैः क्रतुभिश्चाप्तदक्षिणैः स्वर्गद्वारं यथाप्राप्तः पिता नः पृथिवीपतिः ३४ इष्टा व
हुविधैर्यज्ञैर्भोगांश्चावाप्य पुष्कलान् उत्तमं चापुरासाद्य स्वर्यातः पृथिवीपतिः ३५

पुषि पतमानेनागच्छतीति सतिः आत्मा मास्त्वविनतसाधने धर्मे नियोक्तव्यः कुतः यतः प्रजाः सुखभाजः स्मृतां धर्मेसाध्येसुखे सक्ताइ
त्यर्थः ३१ महाराजेश्वतितु नशोकत्वे प्रोपि कार्यइत्याशयेनाह धर्मात्मेत्यादिना ३२ ३३ ३४ उत्तमं पापप्रसंगरहितम् ३५

ग०वा०अ० नवंनवमिवतस्ततः प्रागप्राप्तमिव ऋतुमुखं ऋतुप्रारंभं दृष्ट्वा हृष्यंति नजानंति ऋतूनां परिवर्त्तेन पुनः पुनः प्राप्त्या प्राणिनां प्राणानां प्रक्षती
३६२ स्यच्चयः २५ क्लिष्टानां विश्लेषस्यावश्यंभावित्वात्सोपि न शोचनीयः इत्यभिप्रायेणाह यथा काष्ठमिति श्लोकद्वयेन काष्ठं काष्ठं पोतद्वयं
२६ विनाभवो वियोगः २७ अत्रास्मिन्लोके कश्चिदपि प्राणी यथाभावेन सममभिवर्त्तते यथाभिलावं ध्रुमिः सह न प्रवर्त्तते विप्रयुज्य

हृष्यंत्यृतुमुदं(खं) दृष्ट्वा नवंनवमिवागतम् ऋतूनां परिवर्त्तेन प्राणिनां प्राणसंक्षयः २५ यथा का
ष्ठं च काष्ठं च समेयातां महार्णवे समेत्य च व्यपेयातां कालमासाद्य कंचन २६ एवं भार्या
श्च पुत्राश्च ज्ञातयश्च वसूनि च समेत्य व्यवधावंति ध्रुवो ह्येषां विनाभवः २७ नात्र कश्चि
द्यथाभावेः प्राणी समभिवर्त्तते न तस्मिन्न सामर्थ्यं प्रेतस्यास्त्यनुशोचतः २८ यथा हि सा
र्थं गच्छंतं ब्रूयात्कश्चित्पथि स्थितः अहमप्यागमिष्यामि पृष्ठतो भवतामिति २९

तएव नैव तेन कारणेन प्रेतस्य मृतस्य हेतोरनुशोचतः शुचस्तस्मिन्नविश्योगे मरण निवारणे नैव सामर्थ्यं पारहार्यं शक्तिः
नास्तीति संबंधः २८ पूर्वं गतिसमानगतित्वे दृष्टांतः पथीति पुरतो गच्छंतं सार्थं पथि स्थितः पथिकः १२९ २९ २० राम ३६२

गच्छंतीति प्रत्येकं प्रथमा बहुवचनं महोरात्राविशेषणं प्राणिनां क्षपयंत्याशु ग्रीष्मे जलमिवांशवो रविकिरणाः २० यदेवमतस्त्वमात्मानमनुशोचस्व त्वं वीरः ग्राप्ता
ति कामेगातिरिहामुत्रेति चिंतय स्वयंप्रजानं किमन्यमनुशोचसि आयुस्तु यस्य कस्यापि हीयते तदुक्तार्थः २२ किं हि कृत्वासह व्रजति सहति
षीदति सह गत्वा सह निवर्तते गात्रेषु वलयः एवं मृत्युरूपाख्या दत्तोऽपरिहार्यः संस्तिभावः २२ किं हि कृत्वा प्रभावयेत् कं पापं मु

महोरात्राणि गच्छंति सर्वेषां प्राणिनामिह ॥ आयूंषि क्षपयंत्याशु ग्रीष्मे जलमिवांशवः २०
आत्मानमनुशोच त्वं किमन्यमनुशोचसि ॥ आयुस्ते हीयते यस्य स्थितस्य च गतस्य च २१
सहैव मृत्युर्व्रजति सह मृत्युर्निषीदति ॥ गत्वा सदीर्घमध्वानं सह मृत्युर्निवर्तते २२ गात्रे
षु वलयः प्राप्ताः श्वेताश्चैव शिरोरुहाः ॥ जरयापरघोजीर्णः किं हि कृत्वा प्रभावयेत् २३ नंदं
त्युदित आदित्ये नंदंत्यस्तमिते पि च ॥ आत्मनो नावबुध्यंते मनुष्या जीवितक्षयम् २४

कृत्वा एतत्सर्वपरिहारे समर्थो भवेदित्यर्थः २३ आयुःक्षयकरादित्योदयादिनिष्कसाधने ष्वसाधनत्वबुद्धिं कुर्व
तीति मूढा नंदंत्या उदित इत्याह नंदंतीति आत्मनो जीवनक्षयमागतमिति बुद्ध्येति प्रोषः अस्तमिते नंदंतिकामोपभोगात् इति
जीवितस्यैवनावबुध्यंते जीवितकालक्षयं लोकहितं कर्म नेच्छंतीत्यर्थः २५ कालो
तो
यमाग

आश्वासनप्रकारमाह नात्मन इति आत्मनो जीवस्य कामकारः स्वेच्छया व्यापारो नास्ति यतोऽयं पुरुषोऽनीश्वरः ई-
श्वरवात्स्या तेन प्रहितः तस्मादेनमितश्चास्माद्देहाच्चलोकाच्च इतरतः परस्माद्देहाच्चलोकाच्च कृतान्तः कालो नियामि
रूपः कर्मानुरूपं कर्षति एवं च मम वनवासेन राज्ञो नापि केऽप्यकारणं किं तु देववशात्तामदृष्टमित्यान्तरो भावः १४

नात्मनः कामकारोऽस्ति पुरुषोऽयमनीश्वरः इतश्चेतरतश्चैनं कृतान्तः परिकर्षति १५
सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः संयोगा विप्रयोगान्ता मरणान्तं च जीवितम्
१६ यथा फलानां पक्वानां नान्यत्र पतनाद्भयम् एवं नरस्य जातस्य नान्यत्र मरणाद्भ-
यम् १७ यथागारं दृढस्थूणं जीर्णं भूत्वावसीदति तथावसीदन्ति नरा जरामृत्युवशं ग-
ताः १८ अत्येति रजनी या तु सा न प्रतिनिवर्तते यात्येव यमुना पूर्णा समुद्रमुदकार्णवम् १९

अपरिहरणीयवस्तुस्वभावप्रदर्शनेन च नाशे शोकावसरो नास्तीत्याह सर्व इति निचयाः वस्तुसमूहाः समुच्छ्रयाः विद्यादि समु-
न्नतिस्तेषां नानृत्वरत्वेन निश्चिते कः शोक इति भावः १६ यथा फलानां पतनम शक्य परिहारं एवं मरणमपि तथा ते
स्मान्न्यायमनशोच्यमित्यर्थः १७ तदेव दृष्टान्तान्तरेणोपपादयति यथेति १८ अत्येतीत्यत्र जन्मप्रतिनिवृत्तौ दृष्टान्तो यमुनाप्रा-
णम ३६१

यथा पुष्पितो भूत्वा यदा फलानि न दर्शयति तदा सः तदारोपकः पुमान् यस्य फलस्य हेतोः स द्रुमः प्रभावितः उत्पादितः सतां फल
विषयां प्रीतिं नानुभवेत् ९ एषोपमा त्वयि भवति यत्र रक्षणकाले वृषभः श्रेष्ठस्त्वं भर्ता पालनसमर्थोऽस्मान् भृत्यान्न

स यदा पुष्पितो भूत्वा फलानि न विदर्शयेत् स तां नानुभवेत्प्रीतिं यस्य हेतोः प्ररोपितः ९ ए
षोपमा महाबाहो तदर्थं वेत्तुमर्हसि यत्र त्वमस्मान् वृषभो भर्ता भृत्यान्न शाधि हि १०
श्रेणयस्त्वां महाराज पश्यन्त्वग्र्याश्च सर्वशः प्रतपन्तमिवादित्यं राज्ये स्थितमरिंदमम् ११
तवानुयाने काकुत्स्थ मत्ता नर्दन्तु कुञ्जराः अन्तःपुरचरा नार्यो नन्दन्तु सुसमाहिताः १२
तस्य साध्वनुमन्यन्त नागरा विविधा जनाः भरतस्य वचः श्रुत्वा रामं प्रत्यनुयाचतः १३ त
मेवं दुःखितं प्रेक्ष्य विलपन्तं यशस्विनम् रामः कृतात्मा भरतं समाश्वासयदात्मवान् १४

शाधि न शिक्षयसि अतस्तद् दर्शितस्या उपमाया अर्थं राजप्रयासानर्थक्यरूपं वेत्तुमर्हसि १० श्रेणयो नानाजातीयसंघाः अ
ग्र्याः प्रधानाः ११ १२ रामं प्रत्यनुयाचतस्तस्य वचः श्रुत्वा विविधा नागरा जनाः साध्विति अनुमन्यन्त अन्वमन्यन्तेत्यर्थः १३
कृतात्मा सुशिक्षितबुद्धिः आत्मवान् धीरः १४

रा०वा०टी० जलागमे वर्षाकाले महतांबुवेगेन भिन्नः सेतुरिवेदं महदयोध्यादेशीयं राज्यखंडं भरतत्वं आवृण्व राज्यं त्वदन्येन दुरावारं आ
३६० वरितुमशक्यं ५ ननु त्वया वीरेण सुरक्ष्यमेतत्तत्राह गतिमिति खर इवाश्वगतिमनुगंतुं खरो यथा न शक्तः तार्क्ष्यगतिमनुगम
नेयथेतरपक्षिणो अशक्तास्तथाहं तव गतिं त्वदीयां राज्यपालनप्रकारमनुगंतुं मे न शक्तिः इवशब्दो यथार्थे ६ यः परैर्नि

महते वांबुवेगेन भिन्नः सेतुर्जलागमे दुरावारं त्वदन्येन राज्यखंडमिदं महत् ५ गतिं
खर इवाश्वस्य तार्क्ष्यस्येव पतत्रिणः अनुगंतुं न शक्तिर्मे गतिं तव महीपते ६ सुजी
वं नित्यशस्तस्य यः परैरुपजीव्यते राम तस्य तु दुर्जीवं यः परानुपजीवति ७ यथा
तु रोपितो वृक्षः पुरुषेण विवर्धितः ह्रस्वकेन दुरारोहो रूढस्कंधो महाद्रुमः ८

त्यशः उपजीव्यते तस्य सुजीवं शोभनं जीवनमित्यर्थः दुर्जीवं दुःखजीवनं तस्मात्त्वं राज्यकरणमेवोचितमिति भावः ७
लोकरक्षणार्थं दशरथेनोत्पाद्य वर्धितः सकलसद्गुणसंपन्नोपि लोकरक्षणं न करिष्यसि तदा व्यर्थस्त्व
या सह समर्थं फलाप्रदर्शनमुखेनाह यथाविस्यादि श्लोकत्रयेण यथा वृक्षः फलार्थिना पुंसा रोपितः कृत
बीजावापोनंतरं शाने वर्द्धितः तत्र बध्यति शाखमाह ह्रस्वकेन वामनेन दुरारोहो त एवरूढ स्कंधो महाद्रुमः ८॥३६०

किमितिकिंसाधुवदिष्यतीतियोजना ३ तीवेत्सवइवशाब्दोवाक्यालंकारे ३१ त्वयोग्यपुरःप्रात्रघस्मामाधान्योनपरिहरणात ३२ इतिचतुरुत्तरशततमःसर्गः १०४ पूर्वसर्गोक्तोक्तरीत्यासुहृद्गणावृतेत्वेशोचतांपितृमरणादुःखेन १ मंदा

किमेषवाक्यंभरतोघराघवंप्रणाम्यमत्कृत्सचसाधुवक्ष्यति ॥ ३ ॥ तीवत्तसार्यजनस्यसर्वतो वभूवकौतूहलमुत्तमंतदा ॥ ३१ ॥ सराघवःसत्यधृतिश्चलक्ष्मणोमहानुभावोभरतश्च धार्मिकः ॥ वृताःसुहृद्भिश्चविरेजुरध्वरेयथासदस्यैःसहितास्त्रयोग्नयः ॥ ३२ ॥ इत्यार्षे रामायणेअयोध्याकांडेचतुरुत्तरशततमःसर्गः ॥ १०४ ॥ ततःपुरुषसिंहानांवृतानांतैः सुहृद्गणैः शोचतामेवरजनीदुःखेनव्यत्यवर्त्तत १ रजन्यांसुप्रभातायांभ्रातरस्तेसु हृद्वृताः मंदाकिन्यांहुतंजप्यंकृत्वाराममुपागमन् २ तूष्णींतेसमुपासीनानकश्चित्किं चिदब्रवीत् भरतस्तुसुहृन्मध्येरामंवचनमब्रवीत् ३ सांत्वितामामिकामातादत्तंराज्यमि दंमम तद्ददामितवैवाहंभुंक्ष्वराज्यमकंटकम् ४

किंत्वांततोरहुतेशातरौपासनहोमजप्यंगायत्रीजपं २

३ मामिकामातापयंराज्यदानेनसांत्विताश्वासिताप्रनेनरेतयाममेदंराज्यंदत्तंतद्राज्यमकंटकंउक्तप्रकारेणपितृवच नस्यापिपरिपालनात्प्रसुहरहितम् ४

तेमुखं प्रेक्ष्य स्थितां मां मनसि स्थितो व्यसनारणिसंभवः शोको दहति अग्निराश्रयं काष्ठमिव २६ २७ २८ ततः वसिष्ठरामोपवेशनानंतरं तदा स भरतोग्रजं राममुद्दिश्य जघन्यैः कनिष्ठैः मंत्रिभिः पुरप्रधानैः सैनिकैः धर्मज्ञतमेन जनेन च सहितः

मुखं ते प्रेक्ष्य मां शोको दहत्यग्निरिवाश्रयम् भृशं मनसि वैदेहि व्यसनारणिसंभवः २६ ब्रुवंत्यामेव मात्तौ प्राञ्जलिर्नम्यो भरताग्रज पादावासाद्य जग्राह वसिष्ठस्य स राघवः २७ पुरोहितस्याग्निसमस्य तस्य वै बृहस्पतेरिंद्र इवामराधिपः प्रगृह्य पादौ सुसमृद्धतेजसः सहैव तेनोपविवेश राघवः २८ ततो जघन्यैः सहितः स मंत्रिभिः पुरप्रधानैश्च तथैव सैनिकैः जनेन धर्मज्ञतमेन धर्मवानुपोपविष्टो भरतस्तदाग्रजम् २९ उपोपविष्टस्तु तदा स वीर्यवांस्तपस्विवेषेण समीक्ष्य राघवम् श्रिया ज्वलंतं भरतः कृताञ्जलिर्यथा महेंद्रः प्रयतः प्रजापतिम् ३०

सन्नुपोपविष्टोपयोचितमुपविष्टो बभूवेत्यन्वयः प्रसमुपोदः पादपूरणा इति द्विर्वचनं २९ कृतांजलिरभूदिति शेषः ३०

१८ १० आसक्तमनवरतं २० ववृतिरे चक्रुरित्यर्थः २१ उपगूह्य स्पृष्ट्वा २२ २३ २४ परिक्लिष्टं परिमर्दितं उत्पलं रक्तोत्पलं

तांस्तु रामः समुत्थाय प्रजग्राह चरणौ शुभान् मातॄणां मनुजव्याघ्रः सर्वासां सत्यसंगरः १८
ताः पाणिभिः सुखस्पर्शैर्मृद्वङ्गुलितलैः शुभैः प्रममार्जू रजः पृष्ठाद्रामस्यायतलोचनाः
१९ सौमित्रिरपि ताः सर्वा मातॄः संप्रेक्ष्य दुःखितः अभ्यवादयदासक्तं शनै रामादनन्तरम् २०
यथा रामे तथा तस्मिन्सर्वा ववृतिरे स्त्रियः वृत्तिं दशरथाज्जाते लक्ष्मणे शुभलक्षणे २१
सीतापि चरणांस्तासामुपसंगृह्य दुःखिता श्वश्रूणामश्रुपूर्णाक्षी संबभूवाग्रतः स्थिता
२२ तां परिष्वज्य दुःखार्तां माता दुहितरं यथा वनवासकृशां दीनां कौसल्या वाक्यमब्रवी
त् २३ विदेहराजस्य सुता स्नुषा दशरथस्य च रामपत्नी कथं दुःखं संप्राप्ता निर्जने वने २४
पद्ममातपसंतप्तं परिक्लिष्टमिवोत्पलम् कांचनं रजसा ध्वस्तं क्लिष्टं चन्द्रमिवाम्बुदैः २५

ध्वस्तमभिभूतम् २५ सीतारामसीतारामसीतारामसीतारामसीतारामसीतारामसीतारामसीताराम॥।

१० औपयिकं उचितं न भवतीति मन्ये तत्र हेतुर्भुक्तभोगस्येति भुक्ता भोगा येन तस्य ११ चतुरंतां चतुःसमुद्राव

इदमिक्ष्वाकुनाथस्य राघवस्य महात्मनः राघवेण पितुर्दत्तं पर्यवेक्षेत तद्यथाविधि १०
तस्य देवसमानस्य पार्थिवस्य महात्मनः नैतदौपयिकं मन्ये भुक्तभोगस्य भोजनम् ११
चतुरंतां महीं भुक्त्वा महेंद्रसदृशो भुवि कथमिंगुदिपिण्याकं स भुंक्ते वसुधाधिपः
१२ अतो दुःखतरं लोके न किंचित्प्रतिभाति माम् यत्र रामः पितुर्दत्तमिंगुदीक्षो
दमृद्धिमान् १३ रामेणेंगुदिपिण्याकं पितुर्दत्तं समीक्ष्य मे कथं दुःखेन हृदयं न।
स्फोटति सहस्रधा १४ श्रुतिस्त्वेव हि सत्येयं लौकिकी प्रतिभाति माम् यदन्नः पु
रुषो भवति तदन्नास्तस्य देवताः १५ एवमार्तां सपत्न्यस्ता जग्मुराश्वास्य तां तदा ददृशु
श्चाश्रमे रामं स्वर्गाच्च्युतमिवामरम् १६ सर्वभोगैः परित्यक्तं रामं संप्रेक्ष्य मातरः आर्ता मुमु
चुरश्रूणि सस्वरं शोककर्शिताः १७

मानो १२ क्षोदं पिष्टं १३ न स्फोटति न स्फुटति न विदीर्णा भवति १४
श्रुतिरित्याद्याश्वासनप्रकारः सत्यासत्यार्था लौकिकी लोकप्रसिद्धा १५ एवं श्रुतिस्त्वित्याद्युक्तप्रकारेण १६ १७ । एम ३५८

५ ते पुत्रः जघन्ये जलाहरणादिनिकृष्टे कर्म कृतवानपि न तु गर्हितः कुतस्तत्राह भ्रातुः ज्येष्ठभ्रातुः स्पर्धासहिते प्रयोजनस
हिते भ्रातुः शुश्रूषारूपमिस्पर्धः यत्कर्म तत्सर्वं गुरोर्विहितं ज्येष्ठभ्रातुः पितृसमत्वात्पितृशुश्रूषावत् गुणाय कल्प्यत
इत्यर्थः ६ क्लेशानामतयोचितः यद्यपीदानीं क्लेशानामनुचितोभवतीति यावत् क्लेशानाम उचितस्ते अयं पुत्रः नीचानर्थ

इतः सुमित्रे पुत्रस्ते सदा जन्मतद्वितः स्वर्परहरतिसौमित्रिर्भिमपुत्रस्य कारणात ५ जघ
न्यमपि ते पुत्रः कृतवान्नतु गर्हितः भ्रातुर्यद्दर्पसहितं सर्वं तद्विहितं गुरोः ६ अद्या
प्रमपि ते पुत्रः क्लेशानामतथोचितः नीचानर्थसमाचारसज्जं कर्म प्रमुंचतु ७ ८।
क्षिणामिषुदःभैधुसाददशमहीतले [illegible] पितुरिदि[illegible]पाकेन्यस्ततमायतलोचना ८
तेस्थ मोपितुरा तेन न्यस्तं राममेतां वीक्ष्य सा उवाच देवी कौशल्या सर्वादशरथ प्रियः ९

९२

समाचारे नीचोतिकृष्टः अनर्थोदःखं समाचारोऽनुष्ठानं यस्य तत्तज्जलाहरणादिरूपं सज्जं प्रस्तुतं कर्म अद्य प्रमुंच
तु अपि प्राद्ः संभावनायां भरतप्रार्थनया तेन रामस्वराज्ये स्वीकृते लक्ष्मणस्य नीचकर्मप्रमोचनं संभवेदिति भावः
७ न्यस्तं रामेण दक्षिणः प्रतीतिशेषः ८

५ ते पुत्रः जघन्यं जलाहरणादिनिकृष्टं कर्म कृतवानपि न तु गर्हितः कुतस्तत्राह भ्रातुः ज्येष्ठभ्रातुः अर्थसहितं प्रयोजनस
हितं भ्रातुः शुश्रूषारूपमित्यर्थः यत्कर्म तत्सर्वं गुरोर्विहितं ज्येष्ठभ्रातुः पितृसमत्वात् पितृशुश्रूषावत् गुणाय कल्प्यत
इत्यर्थः ६ क्लेशानामतथोचितः यद्यपीदानीं क्लेशानामनुचितोऽभवत् तथा क्लेशानामनुचितस्ते स्वयं पुत्रः नीचानर्थ

रतः सुमित्रे पुत्रस्ते सदा जन्ममतन्द्रितः त्यक्त्वा हरति सौमित्रिर्मम पुत्रस्य कारणात् ५ जघ
न्यमपि ते पुत्रः कृतवान्न तु गर्हितः भ्रातुर्यदर्थसहितं सर्वं तद्विहितं गुरोः ६ श्लाघ्य
मपि ते पुत्रः क्लेशानामतथोचितः नीचानर्थसमाचारसज्जं कर्म प्रमुञ्चतु ७ द
क्षिणाग्रेषु दर्भेषु सा ददर्श महीतले पितुरिङ्गुदिपिण्याकं न्यस्तमायतलोचना ८
तं भूमौ पितुरार्तेन न्यस्तं रामेण वीक्ष्य सा उवाच देवी कौसल्या सर्वा दशरथस्त्रियः ९

गु२

समाचारे नीचोत्कृष्टः अनर्थोद्धः एवं समाचारोऽनुष्ठानं यस्य तत् जलाहरणादिरूपे सज्जं प्रसक्तं कर्म अयं प्रमुञ्च
तु अपि प्राद्धः संभावनायां भरतप्रार्थनयाऽतमेणास्वराज्ये स्वीकृते लक्ष्मणस्यापि नीचकर्मप्रमोचनं संभवेदिति भावः
७ न्यस्तं रामेण दक्षिणः प्रतीतिशेषः ८

अनुविनादयन्प्रतिध्वनयन् ॥ ४९ ॥ इति श्रुत्तरशततमः सर्गः ॥ १०३ ॥ तर्षितः साभिलाषः ॥ १ ॥ तीर्थमवतारमार्गम् ॥ २ ॥ ३ ॥ येते

ततः स तेषां रुदतां महात्मनां भुवं च खं चानुविनादयन्स्वनः ॥ गुहा गिरीणां च दिशश्च संततं मृदंगघोषप्रतिमो विशुश्रुवे ॥ ४९ ॥ इत्यार्षे रामायणे अयोध्याकांडे श्रुत्तरशततमः सर्गः ॥ १०३ ॥ नवमदिने कथा समाप्ता ॥ वसिष्ठः पुरतः कृत्वा दारान्दशरथस्य च अभिचक्राम तं देशं रामदर्शनतर्षितः १ राजपत्न्यश्च गच्छंत्यो मंदं मंदाकिनीं प्रति ददृशुस्तत्र तत्तीर्थं रामलक्ष्मणसेवितम् २ कौसल्या बाष्पपूर्णेन मुखेन परिशुष्यता सुमित्रामब्रवीद्दीना याश्चान्या राजयोषितः ३ इदं तेषामनाथानां क्लिष्टमक्लिष्टकर्मणाम् वने प्राक्केवलं तीर्थं येते निर्विषयीकृताः ४

प्रसिद्धरामादयः प्राङ्निर्विषयीकृता राज्या न्निष्क्रासिताः वने तेषां क्लिष्टमुपमर्दितं इदं तीर्थं अवतरणस्थलं केवलं निश्चितमित्यर्थः केवलं निश्चिते कृत्स्ने वा च्य वच्चैककृत्स्नयोरिति वैजयंती ४

रथांगाह्वः चक्रवाकः नत्यूहो जलकुक्कुटः प्लवाः स्थूलबकविशेषाः ४३ ४४ ४५ सहितः अन्योन्यसंगतः ४६ पर्यध्वजत

कि रे

रथांगाह्वाः सनत्यूहा हंसाः कारंडवाः प्लवाः तत्पापुस्कोकिलाः क्रौंचा विसंज्ञा भेजिरे दिशः ४३
तेनत्रासेन वित्रस्तैरेतैः प्रापक्षिभिर्वृतम् मनुष्यैरावृता भूमिरुभयपक्षभीतवत् दा ४४
ततस्तुपुरवध्वा घ्राणप्राप्तिविनिम्नकल्पनम् प्रासीनेस्थंडिलेरामे द्रष्टुं सीतासहसा जनः ४५
विगर्हमाणाः कैकेयीं सहिताः सर्वशामपि अभिगम्य जनो रामं बाष्पपूर्णमुखोभवत् ४६
तान्नरान्बाष्पपूर्णाक्षान्समीक्ष्याथ सुदुःखितान् पर्यष्वजत धर्मज्ञः पितृवन्मातृव
च्च सः ४७ स तत्र कांश्चित्परिषस्वजेन तान्नरांश्च केचित्तु तमभ्यवादयन् चकार सर्वा
न्सवयस्य बांधवान्यथार्हमासाद्य तदा नृपात्मजः ४८ सीतारामाभ्यां नमः सीतारामा

परिष्वंगयोग्यानिति शेषः ४७ तदेवाह सतत्रेति ४८ श्रीसीतारामाभ्यां नमः सीताराम सीताराम सीताराम

कैस्तत्राह हयैरित्यादि सुकुमारा इति पूर्वान्वयि पृथन्येते भ्योभिन्नाः ३७ प्रा प्रमपितिच्छेदः ३८ खुरसमाकुलेयानान्यश्वादयः

हयैरन्यैर्गजैरन्यैरथैरन्यैस्वलंकृतैः सुकुमारास्तथैवान्येपद्भिरेवनरायपुः ३७ रचिर
प्रोषितेरामेचिरविप्रोषितेप्रया दृष्टुकामोजनःसर्वोजगामसहसाश्रमम् ३८ भ्रा
तृणांत्वरितास्तेतु दृष्टुकामाःसमागमम् ययुर्बहुविधैर्यानैःखुरनेमिसमाकुलैः ३९
साभूमिर्बहुभिर्यानैरथनेमिसमाहता मुमोचतुमुलंशब्दंद्यौरिवाभ्रसमागमे ४०
तेनवित्रासितानागाःकरेणुपरिवारिताः आवासयंतोगंधेनजग्मुरन्यद्वनंततः ४१
वराहमृगसिंहाश्चमहिषाःसर्पवानराः व्याघ्रगोकर्णगवयावित्रेसुःपृषतैःसह ४२

नेमिसमाकुलानिरथप्राक टादीनि ३९ समाहताभिहताप्राक्रांतेतियावत् ४० तेनशब्देनागंधेनगंधेनाशाबासयंतःम
दगंधेनदिग्मुखानिसुरभीकुर्वंतः ४१ गोकर्णापृषतौमृगविशेषौ ४२

३२ प्रतिशब्दः प्रतिध्वनिः ३३ त्रस्ताः काविपक्षादरम्भदिति भीताः ३४ ततो निष्क्रम्याब्रुवन् ३५ तेस्वनमभिमुखाः स्वनोऽस्य

ततः पर्णकुटीद्वारमासाद्य जगतीपतिः परिजग्राह पाणिभ्यामुभौ भरतलक्ष्मणौ ३२
तेषां तु रुदतां शब्दात्प्रतिशब्दोऽभवद्गिरौ भ्रातॄणां सह वैदेह्या सिंहानां नर्दतामिव ३३
महाबलानां रुदतां कुर्वतामुदकं पितुः विज्ञाय तुमुलं शब्दं त्रस्ता भरतसैनिकाः ३४
अब्रुवंश्चापि रामेण भरतः संगतो ध्रुवम् तेषामेव महाञ्छब्दः शोचतां पितरं मृतम् ३५
अथ वाहान्परित्यज्य ते सर्वे प्रमुखाः स्वनम् अप्येकमनसो जग्मुर्यथास्थानं प्रधाविताः
राम ३६

ति॥ दिशामभिमुखाः यथास्थानं शब्दोत्पत्तिप्रदेशमतिक्रम्य प्रधाविता त्वरिता गच्छंति स्म ६३६ ३६

३२ प्रतिशब्दः प्रतिध्वनिः ३३ त्रस्ताः काविपत्पादरभूदिति भीताः ३४ ततो निश्चित्याब्रुवन् ३५ तं स्वनमभिमुखाः स्वनोऽस्ति

ततः पर्णकुटीद्वारमासाद्य जगतीपतिः परिजग्राह पाणिभ्याम् उभौ भरतलक्ष्मणौ ३२
तेषां तु रुदतां शब्दात् प्रतिशब्दोऽभवद्गिरौ भ्रातॄणां सह वैदेह्या सिंहानां नर्दतामिव ३३
महाबलानां रुदतां कुर्वतामुदकं पितुः विज्ञाय तुमुलं शब्दं त्रस्ता भरतसैनिकाः ३४
अब्रुवंश्चापि रामेण भरतः संगतो ध्रुवम् तेषामेव महाञ्छब्दः शोचतां पितरं मृतम् ३५
अथ वाहान्परित्यज्य तं सर्वेऽभिमुखाः स्वनम् अप्येकमनसो जग्मुर्यथास्थानं प्रधाविताः
राम ३६

ति ॥ दिशामभिमुखाः यथास्थानं शब्दोऽस्ति तद्दिशं प्रति क्रम्य प्रधाविता त्वरिता गछंति स्म ६३६ ३६

 एतदेव विवृणोति प्रगृह्येति २६ २७ प्रत्युत्तीर्य तीरमागत्य निर्वापं चकार पिंडं ददौ न च यदा कदाचित्पितृमरणश्रवणोपु
 त्तरदशाहमशौचतापात्स्मृतिभ्रष्टत्वेन कथं कृतं क्रियमस्य पितुः प्रथमदिने एकपिंडदानमिति वाच्यं तस्याः स्मृतेः क्षत्रियेतर

प्रगृह्य च महीपालो जलपूरितमंजलिम् दिशं याम्यामभिमुखो रुदन्वचनमब्रवीत्
२६ एतत्ते राजशार्दूल विमलं तोयमक्षयम् पितृलोकगतस्याद्य मद्दत्तमुपतिष्ठतु २
७ ततो मंदाकिनीतीरं प्रत्युत्तीर्य स राघवः पितुश्चकार तेजस्वी निर्वापं भ्रातृभिः सह २८
ऐंगुदं बदरीमिश्रं पिण्याकं दर्भसंस्तरे न्यस्य रामः सुदुःखार्तो रुदन्वचनमब्रवीत् २९
इदं भुंक्ष्व महाराज प्रीतो यदशना वयम् यदन्नः पुरुषो भवति तदन्नास्तस्य देवताः ३०
ततस्तेनैव मार्गेण प्रत्युत्तीर्य नदीतटात् आरुरोह नरव्याघ्रो रम्यसानुं महीधरम् ३१

विषयत्वात् कलिविषयत्वाच्च न दोषः २८ ऐंगुदं इंगुदीबीजसंबंधि बदरैः बदरफलैः २९ ननु एकं पिण्याकपिं
उदानं तत्राह यदशना इति यदशनो यस्तत् दशनो यस्य तत् पितर इति शेषः तत्र सामान्येनार्थांतरन्यासमाह यदन्न इति ३० प्रत्युत्तीर्य प्रत्याव्रज्य ३१

रा० वा० अ० एतदेव विवृणोति श्रुत्येति २६ २७ प्रत्युत्तीर्य तीरमागत्य निर्वापं चकार पिंडं ददौ न च यदा कदाचित्पितृमरणश्रवणोपु
३५५ त्रसदशाहशौचं तावत्तिष्ठत्येवेन कथं कृतं क्रियमाणस्य पितुः प्रथमदिन एव पिंडदानमिति वाच्यं तस्याः स्मृतेः क्षत्रियेतर

प्रगृह्य च महीपालो जलपूरितमंजलिम् दिशं याम्यामभिमुखो रुदन्वचनमब्रवीत्
२६ एतत्ते राजशार्दूल विमलं तोयमक्षयम् पितृलोकगतस्याद्य मद्दत्तमुपतिष्ठतु २
७ ततो मंदाकिनीतीरं प्रत्युत्तीर्य स राघवः पितुश्चकार तेजस्वी निर्वापं भ्रातृभिः सह २८
ऐंगुदं बदरीमिश्रं पिण्याकं दर्भसंस्तरे न्यस्य रामः सुदुःखार्तो रुदन्वचनमब्रवीत् २९
इदं भुंक्ष्व महाराज प्रीतो यदशना वयम् यदन्नः पुरुषो भवति तदन्नास्तस्य देवताः ३०
ततस्तेनैव मार्गेण प्रत्युत्तीर्य नदीतटात् आरुरोह नरव्याघ्रो रम्यसानुं महीधरम् ३१

विषयत्वात् कलिविषयत्वाच्च न दोषः २८ ऐंगुदं इंगुदीबीजसंबंधि बदरैः बदरफलैः २९ ननु यज्ञे कथं पिण्याकपिं
डदानं तत्राह यदशना इति यच्छ्रुतदन्ना नोऽस्मत्पितर इति भावः तत्र सामान्येनार्थान्तरन्यासमाह यदन्न इति ३० प्रत्युत्तीर्य प्राप्य स ३१

१९ इंगुदिपिण्याकं तत्पष्टिमिभोऽयं तापसतरुफलपिण्याकं उत्तरं चीरं उत्तरीयं वस्त्रं आहर इदं देहोत्सर्गः २० अभितः पश्चात्
स्थानगतिः सुदारुणा दाहरता श्रो कादि कालिकी तत्पावचपितमे धर्मसूत्रे सर्वे कनिष्ठप्रथमा इतरेतु श्रिप्रागत इति २१ नि

सान्त्वयित्वा तु तां रामो रुदतीं जनकात्मजाम् उवाच लक्ष्मणं तत्र दुःखितो दुःखितं वचः १९
आनयेङ्गुदिपिण्याकं चीरमाहर चोत्तरम् जलक्रियार्थं तातस्य गमिष्यामि महात्मनः २०
सीता पुरस्ताद्व्रजतु त्वमेनामभितो व्रज अहं पश्चाद्गमिष्यामि गतिर्ह्येषा सुदारुणा २१ त
तो नित्यानुगस्तेषां विदितात्मा महामतिः मृदुर्दान्तश्च शान्तश्च रामे च दृढभक्तिमान् २२ सुमन्त्रस्तै
र्नृपसुतैः सार्धमाश्वास्य राघवम् अवतारयदालम्ब्य नदीं मन्दाकिनीं शिवाम् २३ ते सु
तीर्थां ततः कृच्छ्रादुपागम्य यशस्विनः नदीं मन्दाकिनीं रम्यां सदा पुष्पितकाननाम् २४
शीघ्रस्रोतसमासाद्य तीर्थं शिवमकर्दमम् सिषिचुस्तूदकं राज्ञे तत एतद्भवत्विति २५

त्यानुगतः कृत्वे क्रमागतानुचरः विदितात्मा ज्ञातात्मस्वरूपः २२ अवतारयन् अवातारयत् २३ ते सीतादयः २४ अकर्दमं ती
र्थम् अवतारमार्गं तत एतद्भवत्विति उच्चार्य सिषिचुः ददुः १५

टी० वा० रा० निष्प्रधानां प्रधानहीना ऽनेकाग्रां एकाग्रे कार्ये ऽनेकाग्रां बहुनायकां उभयत्र हेतुर्नरेंद्रेण विना कृतामिति ११ अनुशासिष्यति हितं विध
३५४

निष्प्रधानामनेकाग्रांनरेंद्रेणविनाकृताम् निवृत्तवनवासोपिनायोध्यांगंतुमुत्सहे ११
समाप्तवनवासंमामयोध्यायांपरंतप कोनुशासिष्यतिपुनस्ताते लोकांतरंगते १२
पुराप्रेक्ष्यसुवृत्तंमांपितायान्याहसांत्वयन् वाक्यानितानिश्रोष्यामिकुतःकर्णसुखान्य
हम् १३ एवमुक्त्वाथभरतंभार्यामभ्येत्यराघवः उवाचशोकसंतप्तःपूर्णचंद्रनिभाननाम्
१४ सीतेमृतस्तेश्वशुरःपित्राहीनोसिलक्ष्मण भरतोदुःखमाचष्टेस्वर्गतंपृथिवीपतिम्
१५ ततोबहुगुणंतेषांबाष्पंनेत्रेष्वजायत तथाब्रुवतिकाकुत्स्थेकुमाराणांयशस्विनाम्
१६ ततस्तेभ्रातरःसर्वेभृशमाश्वास्यराघवम् अब्रुवन्जगतीभर्तुःक्रियतामुदकंपितुः
१७ सासीताश्वशुरंश्रुत्वास्वर्गलोकगतंनृपम् नेत्राभ्यामश्रुपूर्णाभ्यांनशशाकेक्षितुंप
तिम् १८

पथ्यं वदति कारयिष्यति १२ सुवृत्तं शोभननियोगाचरणं कुतः प्रत्यहात् १३ अभ्येत्य अभिमुखीभूत्वा १४ स्वर्गतिरूपं दुःखम् १५
१६ क्रियतामित्यब्रुवन् १७ १८

बाहू प्रगृह्य उद्धृत्य भुवि पपात ३ ४ सिषिचुः मोहशान्तये सर्वे गात्राणि जलेन सिषिचुः ५ कृपणं भाषितुं लोकानुसारेण वि

प्रगृह्य रामो बाहू वै पुष्पिताङ्ग इव द्रुमः वने परशुना कृत्तस्तथा भुवि पपात ह ३ तथा
हि पतितं रामं जगत्यां जगतीपतिं कूलघातपरिश्रान्तं प्रसुप्तमिव कुञ्जरम् ४ भ्रातरस्तं
महेष्वासं सर्वतः शोककर्शितं रुदन्तः सह वैदेह्या सिषिचुः सलिलेन तु ५ स तु सं
ज्ञां पुनर्लब्ध्वा नेत्राभ्यामास्रमुत्सृजन् उपाक्रामत काकुत्स्थः कृपणं बहु भाषितुम्
६ स रामः स्वर्गतं श्रुत्वा पितरं पृथिवीपतिम् उवाच भरतं वाक्यं धर्मात्मा धर्मसंहितम् ७ किं
करिष्याम्ययोध्यायां ताते दिष्टां गतिं गते कस्तां राजवराद्धीनामयोध्यां पालयिष्यति ८
किन्नु तस्य मया कार्यं दुर्जातेन महात्मनः यो मृतो मम शोकेन मया चापि न संस्कृतः ९
अहो भरत सिद्धार्थो येन राजा त्वयानघः शत्रुघ्नेन च सर्वेषु प्रेतकृत्येषु सत्कृतः १०

लपितुमिति शेषः ६ ७ दिष्टां गतिं दैवकल्पितां गतिम् ८ दुर्जातेन व्यर्थजन्मना ९ १० सीता रामाभ्या

 उक्तमपि राजमरणं रामेणाविषयीकृततोत्तरदानादस्रुतमिव मत्वा पुनस्तदेवाह केकयस्येति यायजूकः इज्याशी
 लः सतांमतः सद्भिः पूज्यमानः ५ ६ ७ ८ प्रियस्त्वमेवोपपादयतित्वामेवेति तव शोकरुग्ण इत्यनेनेतत्वच्छोकए

केकयस्थे तु च मयि त्वयि चारण्यमाश्रिते दिवमार्यो गतो राजा यायजूकः सतांमतः ५ नि
ष्क्रांतमात्रे भवति सहसीते सलक्ष्मणे दुःखशोकाभिभूतस्तु राजा त्रिदिवमभ्यगात् ६
उत्तिष्ठ पुरुषव्याघ्र क्रियतामुदकं पितुः अहं चायं च शत्रुघ्नः पूर्वमेव कृतोदकौ ७ प्रि
येण किल दत्तं हि पितृलोकेषु राघव अक्षय्यं भवतीत्याहुर्भवांश्चैव पितुः प्रियः ८
त्वामेव शोचंस्तव दर्शनेप्सुस्त्वय्येव सक्तामनिवर्त्य बुद्धिम् त्वया विहीनस्तव शोकरुग्ण
स्त्वां संस्मरन्नस्तमितः पिता ते ९ ॥इत्यार्षे रामायणे अयोध्याकांडे द्व्युत्तरशततमः सर्गः॥ १०२
तां श्रुत्वा करुणां वाचं पितुर्मरणसंहिताम् राघवो भरतेनोक्तां बभूव गतचेतनः १ तं तु व
ज्रमिवोत्सृष्टमाहवे दानवारिणा वाग्वज्रं भरतेनोक्तममनोज्ञं परंतपः २

वत्तदवसादहेतुरिति दर्शितम् ९ इति द्व्युत्तरशततमः सर्गः १०२ करुणां शोकावहाम् १ तं भरतोक्तं वाग्वज्रं रामोऽद्रोत्सृष्ट

इत्येकशततमः सर्गः॥ १०१ ॥ अथ भरतः पितृवचनं तपश्चरणं सम्यक्त्वा कञ्चित्स्वे श्रोत्रमाह रामस्येति धर्मात् राज्यत्यागेन पत्त्वेन राजधर्मो दोषभागेन तत्त्वेवारूपमुरम धर्माच्च विहीनस्य मे राजधर्मः किं करिष्यतीत्यतो न्नृपयुक्तो मयि कश्चिदादिश्यत इति भावः १ कुतस्ते राजधर्माभावो ऽत आह शाश्वत इति शाश्वतः कुलक्रमागतः अस्मासु अस्मत्पूर्वेषु तद्वा ज्येष्ठ

इत्यार्षे रामायणे अयोध्याकांडे एकशततमः सर्गः॥ १०१ ॥ रामस्य वचनं श्रुत्वा भरतः प्रत्युवाच ह किं मे धर्माद्विहीनस्य राजधर्मः करिष्यति १ शाश्वतोयं सदा धर्मः स्थितोस्मासु नरर्षभ ज्येष्ठपुत्रे स्थिते राजन्न कनीयान्भवेन्नृप २ स समृद्धां मया सार्द्धमयोध्यां गच्छ राघव अभिषेचय चात्मानं कुलस्यास्य भवाय नः ३ राजानं मानुषं प्राहुर्देवत्वे संमतो मम यस्य धर्मार्थसहितं वृत्तमाहुरमानुषम् ४

ज्येष्ठपुत्रे इति २ पदेव्यमत्तः स इति ३ आगच्छ भवाय अभ्युदयाय ३ ननु देव त्वप्राय्यं केतपो विहाय किं मे राज्येनेत्यत्राह राजानमिति सर्वे जना यद्यपि राजानं मानुषं प्राहुस्तथापि मम स देवत्वे संमतः तत्र हेतुमाह यस्येति अमानुषं मनुष्येष्वसंभावितमित्यर्थः ४

त्वया राज्यं प्राप्तव्यं मया दंडके वस्तव्यं २३ एवं रूपं विभागं लोकसन्निधौ मंत्रिपुरोहितादिजनसन्निधौ उक्त्वा तानेवं विभागं कुरुतेति व्यादिश्य च आज्ञाप्य च दिवं गत इत्यन्वयः २४ यथाभागं पितृकल्पितं चतुर्दशवर्षपर्यंतम् २५ २६ सर्वलोकेश्वरभावं सर्वलोकेश्वरत्वमपि पित्रननुमतं नाहं मतमित्यन्वयः ननु पितुर्मरणश्रवणानंतरं शोकमुद्दिश्या

त्वया राज्यमयोध्यायां प्राप्तव्यं लोकसत्कृतम् वस्तव्यं दंडकारण्ये मया वल्कलवाससा २३
एवं कृत्वा महाराजो विभागं लोकसन्निधौ व्यादिश्य च महाभागो दिवं दशरथो गतः २४
स च प्रमाणं धर्मात्मा राजा लोकगुरुस्तव पित्रा दत्तं यथाभागमुपभोक्तुं त्वमर्हसि २५
चतुर्दश समाः सौम्य दंडकारण्यमाश्रितः उपभोक्ष्ये त्वहं दत्तं भागं पित्रा महात्मना २६
यदब्रवीन्मां नरलोकसत्कृतः पिता महात्मा विबुधाधिपोपमः तदेव मन्ये परमात्मनो हितं न सर्वलोकेश्वरभावमव्ययम् २७

मिषेकप्रत्याख्यानमेव कृत इति चेच्छृणु भरतस्याभिषेककरणाग्रहाद्वारणाय कैकेय्या लोकानां चान्यथा संभावनावारणाय प्रोक्तकालेऽपि धैर्यमवलंब्याभिषेकप्रत्याख्यानकरणं प्रोक्तकालेऽप्येवं धैर्यं कर्तव्यमिति लोकोपदेशायेति दिक् २७

वाल्यादज्ञानात् १७ कथं कैकेयीगर्हणमनुचितमित्यत्राह कामकार इति गुरूणां पित्रादीनां उपपन्नेषु संमतेषु दारेषु पु
त्रेषु च कामकारः स्वेच्छया नियोजनं विधियत इति संबंधः १८ ततः किमत आह वयमिति भार्याः पुत्राः शिष्याश्च लो

न दोषं त्वयि पश्यामि सूक्ष्ममप्यरिसूदन न चापि जननीं बाल्यात्त्वं विगर्हितुमर्हसि १७
कामकारो महाप्राज्ञ गुरूणां सर्वदानघ उपपन्नेषु दारेषु पुत्रेषु च विधीयते १८ व
यमस्य यथा लोके संख्याताः सौम्य साधुभिः भार्याः पुत्राश्च शिष्याश्च त्वमपि ज्ञातुमर्हसि
१९ वने वा चीरवसनं सौम्य कृष्णाजिनाम्बरम् राज्ये वापि महाराजो मां वासयितुमीश्वरः २०
यावत्पितरि धर्मज्ञे गौरवं लोकसत्कृते तावद्धर्मभृतां श्रेष्ठ जनन्यामपि गौरवम् २१
एताभ्यां धर्मशीलाभ्यां वनं गच्छेति राघव मातापितृभ्यामुक्तोऽहं कथमन्यत्समाचरे २२

लोके साधुभिरिच्छाविति योगार्हतया प्रख्याता समाख्याता तथा मम राज्ञो वयं सर्वे इति त्वमपि ज्ञातुमर्हसि १९ प्रकृते किंत
त्राह वनेत्यादि २० प्रकृते कैकेयीगर्हाभावमुपसंहरति यावदिति तावत् तावत्परिमाणकमित्यर्थः २१ ततः कैकेय्या अप्यस्म
न्नियोजनेन प्रेषाधिकार इति भावः २१ समाचरे समाचरिष्यामि २२

अनुपूर्व्या युक्तं ज्येष्ठक्रमेण प्राप्तं यतस्त्वमानुपूर्व्या ज्येष्ठस्त्वं लक्षणात्मा युक्तः प्रशस्तात्मनि त्वयि अभिषेचनं युक्तं तस्मा द्धर्मेण राज्यं प्राप्नुहि १० रजनीयथा तादृशी भूमिः शशिनेव त्वया युता अविधवा भवत्विति यच्छेव प्राच्ययोरन्वयः प

तवानुपूर्व्या युक्तं च युक्तं चात्मनि मानद राज्यं प्राप्नुहि धर्मेण सकामान्सुहृदः कुरु १० भवत्वविधवा भूमिः समग्रा पतिना त्वया शशिना विमलेनेव शारदी रजनी यथा ११ एभिश्च सचिवैः सार्द्धं शिरसा याचितो मया भ्रातुः शिष्यस्य दासस्य प्रसादं कर्तुमर्हसि १२ तदिदं शाश्वतं पित्र्यं सर्वं सचिवमंडलम् पूजितं पुरुषव्याघ्र नातिक्रमितुमर्हसि १३ एवमुक्त्वा महाबाहुः सबाष्पः कैकेयीसुतः रामस्य शिरसा पादौ जग्राह भरतः पुनः १४ तं मत्तमिव मातंगं निश्वसंतं पुनः पुनः भ्रातरं भरतं रामः परिष्वज्येदमब्रवीत् १५ कुलीनः सत्वसंपन्नस्तेजस्वी चरितव्रतः राज्यहेतोः कथं पापमाचरेन्मद्विधो जनः १६ १६ १६

तिनेति नाभाव आर्षः ११ १२ शाश्वतं परंपराप्राप्तं सचिवमंडलं तत्प्रार्थनं पूर्वं सदा पूजितं सफलं कृतमिदानीमतिक्रमितुं नार्हसि १३ १४ १५ पादौ पित्रा... गारूपम् १६

काकुत्स्थेन वलेनवत्प्रग्रह्याहं परिष्वजनतत्सर्वं वक्तुमर्हसीतिमृप ३ उक्तः कैकेयीपुत्रः प्रांजलिर्वाक्यमब्रवीदिदंन्वपः ४
पूर्वं च षमेवार्यं कृतनुतेभूत्पितिस्सेवं रूपं भेगपंतेरेराः १ नः ५ वं ज्ञात्वात दुत्तरमाह रघार्येति परित्यज्य प्रस्मान्ससवीनि

इत्युक्तः कैकेयीपुत्रः काकुत्स्थेन महात्मना प्रगृह्य वलवद्भूपः प्रांजलिर्वाक्यमब्रवीत
४ आर्यं तातः परित्यज्य कृत्वा कर्म सुदुष्करम गतः स्वर्गं महाबाहुः पुत्रशोकाभिपीडि
तः ५ स्त्रियानियुक्तः कैकेय्या मम मात्रा परंतप चकार सुमहत्पापमिदमात्मयशोहरं ६
सा राज्यफलमप्राप्य विधवा शोककर्षिता पतिष्यति महाघोरे नरके जननी मम ७
तस्य मे दासभूतस्य प्रसादं कर्तुमर्हसि अभिषिंचस्व चाद्यैव राज्येन मघवानिव ८ इमाः
प्रकृतयः सर्वा विधवा मातरश्च याः त्वत्सकाशमनुप्राप्ताः प्रसादं कर्तुमर्हसि ९ १ १

मे च लोकमिति प्रोक्तः सुदुष्करं कर्म कृत्वा ज्येष्ठार्हराज्यं स्त्रीनियोगात्कनिष्ठसात्कृत्वेत्यर्थः ५ ६ ७ तस्य मे कैकेयी
सेवं धात्वाप्राप वादस्य[illegible]राज्येतराज्य निमित्तम ८ ९

रा० वा० अ० महीपतिः राजा ह्यत्रिग्रः दूतश्च्युतः एतद्देहं त्यक्त्वा काम्याम ॥७६॥ इति शततमः सर्गः ॥१००॥ एवं कच्चित्प्रश्नानन्तरं स्वस्य राजत्वाभावं
३५०
सूचयितुं तदनन्तरमेव पृच्छति तं भरतमागमनप्रयोजनं पृच्छतीति तं त्वित्यादिना तं तु भ्रातरं गुरुवत्सले समाज्ञाय प्रश्नं राज्य

राजा तु धर्मेण हि पालयित्वा महीपतिर्दण्डधरः प्रजानाम् ॥ अवाप्य कृत्स्नां वसुधां यथा
वदितश्च्युतः स्वर्गमुपैति विद्वान् ॥७६॥ इत्यार्षे रामायणे अयोध्याकाण्डे शततमः सर्गः ॥
१००॥ तं तु रामः समाज्ञाय भ्रातरं गुरुवत्सलम् लक्ष्मणेन सह भ्रात्रा प्रष्टुं समुपचक्रमे १
किमेतदिच्छेयमहं श्रोतुं प्रव्याहृतं त्वया यस्मात्त्वमागतो देशमिमं चीरजटाजिनी २
यन्निमित्तमिमं देशं कृष्णाजिनजटाधरः हित्वा राज्यं प्रविष्टस्त्वं तत्सर्वं वक्तुमर्हसि ३

परित्यागेन जटावल्कलधारणेन गुरौ स्वस्मिन्भक्तिं युक्तं ज्ञात्वा १ यस्मात्कारणात्त्वं चीरजटाजिनी सन्निमं देशमाग
तोसि एतत्कारणं किमिति त्वया प्रव्याहृतं श्रोतुमिच्छेयमिति संबंधः २ एतस्यैव श्लोकस्य व्याख्यानं यन्निमित्तमिति ३

ात्नामवप्रपसंपादनायोस्य न्नुतिकच्चिदितितेवेदास्त्वद्धीतवेदाः सफलाः कच्चित्तद्विहिताग्निहोत्राद्यनुष्ठाने
नसफलीकृताः क्रियंतेसाध्यंतेइतिक्रियास्ताः क्रियाशब्देनधनधान्यान्युच्यंते तत्संपादितानिदिधनादीनिदा
नभोगाभ्यांसफलीकृताः कच्चित्तेदाराः सफलाः रतिपुत्रफलाः कच्चित्तेश्रुतंशास्त्रश्रवणंशीलवृत्तोत्पादनेनस

कच्चित्तेसफलावेदाः कच्चित्तेसफलाःक्रियाः कच्चित्तेसफलादाराः कच्चित्तेसफलंश्रुत
म् ११२ कच्चिदेषाचतेबुद्धिर्यथोक्तामममाराघव आयुष्याचयशस्याच धर्मकामार्थसं
हिता ११३ यांवृत्तिंवर्तितेतातोयांचनःप्रपितामहाः तांवृत्तिंवर्तसेकच्चिद्याचसत्पथगा
शुभा ११४ कच्चित्स्वादुकृतंभोज्यमेकोनाश्नासिराघव कच्चिदाशंसमानेभ्योमित्रेभ्यः
संप्रयच्छसि ११५

फलंकच्चित्यथाचभारते अग्निहोत्रफलावेदादत्तभुक्तफलंधनंरतिपुत्रफलादाराःशील
वृत्तफलंश्रुतमिति ११२ उक्तामयावुद्धिर्यथास्मत्पैतृवत्तथापिवर्ततेकच्चित् ११३ सत्पथगाशिष्टानुष्ठानमार्गाः ११४
आशंसमानेभ्यःस्नेहवद्भ्योयेहारारछेन्द्वाः मित्रेभ्यःस्निग्धेभ्यः ११५

रा०वा०अ०
३४९

यात्रा यानं तच्च पंचविधं विगृह्यासंधाय तथा संभूय प्रसंगतः उपेक्ष्य चेति निपुणैर्यानं पंचविधं स्मृतम् बलवतापि प्रायेण पार्ष्णिग्राहादिभिर्विगृह्य याने १ पार्ष्णिग्राहादिभिः संधिं कृत्वान्यत्र याने संधाय याने २ सामंतैः सह याने संभूय याने ३ अन्योद्देशेन यात्राप्रसंगमुत्पाद्यान्यं प्रतियाने प्रसंगतो याने ४ शत्रुं देशेन यात्रां कृत्वा तमुपेक्ष्य तस्य मित्रेषु याने मुपेक्ष्य याने ५ दंडविधाने दंडः सेना तद्विधानं व्यूहरचना भेदः द्वियोनी संधिविग्रहावितिसंधिविग्रहयानेत्यादि षड्गुणा

यात्रादंडविधानं च द्वियोनी संधिविग्रहौ कच्चिदेतान्महाप्राज्ञ यथावदनुमन्यसे ७०
मंत्रिभिस्त्वं यथोद्दिष्टैश्चतुर्भिस्त्रिभिरेव वा कच्चित्समस्तैर्व्यस्तैर्वा मंत्रं मंत्रयसे मिथः ७१

नाम ध्येसंधिविग्रहौ द्वयोर्योनी तत्र द्वैधीभावसमाश्रयौ संधियोनिकौ यानासने विग्रहयोनिके इति भेदः तत्र द्वैधीभावो नाम बलिनोर्द्विषतोर्मध्ये वाचात्मानं समर्पयन् द्वैधीभावेन वर्तेत काकाक्षिवदलक्षितमिति शुक्रनीतिः [illegible] नसव लदाश्रयतां समाश्रयः कालप्रतीक्षया तूष्णीमवस्थानमासनं ७० यथोद्दिष्टैः शास्त्रोक्तमंत्रिलक्षणलक्षितैः चतुर्भिर्मंत्र करणे मंत्रभिन्नत्वसंभवादेकस्याभावाच्च चतुर्भिस्त्रिभिरेव वेत्युक्तिः व्यस्तैर्मंत्रकरणे तन्मतपरिज्ञानं भवतीत्यर्थः ७१

बहुरिपुः १८ पङ्क्तोः कालेन यश्च स्यः १९ सत्यधर्मव्यपेतश्च २० विंशतिः पुरुषा ह्यमी एतैः संधिं न कु
र्वीत विगृह्णीयात्तु केवलमिति प्रकृतयश्च मंडले च प्रकृति मंडलम् प्रकृतिवर्गस्तु समासो १ राष्ट्र २
दुर्गाणि ३ कोशो ४ दंडश्च ५ पंचमः इति विजिगीषोः प्रकृतयः द्वादशराजमंडलं तत्र विजि
गीषुर्मध्ये अरि मित्र मरे मित्रं मित्रा मित्र मतः परं मित्रारि मित्र मित्रं च । विजिगी
षोः पुरः सराः पार्ष्णिग्राह स्ततः पश्चादाक्रंद स्तदनंतरं आसार एव न पश्चैव विजिगी
षोस्तु पृष्ठतः अरेश्च विजिगीषोश्च मध्यमो भूम्यनंतरः अनुग्रहे संहतयोर्व्यस्तयोर्निग्र
हे प्रभुः मंडलाद्बहिरेतेषामुदासीनो बलाधिकः अनुग्रहे संहतानां व्यस्तानां च वधे प्रभुरि
ति आसारौ पार्ष्णिग्राहासाराक्रंदासारौ आसारपृष्ठभागस्थौ मध्यमोदासीनाविति ६१ १

इंद्रियाणां जयं जयोपायं योगाभ्यासं तु ध्वा षाड्गुण्यं षड्गुणाः संधिः १ विग्रहः २ याने ३ आसनं ४ द्वैधीभावः ५ समाश्रयः
६ इति द्वैधीभावः शत्रुवर्गाणामुपजापः दैवमानुषं दैवं मानुषं च व्यसनमिस्यर्थः तत्र दैवं पंचविधं हुताशनः १ जलं र
व्याधिः ३ दुर्भिक्षं ४ मारीदिः ५ मानुषं तु आधिकारिभ्यः १ चौरेभ्यः २ शत्रुभ्यः ३ राजवल्लभेभ्यः ४ राजलोभाच ५ क्र
त्यं तु अलब्धवेतनावमानितकोपितभीषितवर्गो शत्रुसंबंधिषु अभिमतवस्तुप्रदानेन कर्तव्यं भेदनं राज क्रसशाब्देनो

इंद्रियाणां जयं बुध्वा षाड्गुण्यं दैवमानुषम् कृत्यं विंशतिवर्गं च तथा प्रकृतिमंडलम् ६९

च्यते विंशतिवर्गस्तु बालो १ वृद्धो २ दीर्घरोगी ३ तथा ज्ञातिवहिष्कृतः ४ भीरुको ५ भीरुजनको ६ लुब्धो ७
लुब्धजनस्तथा ८ विरक्तप्रकृतिश्चैव ९ विषयेष्वतिशक्तिमान् १० अनेकचित्तमंत्रश्च ११ देवब्राह्मणनिंदकः १२
दैवोपहतकश्चैव १३ दैवनिंदक एव च १४ दुर्भिक्षव्यसनोपेतो १५ बलव्यसनसंयुतः १६ अदेशस्थो १७

मंगलस्मादौषातः कालेश्वप्रयोगमननुष्ठाने सर्वतः प्रसुत्यानं सर्वदिगावस्थितरिपुदेशेन १ गपदंदं यात्रा ६७ दशावर्गा
दीनि बुध्वा यथावदनुमन्यसेते बुत्यास्यांशामुपादेयांशं चत्तात्वा यथावदनुतिष्ठसि कच्चिदिति तत्तीयस्थे नान्वयः दश
वर्गस्तु कामजः मृगया १ द्यूतं २ दिवास्वापः ३ परिवादः ४ स्त्रियः ५ मदः ६ नृत्यं ७ गीतं ८ वाद्यं ९ वृथापर्यटनं १०
पंचवर्गस्तु पंचविधं दुर्गं ग्रीदकं १ पार्वतं २ वार्क्षं ३ खोरिणं ४ धान्वनं ५ चतुर्वर्गस्तु साम १ दानं २ भेदः ३ द

मौलानां च प्रयोगं च प्रसुत्यानं च सर्वशः कच्चिल्लंबरजं यस्ते तानराजदोषांश्चतुर्दश ६७
दशपंच चतुर्वर्गान् सप्तवर्गं च तत्त्वतः अष्टवर्गं त्रिवर्गं च विद्यास्तिस्रश्च राघव ६८

त्रिवर्ग

दंडः ४ सप्तवर्गस्तु स्वाम्यमात्य राष्ट्रं च दुर्गं कोशो बलं सुहृत् परस्परोपकारीदं राज्यं सप्तांगमुच्यते १ अष्ट
वर्गस्तु पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणं वाग्दंडयोश्च पारुष्यं क्रोधजोऽपि गणोऽष्टक इति ८ त्रिवर्गस्तु उत्सा
हशक्तिः १ प्रभुशक्तिः २ मंत्रशक्तिः ३ तिस्रो विद्याः त्रयी वार्ता दंडनीतिश्च त्रयी वेदत्रयी १ वार्ता कृष्यादि २ दंडनी
तिर्नीतिशास्त्रम् ३ ३ ६८

मंगलस्यादौषातः कालेऽप्रयोगमननुष्ठानं सर्वतःप्रत्युत्थानं सर्वदिगवस्थितारिपूदेशेन १गपद्दृष्ट्यात्रा ६७ दशवर्गा
दीनि बुध्वा यथावदनुमन्यसे ते शुत्या स्थाश्रमुपादेयांश्च त्यत्वा यथावदनुतिष्ठसि कच्चिदिति तेनोयस्थे नान्वयः दश
वर्गस्तु कामजः मृगया १ द्यूतं २ दिवास्वापः ३ परिवादः ४ स्त्रियः ५ मदः ६ नृत्यं ७ गीतं ८ वाद्यं ९ वृथापर्यटनं १०
पंचवर्गस्तु पंचविधं दुर्गं औदकं १ पार्वतं २ वार्क्षं ३ ऐरिणं ४ धान्वनं ५ चतुर्वर्गस्तु साम १ दानं २ भेदः ३ द

मंगलाद्यप्रयोगं च प्रत्युत्थानं च सर्वशः कच्चित्त्वं वर्जयस्येतान्राजदोषांश्चतुर्दश ६७
दशपंचचतुर्वर्गान्सप्तवर्गं च तत्त्वतः अष्टवर्गं त्रिवर्गं च विद्यास्तिस्रश्च राघव ६८

त्रिवर्ग

दंडः ४ सप्तवर्गस्तु स्वाम्यमात्यराष्ट्राणि च दुर्गकोशौ बलं सुहृत् परस्परोपकारीदं राज्यं सप्तांगमुच्यते १ अष्ट
वर्गस्तु पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थदूषणं वाग्दंडयोश्च पारुष्यं क्रोधजोपि गणोऽष्टक इति ८ त्रिवर्गस्तु उत्सा
ह शक्तिः १ प्रभुशक्तिः २ मंत्रशक्तिः ३ तिस्रो विद्याः त्रयी वार्ता दंडनीतिश्च त्रयी वेदत्रयी १ वार्ता कृष्यादि २ दंडनी
तिर्नीतिशास्त्रम् ३ ३ ६८

अर्थेन धर्मेण वा धत्से कच्चित् धर्मार्जनयोग्यपूर्वाह्णे अर्थार्जनं कृत्वा धर्मेण वा धत्से धर्मार्जनेन करोषि कच्चित् अर्थार्जि
नयोग्यमध्याह्ने धर्मार्जनं कृत्वा अर्थेन वा धत्से कच्चित् प्रीतिलोभेन सुखोपलिप्सया वेला हेतुना कामेन तदुभयकालसे
वितेन उभौ धर्मार्थौ न वा धत्से कच्चित् इत्यर्थः ६३ विभज्य सेवसे काले पूर्वाह्णे तदुत्तरकाले सायाह्ने सामोत्तरात्रिरू

कच्चिदर्थेन वा धर्ममर्थं धर्मेण वा पुनः उभौ च प्रीतिलोभेन कामेन न विबाधसे ६२ क
च्चिदर्थं च कामं च धर्मं च जयतां वरः विभज्य काले कालज्ञ सर्वान्भरत सेवसे ६३ क
च्चित्ते ब्राह्मणाः शर्म धर्मशास्त्रार्थकोविदाः आशंसन्ते महाप्राज्ञ पौरजानपदैः सह ६४
नास्तिक्यमनृतं क्रोधं प्रमादं दीर्घसूत्रताम् अदर्शनं ज्ञानवतामालस्यं पञ्चवृत्तिताम् ६५
एकचिन्तनमर्थानामनर्थज्ञैश्च चिन्तनम् निश्चितानामनारंभं मन्त्रस्यापरिरक्षणम् ६६

पेक्रमेण धर्मार्थकामसेवा काले ६३ शर्म सुखं आशंसन्ते प्रार्थयन्ते ६४ प्रमादमनवधानत्वं दीर्घसूत्रतां चिरक्रियत्वं प्र
वस्तुकर्तव्यस्य विचारादिना कालविलंबनं ज्ञानवतां विदुषामदर्शनं आलस्यं नित्यकृत्यालस्यं पञ्चवृत्तितां चक्षुरादि
पञ्चेन्द्रियपरवशतां ६५ अर्थानां राजप्रयोजनानामेकेन चिन्तनं अनर्थज्ञैर्विपरीतदर्शिभिश्चिन्तनं निश्चितानां मे

गृहीतः पालकैर्धनस्वामिना वाप्ययः धर्माधिकृतैः प्रयत्नेन शोधितः द्रव्यापहरणकाले दृष्टः सकारणाः चौर्यलब्धद्रव्य
सहितश्चोरः धनलोभात् चोरैः सौ वोत्कोचतयाद्दीयमानधनलोभात् पालकैर्न मुच्यते कश्चित् ५७ गृहाढ्यस्य धनिकस्य
दुर्गतस्य दरिद्रस्य च व्यसनेनैव विवादरूपसंकटे प्राप्तेन वामात्या विरागाः संतः विगतधनरागाः संतः गृर्पितस्यो व्यवहारं प

गृहीतश्चैव पृष्टश्च काले दृष्टः सकारणाः कश्चिन्न मुच्यते चोरो धनलोभान्नरर्षभ ५७
व्यसने कश्चिदाढ्यस्य दुर्गतस्य च राघव गृर्ष्यविरागाः पप्रपंति त्वामात्या बहुश्रुताः ५८
यानि मिथ्याभिशस्तानां पतंत्यस्राणि राघव तानि पुत्रान्पशून् घ्नंति प्रीत्यर्थमनुशासतः
५९ कश्चिद्वृद्धांश्च बालांश्च वैद्यमुख्यांश्च राघव दानेन मनसा वाचा त्रिभिरेतैर्बुभूषसे ६०
कश्चिद्गुरूंश्च वृद्धांश्च तापसान्देवतातिथीन् चैत्यांश्च सर्वान्सिद्धार्थान् ब्राह्मणांश्च नमस्यसि ६१

प्रपंति कश्चित् ५८ मिथ्याभिशस्तानां मिथ्याभिशापयुक्तानां प्रजानां यान्यश्रूणि पतंति तानि प्रीत्यर्थमनुशासतः भो
गार्थं राज्यं कुर्वतो राज्ञः पुत्रादीन् घ्नंति ५९ दानेन अभिमतवस्तुमतवस्तुप्रदानेन मनसा स्नेहेन वाचा सांत्ववचनेन
च त्रिभिरेतैर्बुभूषसे कश्चित् प्राप्तुमिच्छसि वशीकर्तुमिच्छसीति यावत् ६० चैत्यान् देवतावासभूतचतुष्पथस्थम
हावृक्षान् सिद्धार्थान् विद्यावृत्तयोभिः कृतार्थीकृतजन्मनो ब्राह्मणान् ६१

कर्मान्ताः कर्मकराः अविशङ्कया निर्भयतया ते प्रत्यक्षाः कच्चित् वा अथवा सर्वे ते उत्सृष्टाः परोक्षाः दर्शनात् अत्र कर्मक
रविषये मध्यममेव कारणं प्रति दर्शनादर्शनयोर्मध्यरीत्या करणमेवार्थप्राप्तिकारणं निःशङ्कतया प्रवेशने ऽवज्ञादि
संभवात् दर्शनाभावे कार्यहानिः स्यादिति भावः ५२ ५३ आयो धनागमः व्ययो भोगबलरक्षाद्यर्थं त्यागः अपात्रेषु न

कच्चिन्न सर्वे कर्मान्ताः प्रत्यक्षास्ते विशङ्कया सर्वे वा पुनरुत्सृष्टा मध्यमेवात्र कारणम् ५२
कच्चिद्दुर्गाणि सर्वाणि धनधान्यायुधोदकैः यन्त्रैश्च परिपूर्णानि तथा शिल्पिधनुर्धरैः
५३ आयस्ते विपुलः कच्चित्कच्चिदल्पतरो व्ययः अपात्रेषु न ते कच्चित्कोशो गच्छति राघ
व ५४ देवतार्थे च पित्रर्थे ब्राह्मणाभ्यागतेषु च योधेषु मित्रवर्गेषु कच्चिद्गच्छति ते व्ययः
५५ कच्चिदार्यो विशुद्धात्मा क्षारितश्चोरकर्मणा अपृष्टः शास्त्रकुशलैर्न लोभाद्बध्यते शु
चिः ५६

टविटगायकादिषु ५४ अभ्यागतोऽतिथिः व्ययः आयान्न्यून इति शेषः ५५ आर्यः साधुः विशुद्धात्मापि स्तेन
यदृच्छया चोरकर्मणा क्षारितः अभिशप्तः शास्त्रकुशलैरपृष्टं एव अनिर्णीतदोष एव लोभात् तदानीतनतदीयधनलो
भात् लौल्यान्न बध्यते न दंड्यते कच्चित् ५६

कृषिगोरक्षजीविनः वैश्यादयः सर्वे ते दयिताः स्वधर्मसंपादनद्वारा अभिमताः वार्तायां कृष्यादिवाणिज्ये संश्रितः आश्रितो लोकः जनः सु
खमेधते सुखं प्राप्नोतीति ४७ गुप्तिरिष्टप्रापणं परिहारश्च अनिष्टपरिहरणं ताभ्यां तेषां कृषिगोरक्षजीविनां भरणं कृतं कच्चिदिति सं
बंधः ४८ ताः स्त्रियः सुरक्षिताः स्वयेस्पर्धः आसां न श्रद्दधासि वचनमिति शेषः गुह्यं प्रच्छन्नकार्यप्रवर्तनं तु इह एतेष्विति मत्वा न भा

कच्चित्ते दयिताः सर्वे कृषिगोरक्षजीविनः वार्तायां संश्रितस्तात लोको हि सुखमेधते ४७
तेषां गुप्तिपरीहारैः कच्चित्ते भरणं कृतम् रक्ष्या हि राज्ञा धर्मेण सर्वे विषयवासिनः ४८ कच्चित्
स्त्रियः सांत्वयसि कच्चित्ताश्च सुरक्षिताः कच्चिन्न श्रद्दधास्यासां कच्चिद्गुह्यं न भाषसे ४९
कच्चिन्नागवनं गुप्तं कच्चित्ते संति धेनुकाः कच्चिन्न गणिकाश्वानां कुंजराणां च तृप्यसि ५०
कच्चिद्दर्शयसे नित्यं मनुष्याणां विभूषितम् उत्थायोत्थाय पूर्वाह्णे राजपुत्र महापथे ५१

षसे कच्चित् ४९ नागवनं गजोत्पत्तिस्थानभूतं वनं धेनुकाः काम्यधेनवः स्वार्थकः गणिकाः करिण्यः वेश्या करिण्यो गणि
केति वैजयंती करिण्यादिसंपादनविषये तृप्तिं मा प्राप्नोषि कच्चित् ५० भूषितं सभायां स्थित्वात्मानमिति शेषः ५१

 समुदितां प्रसिद्धां स्फीतां समृद्धाम् ४२ चैत्यशतैरग्निचयनप्रदेशैर्जुष्टः सुनिविष्टैः सुप्रतिष्ठितैर्जनैराकुलो निविडः प्रपाभिः पा

नीयशालाभिः ४३ सुकृष्टाः सीमाः तत्तत्क्षेत्रप्रान्तप्रदेशाः प्रशावच्छ्य यस्मिन्सतथा ४४ अदेवमातृकः नदीमातृक इत्यर्थः

प्रासादैर्विविधाकारैर्वृतां वैद्यजनाकुलाम् कच्चित्समुदितां स्फीतामयोध्यां परिरक्षसि
४२ कच्चिच्चैत्यशतैर्जुष्टः सुनिविष्टजनाकुलः देवस्थानैः प्रपाभिश्च तटाकैश्चोपशो
भितः ४३ प्रहृष्टनरनारीकः समाजोत्सवशोभितः सुकृष्टसीमा पशुमान्हिंसाभिरभिवर्जितः
४४ अदेवमातृको रम्यः श्वापदैः परिवर्जितः परित्यक्तो भयैः सर्वैः खनिभिश्चोपशोभितः
४५ विवर्जितो नरैः पापैर्मम पूर्वैः सुरक्षितः कच्चिज्जनपदः स्फीतः सुखं वसति राघवः ४६

तथा च हलायुधः नद्यम्बुजीवनो देशो नदीमातृक उच्यते वृष्टिनिष्पाद्यसस्यस्तु विज्ञेयो देवमातृक इति खनिभिः रत्नसुव
र्णादिजन्माद्याकरैः ईदृशो जनपदः सर्वैर्भयैः परित्यक्तः कच्चिदस्ति ४५ स च सुखं वसति कच्चिदित्यर्थः ४६ ४६ राम

लोकायतिकान् चार्वाकमतानुसारिणः प्रत्यक्षमात्रप्रमाणकान् अपगतान् लोकायतिकान् शुष्कतर्कवावदूकान् ब्राह्मणान् सेवसे कच्चित् ब्राह्मणत्वेपि तत्परित्यागे हेतुमाह अनर्थेति परलोकसाधनाभावरूपानर्थप्रतिपादने कुशलाः अत एव बालाः अज्ञाः वेदज्ञसन्निधाविति शेषः पंडितमानिनः स्वपृष्ठ्यैव केवलमात्मनः पंडितान्मन्यंते तान् त्वं ३८॥

कच्चिन्न लोकायतिकान्ब्राह्मणांस्तात सेवसे । अनर्थकुशला ह्येते बालाः पंडितमानिनः ३८

धर्मशास्त्रेषु मुख्येषु विद्यमानेषु दुर्बुधाः । बुद्धिमान्वीक्षिकीं प्राप्य निरर्थं प्रवदंति ते ३९

वीरैरध्युषितां पूर्वमस्माकं तात पूर्वकैः । सत्यनामां दृढद्वारां हस्त्यश्वरथसंकुलाम् ४०

ब्राह्मणैः क्षत्रियैर्वैश्यैः स्वकर्मनिरतैः सदा । जितेंद्रियैर्महोत्साहैर्वृतामार्यैः सहस्रशः ४१

द्वितीयलोकायतिकानां त्यागे हेतुमाह धर्मेत्यादि मुख्येषु मुख्यप्रमाणभूतेषु धर्मशास्त्रेषु विद्यमानेषु आन्वीक्षिकीं श्रुतिविरुद्धशुष्कतर्कविद्याजनितां बुद्धिमवलंब्य निरर्थं पुरुषार्थप्रयोजनरहितं वदंति ३९ अयोध्यां सत्यनामां परिरक्षसे कच्चित् सत्यनामामित्यजनंतत्वमार्षं अयोध्येति नाम सत्यं यथा भवति तथा रक्षसि कच्चिदित्यर्थः ४० आर्यैर्हृष्टैर्वणिक्कैः ४१

कच्चिदष्टादशेत्यत्र तीर्थानि च मंत्री १ पुरोहितः २ युवराजः ३ सेनापतिः ४ दौवारिकः ५ अंतःपुराधिकृतः ६ बंधनागाराधिकृतः ७
धनाध्यक्षः ८ राजाज्ञया आज्ञाप्येषु वक्ता ९ प्राड्विवाकसंज्ञो व्यवहारप्रष्टा १० धर्मासनाधिकृतः ११ व्यवहारनिर्णेता
सभ्याख्यः १२ सेनायाः जीवितभृतिदानाध्यक्षः १३ कर्मान्ते वेतनग्राहिणः १४ नगराध्यक्षः १५ राष्ट्रांतपालः राष्ट्रपाले
वाटविकः १६ दुष्टानां दंडनाधिकारी १७ जलगिरिवनदुर्गस्थलपालाः १८ एतान्येव स्वपक्षे मंत्रिपुरोहितयुव

कच्चिदष्टादशान्येषु स्वपक्षे दश पंच च त्रिभिस्त्रिभिरविज्ञातैर्वेत्सि तीर्थानि चारकैः
३६ कच्चिद्व्यपास्तानहितान्प्रतियातांश्च सर्वदा दुर्बलाननवज्ञाय वर्तसे रिपुसूदन ३७

राजान्हित्वा पंचदश एव केकस्मिन्विषये त्रिभिस्त्रिभिरविज्ञातैः परस्परमितरैश्चाविज्ञातैः एतान्यष्टादशतीर्थानि चारकै
र्वेत्सि कच्चित् स्वदेशेऽप्येते न्योयतोऽव्यवहारः शवस्येते न वेति चाराणि यं परदेशे चेति भावः ३६ व्यपास्तान्निष्काशितान प्र
तियातान्पुनरागतान्दुर्बलानपि ग्शनवज्ञाय दुर्बलोऽपमहितः किमस्माकं करिष्यतीत्युपेक्षां न करोषि कच्चित् ३७

विलंबे दोषमाह कालेति भृताः भृतिजीविनो भृत्याः ३३ कुलप्रज्ञाः ज्ञातप्रज्ञाः प्रधानतत् प्रधानाः ३४ जानपदः स्वजनपदेभवः

कालातिक्रमणेनैव भक्तवेतनयोर्भृताः भर्त्तुः कुप्यंति दुष्यंति सोनर्थः सुमहान्स्मृतः
३३ कच्चित्सर्वैस्तु राज्ञः स्वैः कुलप्रज्ञाः प्रधानतः कच्चित्प्राणांस्तवार्थेषु संत्यजंति समाहिताः
३४ कच्चिज्ज्ञानपदो विद्वान्दक्षिणः प्रतिभानवान् यथोक्तवादी दूतस्ते कृतो भरत पंडितः
३५

विद्वान् परामिप्रायज्ञः प्रतिभाववान् प्रत्युत्पन्नबुद्धिः यथोक्तवादी यथोक्तसंदेशवक्ता पंडितः परिच्छेता ३५ ३५ ३५

पतितं यष्टुकामं याजका इव कामयानं कामुकं स्त्रिय इव च उग्रप्रतिग्रहीतारं उग्रेणादेयेन धनस्य ग्रहीतारं त्वां नावजानन्ति कच्चित् अत्र जातिशेषः प्रतिज्ञातिक्रमेण उग्रकरग्रहणात् त्वयि नास्ति कच्चिदिति भावः २८ उपायकुशलं सामाद्युपायचतुरं वैद्यं विद्याविदं राजनीतिशास्त्रज्ञमिति यावत् भृत्यसंदूषणे रतं येन केनापि हेतुना भृत्यविघटने रतं शूरं मरणानि

कच्चित्त्वां नावजानन्ति याजकाः पतितं यथा उग्रप्रतिग्रहीतारं कामयानमिव स्त्रियः २८ उपायकुशलं वैद्यं भृत्यसंदूषणे रतम् शूरमैश्वर्यकामं च यो न हन्ति स वध्यते २९ कच्चिद्धृष्टश्च शूरश्च धृतिमान्मतिमाञ्छुचिः कुलीनश्चानुरक्तश्च दक्षः सेनापतिः कृतः ३० बलवन्तश्च कच्चित्ते मुख्या युद्धविशारदाः दृष्टापदाना विक्रान्तास्त्वया सत्कृत्य मानिताः ३१ कच्चिद्बलस्य भक्तं च वेतनं च यथोचितम् संप्राप्तकालं दातव्यं ददासि न विलम्बसे ३२

ऐश्वर्यकामं राज्याभिलाषिणं यो न हन्ति स वध्यते एवंविधपुरुषः त्वत्सन्निधौ न वर्तते कच्चित् २९ ... धृतिमान् विपदि प्रशस्तधैर्यः दक्षः चतुरः ३० मुख्याः गणमुख्याः दृष्टापदानाः दृष्टचरित्राः ... ते अपदानं पूर्वं कृतं पौरुषं येषां ते विक्रान्ताः शूराः सत्कृत्य मानिताः अर्थदानपूर्वकं श्लाघिताः कच्चित् ३१ भक्तं दैनंदिनं देयं वेतनं प्रतिमासदेयम् ३२

मूर्खाणांसहस्रात् पंडितंसमभ्यधिकम् अपकारिणां एकमिच्छसि कच्चित् पंडितपरिग्रहेहेतुमाह पंडितइति अर्थकृच्छ्रेषु अर्थसंकटेषु महन्निः
श्रेयसं कुर्यात् महदैश्वर्यं प्रापयेदित्यर्थः २२ सहायता कार्यक्षमता २३ विचक्षणोऽभ्यस्तनीतिशास्त्रः २४ भृत्यामहांतः २५ उप

कच्चित्सहस्रान्मूर्खाणामेकमिच्छसि पंडितम् पंडितो ह्यर्थकृच्छ्रेषु कुर्यान्निःश्रेयसं महत् २२ सहस्राण्यपि मूर्खाणां यद्युपास्ते महीपतिः अथवाप्ययुतान्येव नास्ति तेषु सहायता २३ एकोऽप्यमात्यो मेधावी शूरो दक्षो विचक्षणः राजानं राजपुत्रं वा प्रापयेन्महतीं श्रियम् २४ कच्चिन्मुख्या महत्स्वेव मध्यमेषु च मध्यमाः जघन्याश्च जघन्येषु भृत्याः कर्मसु योजिताः २५ अमात्यानुपधातीतान् पितृपैतामहाञ्छुचीन् श्रेष्ठान् श्रेष्ठेषु कच्चित्त्वं नियोजयसि कर्मसु २६ कच्चिन्नोग्रेण दंडेन भृशमुद्वेजिताः प्रजाः राष्ट्रे तवानुजानंति मंत्रिणः कैकयीसुत २७

धाः परीक्षाता अतीतान् तत्रालोलुपानित्यर्थः अत एव शुचीन् कराणा
त्रयः शुद्धिपरीक्षान् पितृपैतामहान् कुलक्रमागतान् २६ उद्वेजिताः प्रजाः मंत्रिणाः राष्ट्रे तव त्वां नानुजानंति नावमन्यंते कच्चित्

ए० वा० अ० ३४२ नैकः एकेन मंत्रे क्रियमाणे स्वकार्याभिनिवेशेन गुणदोषयोर्याथार्थ्यं न हलो न सिध्यति बहुभिर्मंत्रे क्रियमाणे एकमत्यमेव न घटते मंत्रभेदप्रसंगश्चेति भावः राष्ट्रं न परिधावति लोकैर्न ज्ञायत इत्यर्थः १८ लघुमूलं अल्पयत्नसाध्यं महोदयं महाफलं तेन दीर्घयसि न किंत्वेवयसि १९ पार्थिवाः सामंतपृथिवीश्वराः ते सर्वकार्याणि मंत्रितसर्वकार्याणि सुकृतान्येव कृतानि यत्नान्येव विदुः

कच्चिन्मंत्रयसे नैकः कच्चिन्न बहुभिः सह कच्चित्ते मंत्रितो मंत्रो राष्ट्रं न परिधावति १८ कच्चिदर्थं विनिश्चित्य लघुमूलं महोदयम् क्षिप्रमारभसे कर्तुं न दीर्घयसि राघव १९ कच्चित्तु सुकृतान्येव कृतरूपाणि वा पुनः विदुस्ते सर्वकार्याणि न कर्तव्यानि पार्थिवाः २० कच्चिन्न तर्कैर्युक्त्या वा ये चाप्यपरिकीर्तिताः त्वया वा तव वामात्यैर्बुध्यते तात मंत्रितम् २१

दुः कच्चित् कृतप्रायाणि वा क्षिप्रमेव फलोन्मुखानीति यावत् कर्तव्यानि न विदुः मंत्रेणाकर्तव्यतया निश्चितानि करणात्पूर्वं न विदुरित्यर्थः २० ये त्वदीया मंत्राः त्वया तवामात्यैर्वा अपरिकीर्तिताः अनुक्ताः अपि युक्त्या अर्थापत्त्या तर्कैः तत्साधैरनुमानैर्वा परैर्न बुध्यते किल किं च परकृतमंत्रितं त्वया त्वदमात्यैर्वा बुध्यते किल २१

वैद्यान्चिकित्साप्रवीणान्ब्राह्मणान्नित्यर्थः २भृतो ह्येषो मे ध्यो यो मिषज्यतीति श्रुत्युक्त्या निंदा तु शास्त्रानभिज्ञचिकित्साप
र तद्याजी चिकार्थश्च तत्परा वा शास्त्राभिज्ञस्य भैषज्यं तु महते प्रापायेति दिक् १३ इषुरमंत्रो वा शास्त्रयोगः २श्रेष्ठं समंत्रः

कच्चिद्देवान्पितॄन्भृत्यान्गुरून्पितृसमानपि वृद्धांश्च तात वैद्यांश्च ब्राह्मणां
श्चाभिमन्यसे १३ इष्वस्त्रवरसंपन्नमर्थशास्त्रविशारदम् सुधन्वानमुपाध्यायं
कच्चित्त्वं तात मन्यसे १४ कच्चिदात्मसमाः शूराः श्रुतवंतो जितेंद्रियाः कुलीनाश्चेंगि
तज्ञाश्च कृतास्ते तात मंत्रिणः १५ मंत्रो विजयमूलं हि राज्ञां भवति राघव सुसंवृतो
मंत्रिधुरैरमात्यैः शास्त्रकोविदैः १६ कच्चिन्निद्रावशं नैषि कच्चित्काले विबुध्यसे क
च्चिच्चापररात्रेषु चिंतयस्यर्थनैपुणम् १७

वरशाब्दउभयं संबद्धः २अर्थशास्त्रं राजनीतिशास्त्रं तत्र पंडिते सुधन्वा नामानं उपाध्यायं धनुर्वेदाचार्यं १४ १५ मंत्रिधुरैः
मंत्रिश्रेष्ठैः शास्त्रकोविदैर्नीतिशास्त्रनिपुणैः सुसंवृतः रक्षितः गुप्तः १६ अर्थनैपुणं अर्थप्राप्त्युपायम् १७ १७ १७

भ्रंशं प्राप्तमेव पक्षमवलंब्याह न तेराज्यं भ्रष्टमिति मूलभंगोरक्षया सामस्त्येन प्राप्तं केश निश्चयप्राप्त न जीवनपक्षमवलंब्याह कच्चि
त्शुश्रूषसे इति ७ आहर्ता कर्त्ता धर्मनिश्चयैः धर्मबुद्धिरित्यर्थः ८ उपाध्यायो वसिष्ठः नंदति मद्वनवासत्वदुःखेन्यता

कच्चित्सौम्य न तेराज्यं भ्रष्टं बालस्य शाश्वतम् कच्चिच्छुश्रूषसे तात पितुः सत्यपराक्रमः ७
कच्चिद्दशरथो राजा कुशली सत्यसंगरः राजसूयाश्वमेधानामाहर्ता धर्मनिश्चयः ८ स
कच्चिद्ब्राह्मणो विद्वान् धर्मनित्यो महाद्युतिः इक्ष्वाकूणामुपाध्यायो यथावत्तात पूज्यते ९
तात कच्चिच्च कौसल्या सुमित्रा च प्रजावती सुखिनी कच्चिदार्या च देवी नंदति कैकेयी १०
कच्चिद्विनयसंपन्नः कुलपुत्रो बहुश्रुतः अनसूयुरनुद्रष्टा सत्कृतस्ते पुरोहितः ११ कच्चि
दग्निषु ते युक्तो विधिज्ञो मतिमानृजुः हुतं च होष्यमाणं च काले वेदयते सदा १२

भाष्यामिति व्यंग्यम् १० कुलपुत्रः सत्कुलप्रसूतः अनुद्रष्टा वसिष्ठोपदिष्टानामुपद्रष्टा ते पुरोहितः यस्ते नवविप्राक्षपु
त्रः सुयज्ञोभिषेतः ११ अग्निषु अग्निकार्ये युक्तो नियुक्तः काले होमकाले वेदयते हुतं च होष्यमाणं चाग्निं १२

२२३ क्षतिदुःखितस्य भरतस्य दुःखमपनेतुं प्रश्नव्याजेन रामो धर्मानुपदिशति क्वचित्यादिना हे तात ते पिता क्वाभूत् इह परत्र वेत्यर्थः हि यतो जीवतस्तस्य सेवां हित्वा वनमागन्तुं नार्हसि मद्गमनन्निवर्तितु वै वा पितृशुश्रूषायाः अवश्यकर्तव्यत्वादिति भावः ४ दूराद्दूरावस्थितं केकयनगरात् चिरस्यागतं दुष्प्रतीकं कार्श्यवैवर्ण्यादिना दुर्ज्ञेयावयवं भरतमस्मिन्नरण्ये पश्यामि बत इति हर्षे हे तात

कथंचिदभिविज्ञाय विवर्णवदनं कृशम् भ्रातरं भरतं रामः परिजग्राह पाणिना २ आघ्राय रामस्तं मूर्द्धि परिष्वज्य च राघवम् अङ्के भरतमारोप्य पर्यपृच्छत्समाहितः ३ क्व नु ते भूत्पिता तात यदरण्यं त्वमागतः न हि त्वं जीवतस्तस्य वनमागन्तुमर्हसि ४ चिरस्य बत पश्यामि दूराद्भरतमागतं दुःप्रतीकमरण्येऽस्मिन् किं तात वनमागतः ५ कच्चिन्नु धारयेत्तात राजा यत्त्वमिहागतः कच्चिन्न दीनः सहसा राजा लोकान्तरं गतः ६

दुष्प्रतीकमतिभयंकरं वने किमागतः किमागमनप्रयोजनम् ५ यद्यस्मात् भरतागमनं राज्ञा तयावास्मात राज्ञमरणो दुःखाद्वा तत्रागम उपन्यस्यति कच्चिन्नु इति धारयेत्प्राणान् धारयति अथवा लोकान्तरंगतः यत्त्वमिहागत इत्यनुकर्षः ६ ६ ६ ६

४० राजसुतौ रामस्य लक्ष्मणौ ४१ अश्रूण्यमुंचन् प्रविहाय हर्षं पूर्वं तद्दर्शनजसंतोषः पश्चात्तद्दुःखजदुःखाद्श्रूण्यातश्च ४२ इति नवनवतितमः सर्गः ९९ जटिलमित्यादि दुर्दर्शं दुःखेन द्रष्टुं योग्यं युगान्ते भास्करं यथेति भुवि पतितमिति शेषः नन्वद्य प्रीतितमे सर्गे जटाचीराणि धारय- न्निति भरतस्य जटाधारणादिकं श्रूयते नवतितमे सर्गे तु वसानो वाससी क्षौमे भरतः तु राजदर्शनवेलायां क्षौमधारणं श्रूयते अत्र जटिलं

प्रागृह्य चापि रामस्य ववंदे चरणौ रुदन ॥ तावुभौ च समालिंग्य रामोप्यश्रूण्यवर्तयत ॥३९॥ ततः सुमंत्रेण गुहेन चैव समीयतू राजसुताव रण्ये ॥ दिवाकरश्चैव निशाकरश्च यथांबरे शुक्र बृहस्पतिभ्याम ॥४०॥ तान्पार्थिवान्वारणयूथपाभान्समागतांस्तत्र महत्यरण्ये ॥ वनौकसस्तेपि समीक्ष्य सर्वेप्यश्रूण्यमुंचन्प्रविहाय हर्षम ॥४१॥ इत्यार्षे रामायणे अयोध्याकांडे नवनवतितमः सर्गः ॥९९॥ जटिलं चीरवसनं प्रांजलिं पतितं भुवि ददर्श रामो दुर्दर्शं युगान्ते भा- स्करं यथा १

चीरवसनमिति जटावल्कलधारणासिद्धवदनुद्यते इति चेदुच्यते प्रतिसायाराज्ञीऽग्रह पुरेकृत्वात परे घुभरद्वाजदर्शनानंतरं जटावल्कलधारणं करिष्यामीत्यभिप्रायेणागतः तत्र भरद्वाजेनातिथ्येन निमंत्रितत्वाद्देवकार्यार्थं भाविन्द्र रद्वाजाश्रमनिर्गमना- नंतरं जटावल्कलधारणं कृतवानिति सर्वं समंजसम १

३३ यथादिष्टैर्यथाविहितैः ऋत्विक्श्रेष्ठैः प्रामाण्यैर्यस्य धर्मसंचयो प्रकृतः तस्य शरीरं श्रेष्ठं प्रोतसंभृतमुत्पन्नं धर्मपरिमार्गिते ३४ मलेन

एष धारयद्यो विविधाश्रितः सुमनसस्तदा सोऽयं जटाभारमिमं सहते राघवः कथम् ३२ य
स्य यज्ञैर्यथादिष्टैर्युक्तो धर्मस्य संचयः शरीरं श्रेष्ठं प्रातं भूतं स धर्मपरिमार्गिते ३३ चंदने
न महार्हेण यस्यांगमुपसेवितम् मलेन तस्यांगमिदं कथमार्यस्य सेव्यते ३४ मन्निमि
त्तमिदं दुःखं प्राप्तो रामः सुखोचितः धिग्जीवितं नृशंसस्य मम लोकविगर्हितम् ३५
इत्येवं विलपन् दीनः प्रस्विन्नमुखपंकजः पादावप्राप्य रामस्य पपात भरतो रुदन् ३६
दुःखाभितप्तो भरतो राजपुत्रो महाबलः उक्त्वार्येति सकृद्दीनं पुनर्नोवाच किंचन ३७
बाष्पापिहितकंठश्च प्रेक्ष्य रामं यशस्विनम् आर्येत्येवाभिसंक्रुश्य व्याहर्तुं नाशकत्त
च ३८

नदंडवत्त्विषवरास्नानात् स्थितेन ३५ ३६ पादाववप्राप्येति दुःखातिप्रापवशात् ३७ तत एव पुनर्नोवाच ३८ ततः बा
ष्पावरुद्धकंठत्वात् ३९

टी०वा०अ० २७ प्राप्स्यते ब्रह्माणं सरिष्ठिकती रमिव स्थितं २८ ॥ अभ्यधावत धावन्निव त्वरया जगाम क्षिती यभरत प्रारुदत तत्र रान्वयी २९
३३९ दृष्ट्वैव दर्शनमात्रेणैवार्तः खिन्नः सन्तो चार्ति धैर्यं धारयितुमशक्नुवन् अत एव वाष्पसंदिग्धवर्णायागिरावचनम

सिंहस्कंधं महाबाहुं पुंडरीकनिभेक्षणम पृथिव्याः सागरान्तायाः भर्त्तारं धर्मचारिणम
२७ उपविष्टं महाबाहुं ब्रह्माणमिव शाश्वतम स्थंडिले दर्भसंस्तीर्णे सीतया लक्ष्मणेन च २८ तं दृष्ट्वा भरतः श्रीमान दुःखमोहपरिप्लुतः अभ्यधावत धर्मात्मा भरतः। केकेयीसुतः २९ दृष्ट्वैव विललापार्तो बाष्पसंदिग्धयागिरा अशक्नुवन्धारयितुं धैर्याद्वचनमब्रुवन ३० यः संसदि प्रकृतिभिर्भवेद्युक्त उपासितुम वन्यैर्मृगैरुपासीनः सोयमास्ते ममाग्रजः ३१ वासोभिर्वहुसाहस्रैर्यो महात्मा पुरोचितः मृगाजिने सोयमिह प्रवस्ते धर्ममाचरन ३२

ब्रुवन्न व्यक्तं ब्रुवन्विललाप ३० विलापप्रकारमाह यः संसदीति ३१ बहुसहस्र द्रव्यमूल्यैर्वासोभिरलंकर्तुं यः पुरोचितः सम्मृगाजिने श्वेतरीयोत्तरीयरूपे मृगाधर्मरागो प्रवस्ते धर्मपितृवचनपरिपालनरूपम ३२ राम३३९

भारसाधनैः श्वतिगुरुकार्यसाधनैः २० भोगवती नागलोकः २१ महारजतवासोभ्यां सुवर्णनिर्मितकोशाभ्यां चर्मफलके २२ गो
धा ज्याघातवारणांगुलित्रं अंगुलित्राणं काञ्चनभूषितैर्गोधांगुलित्रैरासक्तैः सततस्थापितैः उपलक्षितामिति शेषः

हा

शक्रायुधनिकाशैश्च कार्मुकैर्भारसाधनैः रुक्मबद्धैर्मसारैः शोभितां शत्रुबाधनैः २० ष
कैरश्मिप्रतीकाशैर्घोरैस्तूणगतैः शरैः शोभितां दीप्तवदनैः सर्पैर्भोगवतीमिव २१ म
हारजतवासोभ्यामसिभ्यां च विराजिताम् रुक्मबिंदुविचित्राभ्यां चर्मभ्यां चापि शोभिताम्
२२ गोधांगुलित्रैरासक्तैश्चित्रैः काञ्चनभूषितैः अरिसंघैरनाधृष्यां मृगैः सिंहगुहामिव
२३ प्रागुदक्प्रवणां वेदिं विशालां दीप्तपावकाम् ददर्श भरतस्तत्र पुण्यां रामनिकेतने
२४ निरीक्ष्य स मुहूर्तं तु ददर्श भरतो गुरुम् उटजे राममासीनं जटामण्डलधारिणम् २५ कृ
ष्णाजिनधरं तं तु चीरवल्कलवाससम् ददर्श राममासीनमभितः पावकोपमम् २६

सिंहगुहामिव पाणिप्राप्तेनेव ददर्श लक्ष्मणः २३ प्रागुदक्प्रवणां ईशानभागे निम्नां १४ निरीक्ष्येति अग्निमिति शेषः गुरुं रामं ददर्श २५
उटजे राममित्यादि विशेषणान्तराभिधानार्थं ददर्शेति पुनर्वचनं अभितः पावकोपमं परितः पावकवदत्युग्रमित्यर्थः २६

सराघवो भरतः मंदाकिनीमनुचित्रकूटं प्राप्तः तं जनं मम मा सादिजनं १४ जगत्यां भूमौ धीरासन्ने योगिनामासने १५ १६ इति लोके
न समाकुष्टो निंदितो यस्माद् ततो मे जन्म धिक् स्तोहमेतत् दपप्राः परिहाराय रामं प्रसादयन् रामप्रसादहेतवे तस्य पादेषु पूजायां।

अथ पागत्वा मुहूर्तं तु चित्रकूटं स राघवः मंदाकिनीमनुप्राप्तस्तं जनं चेदमब्रवीत् १४ जगत्यां
पुरुषव्याघ्र आस्ते वीरासने रतः जनेंद्रो निर्जनं प्राप्य धिङ्मे जन्म सजीवितम् १५ मत्कृते व्य
सनं प्राप्तो लोकनाथो महाद्युतिः सर्वान्कामान्परित्यज्य वने वसति राघवः १६ इति लोक
समाकुष्टः पादेष्वद्य प्रसादयन् रामं तस्य पतिष्यामि सीतायाः लक्ष्मणस्य च १७ एवं स
विलपंस्तस्मिन् वने दशरथात्मजः ददर्श महतीं पुण्यां पर्णशालां मनोरमाम् १८ सा
लतालाश्वकर्णानां पर्णैर्बहुभिरावृताम् विशालां मृदुभिस्तीर्णां कुशैर्वेदिमिवाध्वरे १९

वहुवचनं सीतायाः लक्ष्मणस्य च पादयोः पतिष्यामि स्वापराधप्रसादनाय कनीयसः स्वपि प्रणामो लोकप्रसिद्धः १७ १८
सालो मद्रुपर्णाः अश्वकर्णाः सर्जतरुः १९

एवमेतान्पदार्थान्पश्यन् गच्छन्नेव शत्रुघ्नमब्रवीत् ८ इतः अस्मात्प्रदेशान्मन्दाकिनीं नातिदूरे मन्ये प्रत्यासन्नां मन्ये इत्यर्थः यतो
यं भरद्वाजो ब्रवीत्तं देशं प्राप्ताः स्मेति मन्ये ९ यत उच्चैर्बद्धानि चीराणि तत् स्यादिति काले मार्गस्य स्पष्टदर्शनाय उपकाले जलाहर

गच्छन्नेव महाबाहुर्द्युतिमान्भरतस्तदा । शत्रुघ्नं चाब्रवीद्धृष्टस्तानमात्यांश्च सर्वशः ८
मन्ये प्राप्ताः स्म तं देशं भरद्वाजो यमब्रवीत् । नातिदूरे च मन्येहं नदीं मन्दाकिनीमितः ९ उच्चै
र्बद्धानि चीराणि लक्ष्मणेन भवेदयम् । अभिज्ञानकृतः पन्था विकाले गन्तुमिच्छता १०
इदं चोदात्तदन्तानां कुञ्जराणां तरस्विनाम् । शैलपार्श्वे परिक्रान्तमन्योन्यमभिगर्जताम् ११
यमेवाधातुमिच्छन्ति तापसाः सततं वने । तस्यासौ दृश्यते धूमः संकुलः कृष्णवर्त्मनः १२ अ
त्राहं पुरुषव्याघ्रं गुरुसत्कारकारिणम् । आर्यं द्रक्ष्यामि संहृष्टो महर्षिमिव राघवम् १३

णाय गन्तुमिच्छता लक्ष्मणेन अभिज्ञानकृतः कृताभिज्ञानः आश्रमपन्थाः अयमेव भवेदिति संबंधः १० उदात्तदन्तानां इदं प
रिक्रान्तं परिक्रमणस्थानम् ११ तापसाः यमग्निं सततमाधातुं सायंप्रातर्होमार्थं सर्वदा रक्षितुमिच्छन्ति तस्यासौ दृश्यते धूमः संकु
लो निबिडः १२ १३

रामदर्शनजस्तर्षः रामदर्शनमुद्दिश्य जनितोऽभिलाषः भरतवत्कुत्तु घ्नस्य सुमंत्रस्य च अतः शत्रुघ्नं भरतमनुधावंतं सूदू
रात्तं समीपे यथा भवतितथान्वपद्यत अन्वधावत् ३ तापसानामालयैः सह संस्थितां पर्णकुटीं अग्न्यगार निवास

सुमंत्रस्त्वपि शत्रुघ्नमदूरादन्वपद्यत रामदर्शनजस्तर्षो भरतस्येव तस्य च ३ गच्छ
न्नेवाथ भरतस्तापसालयसंस्थिताम् भ्रातुः पर्णकुटीं श्रीमानुटजं च ददर्श ह ४
शालायास्त्वग्रतस्तस्या ददर्श भरतस्तदा काष्ठानि चावभग्नानि पुष्पाण्युपचितानि
च ५ लक्ष्मणस्य च रामस्य ददर्शाश्रममेयुषः कृतं वृक्षेष्वभिज्ञानं कुशचीरैः
क्वचित्क्वचित् ६ ददर्श च वने तस्मिन्महतः संचयान्कृतान् मृगाणां महिषाणां च
करीषैः शीतकारणात् ७

भ्रातुः पर्णशालां उटजं च बहिः सखावस्थानार्थमुपकल्पितमाश्रमं च ददर्श
सर्थेः ४ तस्याः शालायाः पर्णकुटीसंज्ञायाः अवभग्नानि होमार्थं उपचितानि वल्यर्थं संपादितानि ५ एयुषः आश्र
वतः आरुह्य पूर्वादिशाः कुशः कुशचीरैः वल्कलैरध्वमार्गपरिज्ञानार्थं कृतमभिज्ञानचिन्हं ददर्श ६ शीतकरणात् शीतनिवृत्ति

द्रुमजालानिमध्येनद्रुमजालानांमध्ये १५ अग्नेर्ध्वजंधूमं १६ तंध्वजम् १७ पुण्यजनास्तपस्विनःपुनर्निवेश्य अग्रन्वेषणानि
योजितामपिचमूंसंस्थापयित्वागुहेनेतिशेषधानजनोपलक्षणाम् १८ इत्यष्टनवतितमःसर्गः ९८ अनुदर्शयन्रामाश्रमम्

सतानिद्रुमजालानिजातानिगिरिसानुषु॥पुष्पिताग्राणिमध्येनजगामवदतांवरः॥१५॥
सगिरेश्चित्रकूटस्यसालमासाद्यपुष्पितम्॥रामाश्रमगतस्याग्नेर्ददर्शध्वजमुच्छ्रित
म्॥१६॥तंदृष्ट्वाभरतःश्रीमान्मुमोदसहबांधवैः॥अत्ररामइतिज्ञात्वागतःपारमिवांभसः॥
१७॥सचित्रकूटेतुगिरौनिशाम्यरामाश्रमंपुण्यजनोपपन्नम्॥गुहेनसार्धंत्वरितोजगामपु
नर्निवेश्यैवचमूंमहात्मा॥१८॥इत्यार्षेरामायणेवाल्मीकीयेअयोध्याकांडेअष्टनवतितमः
सर्गः॥९८॥निविष्टायांतुसेनायामुत्सुकोभरतस्ततः जगामभ्रातरंद्रष्टुंशत्रुघ्नमनुदर्शयन्१
ऋषिंवसिष्ठंसंदिश्यमातॄर्मेशीघ्रमानय इतित्वरितमग्रेसजगामभ्रातृवत्सलः २ राम

समीपवर्तिचिन्हमितिशेषः १ आनयेतिसंदिश्यपश्चात्त्वरितमग्नेजगामनतुमातॄःप्रतीक्ष्यस्थित इत्यर्थः २ सीतारामाभ्यांनमः

पार्थिवव्यंजनान्वितौ छत्रचामरविदंकुशादि धा कल्पादिमहाराजलक्षणयुक्तौ चरतौ यावत्तिरसा न ग्रहीष्यामितावन्मेन शांतिरित्यन्वयः ९ १० वैदेहीमहाकुलप्रसूतामहाभागामहाभाग्यवतीकृताकृत्या कृतार्थी चतत्फलं तदेतुं चाह भर्तारमन्तर्भविष्यति १२

यावन्नचरतोभ्रातुः पार्थिवव्यंजनान्वितौ शिरसाप्रग्रहीष्यामि नमेशांतिर्भविष्यति ९ याव

न्नराजेराज्यार्हः पितृपैतामहेस्थितः अभिषिक्तोजलक्लिन्नोनमेशांतिर्भविष्यति १० कृ

तकृत्यामहाभागावैदेहीजनकात्मजा भर्तारंसागरांतायाः पृथिव्यायानुगच्छति ११

सुभगश्चित्रकूटोसौगिरिराजोपमोगिरिः यस्मिन्वसतिकाकुत्स्थः कुबेरइवनंदने १२

कृतकार्यमिदंदुर्गंवनंव्यालनिषेवितम् यदध्यास्तेमहातेजारामः शस्त्रभृतांवरः १३

एवमुक्त्वामहाबाहुर्भरतः पुरुषर्षभः पद्भ्यामेवमहातेजाः प्रविवेशमहद्वनम् १४

गिरिराजोपमः हिमवत्सदृशः नंदनेकुवेरोद्याने १२ कृतकार्यं कृतार्थं यस्यावरत्वमोचकाममपादरजोभ्याजस्याकृतार्थमित्यर्थः दुर्गं दुःप्रवेशम् १३ १४ राम ३३६

यथोद्दिष्टं अमुकस्यामुकदिशिवासः इतिस्वाम्युपदिष्टप्रदेशमनतिक्रम्यनिविष्टसैन्य इत्यर्थः भरतोविनीतार्हमिदंवाक्यंशत्रुघ्न
मब्रवीदित्यन्वयः २ लुब्धैर्निषादैरभिर्गुहमनुष्यैः ३ ज्ञातिसहस्रेणपरिवृतः ४ अमात्यैःपौरैश्चसहगुरुभिश्चसहद्विजा

निविष्टमात्रेसैन्येतुयथोद्दिष्टंविनीतवत् भरतोभ्रातरंवाक्यंशत्रुघ्नमिदमब्रवीत् २ क्षिप्रंवन
मिदंसौम्यनरसंघैःसमंततः लुब्धैश्चसहितैरेभिःत्वमन्वेषितुमर्हसि ३ गुहोज्ञातिसहस्रेण
शरचापासिपाणिना समन्वेषतुकाकुत्स्थावस्मिन्परिवृतःस्वयम् ४ अमात्यैःसहपौरैश्च
गुरुभिश्चद्विजातिभिःसहसर्वंचरिष्यामिपद्भ्यांपरिवृतःस्वयम् ५ यावन्नरामंद्रक्ष्यामिल
क्ष्मणंवामहाबलम् वैदेहींवामहाभागांनमेशान्तिर्भविष्यति ६ यावन्नचन्द्रसंकाशंद्रक्ष्या
मिशुभमाननम् भ्रातुःपद्मपलाशाक्षंनमेशान्तिर्भविष्यति ७ सिद्धार्थःखलुसौमित्रिर्यश्चन्द्र
विमलोपमम्मुखंपश्यतिरामस्यराजीवाक्षंमहाद्युतिम् ८

तिभिःपरिवृतःपद्भ्यांसर्वंवनंचरिष्यामि ५ शान्तिर्दुःखशान्तिः ६ ७ चन्द्रविमलोपमंविमलचन्द्रसदृशम् ८

अवतीर्येति रामाज्ञयेत्यादिः २८ रामाश्रमस्य संमर्दोनिभवेदितिभरतेन संदेष्टा आज्ञप्ता सेनाप्रोत्स्य समंतात् दूरभागे वासम कल्पयत् २९ अध्यर्धं सार्धयोजनम् ३० धर्मपुरस्कृत्य दर्पं विधूय स्थितेन नीतिमता भरतेन प्रसादिता प्रसादिता सेना विरो

अवतीर्य तु सा लेनागारात्तस्मात्स समितिंजयः॥ लक्ष्मणाश्रो जलिर्भूत्वा तस्थौ रामस्य पार्श्वतः २८ भरतेनाथ संदिष्टा संमर्दो न भवेदिति॥ समंतात्तस्य प्रोत्स्य सेना वासमकल्पयन्॥ २९॥ अध्यर्धमिक्ष्वाकु चमूर्योजनं पर्वतस्य सा॥ पार्श्वे न्यविशदावृत्य गजवाजि नराकुला॥ ३०॥ सा चित्रकूटे भरतेन सेना धर्मं पुरस्कृत्य विधूय दर्पम्॥ प्रसादनार्थं रघुनंदनस्य विरोचते नीतिमता प्रणीता॥ ३१॥ इत्यार्षे रामायणे अयोध्याकांडे सप्तनवतितमः सर्गः॥ ९७॥ निवेश्य सेनां तु विभुः पद्भ्यां पादवतां वरः अभिगंतुं स काकुत्स्थमियेष गुरुवर्तकम् १

चते इति संबंधः ३१ इति सप्तनवतितमः सर्गः ९७ पादवतां वरः प्राणिनां परो विभुः भरतः गुरुवर्तिकं गुरुवचनानुष्ठानपरम्

नौमुखोचितौमन्यमानः वनवासमनुध्यायकथं विचिंत्य २२ इमौ वैदेहीमित्यन्वयः २३ गोत्रवंतौ प्रशस्तनामानौ प्रशस्तकुल
प्रसूतौ वा २४ पितुरागमनं चिन्हांतरमाह सएषइति कंपतेचलति खागच्छति स्वयंशत्रुंजयोरामे रासयज्ञादत्तादन्य

अप्यवानौ ध्रुवंमन्येमन्यमानःसुखोचितौ वनवासमनुध्यायमहापश्यतिनेष्यति २२ इमौ
वाप्यथवैदेहीमस्पंतसुखसेविनीम् पितामेराघवः श्रीमान्वनादादाप्यास्यति २३ एतौ
तौसंकाशौतेगोत्रवंतौमनोरमौ वायुवेगसमौवीरजवनौतुरगोत्तमौ २४ सएषहिमहाकायः
कंपत्तेवाहिनीमुखे नागःशत्रुंजयोनाम वृद्धस्तातस्यधीमतः २५ नतुपश्यामितच्छत्रंपा
दुरंलोकसत्कृतम् पितुर्दिव्यंमहाभागसंशयोभवतीहमे २६ वृक्षाग्रात्समवरोहत्वंकुरुलक्ष्म
णमद्वचः इतीवरामोधर्मात्मासौमित्रिंतमुवाचह २७

एव अतएवतातस्यशत्रुंजयइत्युक्तं २५ इहच्छत्रविषये
२६ इतीवरत्येवसौमित्रिं वृक्षाग्रस्थितेधर्मात्मारामउवाच अथवृक्षादवरोहणमाज्ञापयति मद्वचः कुरु पूर्वोक्तंविहाययमद्वच
सासालावरोहणंकुर्वित्यर्थः २७

 प्राणमात्मनः समं भ्रातरमित्यन्वयः १६ इमां वाचं भरतवधविषयां प्रदीयतामिति वक्ष्यामीत्यन्वयः १७ ननु त्वदुक्तोपि स न दद्या
 त्तत्राह उच्यमान इति प्रयच्छेति सुच्यमाणः सर्पः राज्यलिप्सा चेत्तदेव दापयिष्यामि किं भ्रातृवधेनेत्याशयः १८ लज्जया गा

कथं नु पुत्राः पितरं हन्युः कस्यांचिदापदि भ्राता वा भ्रातरं हन्यात्सौमित्रे प्राणमात्मनः १६ यदि रा
ज्यस्य हेतोस्त्वमिमां वाचं प्रभाषसे वक्ष्यामि भरतं दृष्ट्वा राज्यमस्मै प्रदीयताम् १७ उच्यमानो
हि भरतो मया लक्ष्मण तत्त्वतः राज्यमस्मै प्रयच्छेति वाढमित्येव वक्ष्यति १८ तथोक्तो धर्मशी
लेन भ्राता तस्य हिते रतः लक्ष्मणः प्रविवेशेव स्वानि गात्राणि लज्जया १९ तद्वाक्यं लक्ष्मणः श्रु
त्वा व्रीडितः प्रत्युवाच ह त्वां मन्ये द्रष्टुमायातः पिता दशरथः स्वयम् २० व्रीडितं लक्ष्मणं दृष्ट्वा
भावज्ञः प्रत्युवाच ह एष मन्ये महाबाहुरिहास्मान्द्रष्टुमागतः २१

त्राणि प्रविवेशेवत्यलज्जातिशयात्स्वांतसंकुचितोभूदित्यर्थः तस्य रामस्य हिते रतः १९ व्रीडातिशये न मसंगात्त्वां प्रत्यतीत्तदिति २०
भावज्ञो रामोप्योचितसेन लक्ष्मणाकृतप्रस्तावमेव प्रपंचयति व्रीडितमित्यादिना एषः पिता २१

१०।११ रूप्यतद्विषये रोषं कृत्वा पितरं प्रसाद्य त्वद्दत्तराज्यं प्राप्तेन मया भ्रात्रा पदीयेत भक्तोनतेसत्यभ्रंशादोष इति तदनुमन्यस्वेति
प्रसाद्य १२ एष भरतः त्वस्मान्द्रष्टुमिच्छतीति पर्त्ते एतत्प्राप्तकालं कार्यं सो चिंतमि सर्पः १३ भरतेन कदाचित् विप्रियं कृतपूर्वं किं

म

श्रुत्वा प्रव्राजितं मां हि जटावल्कलधारिणम् जानक्या सहितं वीर त्वया च पुरुषोत्तम १०
स्नेहेनाक्रान्तहृदयः शोकेनाकुलितेन्द्रियः द्रष्टुमभ्यागतो ह्येष भरतो नान्यथागतः ११
अम्बां च केकयीं रुष्य परुषं चाप्रियं वदन् प्रसाद्य पितरं श्रीमान् राज्यं मे दातुमागतः १२ प्राप्तका
लं यदेषोस्मान्भरतो द्रष्टुमर्हति अस्मासु मनसाप्येष नाहितं किंचिदाचरेत् १३ विप्रियं कृतपू
र्वं ते भरतेन कदा नु किं ईदृशं वा भयं तेद्य भरतं यद्विशंकसे १४ नहि ते निष्ठुरं वाच्यो भरतो ना
प्रियं वचः अहं ह्यप्रियमुक्तः स्यां भरतस्याप्रिये कृते १४ ८

तेन ईदृशं भयं वा त्वदुक्तसदृशं भयजनकं वा
कं कृतपूर्वं किं प्रत्युत मम भरते तेषां कसेई इति संबंधः १४ अतः ते त्वया भरतो निष्ठुरं परुषं प्रति एवा प्रियं यथा तथा
न वाच्यः यतो भरतस्य अप्रिये अप्रियवचने कृते उक्ते सति अहं हि अहमेव अप्रियमुक्तः स्यां त्वया १५

२

रा०वा०अ० सापवादेनापि ज्ञाभरताप्रदत्तराज्यं प्राप्नोय हत्वा निस्पवाद सहितेन ३ ४ एतदुक्तार्थजातमुदिश्य प्रतिशृणोमि प्रतिज्ञां करोमि
३३३ ५ ३ उक्तार्थमेव शपथरूपेण द्रढयति भ्रातॄणामिति संग्रहार्थं सम्यक्पालनार्थं अत एव तेषां सुखार्थं च ६ ७ भरतादिसुखा

पितुः सत्यं प्रतिश्रुत्य हत्वा भरतमागतम् किं करिष्यामि राज्येन सापवादेन लक्ष्मण ३ य
द्द्रव्यं बांधवानां वा मित्राणां वा क्षये भवेत् नाहं तत्प्रतिगृह्णीयां भक्ष्यान्विषकृतानिव
४ धर्ममर्थं च कामं च पृथिवीं चापि लक्ष्मण इच्छामि भवतामर्थे एतत्प्रतिशृणोमि
ते ५ भ्रातॄणां संग्रहार्थं च सुखार्थं चापि लक्ष्मण राज्यमप्यहमिच्छामि सत्येनायुधमाल
भे ६ नेयं मम मही सौम्य दुर्लभा सागरांबरा नहीच्छेयमधर्मेण शक्रत्वमपि लक्ष्मण ७
यद्विना भरतं त्वां च शत्रुघ्नं चापि मानद भवेन्मम सुखं किंचिद्भस्म तत्कुरुतां शिखी ८
मन्येहमागतो योध्यां भरतो भ्रातृवत्सलः मम प्राणात्प्रियतरः कुलधर्ममनुस्मरन् ९

न्नत्वत्तरां प्रत्सुखं तदग्निर्भस्म कुरुतां न तन्मम ग्राह्यमित्यर्थः ८ एष भरतो द्रष्टुमभ्यागत इति मन्ये इति तत्तोपेनान्वयः आगतो
मातुलगृहादिति शेषः कुलधर्मं ज्येष्ठस्य राज्यमित्येवंरूपम् ९

असत्कारं कैकेयीकृतं २८ शत्रुशरीराणि भिंदन्काननं शोणितोक्षितं करिष्य इत्यन्वयः २९ ३० भरतलक्ष्मणयोः समतयाप्येक
शेषत्वाल्लक्ष्मणस्य भरतविषये एवंवादः रामस्य तूभयोरपि स्वीयकरणात्वान्न क्वापि रोष इति तत्त्वम् ३१ इति षण्णवतितमः

अद्येमं संयतं क्रोधमसत्कारं च मानद मोक्ष्यामि शत्रुसैन्येषु कक्षेष्विव हुताशनम् २८
अद्यैव चित्रकूटस्य काननं निशितैः शरैः छिंदञ्छत्रुशरीराणि करिष्ये शोणितोक्षितम्
२९ शरैर्निर्भिन्नहृदयान्कुंजरांस्तुरगांस्तथा श्वापदाः परिकर्षंतु नरांश्च निहतान्
मया ३० शराणां धनुषश्चाहमनृणोस्मिन्महावने ससैन्यं भरतं हत्वा भविष्यामि न
संशयः ॥३१॥ इत्यार्षे रामायणे अयोध्याकांडे षण्णवतितमः सर्गः ॥ ९६ ॥ सुसंरब्धं तु सौमित्रिं ल
क्ष्मणं क्रोधमूर्छितम् रामस्तु परिसांत्व्याथ वचनं चेदमब्रवीत् १ किमत्र धनुषा का
र्यमसिना वा सचर्मणा महेष्वासे महाप्राज्ञे भरते स्वयमागते २

सर्गः ९६ अथ रामो भगवान्सर्वभूत
भावज्ञस्तत्क्रोधमयनप्रतीतदागमनप्रयोजनकथनेन भरतं प्रति सुसंरब्धं रागोद्युक्तम् १ अत्र भरतविषये २

अतो गृहीतधनुषाविति २० अपि नौ वशमागच्छेदिति कामप्रवेदने लिङ् नौ आवयोः यत्कृते महाद्व्यसनं त्वया प्राप्तमित्युत्तरे

गृहीतधनुषौ चावां गिरिं वीर श्रयावहे अथवेहैव तिष्ठावः सन्नद्धावुद्यतायुधौ २०
अपि नौ वशमागच्छेत्कोविदारध्वजो रणे अपि द्रक्ष्यामि भरतं यत्कृते व्यसनं महत् २१
त्वया राघव संप्राप्तं सीतया च मया तथा यन्निमित्तं भवान्राज्यात् च्युतो राघव शाश्वता
त् २२ संप्राप्तोऽयमरिर्वीर भरतो वध्य एव मे भरतस्य वधे दोषं नाहं पश्यामि राघव २३
पूर्वापकारिणां त्यागेन ह्यधर्मो विधीयते २४ पूर्वापकारी भरतस्त्यक्तधर्मश्च राघव
एतस्मिन्निहते कृत्स्नामनुशाधि वसुंधराम् २५ अद्य पुत्रं हतं संख्ये कैकेयी राज्यकामु
का मया पश्येत्सुदुःखार्ता हस्तिभग्नमिव द्रुमम् २६ कैकेयीं च वधिष्यामि सानुबंधां
सबांधवाम् कलुषेणाद्य महता मेदिनी परिमुच्यताम् २७

णान्वयः २१ यन्निमित्तं यस्माद्भरताद्धेतोः
२२ २३ त्यागे वधे २४ अपकारश्च नप्रामादिकः स्याहत्यक्तधर्मश्चेति २५ संख्ये युद्धे २६ सानुबंधां मे पश्य राघानुबंधपुत्रां कलु
षेणा पापेन कैकेयीरूपेण २७

ते पुरुषव्याघ्रः सन्नाहवादिनं रामो विस्मयप्रकाशित्वादाह ऽग्रेगोत्तिर्यामिमां चमूं भयप्रहेतुं मन्यसे सा कस्येत्यवेक्षस्वेत्यर्थः १५ रुषितः क्रुद्धः १६ अ
भिषेचनं राज्यं प्राप्य संपन्ने ऽकंटके १७ भरतागमने किंचिन्हमित्यत्राह एष इति एष वै सुमहान्श्रीमान्विटपी भरतध्वज
चिन्हीभूतो वृक्षः संप्रकाशते स्फुटं दृश्यते तमेव विशिनष्टि विराजतीति रथे उद्गतस्कंधः उन्नतस्कंधः कोविदारध्व

तेरामः पुरुषव्याघ्रो लक्ष्मणो प्रत्युवाच ह ऽग्रेगावेक्षस्व सौमित्रे कस्येतां मन्यसे चमूम् १५ ए
वमुक्तस्तु रामेण लक्ष्मणो वाक्यमब्रवीत् दिधक्षन्निव सेनां तां रुषितः पावको यथा १६ सं
पन्नं राज्यमिच्छंस्तु व्यक्तं प्राप्याभिषेचनम् ऽग्रावां हंतुं समभ्येति भरतः कैकेयीसुतः १७ एष
वै सुमहान्श्रीमान्विटपी संप्रकाशते विराजत्युद्गतस्कंधः कोविदारध्वजो रथे १८ भ
जंत्येते यथाकाममश्वानारुह्य शीघ्रगान् एते भ्राजंति संहृष्टा गजानारुह्य सादिनः १९

जः कोविदारयुक्तो ध्वजः ध्वजस्योद्गतस्कंधत्वं लिखितवृक्षद्वारा पद्वारा एष वृक्षो महान्संप्रकाशते तेतन्समीपे तं लक्ष्मीकृत्य र
थे कोविदारध्वजो विराजत इत्यर्थः १८ एते अश्वारोहाः ऽश्वानारुह्य भजंति इमं देशं प्राप्नुवंतीत्यर्थः सादिनो गजारोहाः
१९

तत्कारणमुन्नयन्नस्वयमाह राजा वेति राजादिर्मृगयामटते ज्ञातुमर्हसि अन्यत् श्वापदं दुष्टजन्तुः वनं क्षोभयतीति शेषः ९ पक्षिणामपि दुश्चरः पक्षिसंचारोपीदानीं नास्तीत्यर्थः सर्वमेतत्पूर्वोक्तकारणं यथावत् अचिराज्ज्ञातुमर्हसि १० पुष्पितमि

राजा वा राजपुत्रो वा मृगयामटते वनम् अन्यद्वा श्वापदं किंचित्सौमित्रे ज्ञातुमर्हसि ९ सुदुश्चरो गिरिश्चायं पक्षिणामपि लक्ष्मण सर्वमेतद्यथातत्त्वमचिराज्ज्ञातुमर्हसि १० स लक्ष्मणः संत्वरितः सालमारुह्य पुष्पितम् प्रेक्षमाणो दिशः सर्वाः पूर्वां दिशमवैक्षत ११ उदङ्मुखः प्रेक्षमाणो ददर्श महतीं चमूम् रथाश्वगजसंबाधां यत्तैर्युक्तां पदातिभिः १२ तामश्वगजसंपूर्णां रथध्वजविभूषिताम् शशंस सेनां रामाय वचनं चेदमब्रवीत् १३ अग्निं संशमयत्वार्यः सीता च भजतां गुहाम् सज्यं कुरुष्व चापं च शरांश्च कवचं तथा १४ सीताभ

त्यनेन विरलपत्रतया नावारकत्वमुक्तं ११ यत्तैः सज्जैः १२ सेनां शशंस भूतशब्दकारणं सेनामुक्तवान् १३ संशमयतु अन्यथा धूमानुसारेणागच्छेत्सेनेति भावः गुहामंतर्गृहं शरांश्च कवचं धारयेति शेषः १४

तत्र गिरिप्रदेशे तस्यासतः तस्मिन् रामे आसीने सति उपयायिनः समीपे प्रागुक्तः भरतस्य सैन्यरेणुः सैन्यशब्दश्च प्रादुरास्तां
प्रादुर्बभूवतुः ३ एतस्मिन्नंतरे सेनाशब्दप्रवृत्तिसमये ४ स राघवो रामचंद्रः सैन्यसमुद्भूतं सैन्योत्पादितम् ५ ६ भीमं

तथा तत्रासतस्तस्य भरतस्योपयायिनः सैन्यरेणुश्च शब्दश्च प्रादुरास्तां नभस्पृशौ ३ एत
स्मिन्नंतरे त्रस्ताः शब्देन महता ततः अर्दिता यूथपा मत्ताः सयूथा विद्रुता दिशः ४ स
तं सैन्यसमुद्भूतं शब्दं शुश्राव राघवः तांश्च विप्रद्रुतान् सर्वान् यूथपानन्ववैक्षत ५ तां
श्च विप्रद्रुतान् दृष्ट्वा ते च श्रुत्वा महास्वनम् उवाच रामः सौमित्रिं लक्ष्मणं दीप्ततेजसम् ६
हंत लक्ष्मण पश्येह सुमित्रा सुप्रजास्त्वया भीमस्तनितगंभीरं तुमुलः श्रूयते स्वनः ७ गजयू
थानि वारण्ये महिषा वा महावने वित्रासिता मृगाः सिंहैः सहसा प्रद्रुता दिशः ८

मयेकरे सत्तनितं मे घशब्दस्तद्गंभीरं च यामवतित्तं यथो मे स्वनः श्रूयते ७ तस्य कारणं परपरेपति योजना ७ यास सहसाम
गाः प्रद्रुताः दिशः तस्य कारणं तथा सिंहैर्वित्रासिता निगजयूथानि वा ग्र्ये तैर्वित्रासिता महिषा वा दिशः प्रद्रुता तत्कारणं च

रा०वा०अ०
३३०

१६ उपस्पृशन् स्नाने कुर्वन् १७ सुपुष्पितामिमां नदीमवगाह्य यो न गतक्लमः सुखी न स्यात्स नास्तीति संबंधः पुष्पभरै
र्दक्षैः १८ सरितं प्रति सरितं वर्णयन् नयनयोरुपमं जनं नयनाञ्जनं तद्वन्नीलप्रभं चित्रकूटं चचारेति संबंधः १९

लक्ष्मणश्चैव धर्मात्मा मन्निदेशे व्यवस्थितः त्वं चानुकूला वैदेहि प्रीतिं जनयथो मम १६
उपस्पृशंस्त्रिषवणं मधुमूलफलाशनः नायोध्यायै न राज्याय स्पृहये ऽद्य त्वया सह १७
इमां हि रम्यां गजयूथलोलितां निपीततोयां गजसिंहवानरैः सुपुष्पितां पुष्पभरैरलं
कृतां न सोऽस्ति यः स्यान्न गतक्लमः सुखी १८ इतीव रामो बहुसंगतं वचः प्रियासहायः सरि
तं प्रति ब्रुवन् चचार रम्यं नयनाञ्जनप्रभं स चित्रकूटं रघुवंशवर्धनः ॥१९॥ इत्यार्षे रामाय
णे अयोध्याकांडे पंचनवतितमः सर्गः ॥ ९५॥ तां तथा दर्शयित्वा तु मैथिलीं गिरिनिम्नगाम् नि
षसाद गिरिप्रस्थे सीतां मांसेन छंदयन् १ इदं मेध्यमिदं स्वादु निष्टप्तमिदमग्निना एवमा
स्ते स धर्मात्मा सीतया सह राघवः २

इति पंचनवतितमः सर्गः ९५ एवं प्रासेन गिरिकमस्थाय कृतमनुस्मारयिता
मिति मांसेन छंदयन् लालयन् गिरिनिम्नगां मंदाकिनीं १ लालनप्रकारमाह इदमिति एवमित्यस्य ब्रुवन्निति शेषः २ राम ३३०

अभ्रमिति धोधूयमानान् पुनः पुनः प्लवमानान्पुष्पसंचयान्पश्य १० रथांगेतद्वाचकः शब्दः आह्वयने नाम निमेषां ते रथांगा
ह्वयनाः चक्रवाकाः अधिरोहंति गिरिं निष्कूजंतीति शेषः ११ अधिकं अधिकसुखावहं उद्दीपकत्वादिति भावः १२ तपोदम

निर्धूतान्वायुनापश्य विततान्पुष्पसंचयान् धोधूयमानानपरान्पश्य त्वं जलमध्यगान् १०
पश्यैतान्चक्रवाकांश्च सोरथांगाह्वयनाद्विजाः अधिरोहंति कल्याणि निष्कूजंतः शुभा गिरः ११
दर्शने चित्रकूटस्य मंदाकिन्याश्च शोभने अधिकं पुरवासाच्च मन्ये तव च दर्शनात् १२ वि
धूतकल्मषैः सिद्धैस्तपोदमशमान्वितैः नित्यविक्षोभितजलां विगाहस्व मया सह १३ सखीव
च्च विगाहस्व सीते मंदाकिनीमिमां कमलान्यवमज्जंती पुष्कराणि च भामिनि १४ त्वं पौरज
नवद्व्यालानयोध्यामिव पर्वतम् मन्यस्व वनिते नित्यं सरयूवदिमां नदीम् १५

शमान्वितैः अतएव विधूतकल्मषैः निष्पापैः सिद्धैः सधनवनिषेवितैः नित्यविक्षोभितजलां धन्यां मंदाकिनीं मया सह विगाहस्व ज
ले क्रीडारसमनुभव स्वेत्यर्थः १३ सखीवत्मंदाकिन्या इति शेषः कमलं पुष्करं रक्तसितपद्मे तानि अवमज्जंती अधःक्षिपंती
१४ पौरजनवन्मन्यस्व पौरजनादानवलोकनदुःखं त्वया न कार्यमिति भावः १५

ग०वा० २४० कुसुमैः पद्मादिभिः ३ राजराजस्य कुबेरस्य नलिनीं सौगंधिकाख्यां सरसीमिव ४ तीर्थानि अवगाहमार्गाः [illegible] रतिं अवगाहन
३२९
विषयां प्रीतिं ५ ६ उपतिष्ठंते मंत्रैरुपस्थानं कुर्वते एते परे मुनयः प्रकाशंते जपपरा इति शेषः ७ प्रनृत्त [illegible] इव नृत्यन्

विचित्रपुलिनां रम्यां हंससारससेविताम् कुसुमैरुपसंपन्नां पश्य मंदाकिनीं नदीम् ३
नानाविधैस्तीररुहैर्वृतां पुष्पफलद्रुमैः राजंतीं राजराजस्य नलिनीमिव सर्वतः ४ मृ
गयूथनिपीतानि कलुषांभांसि सांप्रतम् तीर्थानि रमणीयानि रतिं संजनयंति मे ५ ज
टाजिनधराः काले वल्कलोत्तरवाससः ऋषयस्त्ववगाहंते नदीं मंदाकिनीं प्रिये ६
आदित्यमुपतिष्ठंते नियमादूर्ध्वबाहवः एते परे विशालाक्षि मुनयः संशितव्रताः ७ मारु
तोद्धूतशिखरैः प्रनृत्त इव पर्वतः पादपैः पुष्पपत्राणि सृजद्भिरभितो नदीम् ८ क्वचिन्म
णिनिकाशोदां क्वचित्पुलिनशालिनीम् क्वचित्सिद्धजनाकीर्णां पश्य मंदाकिनीं नदीम् ९

कर्तुमुपक्रांत इव यतः एवं पुष्पांजलिकरणां पादपैः ८ मणिनिकाशं मुक्तासदृशमुदकं यस्यास्ताम् ९ ९९९९ राम ३२९

मण्डिताः स्थानानाद्विभोगेन कृतमर्द्दनाः म्लाना इत्यर्थः अपविद्धाः त्यक्ताश्च पर्यः फलानि भुक्तानीति शेषः २५ वस्वोकसारां कुवेरनगरीं नलिनीं शक्रपुरीं अतीत्य शोभते इति शेषः २६ हे वनिते सीते परैः श्रेष्ठैः स्वैः स्वीये निर्यमैः सह सतां पथि स्थितः सन् २

मण्डिताश्चापविद्धाश्च दृश्यंते कमलस्रजः ॥ कामिभिर्वनिते पश्य फलानि विविधानि च ॥ २५ ॥ वस्वोकसारां नलिनीमतीत्यैवोत्तरान्कुरून् ॥ पर्वतश्चित्रकूटोसौ बहुमूलफलोदकः ॥ २६ ॥ इमं तु कालं वनिते विजह्रिवांस्त्वया च सीते सह लक्ष्मणेन च ॥ रतिं प्रपत्स्ये कुलधर्मवर्धिनीं सतां पथि स्वैर्नियमैः परैः स्थितः ॥ २७ ॥ इत्यार्षे रामायणे अयो॰ चतुर्नवतितमः सर्गः ॥ ९४ ॥ अथ शैलाद्विनिष्क्रम्य मैथिलीं कोसलेश्वरः अदर्शयच्छुभजलां रम्यां मंदाकिनीं नदीम् १ अब्रवीच्च वरारोहां चारुचंद्रनिभाननाम् विदेहराजस्य सुतां रामो राजीवलोचनः २

ते

इमं कालं चतुर्दशमितं त्वया लक्ष्मणेन च सह विजह्रिवान् शासविता रोपदिभ विश्वामित दा कुलधर्मवर्धिनीं रतिं राज्यसौख्यं प्रपत्स्ये प्राप्स्यामि २७ इति चतुर्नवतितमः सर्गः ९४ अथ मंदाकिनीप्रदर्शनेनोपलालयति अथेति १ वरारोहाम्

मवतितम २

बहुलाः बहुविधाः अभितः शोभन्ते इत्यन्वयः २० अचलेन्द्रस्य चित्रकूटस्य ओषध्यः स्वकान्तिसंपदा शोभमानाः निशि हुताशन
शिखा इव भान्ति २१ क्षयनिभाः गृहसदृशाः अतिनिविडवृक्षपल्लवप्रावृतकत्वात् उद्यानसन्निभाः चंपकमालत्यादिवा

शिलाः शैलस्य शोभन्ते विशालाः शतशोऽभितः बहुला बहुलैर्वर्णैर्नीलपीतसिताऽरुणैः २० नि
च शि भान्त्यचलेन्द्रस्य हुताशनशिखा इव ओषध्यः स्वप्रभालक्ष्म्या भ्राजमानाः सहस्रशः २१ के
चित्क्षयनिभा देशाः केचिदुद्यानसन्निभाः केचिदेकशिला भान्ति पर्वतस्यास्य भामिनि २२
भित्त्वेव वसुधां भाति चित्रकूटः समुत्थितः चित्रकूटस्य कूटोऽयं दृश्यते सर्वतः शुभः २३ कुष्ठ
पुन्नागतगरभूर्जपत्रोत्तरच्छदान् कामिनां स्वास्तरान्पश्य कुशेशयदलायुतान् २४

हृत्त्वात् एकशिलाः अनेकजनावस्थानक्षमैकशिलायुक्ताः २२ कूटोग्रभागः २३ कुष्ठमुत्पलं पुन्नागः पुन्नागपु
ष्पाणि तगरः पुत्रजीवकः भूर्जः भूर्जपत्रवृक्षः एतेषां पत्राण्युत्तरच्छदा उपर्यास्तरणानि येषां तान्कामिनां स्वास्तरणान्
आस्तरणानि कुशेशयपद्मान्तदलैः समंता छन्नानि पश्य २४

शरदः संवत्सरान् शोकः नगरत्यागजं दुःखं न प्रधक्ष्यति न पीडयिष्यतीत्यर्थः १५ रतवान् रतिमान् प्रीतिमानित्यर्थः १६ धर्मे सत्यपालने नृणता १७ मनोवाक्कायाः संयता यैस्तान् वशीकृतमनोवाक्कायानित्यर्थः विविधान् मलयानिलकोकिलालीपद्ममरन्दकारपुष्पहासप्रभृतिभेदान् भावान् पश्यन्ती रमसे कच्चित् १८ न केवलमयं वनवासो भोगाय

यदीह शरदोनेकास्त्वया सार्धमनिंदिते लक्ष्मणेन च वत्स्यामि न मां शोकः प्रधक्ष्यति १५ बहुपुष्पफले रम्ये नानाद्विजगणायुते विचित्रशिखरे ह्यस्मिन् रतवानस्मि भामिनि १६ अनेन वनवासेन मया प्राप्तं फलद्वयम् पितुश्चानृणता धर्मे भरतस्य प्रियं तथा १७ वैदेहि रमसे कच्चिच्चित्रकूटे मया सह पश्यंती विविधान् भावान् मनोवाक्कायसंयतान् १८ इदमेवामृतं प्राहू राज्ञां राजर्षयः परे वनवासं भवार्थाय प्रेत्य मे प्रपितामहाः १९ सीतारामाभ्यां नमः

आमुष्मिकसाधनं चेत्याह इदमिति हे राज्ञि परे राजर्षयः इदमेव नियमसहितं वनेऽवस्थानमेव अमृतं मोक्षसाधनं प्राहुः मे प्रपितामहाः मन्वादयस्तु वनवासं प्रेत्य एतच्छरीरत्यागोत्तरं भवार्थाय भवः श्रीवो हिरण्यगर्भस्तल्लोकप्राप्तिरूपप्रयोजनायाहुः १९

तिशेषः

रा० वा० ष्व०
३२७

पुष्पवद्भिरित्यादीनि सर्ववृक्षविशेषणानि पुष्यति वर्द्धयति १० शैलप्रस्थेषु पर्वतसानुषु कामहर्षणान् देशानिति शेषः तत्र रममाणान्किन्नरान्पश्य ११ खड्गान्किन्नराणामिति पाठः विद्याधरीणां क्रीडादेशान् पश्य पताका शाखावसक्तान्य

पुष्पवद्भिः फलोपेतैः छायावद्भिर्मनोरमैः एवमादिभिराकीर्णः श्रियं पुष्यत्ययं गिरिः १०
शैलप्रस्थेषु रम्येषु पश्येमान्कामहर्षणान् किन्नरान्द्वन्द्वशो भद्रे रममाणान्मनस्विनः ११
शाखावसक्तान्खड्गांश्च प्रवराण्यम्बराणि च पश्य विद्याधरस्त्रीणां क्रीडोद्देशान्मनोरमान्
१२ जलप्रपातैरुद्भेदैर्निष्पन्दैश्च क्वचित्क्वचित् स्रवद्भिर्भात्ययं शैलः स्रवन्मद इव द्विपः १३
गुहासमीरणो गन्धान्नानापुष्पभवान्वहन् घ्राणतर्पणमभ्येत्य कं नरं न प्रहर्षयेत् १४

वराणि च पश्य १२ जलप्रपातैः उन्नतप्रदेशात्पतद्भिर्जलप्रवाहैः उद्भेदैर्भुवमुद्भिद्य निर्गतैः निष्पन्दैः अल्पनिर्झरैः स्रवद्भिरित्युभयविशेषणं १३ गुहासमीरणः गुहाद्वारप्रवृत्तः समीरणः घ्राणतर्पणं कुर्वाण इति शेषः नानापुष्पसमुद्भवान्वहन् गन्धान् अभ्येत्य प्राप्य कं नरं न प्रहर्षयेदिति सम्बन्धः १४

अचलेंद्रस्य चित्रकूटस्य देशा धातुविभूषिताः संति अत एव केचिद्देशा रजतसंकाशा अस्तंते शुभ्राभाः केचित् तप्तजसन्निभाः
रुधिरसदृशा वर्णाः केचित्पीतवर्णा मांजिष्ठवर्णाश्चित्रवर्णाः केचिन्मणिवरप्रभाः इंदुनीलप्रभाः ५ पुष्पस्य पुष्यरागस्य अ
र्कस्य स्फटिकस्य केतकानां केतकपुष्पाणां शुभ्राभा प्रभा येषां ते केचि ज्योतिः प्रभाः नक्षत्रप्रभा केचित् रसप्रभाः पारद
च

केचिद्रजतसंकाशाः केचित्तप्तजसन्निभाः पीतमांजिष्ठवर्णाश्च केचिन्मणिवरप्रभाः ५
पुष्पार्ककेतकाभाश्च केचिज्योतीरसप्रभाः विराजंते चलेंद्रस्य देशा धातुविभूषिताः ६ ना
नामृगगणद्वीपितरक्षुऋक्षगणैर्वृतः अदुष्टैः शोभितः प्रोलो बहुपक्षिसमाकुलः ७ आम्रजं
बूसनैर्लोधैः प्रियालैः पनसैर्धवैः अंकोलैर्भव्यतिमिशैर्बिल्वतिंदुकवेणुभिः ८ काश्मर्य्ये
रिष्ठवरणैर्मधूकैस्तिलकैस्तथा वदर्य्यामलकैर्नीपैर्वेत्रधन्वनबीजकैः ९ ९ ९ ९

प्रभा विराजंते तद्दतिसंबंधः ६ द्वीपी महाव्याघ्रः तरक्षुः क्षुद्रव्याघ्रः अदुष्टैः तपस्विवैभवाद्धिंसादिदोषरहितैः ७ असनः पीतसा
रः प्रियालो राजादनं अंकोलैः भव्यैः लकुचैः तिनिशैः स्पंदनैः ८ अरिष्टो निंबः धन्वन इंद्रयवः बीजकाः बीजप्रचुरफलवि
शेषाः दाडिमादयः ९

रा०वा०अ०
३२६

अपि च या चमूर्भरतेन व्यवस्थिता भरतेन व्यवस्थापिता सा वा सा अग्रतः भूमिं निरीक्षमाणा नचिरेण शीघ्रं जानकीप्रियस्य रामस्य समागमं निरीक्षमाणा तदा हृष्टा बभूव २१ इति त्रिनवतितमः सर्गः ९३ अथ महाकविश्चित्रकूटस्थितश्रीजानकीरघुवीरविहारं वर्णयति दीर्घेत्यादि श्लोकद्वयमेकं वाक्यं अथ तस्मिन् गिरौ दीर्घकालोषितो दाशरथी रामः वैदे

व्यवस्थिता या भरतेन सा चमूर्निरीक्षमाणापि च धूममग्रतः ॥ बभूव हृष्टा नचिरेण जानकीप्रियस्य रामस्य समागमं तदा ॥ २१ ॥ इत्यार्षे रामायणे अयोध्याकांडे त्रिनवतितमः सर्गः ॥ ९३ ॥ दीर्घकालोषितस्तस्मिन् गिरौ गिरिवनप्रियः वैदेह्याः प्रियमाकांक्षन्स्वं च चित्तं विलोभयन् १ अथ दाशरथिश्चित्रं चित्रकूटमदर्शयत् भार्याममरसंकाशः शचीमिव पुरंदरः २ न राज्याद्भ्रंशनं भद्रे न सुहृद्भिर्विनाभवः मनो मे बाधते दृष्ट्वा रमणीयमिमं गिरिम् ३ पश्येममचलं भद्रे नानाद्विजगणायुतम् शिखरैः खमिवोद्विद्धैर्धातुमद्भिर्विभूषितम् ४

ह्याः प्रियं संतोषमाकांक्षन्निच्छन् स्वं च चित्तं वनवासपरिश्रांतं विलोभयन् अभिमतविषयांतरव्यासंगेनानंदयन् भार्यां वैदेहीं चित्रकूटमदर्शयदित्यन्वयः १२ विनाभवः विनावस्थानं मे मनो न बाधते इमं गिरिं दृष्ट्वा स्थितस्येति शेषः ३ खमिवोद्विद्धैः खं भित्त्वा उद्गतैरिव अभ्रंलिहैरि

राम ३२६

धूमाग्रे धूमशिखा तेन वह्निमनुमाय तत्संपादकत्वेन राघवावनुमाय भरतमूचुः २१ २२ पक्षांतरमाहुः अथवेति नरव्याघ्रौ यदि न स्त इति शेषः यद्यत्र न तौ तदाप्यन्ये तपस्विनोऽत्र भविष्यंतीति तन्मुखात् ह्यास्थानस्तोभो भविष्यतीति भावः २३ साधु

भरतस्य वचः श्रुत्वा पुरुषाः शास्त्रपारगाः विविधुस्तद्धने प्रीता धूमाग्रं ददृशुस्ततः २१ ते समालोक्य धूमाग्रमूचुर्भरतमागताः नामनुष्ये भवत्यग्निर्व्यक्तमत्रैव राघवौ २२ अथवात्र नरव्याघ्रौ राजपुत्रौ परंतपौ अन्ये रामोपमाः संति व्यक्तमत्र तपस्विनः २३ तच्छ्रुत्वा वचनं तेषां भरतः साधुसंमतम सैन्यानुवाच सर्वांस्तानमित्रबलमर्दनः २४ यत्ता भवंत तिष्ठंतु नेतो गंतव्यमग्रतः अहमेव गमिष्यामि सुमंत्रो धृतिरेव च २५ एवमुक्तास्ततः सैन्यास्तत्र तस्थुः समंततः भरतो यत्र धूमाग्रं तत्र दृष्टिं समादधत २६

संमतं न्यायसिद्धं संमतं ते षां वचनं श्रुत्वा तत्र प्रदेशे रामा वस्यिति निश्चित्य सर्वान्सैन्यानुवाच २४ वचनमाह यत्ता इति यत्ताः सावधानाः कोलाहलमकुर्वंत धृतिरित्यप्रोक्तमंत्रिणो नामांतरम २५ २६ २५ २६

गा० वा० अ० निकुंजमिव धूत्वा पूर्वं जनशब्दरहितं भूत्वा स्थितमिदं वनं संप्रति अस्मदागमनेन जनाकीर्णायोध्येव प्रतिभातीति संबंधः १४
३२५ हयादि खुरैरुदीरितं अयापितो रेणुर्दिवं प्रच्छाद्य तिष्ठति अनिलः शीघ्रं तं वहति अपनयति मम प्रियं मत्प्रियं कुर्वन्निव चि

निष्कूजमिव भूत्वेदं वनं घोरप्रदर्शनम् अयोध्येव जनाकीर्णा सांप्रतं प्रतिभाति मे १४ खु
रैरुदीरितो रेणुर्दिवं प्रच्छाद्य तिष्ठति तं वहत्यनिलः शीघ्रं कुर्वन्निव मम प्रियम् १५ स्यंद
नांस्तुरगोपेतान् सूतमुख्यैरधिष्ठितान् एतान्संपततः शीघ्रं पश्य पश्य प्रात्र्रुद्यकानने १६
एतान्वित्रासितान्पश्य बर्हिणः प्रियदर्शनान् एतमाविशतः शैलमधिवासं पतत्रिणाम् १७
अतिमात्रमयं देशो मनोज्ञः प्रतिभाति मे तापसानां निवासोऽयं व्यक्तं स्वर्गपथोपमः १८ मृगा
मृगीभिः सहिता बहवः पृषता वने मनोज्ञरूपा दृश्यन्ते कुसुमैरिव विचित्रिताः १९ साधु
सैन्याः प्रतिष्ठन्तां विचिन्वन्तु च काननम् यथा तौ पुरुषव्याघ्रौ दृश्येते रामलक्ष्मणौ २०

त्रकूटदर्शननिरोधनिवर्तकत्वादिति भावः १५ संपततः गच्छतः १६ १७ व्यक्तं स्पष्टं स्वर्गपथः स्वर्गप्रदेशः १८ पृषता नाम सविंदवो
कुसुमैश्चित्रिता इवेत्युक्तिः १९ साधु उचिताः सैन्याः सैनिकाः प्रतिष्ठन्तां गच्छन्तु विसर्पिः गमनफलं विचिन्वन्त्वित्याह २० २०

राम ३२५

१ योद्धप्रविद्धः १ मेघराज्यः

श्रवणम् घंतेपीडयंते अंभ्रत एवैतेन गाववृक्षाः गजानामाघातेन चलितशाखाः पर्वतसानुषु कुसुमानि सिंचंति १० किन्नरचरितो देशः कि
न्नरचरितरूपपर्वतम् ११ प्रचोदिताः सैनिकैरितिशेषः वायुप्रेरिताः मेघपंक्तयः प्रव १२ दाक्षिणात्याः दक्षिणदिग्भवानराः मे
घप्रकाशैः अक्षादिनीलचर्मपिनद्धत्वान्नीलमेघतुल्यैः फलकैः केशवंधसाधनभूतैः शिरःसु कुसुमापीडान् कुसुमस्र

गिरेः सानूनि रम्याणि चित्रकूटस्य संश्रिता वारणौरवम घंतेऽम्भकैः पर्वतोपमैः ९ मुंच
ति कुसुमान्येतेन नगाः पर्वतसानुषु नीलाइवातपापायेतो पतोयधारा घनाः १० किन्नराच
रितो देशं पश्य शत्रुघ्न पर्वतं हयैः समंतादाकीर्णं मकरैरिव सागरम् ११ एते मृगगणा भांति शी
घ्रवेगाः प्रचोदिताः वायुप्रविद्धाः शरदि मेघराज्य इवांबरम् १२ कुर्वंति कुसुमापीडान् शिरःसु
सुरभीनमी मेघप्रकाशैः फलकैर्दाक्षिणात्या नरा यथा १३

क्षि

हान् यथा कुर्वंति धारयंति तिन पैवामी वृक्षाः सुसुरभीन् कुसुमापीडान् कुसुमस्तवकान् शिरःसु धारयंति यद्वा अमी भटाः मे
घप्रकाशैः फलकैः शस्त्रनिवारणचर्मभिरुपलक्षिताः संतो दाक्षिणात्यानरा इव कुसुमापीडान् कुसुमापीडान् कुसुमनिर्मितभूषणा
विशेषान् शिरःसु कुर्वंति १३

अरक्षामहद्रूकाः पृषताः सविंदवः रुरवोऽविंदवो मृगाः श्वदिताः दृश्यंत इत्सर्वः २ ३ ४ प्रवर्तताप्यासा तस्मिन्काले मार्गे गमनकाले सा मही ५ मंत्रिणां मंत्रविदां वरं श्रेष्ठं ६ भरद्वाजो यं देशं चित्रकूटं प्रांदृश्यमब्रवीत् यथा चास्माभिः श्रुतं तथैवा

ऋक्षाः पृषतसंघाश्च रुरवश्च समंततः दृश्यंते तेन राजेंद्र गिरिश्चापि नदी भुच २ स संप्रतस्थे धर्मात्मा प्रीतो दशरथात्मजः वृतो महत्या नादिन्या सेनया चतुरंगया ३ सागरौघनिभा सेना भरतस्य महात्मनः महीं संछादयामास प्रावृषि द्यामिवांबुदा ४ तुरंगौघैरवतता वारणैश्च महाबलैः अनालक्ष्या चिरं कालं तस्मिन्काले बभूव सा ५ स यात्वा दूरमध्वानं संपरिश्रांतवाहनः उवाच भरतः श्रीमान्वसिष्ठं मंत्रिणां वरम् ६ यादृशं लक्ष्यते रूपं यथा चैव श्रुतं मया व्यक्तं प्राप्ताः स्म तं देशं भरद्वाजो यमब्रवीत् ७ अयं गिरिश्चित्रकूटस्तथा मंदाकिनी नदी एतत्प्रकाशते दूरान्नीलमेघनिभं वनम् ८

सदेवशस्वरूपं लक्ष्यते तस्माद्व्यक्तं तं देशं प्राप्ताः स्मः छांदसो विसर्गलोपः ७ प्रस्थितेव विवरोति गिरियमिति ८ सीतारामाभ्यां नम०

यानप्रवेकैः यानोत्तमैः ३५ चन्द्रार्कतरुणाभासां तरुणौ च चन्द्रार्कौ तद्वद्भासां नियुक्तां वाहकैरिति शेषः ३६ ३७ गङ्गायाः दक्षिणावाहिन्याः परवेलायां पश्चिमभागे स्थितानि तेनागिरिषु नदीषु च वर्त्तमानवनान्यतिक्रम्य प्रयाता बभूवेति शेषः ३ इति द्विन

ग्र

अथ यानप्रवेकैस्तु कौशल्याप्रमुखाः स्त्रियः रामदर्शनकांक्षिण्यः प्रययुर्मुदितास्तदा ३५ चन्द्रार्कतरुणाभासां नियुक्तां शिबिकां शुभाम् आस्थाय प्रययौ श्रीमान्भरतः सपरिच्छदः ३६ सा प्रयाता महासेना गजवाजिरथाकुला दक्षिणां दिशमावृत्य महामेघ इवोत्थितः ३७ वनानि तु व्यतिक्रम्य जुष्टानि मृगपक्षिभिः गङ्गायाः परवेलायां गिरिष्वपि नदीषु च ३८ सा संप्रहृष्टद्विजवाजियोधा वित्रासयन्ती मृगपक्षिसंघान् महद्वनं तत्प्रविगाहमाना रराज सेना भरतस्य तत्र ३९ ॥इत्यार्षे रामायणे अयोध्याकाण्डे द्विनवतितमः सर्गः॥९२॥ तया महत्या यायिन्या ध्वजिन्या वनवासिनः अर्दिता यूथपा मत्ताः सयूथाः संप्रदुद्रुवुः १ १ सीतारामाभ्यां नमः सीताराम

वतितमः सर्गः ९२ यायिन्या गच्छन्त्या अर्दिताः पीडिताः यूथपाः गजादियूथनाथाः यूथनाथस्तु यूथप इत्यमरः १ १ १ १

१ कैकेयी दोषेणानावगन्तव्या
यां

२७ २८ कैकेय्यै दोषदृष्टिर्न कर्त्तव्येत्यर्थः सुखोदर्कं देवानाम् ऋषीणां च सुखफलं २९ ३० संसिद्धः प्राप्ताशीर्वादरूपानुग्रहः युज्यतां गमनाय सन्नह्यताम् ३१ ३२ गजकन्याः करेणवः हेमकक्ष्याः हेममयवेधनरज्जवः सघोषः घंटाघोषसहि

इत्युक्त्वा नरशार्द्दूलो बाष्पगद्गदया गिरा सनिशश्वासताम्राक्षः क्रुद्धो नाग इवासकृत् २७
भरद्वाजो महर्षिस्तं ब्रुवन्तं भरतं तदा प्रत्युवाच महाबुद्धिरिदं वचनमर्थवत् २८ न दोषेणा
वगन्तव्या कैकेयी भरत त्वया रामप्रव्राजनं ह्येतत्सुखोदर्कं भविष्यति २९ देवानां दानवानां
च ऋषीणां च महात्मनां ३० अभिवाद्य तु संसिद्धः कृत्वा चैनं प्रदक्षिणम् आमंत्र्य भरतः
सैन्यं युज्यतामित्यचोदयत् ३१ ततो वाजिरथान्युक्त्वा दिव्यान्हेमपरिष्कृतान् अध्यारो
हत्प्रयाणार्थी बहून्बहुविधो जनः ३२ गजकन्या गजाश्चैव हेमकक्ष्याः पताकिनः जीमूता
इव घर्मान्ते सघोषाः संप्रतस्थिरे ३३ विविधान्यपि यानानि महान्ति च लघूनि च प्रययुः सुमहा
र्हाणि पादैरेव पदातयः ३४

ताः ३३ सुमहार्हाणि यानान्यारुह्य तद्योग्याः प्रययुः पदातयस्तु पादैरेव प्रययुः ३४

धातारमुपेदुमदितिरिवयातंसिह वाह्निक्रांतगमनशीलंपुरुषव्याघ्रंरामंसुषुवेसाकौशल्याएषोस्यान्वयः २१ यस्याः कौशल्यायावामे
भुजंच्छिन्नाद्दुर्मनादुःखितमनाः दुर्मनस्त्येव ध्वांतः कर्णिकारस्यशीर्णपुष्पम्लानपुष्परा स्विवयैषातिष्ठति २२ एतस्यास्तौसुतौदे

एषातेपुरुषव्याघ्रंव्याघ्रविक्रांतगामिनम् कौशल्यासुषुवेरामंधातारमदितिर्यथा २१ य
स्यावामंभुजंच्छिन्नाद्येषातिष्ठतिदुर्मनाः कर्णिकारस्यशाखेवशीर्णपुष्पावनांतरे २२
एतस्यास्तौसुतौदेव्याः कुमारौदेववर्णिनौ उभौलक्ष्मणशत्रुघ्नौवीरौसत्यपराक्रमौ २३ य
स्याः कृतेनरव्याघ्रौजीवनाशमितोगतौ राजापुत्रविहीनश्चस्वर्गंदशरथोगत २४ क्रोधनाम
कृतप्रज्ञांदृप्तांसुभगमानिनीं ऐश्वर्यकामांकैकेयीमनार्यामार्यरूपिणीम् २५ ममैतांमातरंवि
द्धिनृशंसांपापनिश्चयाम् यतोमूलंहिपश्यामिव्यसनंमहदात्मनः २६ २६ ६ ६ ६ ६

ववर्णिनौदेवतुल्यरूपौतयोर्लक्ष्मणशत्रुघ्नयोर्मातासुमित्रेयमिस्यर्थः २३ यस्याः कैकेय्याः कृतेजीवनाशंगतौताद्दशापदंप्राप्तौ २४
रौकृतप्रज्ञांशिक्षितबुद्धिंदृप्तांगर्विताम् आर्यरूपिणींसतीवप्रतिभासमानाम् २५ यतोमूलंयन्मूलम् २६ २६ २६

वेपमाना वाईक्या दृष्टिदर्शनाच्च कृशा रामविरहादिति शेषः १५ असमृद्धेन फलरहितेन कामेन मनोरथेनोपलक्षिता लोके सर्वलोके
न गर्हिता अत एव सव्यपत्रपा सलज्जा १६ तं ज्ञानवृद्धादेव कौशल्यादिभिः सह मुनेः पुरतः स्थातुमशक्ता प्रदक्षिणव्याजेन भरतं गतेत्या

वेपमाना कृशा दीना सह देव्या सुमित्रया कौशल्या तस्य जग्राह कराभ्यां चरणौ मुनेः १५ असमृ
द्धेन कामेन सर्वलोकस्य गर्हिता कैकेयी तस्य जग्राह चरणौ सव्यपत्रपा १६ तं प्रदक्षिणमा
गम्य भगवन्तं महामुनिम् अदूराद्भरतस्यैव तस्थौ दीनमनास्तदा १७ ततः पप्रच्छ भरतं भर
द्वाजो दृढव्रतः विशेषं ज्ञातुमिच्छामि मातॄणां तव राघव १८ एवमुक्तस्तु भरतो भरद्वाजेन
धार्मिकः उवाच प्राञ्जलिर्भूत्वा वाक्यं वचनकोविदः १९ यामिमां भगवन्दीनां शोकानशनक
र्षिताम् पितुर्हि महिषीं देवीं देवतामिव पश्यसि २०

हतमिति १७ पप्रच्छ सर्वज्ञोपि कैकेय्यैश्वर्यमिति शेषः विशेषं तत्तन्नामरूपम् १८ धार्मिकः सत्यवादी वचनकोविदः भरद्वा
जवचनतात्पर्यज्ञ इत्यर्थः १९ शोकवशात्प्राप्तानशनेन कृशीकृताम् २० २० २० २० २०

तस्य चित्रकूटस्य उत्तरपार्श्वं प्राप्य मंदाकिनी भागीरथी व्यतिरिक्ता नदी वर्तत इति शेषः ११ तस्याः सरितो मंदाकिन्या अनंतरं समीपे चित्रकूटः पर्वतस्तिष्ठति तयोः सरिद्गिर्योर्मध्ये पर्णकुटी पर्णशाला कृता तत्र तौ वसतो ध्रुवं निश्चयेन योगप्रभावेन जानामीत्यर्थः १२ दक्षिणेत्यादि सार्द्धश्लोकमेकं वाक्यं यमुनायाः दक्षिणतीरमार्गेण तौ वर्त्म किंचिद्दूरं गत्वा तदनंतरं सव्यं दक्षिणमेव च सव्यं दक्षिणं

उत्तरं पार्श्वमासाद्य तस्य मंदाकिनी नदी पुष्पितद्रुमसंछन्ना रम्यपुष्पितकानना ११
अनंतरं तत्सरितश्चित्रकूटश्च पर्वतः तयोः पर्णकुटीं तात तत्र तौ वसतो ध्रुवम् १२ दक्षिणेन च मार्गेण सव्यं दक्षिणमेव च गजवाजिसमाकीर्णां वाहिनीं वाहिनीपते वाहयस्व महाभाग ततो द्रक्ष्यसि राघवम् १३ प्रयाणमिति च श्रुत्वा राजराजस्य योषितः हित्वा यानानि यानार्हा ब्राह्मणं पर्यवारयन् १४

यथा तथा वाहिनीं वाहयस्व कांतारमार्गस्य दुष्टत्वात् यथायोग्यमार्गस्य वामतो दक्षिणतश्च विस्तारप्रदेशे वाहिनीं प्रापयस्वेत्यर्थः १३ राजराजस्य दशरथस्य ब्राह्मणं भरद्वाजं पर्यवारयन् नमस्कारार्थमिति शेषः १४

बलवत्तर्पितः अतीवतर्पितः ५ क्लमो ग्लानिः संतापो देहोष्मा सुभिक्षाः सुसमृद्धान्नपानाः सुप्रतिश्रयाः शोभनावासाः अपिप्रेष्यानुपादाय तैरपि सह सर्वे स्म सुखोषिताः स्म ६ आमंत्रये पृच्छामि कामं अवधिकं मैत्रेण स्निग्धेन ७ आश्रमं मार्गं च आचक्ष्व तस्य कतमो मार्गः

सुखोषितोऽस्मि भगवन् समग्रबलवाहनः बलवत्तर्पितश्चाहं सामात्यो भगवंस्त्वया ५ अपेतक्लमसंतापाः सुभिक्षाः सुप्रतिश्रयाः अपि प्रेष्यानुपादाय सर्वे स्म सुसुखोषिताः ६ आमंत्रयेऽहं भगवन् कामं त्वामृषिसत्तम समीपं प्रस्थितं भ्रातुर्मैत्रेणेक्षस्व चक्षुषा ७ आश्रमं तस्य धर्मज्ञ धार्मिकस्य महात्मनः आचक्ष्व कतमो मार्गः कियानिति च शंस मे ८ इति पृष्टस्तु भरतं भ्रातृदर्शनलालसम् प्रत्युवाच महातेजा भरद्वाजो महातपाः ९ भरतार्धतृतीयेषु योजनेष्वजने वने चित्रकूटो गिरिस्तत्र रम्यनिर्झरकाननः १० १० १०

कियान्दूर इति शंस ८ ९ अर्धतृतीयेष्वर्धं तृतीयं येषां ते अर्धतृतीयेषु सार्धयोजनद्वये गतीते इत्यर्थः तत्र अजने निर्जने वने चित्रकूटो गिरिः वर्तत इति शेषः रम्याः निर्झरा यस्मिन् ता दृशाः काननं यस्मिन् १०

एतत्सर्वं सत्यमेवेति द्रढयितुं मदादीनामवस्थितिमाह तथैवेति मत्ताः मौरेईष्णाः मदिरोत्कटाश्च मदिरया मत्ताश्च मत्ते प्रोंडोत्कट इत्युक्तौ वा
इत्यमरः तथैव अनुभवकालेऽप्येवं वर्तितस्सर्वः स्रगुत्तमाः उपभोगवशात्प्रमर्दिताश्च पृथक् पूर्वं स्रग्भ्यो विलक्षणाः ५३ इत्येकनव

तथैव मत्ता मदिरोत्कटा नरास्तथैव दिव्यागरुचंदनोक्षिताः ॥ तथैव दिव्या विविधाः स्रगुत्तमाः
पृथक् प्रकीर्णा मनुजैः प्रमर्दिताः ॥ ५३ ॥ इत्यार्षे रामायणे अयोध्याकांडे एकनवतितमः सर्गः ॥
९१ ॥ ततस्तां रजनीं व्युष्य भरतः सपरिच्छदः कृतातिथ्यो भरद्वाजं कामादभिजगाम ह १ तमृ
षिः पुरुषव्याघ्रं प्रेक्ष्य प्रांजलिमागतम् हुताग्निहोत्रो भरतं भरद्वाजोऽभ्यभाषत २ कच्चिद
त्र सुखा रात्रिस्तवास्मद्विषये गता समग्रस्ते जनः कच्चिदातिथ्ये शंस मेऽनघ ३ तमुवाचांजलिं
कृत्वा भरतोऽभिप्रणम्य च आश्रमादभिनिष्क्रान्तमृषिमुत्तमतेजसम् ४ ४ ४ ४ ४ ४४

तितमः सर्गः ९१ व्युष्य उषित्वा सपरिच्छदः सपरिवारः कामात् रामप्राप्तीच्छया १ २ अस्मद्विषये अस्मदाश्रमे सुखा सुखरूपा आतिथ्ये सति
जनः संतुष्टोऽभूदिति शेषः ३ आश्रमादभिनिष्क्रान्तमित्यनेन कौसल्यादिसर्वजनदर्शनार्थं वहिर्निर्गतवानृषिरिति व्यंजितम् ४ ४ ताम

भुक्त्वा रणाचेर्यत्पीयते तत्प्रपानं तत्प्रहृदान् स्वर्णादीनामवगाहनयोग्यसुखावतारान् पद्मोत्पलसहितान् हृदान् आकाशवर्णप्रतिमा
न् उपाधिविशेषेण नीलवर्णान् सुखेन प्लवः ७८ पर्वसंत्वं निर्वापार्थमास्तरणार्थं ७९ स्वप्नकल्पं मत्से दुर्लभं द्रागुत्पन्न

प्रतिपानहृदान् पूर्णान् खरोष्ट्रगजवाजिनाम् अवगाह्यसुतीर्थांश्च हृदान्सोत्पलपुष्क
रान् आकाशवर्णप्रतिमान्स्वच्छतोयान्सुखाप्लवान् ७८ नीलवैदूर्यवर्णांश्च मृदून्यव
ससंचयान् निर्वापार्थंपशूनांतेददृशुस्तत्रसर्वशः ७९ व्यस्मयंतमनुष्यास्तेस्वप्नकल्पं
तदद्भुतम् दृष्ट्वातिथ्यंकृतंतादृग्भरतस्यमहर्षिणा ८० इत्येवंरममाणानांदेवानामि
वनंदने भरद्वाजाश्रमेरम्येसारात्रिर्व्यत्यवर्त्तत ८१ प्रतिजग्मुश्चतानद्योगंधर्वाश्चय
थागतम् भरद्वाजमनुज्ञाप्यताश्चसर्वावरांगनाः ८२

विचित्रपदार्थत्वात् तादृक्वाचामगोचरं भरतस्यभरताय ६ ८० ८१ अनुज्ञाप्यप्रत्यनुज्ञांकारयित्वा ८२ ८२

कल्कान् आमलकादीनां चूर्णि कषायान् सुरभिचूर्णानि कषायोपसुरभौ लोहिते पिच्चेति विश्वः स्नानानि स्नानीयद्रव्याणि सरितां तीर्थेषु स्नानघट्टेषु ७४ शुक्लान् शुद्धान् अंशुमतः स्निग्धान् कूर्चवतः दंतधावनानां अपामार्गादिकाष्ठानां समूहान् कल्कान् घृष्टचंदनान्।

कल्कांश्चूर्णकषायांश्च स्नानानि विविधानि च ददृशुर्भोजनस्थानि तीर्थेभ्यः सरितां नगाः ७४
शुक्लानंशुमतश्चापि दंतधावनसंचयान् शुक्लांश्चंदनकल्कांश्च समुद्रे स्ववतिष्ठतः ७५
दर्पणान्परिमृष्टांश्च वाससां चापि संचयान् पादुकोपानहश्चापि युग्मान्यत्र सहस्रशः ७६
आंजनीः कंकतान्कूर्चान् छत्राणि च धनूंषि च मर्मत्राणानि चित्राणि शयनान्यासनानि च ७७

समुद्रे संपुटेषु अवतिष्ठतः वर्तमानान् ददृशुरिति संबंधः ७५ परिमृष्टान् निर्मलीकृतान् पादुकाः दारुनिर्मिताः उपानहश्चर्मनिर्मिताः युग्मानि द्वंद्वानि ७६ आंजनीः अंजनयुक्तकरंडिकाः कंकतान् केशमार्जनानि कूर्चान् श्मश्रुप्रसाधकान् मर्मत्राणानि कवचानि ७७

निषादादिवलवत्सुपर्यंशनापमात्रेणासेत्स्कार्याः पृतप्लाः तथापि वैरेयुकपात्रेषुसंस्कृताः पक्वाःपैठरास्ते मृगमांसपूरकुक्कुटसंबंधिभिर्मत्स्यमांस
चयैर्वृताः मैरेयपूर्णा वाप्यश्च श्वासन्निति संबंधः ७० पात्रीणां मन्त्रधाराणां सहस्राणि स्थालीनां व्यंजनस्थालीनां नियुतानि ल
क्षाणि पात्राणि भोजनपात्राणि न्यर्बुदानि शातकौम्भः ७१ कुंभ्यः स्थाल्यः जलपानपात्रविशेषाः करंभ्यो दधिमिश्रान्नपात्राणि
तद्विशेषाद्दधिपूर्णा इति यौवनस्थस्य मध्यनोत्तरं प्राप्तस्य तावत्कालेन सुपक्वस्य केशरादिसंबंधाद्गौरस्य पीतस्य कपित्थस्य
तक्रस्य सुगंधिनः सुगंधद्रव्यप्रक्षेपात्तक्रं कपित्थमथितमिति वैजयंती ७२ ह्रदाः पूर्णा इति पूर्वोक्तेनान्वयितः रसालस्य तक्रविशे

वाप्यो मैरेयपूर्णाश्च मत्स्यमांसचयैर्वृताः घृतसूपैठरैश्चापि मृगमांसपूरकुक्कुटैः ७० पात्री
णां च सहस्राणि स्थालीनां नियुतानि च न्यर्बुदानि च पात्राणि शातकुंभमयानि च ७१ स्था
ल्यः कुंभ्यः करंभ्यश्च दधिपूर्णाः सुसंस्कृताः यौवनस्थस्य गौरस्य कपित्थस्य सुगंधिनः ७२ ह्रदाः
पूर्णा रसालस्य दध्नः श्वेतस्य चापरे बभूवुः पयसश्चान्ये शार्करायाश्च संचयाः ७३

षस्य म्रपक्वतक्रं सद्योघंचतुर्जातगुडार्द्रकसजीरकै रसालं स्यान्मज्जिका शिखरिण्यपीति वैजयंती तक्रमत्र निर्जलं सद्योघं पुंडो मरि
चपिप्पल्यः चतुर्जातं लवंगैलाजातीजपत्राणि गुडाः खंडशर्कराः श्रादृकं च तत्तौ पार्श्वे षष्ठ्यः उक्तविशेषणाविशिष्ठेन तक्रेण पू
र्णाः श्वेतेन दध्ना चापरे पयसा चान्ये पूर्णा ह्रदा बभूवुरित्यर्थः शार्कराणां च संचयाः राशयः ७३ ७३ ७३ ७३ ७३ ७३ रामः ३१८

६६ आजैरित्यादि श्लोकद्वयमेकं वाक्यं आजैः अजमांसैः निष्ठानवरसंचयैः व्यञ्जनश्रेष्ठसमूहैः निष्ठानं व्यञ्जनं तेमनमिति हलायुधः फलनिर्यूहसंसिद्धैः सम्यगतिनिष्पन्नफलपक्वशार्करादिक्वाथरसैः क्वाथरसे निर्यूह इति वैजयन्ती सूपैर्मुद्गाढकचणकादिसूपैः

नाप्यशक्ता वा सा तत्रासीत्क्षुधितो मलिनोऽपि वा रजसा ध्वस्तकेशो वा नरः कश्चिद्दृश्यत ६५
आजैश्चापि च वाराहैर्निष्ठानवरसंचयैः फलनिर्यूहसंसिद्धैः सूपैर्गन्धरसान्वितैः
६७ पुष्पध्वजवतीः पूर्णाः शुक्लस्यान्नस्य चाभितः ददृशुर्विस्मितास्तत्र नरा लौहीः सहस्रशः
६८ बभूवुर्वनपार्श्वेषु कूपाः पायसकर्दमाः ताश्च कामदुघा गावो द्रुमाश्चासन्मधुश्च्युतः
६९

गन्धरसान्वितैः पाकभेदोत्पन्नगन्धरसपुञ्जैः रैणजादिभिः पूर्णाः शुभ्रमितः शुक्लस्यान्नस्यौदनस्य च पूर्णाः पुष्पध्वजवतीः स्थले कालेर्यकल्पितपुष्पध्वजयुक्ताः लौहीः सुवर्णरजतपात्रीर्ददृशुरिति संबन्धः ६७ ६८ वनपार्श्वेषु चैत्ररथवनवत्प्रतिभासमानवनप्रदेशेषु पञ्चयोजनमितेषु तत्रत्याः कूपाः पायसकर्दमा बभूवुः तत्रत्या गावश्च कामदुघा बभूवुः ६९ ॥॥॥ २।२

हस्त्यश्वारोहास्तद्बंधकाश्चतेविधिनाद्दृष्टासत्कारं श्वनाथाः श्वपाचकाइत्यर्थः ६० विनेदुरत्रविनादःसंप्रहृष्टानोश्रा
द्धविशेषः ६१ ६२ अभवद्भक्षणेमतिःतत्रान्नानामपिभक्ष्यसौष्ठवात्पुनराकांक्षाभूदित्यर्थः ६३ प्रेष्याःसेवकाःचेट्योदासाःव

इतिपादात्तयोधाश्वहस्त्यश्वारोहवंधकाः श्वनाथास्तेविधिंत्वध्वावाचमेतामुदीरयन् ६०
संप्रहृष्टाविनेदुस्तेनराःस्तत्रसहस्रशः भरतस्यानुयातारःस्वर्गोयमितिचाब्रुवन् ६१ नृत्यंत
श्चहसंतश्चगायंतश्चैवसैनिकाः समंतात्परिधावंतिमाल्योपेताःसहस्रशः ६२ ततोभुक्तव
तांतेषांतदन्नममृतोपमम् दिव्यानुद्वीक्ष्यभक्ष्यांस्तानभवद्भक्षणेमतिः ६३ प्रेष्याश्चेट्य
श्चवध्वश्चबलस्थाश्चापिसर्वशः बभूवुस्तेभृशंतृप्ताःसर्वेचाहतवाससः ६४ कुंजराश्च
खरोष्ट्राश्चगोश्वाश्चमृगपक्षिणः बभूवुःसुभृतास्तत्रनान्योह्यन्यमकल्पयत् ६५ ६५

ध्वोयोषोगन्नाः बलस्थाःसेनास्थाः अहतवाससः नूतनवस्त्रपरिधानाः ६४ सुभृताःसुपुष्टाः नान्योह्यन्यमकल्पयत् हिरण्यार्थे
अन्योपिसेनानेतरोपिमार्गस्थःप्रसंगात्तद्ग्रामागतः अन्यं अभिकल्पितादन्यंपदार्थंनाकल्पयत् नमुक्तवानित्यर्थः अन्ने

सुरभेः सुतान् बलीवर्दान् वाहनपाः ऋषिप्रभावसिद्धवाहनरक्षकाः ५५ इक्ष्वाकुवरयोधानां वाहनानि चोदयन्तः भक्षणाय प्रेरयन्तः
तान् इक्ष्वादीन् भोजयन्तिस्म ५६ अश्वबन्धातीसम्बन्धः अश्वस्याहनाजानानात्तन् ज्ञातवान् तत्रहेतुमाह मत्तेत्यादि मत्ताम

हयान्गजान्खरानुष्ट्रान्तथैव सुरभेसुतान् अभोजयन्वाहनपास्तेषांभोज्यं यथाविधि ५५
इक्षूंश्चमधुलाजांश्चभोजयन्तिस्मवाहनान् इक्ष्वाकुवरयोधानांचोदयन्तोमहाबलाः ५६
नाश्वबन्धोऽश्वमाजानान्नागंकुञ्जरग्रहः मत्तप्रमत्तमुदिताचमूसातत्रसंबभौ ५७ त
र्पिताःसर्वकामैस्तेरक्तचंदनरूषिताः अप्सरोगणसंयुक्ताःसैन्यावाचमुदीरयन् ५८ नैवा
योध्यांगमिष्यामोन गमिष्याम दण्डकान् कुशलंभरतस्यास्तुरामस्यास्तुतथासुखम् ५९

दकरद्वयसेवयाप्रमत्ताम धुपानेन कार्याकार्यविवेकशून्याम् उदिताः स्रक्चंदनादिभोगातिशयेन ५७ सैन्याः सेनासमवेताः उदीर
यन् उदैरयन् ५८ तां वाचमाह नैवेति न गमिष्याम इत्यार्षः सन्तोषः भरतस्य कुशलमस्तु यत्संगत्या भूमौ स्वर्गसुखलाभः ५९ ५९

ए०वा०स्व० विताविल्ववृक्षमार्द्दीका मृदंगवादकरूपधाराः एवं विभीतकाः शम्याख्यतालग्राहकाः अभासन् ४९ सरलो देवदारुः तालः
३१७
प्रसिद्धः कुब्जाः स्वयमुन्नतो भूत्वा वामनाः ह्रस्वाः संपेतुः संपन्नाः ५० शिंशपादयो स्त्रीलिंगशब्दवाच्या वृक्षाः लता मल्लिकाद्या

विल्वा मार्द्दीगिकाश्चासन् कुम्याग्राहा विभीतकाः अश्वत्था नर्त्तकाश्चासन् भरद्वाजस्य तेजसा
४९ ततः सरलतालाश्च तिलकानक्तमालकाः प्रहृष्टास्तत्र संपेतुः कुब्जा भूत्वाथ वामनाः
५० शिंशपामलकी जंबुर्याश्चान्याः कानने लताः प्रमदाविग्रहं कृत्वा भरद्वाजाश्रमेवस
न् ५१ सुरां सुरापाः पिबत पायसं च बुभुक्षिताः मांसानि च सुमेध्यानि भक्ष्यंतां यावदिच्छथ ५२
उच्छाद्य स्नापयंति स्म नदीतीरेषु वल्गुषु अप्येकमेकं पुरुषं प्रमदाः सप्त चाष्ट च ५३ संवा
हंत्यः समापेतुर्नार्यो विपुललोचनाः परिमृज्य तथान्योन्यं पाययंति वरांगनाः ५४ एमसी

लत्पादयः ५१ ततः प्रमदारूपं धृत्वा किं कुर्युस्तदाह सुरामिति एवमूचुरिति शेषः ५२ उच्छाद्य उद्वर्तनं कृत्वा उद्वर्तनोच्छादने द्वे इत्यम
रः ५३ संवाहंत्यः पादसंवाहनं कुर्वंत्यः परिमृज्य जलार्द्रमंगं वस्त्रादिना परिमृज्य अथ लेह्यं सच पायसं तिमध्वादिकमिति शेषः ५४

उभयतः कूले उभयोः कूलयोः पांडुमृत्तिकलेपनाः सुधालिप्ताः ब्राह्मणस्य भरद्वाजस्य ४२ आगुः आगतवत्यः ४३ सुवर्णमणिमुक्तेन सुवर्णा

तासामुभयतः कूलं पांडुमृत्तिकलेपनाः रम्याश्चावसथा दिव्या ब्राह्मणस्य प्रसादजाः ४२ तेनैव
च मुहूर्त्तेन दिव्याभरणभूषिताः आगुर्विंशतिसाहस्रा ब्रह्मणा प्रहिताः स्त्रियः ४३ सुवर्णमणि
मुक्तेन प्रवालेन विभूषिताः आगुर्विंशतिसाहस्राः कुबेरप्रहिताः स्त्रियः ४४ याभिर्गृहीतः पुरुषः
सोन्माद इव लक्ष्यते आगुर्विंशतिसाहस्रा नंदनादप्सरोगणाः ४५ नारदस्तुंबुरुर्गोपः प्रभावा
त्सूर्यवर्चसः एते गंधर्वराजानो भरतस्याग्रतो जगुः ४६ अलंबुसा मिश्रकेशी पुंडरीका च वाम
नाः उपानृत्यंस्तु भरतं भरद्वाजस्य शासनात् ४७ यानि माल्यानि देवेषु यानि चैत्ररथे वने प्र
यागे तान्यदृश्यंत भरद्वाजस्य शासनात् ४८

नि सुवर्णमयाभरणानि मणयो रत्नानि मुक्ता च सुवर्णमणिमुक्तं तेन ४४ गृहीतः आलिंगितः ४५ नारदः ब्रह्मपुत्रादन्यः ४६ ४७
४८

वेश्मसंविधिं वेश्मसंविधानं ३७ राजासनं सिंहासनं राजवत् राजार्हं स्वयं वर्त्तत प्रदक्षिणीकृतवान् ३८ रामं चेद्दीप्यमेतदितिबुध्या पूर्वमासनं पूजयामास ततस्तत्र प्रतिष्ठिते श्रीरामे ध्यात्वा प्रणाम्य वालव्यजनमादाय राम सेवा प्रोषितया सचिवासने न्यषीददित्यर्थः

अनुजग्मुश्च तं सर्वे मंत्रिणः सपुरोहिताः बभूवुश्च मुदा युक्ता दृष्ट्वा वेश्मसंविधिम् ३७
तत्र राजासनं दिव्यं व्यजनं छत्रमेव च भरतो मंत्रिभिः सार्धमभ्यवर्त्तत राजवत् ३८ आ
सनं पूजयामास रामायाभिप्रणम्य च वालव्यजनमादाय न्यषीदत्सचिवासने ३९ आनु
पूर्व्यान्निषेदुश्च सर्वे मंत्रिपुरोहिताः ततः सेनापतिः पश्चात्प्रशास्ता च न्यषीदत ४० त
तस्तत्र मुहूर्तेन नदाः पायसकर्दमाः उपातिष्ठन्त भरतं भरद्वाजस्य तेजसा ४१

अत्र भगवदेकचित्तानामनिच्छतामप्यानुषंगिकं सुखमिहापि भवतीति श्रीरामस्मरणानुभावे ख्यापयतो मुने राति प्रकरणमिति बोध्यं ३९ आनुपूर्व्यात् यथोचितोपविशनप्रकारेण प्रशास्ता शिबिररक्षकः ४० मुहूर्तेन अल्पकालेन १४१ ४१ ४१

कं स्वर्गं

तस्मिन् पंचयोजनमिते देशे फलानि भूषणानि येषां ते कपित्थादयो बभूवुः ३० वने चैत्ररथं नन्दीजाताचेक वेचनं तीरजैः वृक्षैः ३१ चतुःशा
लानि शुभ्राणि गृहाणि जातानीति शेषः तोरणानि पुरद्वाराणि ३२ सितमेघनिभं सुधालेपेन शुक्लमाल्यैः कृतशाकारोऽलंकारो यस्य दि

तस्मिन् कपित्थाविल्वाम्रपनसा बीजपूरकाः । श्रामलक्यो यजंबश्चबभूवुः फलभूषणाः ३० ३
नरेभ्यः कुरुभ्यश्चवने दिव्योपभोगवत् । धाञ्जगाममनदीमौम्यातीरजैर्वृक्षैर्विभूषिता ३१ चतुःशा
लानि शुभ्राणि प्रान्तायस्या जवाजिनाम् । हर्म्यप्रासादसंघातस्तोरणानि शुभानि च ३२ सितमेघ
निभं चापि राजवेश्म सतोरणम् । शुक्लमाल्यकृताकारं दिव्यगंधसमुक्षितम् ३३ चतुरस्रमसं
बाधं शयनासनयानवत् । दिव्यैः सर्वरसैर्युक्तं दिव्यभोजनवस्त्रवत् ३४ उपकेल्पितसर्वान्नं धौ
तनिर्मलभाजनम् । क्लृप्तसर्वासनं श्रीमत्स्वास्तीर्णशयनोत्तमम् ३५ प्रविवेश महाबाहुरनुज्ञातो
महर्षिणा । वेश्म तद्रत्नसंपूर्णं भरतः कैकेयीसुतः ३६

वैर्यगंधैर्धवकुंजलैरुक्षितं सिक्तं ३२ चतुरस्रं च
तुः कोणमसंबाधं विशालं शयनासनयानवत् यानं शिविकादि ३४ धौतत्वेन प्रक्षालितत्वेन निर्मलानि भाजनानि यस्मिन् ३५
३६

मलयदर्दुरौ चंदनपर्वतौ उपस्पृश्य स्पृष्ट्वा युक्त्या यथोचितत्वस्पर्शेन समं सुखं सौरभ्ययोगेन सुभीतात्मा सुप्रीतस्वरूपः अत एव शिवः सुखदः ई
दृशोऽनिलः सुखं ववौ २४ घना मेघाः २५ वीणा वाद्यमानाः इति शेषः स्वरान् षड्जादीन् २६ कीदृशाः श्लक्ष्णाः कोमलाः समः निषादादिषु

मलयं दर्दुरं चैव ततः स्वेदनुदोऽनिलः उपस्पृश्य ववौ युक्त्या सुप्रीतात्मा सुखं शिवः २४ त
तोऽभ्यवर्तत घना दिव्याः कुसुमवृष्टयः देवदुंदुभिघोषाश्च दिक्षु सर्वासु जज्ञिरे २५ प्रव
वुश्चोत्तमा वाता ननृतुश्चाप्सरोगणाः प्रजगुर्देवगंधर्वा वीणाः प्रमुमुचुः स्वरान् २६ स श
ब्दो द्यां च भूमिं च प्राणिनां श्रवणानि च विवेशोच्चरितः श्लक्ष्णः समो लयगुणान्वितः २७
तस्मिन्नुपरते शब्दे दिव्ये श्रोत्रसुखे नृणाम् ददर्श भारतं सैन्यं विधानं विश्वकर्मणः २८ बभू
व हि समा भूमिः समंतात्पंचयोजनम् शाड्वलैर्बहुभिश्छन्ना नीलवैदूर्यसन्निभैः २९ तारा

क्वचिदपि उत्कर्षरहितः लयगुणान्वितः लयो नाम नृत्तगीतवाद्यानामेककालविरामः स एव गुणस्तेनान्वितः अनेन गंधर्वाप्सरसामा
गमनमात्रं सूचितं २७ भरतः सैन्यं भारतं सैन्यं विश्वकर्मणोऽपि विधानं ददर्श २८ तदेव विधानं दर्शयति बभूवेत्यादि नीलवैदूर्यसन्निभैः
शाड्वलैः कोमलतृणैः छन्नावभूदेव स न कर्षः २९

सपरिच्छदाः सालंकाराः १८ कुरुषु उत्तरकुरुषु यद्दिव्यं वनं चैत्ररथाख्यं वासोभूषणान्येव पत्राणि यस्मिन्संति तत्तत् दिव्यनार्य एव फलानि यस्य तत् कौवेरं वनं इहैव तु इहवने एवागच्छतु इति शेषः १९ २ सोमं कुवेरं चलुकान्तपतिं चंद्रं प्रत्याह इह मे इत्यादि श्लोकद्वयमेकं वाक्यम् २० पादपप्रच्युतानि वृक्षेभ्यः स्वयंजातानि २१ समाधिना तेजसा तपसा च युक्तो मुनिः शिक्षास्वरसमायुक्तं

प्राकृं याभ्युद्धोपति छंति व्रत्तोगोया भ्रभामिनीः सर्वीसंवृरुगाला सार्द्रमा लरूपेस्तपरिच्छदाः १८
वनं कुरुषु यद्दिव्यं वासोभूषणपत्रवत् दिव्यनारीफलं शश्वत्तत्कौवेरमिहैव तु १९ इह
मे भगवान्सोमो विधत्तामन्नमुत्तमम् भक्ष्यं भोज्यं च चोष्यं च लेह्यं च विविधं बहु २० वि
चित्राणि च माल्यानि पादपप्रच्युतानि च सुरादीनि च पेयानि मांसानि विविधानि च २१ ए
वं समाधिना युक्तस्तेजसाप्रतिमेन च शिक्षास्वरसमायुक्तं तपसा चाब्रवीन्मुनिः २२ मनसा
ध्यायतस्तस्य शशुभस्य कृताञ्जलेः आजग्मुस्तानि सर्वाणि दैवतानि पृथक्पृथक् २३

शिक्षाप्रतिपाद्यवर्णोच्चारणलक्षणोपेतं तथा व्याकरणोपदिश्यमानप्रकृतिप्रत्ययस्वरसहितं एवं गुणोपेतमाह ऊनवाक्यम्
अब्रवीदित्यर्थः २२ मनसा ध्यायतः मनसा ध्यानपूर्वकं कृताह्वानस्य तानि आहूतानि २३

आह्वानप्रकारमाह आह्वये इति विश्वकर्मा सर्वशिल्पकर्ता त्वष्टा तु तदन्तेवासी हादिति मे तत्र संविधीयतां गृहादि सर्वं सिद्धं क्रियतां १२ त्रीन् यमवरुणकुबेरान् संविधीयतां पालनं क्रियतां १३ अन्तरिक्षे नदी आकाशगंगा १४ तासां कृत्यमाह अन्या इति

आह्वये विश्वकर्माणमहं त्वष्टारमेव च आतिथ्यं कर्तुमिच्छामि तत्र मे संविधीयताम् १२ आह्वये लोकपालांस्त्रीन्देवाञ्छक्रमुखांस्तथा आतिथ्यं कर्तुमिच्छामि तत्र मे संविधीयताम् १३ प्राक्स्रोतसश्च या नद्यः प्रत्यक्स्रोतस एव च पृथिव्यामन्तरिक्षे च समायान्त्वद्य सर्वशः १४ अन्याः स्रवन्तु मैरेयं सुरामन्याः सुनिष्ठिताः अपराश्चोदकं शीतमिक्षुकाण्डरसोपमम् १५ आह्वये देवगन्धर्वान्विश्वावसुहहाहुहून् तथैवाप्सरसो देवीर्गन्धर्वीश्चापि सर्वशः १६ घृताचीमथ विश्वाचीं मिश्रकेशीमलम्बुसाम् नागदन्तां च हेमां च भीमामद्रिकृतस्थलाम् १७

मैरेयं प्रसवे खर्जूरतालादिहेतुकं मद्यविशेषं सुरां गौडी पैष्टी माध्वी च विज्ञेया त्रिविधा सुरेत्युक्ताम् सुनिष्ठिताः १५ हहाः हाहाः छन्दोवशाद्ध्रस्वपाठः अप्सरसां द्वैविध्यमाह देवीः देवजातीः गन्धर्वीः जातीः १६ १७

विषयेषुदेशेषुतपस्विनःपरिहर्त्तव्याः तदाश्रमवर्तिवृक्षोदकादिबाधाप्रसंगनिमित्तमनुपरोध्याः ७ तदेवाह वाजीत्यादि ८ ९ समुपागमंसमीपानयनं १० अग्निशालांप्रवेश्य पाद्यार्घ्यं अपःपीत्वात्रिरितिशेषः परिमृज्यचास्यंद्विरितिशेषः चकारेणात्र हृदयः

राज्ञाहिमृगवन्नित्यंराजपुत्रेणवासदा यत्नतःपरिहर्त्तव्याविषयेषुतपस्विनः ७ वाजिभु
रव्यामनुष्याश्चमत्ताश्चवरवारणाः प्रच्छाद्यमहतींभूमिंमृगवन्नुपयातिमाम् ८ तेवृ
क्षानुदकंभूमिमाश्रमेषूटजोस्तथा नहिंसुरितितेनाहमेकएवागतस्ततः ९ आनीयत्ता
मितःसेनेत्यासन्नेपरमर्षिणा तथातुचक्रेभरतःसेनायाःसमुपागमम् १० अग्निशालांप्र
विश्यपाद्यपीत्वापःपरिमृज्यच आतिथ्यसत्क्रियाहेतोर्विश्वकर्माणमाह्वयत् ११ ॥

स्पृश्यशिरश्चक्षुषीनासिकेश्रोत्रेहृदयमालभेतेत्युक्तसंग्रहः अनेनसर्वकर्मणामाचमनंदर्शितं आतिथ्यसत्क्रियाहेतोः आ
तिथ्यकरणनिमित्तंविश्वकर्माणंसृष्टिकर्तृविशेषमाह्वयदित्यर्थः ११

विषयेषु देशेषु तपस्विनः परिहर्तव्याः तदाश्रमवर्तिवृक्षोदकादिबाधाप्रसंगनिमित्तमनुपरोध्याः ७ तदेवाह वाजीत्यादि ८ ९ समु
पागमं समीपानयने १० अग्निशालां प्रविश्य पावनार्थं अपः पीत्वा त्रिरिति शेषः परिमृज्य च द्विरिति शेषः चकारेणासमुच्चयः

राज्ञा हि भगवन्नित्यं राजपुत्रेण वा सदा यत्नतः परिहर्त्तव्या विषयेषु तपस्विनः ७ वाजिमु
ख्याम्नुष्याश्च मत्ताश्च वरवारणाः प्रच्छाद्य महतीं भूमिं भगवन्नुपयान्ति माम् ८ ते वृ
क्षानुदकं भूमिमाश्रमेषूटजांस्तथा नहिंस्युरिति तेनाहमेक एवागतस्ततः ९ आनीयता
मितः सेनेत्याज्ञप्तः परमर्षिणा तथा तु चक्रे भरतः सेनायाः समुपागमम् १० अग्निशालां प्र
विश्याथ पीत्वापः परिमृज्य च आतिथ्यस्य क्रियाहेतोर्विश्वकर्माणमाह्वयत् ११ ।।।

स्पृश्य शिरश्चक्षुषी नासिके श्रोत्रे हृदयमालभेतेत्युक्तसंग्रहः अनेन सर्वकर्मांगमाचमनं दर्शितं आतिथ्यस्य क्रियाहेतोः आ
तिथ्यकरणनिमित्तं विश्वकर्माणं सृष्टिकर्तृविशेषमाह्वयदित्यर्थः ११

 तत्रैवाश्रमे निवासाय कृतबुद्धिं कृतनिश्चयं आतिथ्येन विविधभोजनोपेतातिथ्यसत्कारेणाहेतुनाफलमपि हेतुः १ वने यदुपपद्य
ते तेनातिथ्यं कृतं नन्विति अब्रवीत् २ वनवासित्वेन निःस्वत्वादेतदधिकातिथ्यकरणोऽसामर्थ्यं मन्यत इत्याशयेन प्रहसन्निवेति ये

कृतबुद्धिं निवासाय तत्रैव स मुनिस्तदा भरतं कैकेयीपुत्रमातिथ्येन न्यमंत्रयत् १ अब्रवी
द्भरतस्त्वेनं नन्विदं भवता कृतम् पाद्यमर्घ्यं तथातिथ्यं वने यदुपपद्यते २ अथोवाच भर
द्वाजो भरतं प्रहसन्निव जाने त्वां प्रीतिसंयुक्तं तुष्येस्त्वं येन केनचित् ३ सेनायास्तु ते ए
तस्याः कर्तुमिच्छामि भोजनम् मम प्रीतिर्यथारूपा त्वमर्हो मनुजर्षभ ४ किमर्थं चा
पि निक्षिप्य दूरे बलमिहागतः कस्मान्नेहोपयातोसि सबलः पुरुषर्षभ ५ भरतः प्रत्युवा
च इदं प्रांजलिस्तं तपोधनम् ससैन्यो नोपयातोस्मि भगवन्भगवद्भयात् ६ ६ ६ ६ ६ ६ ६

न केनचिदपि वन्येनाप्यातिथ्येन तुष्येः प्रीतियुक्तो भवेरिति जाने ३ मम प्रीतिर्यथारूपा मम च्छायाद्दृशी तथारूपातोऽत्वमर्होसि अं
भो कर्तुमिति शेषः ४ बलं दूरे निक्षिप्य एकाकी किमर्थमागतः स्वयमेवार्थो व्यतिरेकमुखेन प्रदर्श्यते कस्मादिति ५ अथोत्तर
माह भरत इति भगवद्भयात् भगवदाश्रमपीडाप्रसंगभयादित्यर्थः ६

गुरुवृत्तिर्ज्येष्ठानुवर्तित्वं दमः इंद्रियनिग्रहः साधूनां चानुयायिता सच्चरितानुवर्तित्वं एतत्त्रितयं त्वयि राघववंशजे युक्तमित्यन्वयः २० जाने चे यो
गप्रभावेनेति शेषः दृढीकरणं अन्यथाभावान्निवृत्तिः बहुनामग्रे ऽकौशल्यानां त्वया कर्तुं प्रकटीकृतेमत्स्वप्रयोजनमाह । कीर्तिं सम

त्वय्येतत्पुरुषव्याघ्र युक्तं राघववंशजे ॥ गुरुवृत्तिर्दमश्चैव साधूनां चानुयायिता ॥२०॥ जाने चै
तन्मनःस्थं ते दृढीकरणमस्त्विति ॥ अपृच्छं त्वां ततो वाक्यं कीर्तिं समभिवर्धयन् ॥२१॥ जाने
च रामं धर्मज्ञं ससीतं सहलक्ष्मणम् ॥ असौ वसति ते भ्राता चित्रकूटे महागिरौ ॥२२॥ श्वस्तु
गन्तासि तं देशं वसाद्य सह मंत्रिभिः ॥ एतं मे कुरु सुप्राज्ञ कामं कामार्थकोविद ॥२३॥ ततस्त
थेत्येवमुदारदर्शनः प्रतीतरूपो भरतोऽब्रवीद्वचः ॥ चकार बुद्धिं च तदा तदाश्रमे निशानिवासाय
नराधिपात्मजः ॥२४॥ इत्यार्षे रामायणे श्रीअयोध्याकांडे नवतितमः सर्गः ॥ ९० ॥ सीतारामाभ्यां नमः

भिवर्धयन्निति कीर्तिं समभिवर्धयन् हेतवे ऽ प क्रमित्यर्थः २१ अथ रामः क्वेति प्रश्नस्योत्तरमाह जाने चेति २२ एतं अद्य वासरूपं कामार्थकोवि
द वांछितार्थप्रदानसमर्थ १३ प्रतीतरूपः प्रकटीकृतहृष्टरूपः २४ इति नवतितमः सर्गः ९० ९० ९० ९० ९० ९० ९०

रा०व्या०२७० यदि भगवानपि सर्वज्ञोऽपि मामेवं पापमसङ्कल्पं मन्यते तदा हतोऽस्मि व्यर्थजन्मास्मि मत्तो दोषप्रत्याजन दोषं नाशङ्कीः नो मे ऋषीः अ
३१२ तो मामेवं नानुशाधि हि एवं करणीकदोरं वक्तुं नार्हसि १५ मातृकृतं त्वत्कृतमेवेत्यापं काह नचैतदिति मदन्तरे मद्विषये तदेव वि
णोति नाहमिति एतेन मातृकृतव्यापारेण न तद्वचनमाददे नाङ्गीकरोमि इदानीमपीति शेषः १६ स्वागमनकारणमाह अ

कृतोऽस्मि यदि मामेवं भगवानपि मन्यते मत्तो न दोषमाशङ्कीर्नैवं मामनुशाधि हि १५ न चैतत्
दिष्टं माता मे यदवोचन्मदन्तरे नाहमेतेन तुष्टश्च न तद्वचनमाददे १६ अहं तु तं नरव्याघ्र
मुपयातः प्रसादकः प्रतिनेतुमयोध्यां च पादौ तस्याभिवन्दितुम् १७ तं मामेवं गतं मत्वा प्रसादं क
र्तुमर्हसि शंस मे भगवन्रामः क्व संप्रति महीपतिः १८ वसिष्ठादिभिरृत्विग्भिर्याचितो भगवां
स्ततः उवाच तं भरद्वाजः प्रसादाद्भरतं वचः १९

हं त्विति प्रसादकः उपयातः प्रसादयितुमागत इत्यर्थः १७ एवं गतं एवं

बुद्धिं क्व संप्रति कस्मिन्देशे १८ वसिष्ठादिभिर्याचितः नरतापश्रमन्तो भवेति प्रार्थितः प्रसादात् प्रसादं प्राप्योवाचेत्यर्थः १९ १९ १९

तथेति प्रतिज्ञाय अन्नाम प्रमित्युक्त्वा राघवस्नेहबंधनात् रामविषयस्नेहानुबंधात् ९ न शुध्यते न विश्वसिति १० सुषुवे यमिति श्लोकत्रयमेकं वाक्यं चिरं प्रव्राजितः चिरं प्रव्राजितः चिरकालमवधि प्रप्रव्राजितः ११ वनवासी भवेति नियुक्तः १२

तथेति च प्रतिज्ञाय भरद्वाजो महातपाः भरतं प्रत्युवाचेदं राघवस्नेहबंधनात् ९ किमिहागमने कार्यं तव राज्यं प्रशासतः एतदाचक्ष्व मे सर्वं न हि मे शुद्ध्यते मनः १० सुषुवे यममित्रघ्नं कौशल्या कुलवर्धनम् भ्रात्रा सह सभार्यो यश्चिरं प्रव्राजितो वनम् ११ नियुक्तः स्त्रीनिमित्तेन पित्रा योऽसौ महायशाः वनवासी भवेतीह समाः किल चतुर्दश १२ कच्चिन्न तस्यापापस्य पापं कर्तुमिहेच्छसि अकंटकं भोक्तुमना राज्यं तस्यानुजस्य वै १३ एवमुक्तो भरद्वाजं भरतः प्रत्युवाच ह पर्यश्रुनयनो दुःखाद्वाचा संसज्जमानया १४

इह वने तस्य रामस्य तस्यानुजस्य लक्ष्मणस्य च पापं द्रोहं कर्तुं नेच्छसि कच्चित् तन्न हेतुरकंटकं असपत्नम् १३ पर्यश्रुनयनः परिप्लुताश्रुनयनः संसज्जमानया स्खलन्त्या १४

 ततः संदर्शने आश्रमप्रवेशानंतरम् संदर्शिनाद्वारे अन्तः पुरोहितमनुपश्चात् ३ संचचाल उदतिष्ठत् शिष्यान्प्रति अर्घ्यमानयेतिब्रुवन् ४ अबुध्यत वसिष्ठेन सहागमनादिति शेषः ५ ताभ्यां वसिष्ठभरताभ्यां आनुपूर्व्यात् क्रमेण प्रथमं ब्राह्मणस्य पश्चात् क्षत्रियस्य कु

ततः संदर्शने तस्य महर्षेः सह राघवः मैत्रावरुणिनानवसृष्टाप्यजगामानुपुरोहितम् ३ वशिष्ठमथ दृष्ट्वैव भरद्वाजो महातपाः संचचालासनात्तूर्णं शिष्यानर्घ्यमितिब्रुवन् ४ समागम्य वशिष्ठेन भरतेनाभिवादितः अबुध्यत महातेजाः सुतं दशरथस्य तम् ५ ताभ्यामर्घ्यं च पाद्यं च दत्वा पश्चात्फलानि च आनुपूर्व्याच्च धर्मज्ञः पप्रच्छ कुशलं कुले ६ अयोध्यायां बले कोशे मित्रेष्वपि च मंत्रिषु जानन्दशरथं वृत्तं न राजानमुदाहरत् ७ वशिष्ठो भरतश्चैनं पप्रच्छतुरनामयम् शरीरेग्निषु वृक्षेषु शिष्येष्वपि च पक्षिषु ८

लेगृहे ६ वृत्तं मृतीतं नोदाहरत् नाशासीत् ७ शरीरादित्रयस्य यथायोगं तपः साधनत्वात्तदनामयप्रश्नः मृगपक्षिणामन्नयाजस्थान द्वारा धर्मसाधनत्वात् शिष्यवत् शिष्यत्वाच्च तदनामयप्रश्नः ८

यथोपजोषं यथासुखं ऋषिप्रवर्यं ऋषिश्रेष्ठं २२ देवपुरोहितस्य भरद्वाजोद्युतस्य भार्या संगमनज्ञायां बृहस्पतेर्जात इति पुराणप्रसिद्धं ते
च भरतं निशात्य कुकामांममजां देवाड चेः उन्तथ्य त्वस्य देवजत्वेन बृहस्पतेर्गौरसत्वेन द्वाजमनुं भरेति तस्मा भरद्वाजेति तस्य नाम २३ इ
त्येकोननवतितमः सर्गः ८९ भरद्वाजेत्यादि श्लोकद्वयमेकं वाक्यं जगाम दृष्टुमिति शेषः अवस्थाप्य आश्रमोपरोधनिवृत्तये इति प्रो

ग्राम्यवासयित्वा च चमूं महात्मा निवेशयित्वा च यथोपजोषम् दुद्रुं भरद्वाजमृषिप्रवर्यम्
ऋत्विक्सदस्यैर्भरतः प्रतस्थे २२ स ब्राह्मणस्याश्रममभ्युपेत्य महात्मनो देवपुरोहितस्य ददर्श र
म्योटजवृक्षदेशं महद्वनं विप्रवरस्य रम्यम् ॥२३॥ इत्यार्षे अयोध्या० एकोननवतितमः सर्गः ॥ ८९॥
भरद्वाजाश्रमं दृष्ट्वा क्रोशादेव नरर्षभः बलं सर्वमवस्थाप्य जगाम सह मन्त्रिभिः १ पद्भ्यामेव
हि धर्मज्ञो न्यस्तशस्त्रपरिच्छदः वसानो वाससी क्षौमे पुरोधाय पुरोहितम् २

षः १ पद्भ्यामेवेति विनयप्रदर्शनार्थं वसानो वाससी क्षौमे इति ननु पूर्वं जटाचीराणि धारयन्ति स्मेत्युक्तं जटिलं चीरवसनमिति च व
क्ष्यते कथमत्र क्षौमवसनमुच्यते नैष दोषः पूर्वं प्रतिज्ञामात्रं कृतं भरद्वाजाश्रमात्परं जटाधारणमिति पुरोधाय पुरस्कृत्य २ २२

रा०वा०अ०
३१०

नातिरामभिपूर्णा इत्यादौ तृतीयार्थस्य प्रोषत्वविवक्षायां षष्ठी नातिभिः पूर्णा इत्यादावर्थः यानानि रथप्राकटादीनि युग्यान्यश्वा-
श्वतरीबलीवर्दादीनि महाधनं बहुमूल्यम् १७ तं जनमवरोप्य निवृत्ता नावः समाहृय दाशबंधुभिः दाशश्रेष्ठैः कांडचि-
त्राणि कांडे वारिणि चित्राणि विचित्रगमनानि यत्र पुनरावृत्तिक्रियंते स्म इत्यर्थः १८ सवैजयंताः सध्वजाः १९ प्लवा वेणुत-

नातिरामभिपूर्णास्तु काश्चित्काश्चित्तु वाजिनाम् काश्चित्तत्र वहंति स्म यानयुग्यं महाधनम् १७ तास्तु गत्वा परं तीरमवरोप्य च तं जनम् निवृत्ताः कांडचित्राणि क्रियंते दाशबंधुभिः १८ सवैजयंतास्तु गजा गजारोहैः प्रचोदिताः तरंति स्म प्रकाशंते सध्वजा इव पर्वताः १९ नावश्चारुरुहुस्त्वन्ये प्लवैस्तेरुस्तथापरे अन्ये कुंभघटैस्तेरुरन्ये तेरुश्च बाहुभिः २० सा पुण्या ध्वजिनी गंगां दाशैः संतारिता स्वयम् मैत्रे मुहूर्ते प्रययौ प्रयागवनमुत्तमम् २१

णादिनिर्मिताः कुंभा महांतः घटाः स्वल्पा घटाः २० मैत्रे उदयात्तृतीये मुहूर्ते नाडीद्वयं मुहूर्तः रौद्रः सार्प-
स्तथा मैत्रः पैत्रो वासव एव च आप्यो वैश्वस्तथा ब्राह्मः प्राजो रौद्रास्मिरे व च ऐंद्रे यनि ... तिष्ठेव वारुणोर्यमसा ध्वकौएतेक्र-
मेणाविज्ञेया मुहूर्ता दश पंच चेत्युक्तेः २१

ततः इतरस्वस्तिकृतः भ्योपिलब्धरां स्वस्ति कारयां पांडुके वल्लोरुजालतरणां कं वल्लसंवृतां सनंदिघोषां हर्षजनके किंकिणीदिघोषयुक्तां राजाहीं नावमुहः स्वयमेवोपहरत् १२ ततूर्ध्वं तमाह कभर तारोहात्पूर्वं पुरोहितामरवो ब्राह्मणा अन्येऽप्याप्तास्ते आरुरुहुः अनन्तरं ते षां तासां चानंतरं राजदाराः मीडलिके स्त्रियः प्राकदानि शाप ताः पदार्पी इतरं नौष्ठ्या रोपिता इति श्लोकः १४

ततः स्वस्ति कृतिं तेषां पांडुके वल्लसंवृताम् सनंदिघोषां कल्याणीं डिंडिहोनावमुपाहरत्
१२ तामारुरोह भरतः प्राङ्मुखश्च महाप्रभाः कौशल्या च सुमित्रा च साध्व्यान्या राजयोषितः १३
पुरोहितश्च तन्नूर्ध्वं गुरवो ब्राह्मणाश्च ये अनंतरं राजदारास्तथैव च प्राकदारशाः १४ आवा
समादीपयतां तीर्थं चाप्यवगाहताम् भांडानि चाददानानां घोषस्त्रिदिवमस्पृशत् १५
पताकिन्यस्तु ता नावः स्वयं दाशैरधिष्ठिताः वहन्त्यो जनमारूढं तदा संपेतुराशुगाः १६ ६६

आवासं उषिता वासं आदीपयतां अग्नि सात्कुर्वतां अप्रंसेना धर्मः तीर्थं नद्यवतारमवगाहतो अहमहमिकया श्रवितताभां डानि उपकरणानि १५ आशुगाः शीघ्राः संपेतुः आशुगत्वेन दाशाधिष्ठानमाश्रेता अनायासेन जग्मुरित्यर्थः १६ ६६

रा०वा०७१०
३०७

रामस्यानुवशः स्थितो रामाधीनः ६ ते वयं पूजिताः ७ ८ ९ नावां पंच शतानि समानिन्युः १० १४ अन्याः पूर्वोक्त व्यतिरिक्ताः स्वस्ति
कारव्यरचनाविशेषविशिष्टा तेषां लिमितत्वात् स्वस्तिका इति विशेयाः महाघंटाधराः पताकास्तासां धारं पंतीत्यर्थः शोभमाना

गुहस्य तत्तु वचनं श्रुत्वा स्नेहाद् उदीरितम् रामस्यानुवशो वाक्यं भरतोपीदमब्रवीत् ६ स
खा नः प्रार्वरी राजन् पूजिताः स्थापिते वयम् गंगां तु नौभिर्बह्वीभिर्दाशाः संतारयंतु नः ७
ततो गुहः संत्वरितः श्रुत्वा भरतशासनम् प्रतिप्रविश्य नगरं तं ज्ञातिजनमब्रवीत् ८ उत्ति
ष्ठत प्रबुध्यध्वं भद्रमस्तु हि वः सदा नावः समनुकर्षध्वं तारयिष्यामि वाहिनीम् ९ ते
तथोक्ताः समुत्थाय त्वरिता राजशासनात् पंच नावां शतान्येव समानिन्युः समंततः १० अ
न्याः स्वस्तिक विज्ञेयाः महाघंटाधरा धराः शोभमानाः पताकिन्यो युक्तवाहाः सुसंहताः ११

नाः स्वस्तिकादिरूपविचित्रचित्रैः शोभमाना पताकिन्यः बहुरित्र वसाः स्वरित्रैः नावाकर्षणदंडः युक्तवाहाः पर्याप्तकर्णधारयुक्ताः सुसंह
ताः दृढसंधिबंधाः ११

नप्रतिपत्स्यते नांगीकरिष्यति यदि प्रार्थनामिति शेषः उपेक्षितुं नार्हति भक्तवत्सलत्वादिति भावः ॥ ३० ॥ इत्यष्टाशीतितमः सर्गः ॥ ८८ ॥

प्रसाद्यमानः शिरसा मया स्वयं बहुप्रकारं यदि न प्रपत्स्यते ॥ ततोऽनुवत्स्यामि चिराय राघवं वने वसन्नार्हति मामुपेक्षितुम् ॥ ३० ॥ इत्यार्षे रामायणेऽयोध्याकांडेऽष्टाशीतितमः सर्गः ॥ ८८ ॥ व्युष्य रात्रिं तु तत्रैव गंगाकूले स राघवः भरतः कल्यमुत्थाय शत्रुघ्नमिदमब्रवीत् १ शत्रुघ्नोत्तिष्ठ किं शेषे निषादाधिपतिं गुहम् शीघ्रमानय भद्रं ते तारयिष्यति वाहिनीम् २ जागर्मि नाहं स्वपिमि तथैवार्यं विचिंतयन् इत्येवमब्रवीद्भ्राता शत्रुघ्नो विप्रचोदितः ३ इति संवदतोरेवमन्योन्यं नरसिंहयोः आगम्य प्रांजलिः काले गुहो भरतमब्रवीत् ४ कच्चित्सुखं नदीतीरेऽवात्सीः काकुत्स्थ शर्वरीं कच्चिच्च सह सैन्यस्य तव सर्वमनामयम् ५

व्युषित्वा कल्यमुषःकाले १ २ आर्यं विचिंतयन्नहमपि यथा त्वं तथैव ॥ जागर्मि न स्वपिमीत्येवमब्रवीदित्यन्वयः ३ ४ शर्वरीमवात्सीः उषितवानसि योगे द्वितीया ५

टी० वा० अ० अप्रहृष्टबलां वलेषु प्रस्यां अतएव न्यूनां क्षीणबलां विषमस्थां दुर्दशापन्नां अनावृतां वाहारक्षकरहितां नाभिमन्येत स्वीकर्तुं नेच्छेति
३८ अत्रैतद्धाडवीर्यं रक्षितत्वे हेतुः २५ अतएतत्तमेव राज्यार्हमानेष्यामित इत्युते चाहमेव नैष्यास्य इत्याह अहमित्यादिना २६ तस्यैव

अप्रहृष्टबलां न्यूनां विषमस्थामनावृताम् प्राप्तवान्नाभिमन्येत भक्ष्यान्विषकृतानिव
२५ अहं ह्यप्रभृति मेमातु प्राप्यद्विष्टो हरतो ध्रुवा फलमूलाशनो नित्यं जटाचीराणि धारय
न् २६ तस्यापेमुत्तरं काले निवत्स्यामि सुखं वने तं प्रति श्रवमामुच्य नास्मि मिथ्याभवि
ष्यति २७ वसंतं भ्रातुरर्थाय प्राप्तं घोमान्ड वत्स्यति लक्ष्मणेन सह त्वार्यो ह्ययोध्यां पाल
यिष्यति २८ अभिषेक्ष्यंति काकुत्स्थमयोध्यायां द्विजातयः अपि मे देवताः कुर्युरिमं स
त्यं मनोरथम २९

तसं कल्पं स्वसंग्रहीत्वा तस्य रिपाज ना यमुत्तरकालं च तद्दशवर्षपर्यंतमहं वने वत्स्यामि तं प्र
ति श्रवं तां प्रतिज्ञां आमुच्य स्वस्मिन्न्यास्य तस्यार्थमुत्तरकालं वने वत्स्यामि एवं सति नार्यस्य तत्प्रतिश्रुतं मिथ्या भ
विष्यति २७ २८ २९

राम ३८

१९ विषमे काले संकटकाले २० प्रापतिमानुपतिमनुसृत्य वनं गता अतः सिद्धार्था वयं संप्रापिताः २१ अस्मत्सेवां रामोंगीकरिष्यति

कच्चिदिंदीवरश्यामो रक्ताक्षः प्रियदर्शनः सर्वभोगीनदुःखार्हः प्रापितोम्ब विराघवः १९
धन्यः खलु महाबाहुर्लक्ष्मणः शुभलक्षणः भ्रातरं विषमे काले यो राममनुवर्त्तते २०
सिद्धार्था खलु वैदेही पतिं यानुगता वनम् वयं संप्रापिताः सर्वे हीनास्तेन महात्मना २१
अकर्णधारा पृथिवी शून्येव प्रतिभाति मे गते दशरथे स्वर्गे रामे चारण्यमाश्रिते २२ ।
न च सा धृष्यते कश्चिन्मनसापि वसुंधरा वनेपि वसतस्तस्य बाहुवीर्याभिरक्षिताम् २३
शून्यसंवरणारक्षामयंत्रितहयद्विपाम् अनावृतपुरद्वारां राजधानीमरक्षिताम् २४

नवेत्ति संशयमापन्नाः २१ अकर्णधारा नौरिव शून्या नायकरहिताः २२ न धृष्यते आक्रमितुं नेच्छति २३ शू
न्यसंवरणा रक्षां संवरणानां प्राकाराणाम् आरक्षंता दृक्षया शून्यां हीनां अनावृतत्वे रक्षकाभावात् २४ एमसीता

टी० म० इदं हि परिवर्तितं स्वापकाले श्रमातिशयादितस्ततः शरीरपरिवर्तनं स्थंडिले कठिने सर्वं गात्रं त्वचोर्विमर्दितं तृणमिति संबं ३७
धः १३ कनकबिंदवः भूषणावयवकनककणाः केलानि १४ सीतायाधृतमिति शेषः १५ भर्तुः शय्या कोमला लोकठिना वा इति

इयं शय्या मम भ्रातुरिदं हि परिवर्तितम् स्थंडिले कठिने सर्वं गात्रैर्विमर्दितं तृणं १३
मन्ये साभरणा सुप्ता सीतास्मिन् शयने तदा तत्र तत्र हि दृश्यंते सक्ताः कनकबिंदवः १४
उत्तरीयमिहासक्तं सुव्यक्तं सीतया तदा तथा ह्येते प्रकाशंते सक्ताः कौशेयतंतवः १५
मन्ये भर्तुः सुखा शय्या येन बाला तपस्विनी सुकुमारी सती दुःखं न विजानाति मैथिली १६
हा हतोस्मि नृशंसोहं यत्सभार्यः कृते मम ईदृशीं राघवः शय्यामधिशेते ह्यनाथवत् १७
सार्वभौमकुले जातः सर्वलोकसुखावहः सर्वलोकप्रियस्त्यक्त्वा राज्यं प्रियमनुत्तमम् १८

तां सुखैव यतः सुकुमारी मैथिली सती पतिव्रता अस्मिन्नपि शयने शयिता दुःखं न विजानाति १६ मम कृते इति कैके
यीप्रयुक्तेः स्थानमतिरहितोपि सम्यग्दृष्टः प्रजातत्वादिति भावः १७ १८ राम० ३७

वराभरणानां परिचारिकाणां नूपुराद्याभरणानां निस्वनैर्गीतादिशब्दैः स्तुतिभिश्च प्रतिबोध्यमानः कथं भूमौ केवले शेते इति सं-
बंधः ८ ९ इदं रघुनाथस्य तल्पशय्याशयनादिकं लोके अश्रद्धेयं जनेषु श्रुतमपि माम् असत्यं प्रतिभाति एतद्दिव ये मे भावः
अन्तःकरणं मुह्यते मोहं प्राप्नोति अयं वा स्वप्नो यं भवितुमर्हतीति मे मतिः स्वप्ने ह्यसंभावितमपि संभाव्यते १० कालेन काल-

गीतवादित्रनिर्घोषैर्वराभरणनिस्वनैः मृदंगवरशब्दैश्च सततं प्रतिबोधितः ८ वं-
दिभिर्वंदितः काले बहुभिः सूतमागधैः गाथाभिरनुरूपाभिः स्तुतिभिश्च परंतपः ९
अश्रद्धेयमिदं लोके न सत्यं प्रतिभाति माम् मुह्यते खलु मे भावः स्वप्नोयमिति मे मतिः १०
न नूनं दैवतं किंचित्कालेन बलवत्तरम् यत्र दाशरथी रामो भूमावेवमशेत सः ११ वि-
देहराजस्य सुता सीता च प्रियदर्शना दयिता शयिता भूमौ स्नुषा दशरथस्य च १२

तो बलवत्तरं किंचित्किमपि दैवतं नास्तीति नूनं मन्ये यत्र कालेऽशोभनमस्ति दशरथपुत्रो रामोऽपि भूमावशेत ११ प्रियदर्शना अ-
तदेहस्पर्शे दयिता रामस्य शालोभ्योपि प्रियंसी भूमौ शायिता हे ते ति भावः १३

रा० वा० अ० इह भूमौ सर्वे ही प्राशिता अधिकरणोनिक्काएतद्देशावच्छिन्नप्रायत्नाधिकरणं प्रावृषि(?) तिर्यर्थः २ दमस्य विमर्दितं अङ्गानामि
३०६ ति शेषः अस्सरामस्य इदमङ्गानां विमर्दनाधिकरणमित्यर्थः २ ३ ऋषिशेषतोन दशरथेन हेतुना जातो नोर्व्यां स्वप्तुमर्हति ३
अजिनेन कदल्यादिमृगविशेषाजिनेन इत्तरेणासंचोत्तरछदेन संस्तीर्णो वरास्तरणसंचये श्रेष्ठास्तरणनिचयेषु पर्यंके सुप्तेषां संचये

अश्वत्थीज्जननीः सर्वा इह तेन महात्मना प्रावृषि प्राशिताम् भूमा विदमस्य विमर्दितम् २ म
हाभागकुलीनेन महाभागेन धीमता जातो दशरथेनोर्व्यां नरामः स्वप्तुमर्हति ३
अजिनोत्तरसंस्तीर्णो वरास्तरणसंचये शयित्वा पुरुषव्याघ्रः कथं शेते महीतले ४ प्रासा
दाग्रविमानेषु वलभीषु च सर्वदा हेमराजतभौमेषु वरास्तरणशालिषु ५ पुष्पसंचयचि
त्रेषु चन्दनागरुगन्धिषु पाण्डुराभ्रप्रकाशेषु शुकसंघरुतेषु च ६ प्रासादवरवर्येषु शीत
वत्सु सुगन्धिषु उषित्वा मेरुकल्पेषु कृतकांचनभित्तिषु ७

समूहे ४ प्रासादाग्रविमानेषु विमाना
कारप्रासादाग्रगृहे षु वलभीषु कूटागारेषु हेमानि राजतानि च भौमानि भूतलानि येषु ५ शुकसंघरुतेषु शुकरुतवत्सु ६
प्रासादवराणां प्रासादश्रेष्ठानां मध्ये वर्येषु श्रेष्ठेषु उषित्वा कथं भूमौ शेते इति संबन्धः ७ रामे ३६

अपाक्रामत् शयनदेशात् बहिर्दूरमिति शेषः २० २१ इषुधी पृष्ठे बध्वा तलांगुलित्रवान् तलं ज्याघातवारणं अंगुलित्रं अंगु

तस्मिन्समाविशद्रामः स्वास्तरे सह सीतया गृह्यास्य चतयोः पादान्यपाक्रामत्स लक्ष्मणः २०
एतत्तदिंगुदीमूलमेतदेव च तत्तृणम् यस्मिन् रामश्च सीता च रात्रिं तौ शयितावुभौ २१ नि
यम्य पृष्ठे तु तलांगुलित्रवान् शरैः सुपूर्णाविषुधी परंतपः महद्धनुः सज्यमुपोह्य लक्ष्म
णो निशामतिष्ठत्परितोऽस्य केवलम् २२ ततस्त्वहं चोत्तमबाणचापधृक्स्थितोऽभवं तत्र स यत्र
लक्ष्मणः अतन्द्रिभिर्ज्ञातिभिरात्तकार्मुकैः महेन्द्रकल्पं परिपालयंस्तदा ॥२३॥ इत्यार्षे रामा
यणे अयोध्याकांडे सप्ताशीतितमः सर्गः ॥ ८७ ॥ तच्छ्रुत्वा निपुणं सर्वं भरतः सह मंत्रिभिः इंगु
दीमूलमागम्य रामशय्यामवेक्षत १

लित्राणि तद्वान् सज्यं धनुरुपोह्य धृत्वा अस्य परितो भ्रमन्निति
ष्ठन् केवलं निद्रारहितः २२ परिपालयन् पर्यपालयम् २३ इति सप्ताशीतितमः सर्गः ८७ निपुणं सावधानमिति शेषः १

तमेवाह अन्नमित्यादि १४ प्रत्यनुनाथ्य महानुग्रहार्थं केवलं मे गोष्पदमपूर्णमेवमेव दत्तमिति क्षत्रधर्मं प्रतिग्रहरूपं १५ तमेव धर्म माह न हीति नन्वेवं भरद्वाजादिदत्तोपीकारः कथमिति चेत्तत्र धूप कौटिनाराजपूजायां ब्राह्मणं प्रतिविनैव तस्य युक्तत्वात् गु

अन्नमुच्चावचं भक्ष्याः फलानि विविधानि च रामायाभ्यवहारार्थं बहु चोपहृतं मया १४ तं तु वै प्रत्यनुनाथ्य रामः सत्यपराक्रमः नहि तत्प्रत्यगृह्णात्स क्षत्रधर्ममनुस्मरन् १५ न ह्यस्माभिः प्रतिग्राह्यं सखे देयं हि सर्वदा इति तेन वयं राजन्ननुनीता महात्मना १६ लक्ष्मणेन समानीतं पीत्वा वारि महामनाः औपवास्यं तदाकार्षीद्राघवः सह सीतया १७ ततस्तु जलशेषेण लक्ष्मणोप्यकरोत्तदा वाग्यतास्ते त्रयः संध्यामुपासीत समाहिताः १८ सौमित्रिस्तु ततः पश्चादकरोत्स्वास्तरं शुभम् स्वयमानीय बर्हींषि क्षिप्रं राघवकारणात् १९ १९ १९ १९

हस्य निषादत्वेन राजपूजानधिकारात् यद्यपि गुहस्य तत्तत्त्वेनास्त्येव भगवत्पूजाधिकारस्तथापि वृत्तस्यैन शूद्रत्वेन न्यायमिति लोकशिक्षणायेदमिति बोध्यम् १६ औपवास्यमुपवाससंबन्धि पेयं जलं १७ संहिताः समाहितचित्ताः १८ स्वास्तरं शयनं बर्हींषि कुशान् १९ रा०म० ३५

७ ८ ९ एकपुत्रायाममेति प्रोचः १० मुहूर्तं विस्तितः सन् पश्चात्समाश्वस्य सर्वः परिसान्त्व्य लक्ष्मणं किंते किमपि नास्ति किंतु तस्योर्जं
दाधार राजेन्द्र दुःखेन मूर्छितोसि इत्युक्तो ११ १२ हृष्टः रामवृत्तांतकीर्तनस्यावकाशो लब्ध इति संजातहर्षः सन् रामे यद्वि

वत्सलात्वं यथा वत्समपश्यन्मनस्विनी परिपप्रच्छ भरतं रुदंती शोककर्शिता ७ पुत्र व्या
धिर्न ते कच्चिच्छरीरं प्रतिबाधते अस्य राजकुलस्याद्य त्वदधीनं हि जीवितम् ८ त्वां दृष्ट्वा पु
त्र जीवामि रामे सभ्रातृके गते वृत्ते दशरथे राज्ञि नाथ एकस्त्वमद्य नः ९ कच्चिन्न लक्ष्मणे पु
त्र श्रुतं ते किंचिदप्रियम् पुत्रे वाप्येकपुत्रायाः सहभार्ये वनं गते १० स मुहूर्तं समाश्वस्य रुद
न्नेव महायशाः कौसल्यां परिसान्त्व्येदं गुहं वचनमब्रवीत् ११ भ्राता मे क्वावसद्रात्रिं क्व सीता
क्व च लक्ष्मणः अस्वपच्छयने कस्मिन्किं भुक्त्वा गुह शंस मे १२ सोब्रवीद्भरतं हृष्टो नि
षादाधिपतिर्गुहः यद्विधं प्रतिपेदे च रामे प्रियहितेतिथौ १३

धं यथा दृष्टानुपचारप्रतिपेदे अकरोत् तमब्रवीत् रामकृतं चाब्रवीदित्यन्वयः १३ श्रीसीतारामाभ्यां नमः सीताराम ||||

रा० बा० अ० ४८ श्रुतमप्रियं जटाधारणरूपं यत्तच्छ्रुतं तत्रैव श्रुतो ध्यानं जगाम त्वामिति लेषितकार्यसंकटं जातमिति चिंतां प्राप सः १ सुकुमार इत्यादिश्लोकद्व
यमेकं वाक्यं सुकुमारत्वादिगुणोन्नत्यादिके एतं श्रुतो निवृत्ति दुर्लभेति चिंतां जगाम २ तं तो मुहूर्तं कालं परमदुर्मनाः परमखिन्नः प्रत्याश्वस्य

३६

गुहस्य वचनं श्रुत्वा भरतो भृशमप्रियम् ध्यानं जगाम तत्रैव यत्र तच्छ्रुतमप्रियम् १ सुकुमारो महासत्वः सिंहस्कंधो महाभुजः पुंडरीकविशालाक्षस्तरुणः प्रियदर्शनः २ प्रत्याश्वस्य मुहूर्तं तु कालं परमदुर्मनाः पपात सहसा तोत्रै र्हृदि विद्ध इव द्विपः ३ तदवस्थं तु भरतं शत्रुघ्नोनंतरस्थितः परिष्वज्य रुरोदोच्चैर्विसंज्ञः शोककर्शितः ४ ततः सर्वाः समापेतुर्मातरो भरतस्य ताः उपवासकृशा दीना भर्तुर्व्यसनकर्शिताः ५ ताश्च तं पतितं भूमौ रुदंत्यः पर्यवारयन् कौशल्या त्वानुसृत्यैनं दुर्मनाः परिषस्वजे ६

न च सहसा दुःखवेगेन पपात तोत्रैरंकुशैर्हृदि विद्धो द्विप इव ३ तदवस्थं अचेतनावस्थं अनंतरस्थितः समीपस्थितः
४ ५ अनुसृत्य समीपं प्राप्य ६

आरामाः उद्यानानि उपवनानि राज्ञः क्रीडार्हवनानि चैतैः संपन्नो समाजैः संघैः क्रियमाणा उत्सवसमाजोत्सवो देवोत्सवस्तेन शोभमाना
मम पितू राजधानीं सुखिता विचरिष्यतीत्यर्थः २१ तस्य प्रतिज्ञेन रामेणाश्वविप्रो महि वृत्तमिति शेषः २२ परिदेवयमानस्य राजपुत्रस्य सतः प्राचीरी

आरामोद्यानसंपन्नां समाजोत्सवशालिनीम् सुखिता विचरिष्यंति राजधानीं पितुर्मम २१
अविषस्य प्रतिज्ञेन तार्ह कुशलिना वयम् निवृत्ते समये ह्यस्मिन् सुखिताः प्रविशामहि २२ परिदे
वयमानस्य तस्यैवं महात्मनः तिष्ठतो राजपुत्रस्य शर्वरी सात्यवर्तत २३ प्रभाते विमले सूर्ये का
रयित्वा जटा उभौ अस्मिन् भागीरथीतीरे सुखं संतारितौ मया २४ जटाधरौ तौ द्रुमचीर
वाससौ महाबलौ कुंजरयूथपोपमौ वरेषुधी चापधरौ परंतपौ व्यपेक्षमाणौ सह सीतया
गतौ २५॥ इत्यार्षे रामायणे अयोध्याकांडे षड्शीतितमः सर्वः सर्गः ८६॥ सीतारामाभ्यां नमः

६

अस्य वर्तिनगतेत्यर्थः २३ प्रभाते सूर्ये विमले सति अस्मिन् भागीरथीतीरे जटाकारयित्वाश्यितौ तावुभौ सुखं मया संतारितौ गतौ गंगामि
ति शेषः २४ व्यपेक्षमाणौ निरपेक्षावित्यर्थः २५ इति षडशीतितमः सर्गः ॥ ८६

रा० बा० ३५ सर्वेति जीवेयुरितिनाशंसे यदि जीवेयुरिमां श्रावीरिमिवेति संबंधः १५ शत्रुघ्नस्यान्ववेक्षया शत्रुघ्नस्यापि वेक्षया १६ राज्ये राममनिक्षिप्य
३३ ता ६ राममनोरथमनवाप्यमेपितां किंक्षिष्यति सुतः भ्रातः अतिक्रांतमतिक्रांतं सर्वेश्वयोजनं अतीत्य गतं व्यर्थीगतमित्यर्थः १७ वृतमतीतं
म तामतियावत् १८ रम्येत्यादि श्लोकत्रयमेकं वाक्यं रम्याणि रमणीयानि चत्वराणि संस्थानानि यस्यां सुविभक्तामहोतः

कौशल्या चैव राजा च तथैव जननी मम । नाशंसे यदि ते सर्वे जीवेयुः श्रावीरिमाम् १५ जी
वेदपि च मे माता शत्रुघ्नस्यान्ववेक्षया । दुःखिता सा तु कौशल्या वीरसूर्विनशिष्यति १६
अतिक्रांतमतिक्रांतमनवाप्य मनोरथम् । राज्ये राममनिक्षिप्य पिता मे विनशिष्यति १७ न
सिद्धार्थाः पितरं वृत्तं तस्मिन्काले ह्युपस्थिते । प्रेतकार्येषु सर्वेषु संस्करिष्यंति भूमिपम्
१८ रम्यचत्वरसंस्थानां सुविभक्तमहापथाम् । हर्म्यप्रासादसंपन्नां सर्वरत्नविभूषिताम् १९
गजाश्वरथसंबाधां तूर्यनादविनादिताम् । सर्वकल्याणसंपूर्णां हृष्टपुष्टजनाकुलाम् २०

पंथानो यस्यां हर्म्याणि धनिनां गृहाणि प्रासादा देवानां राज्ञां च गृहाणि तैः संपन्नां समृद्धां १९ संबाधां निबिडां विनादितां संजातवि
निनादां सर्वकल्याणैः सर्वमंगलैः संपूर्णाम् २० २० २० २० २० २० २० २० २० २० २० राम ३३

८ ९ १० ११ तपसाऽनशनेन परिश्रमैर्यज्ञादिभिरित्यर्थः एकः मुख्यः एके मुख्यान्यकेवलाः इत्यमरः १२ प्रव्राजनकालीनदशरथदर्शो

नहिमेविदितंकिंचिद्वनेस्मिन्वसतःसदा चतुर्दशंतुपित्रात्वंप्रसहेमवर्षंयुधि ८ एवमस्माभिरुक्तेनत्वत्प्रमोतेनमहात्मना अनुनीताहंसदैवमिवानपश्यता ९ कथंदाशरथोभूमौशयानेनसहसीतया शक्यानिदुःखमयालब्ध्वाजीवितंवामरवानिवा १० येनदेवासुरैःसर्वैःशक्राःप्रसहितेयुधि तेनपरम[illegible]संविधेतराघवसहसीतया ११ महतातपसालब्धोविविधैश्चपरिश्रमैः एकोदशरथस्येवपुत्रःसदृशलक्षणाः १२ अस्मिन्प्रव्राजितेराजानचिरंवर्तयिष्यति विधवामेदिनीनूनंक्षिप्रमेवंभविष्यति १३ विनद्यमहानादंश्रमेणोपरताःस्त्रियः निर्घोषविरतंनूनमद्यराजनिवेशनम् १४ सीतासमाभ्यां

स्मरन्तोहमस्मिन्निति वर्तयिष्यति जीविष्यति १३ श्रमहानादं विनद्य कृत्वेत्यर्थः श्रमेणास्त्रिय उपरताः अतो नूनं राजनिवेशनं निर्घोषेण विरतं रहितमिति मन्ये १४

टी० वा० अ०
३२

तदेवाहतमिति भ्रातरं गुरुस्वर्यं जागतं विनिदं गुरुतोः स्नेहसौप्रीत्यादि गुरुतोः क्षत्रियगुप्तोश्व कृत्रम २ ३ पं ताते त्यादि रुक्तानुवादः पूर्वमेवं व्याख्यातः ३ तस्य रामस्य ४ मोत्सुको भूः उत्सुका मा भूः ७ प्रसिन्नं ये विस्मयं मा गाः नेदमसत्यमतं यहं ब्रवीम्येतदिति

तं जागतं गुरुसौम्यं कुंवर वायेषु धारिताम् भ्रातरं प्रपन्नं तं महे लक्ष्मणम् अब्रवीत् २ ३
पं ताते सुखोप्राप्याल्वद धर्मपक स्मितां प्रत्याम्बालिहि प्रोष्वाम्य सुखराघवनंदन ३ उचि
तो यं जनः सर्वो दुःखानां त्वं सुखोचितः धर्मात्मंस्तत्परगुप्रपद्ये ज्ञागरिष्यामहे वयम् ४
नहि रामात्प्रियतरो ममास्ति भुवि कश्चन मोत्सुको भूर्ब्रवीम्येतदप्यसत्यं तवाग्रतः ५ ।१
स्य प्रसादादाशंसे लोकेस्मिन्सुमहद्यशः धर्मावाप्तिं च विपुलामर्थ कामौ च केवलौ ६
सोहं प्रियसखं रामं शयानं सहसीतया रक्षिष्यामि धनुष्पाणिः सर्वैः स्वैर्ज्ञातिभिर्वृतः ७

तमं रक्षिस्यामी स्येतं तद्वचनं तवाग्रतः ५ सत्यं ब्रवीमि किं तव बीम्येवेत्यर्थः ५ पिकिमर्थे ५ स्वस्यैहिकामुष्मिकफलं लाभाय
तमित्याह यस्येति केवलो न्यायप्राप्तोवितिसावृत्त ६ मेविदितामित्राहदितामि [illegible] नि छे दः ७

प्रमोहाएवश्रनंतसत्वात्निर्जितवीपस्मिनसंतापः खंतवीहिः करतासंतापएवश्रोषध यो वेगोवश्वप्रस्मिन्मज्जताभग्नेकुर्वतामकरताग्ना
ममोत्मानमध्योनश्ताएवंभूतेनदुःखरूपश्रोनेनश्मभ्याक्रांतोऽभूदितिश्रोषः ।२०। शकं वेतामूढासंज्ञोचेतनायस्यपूथहतोपूथभ्रष्टः ।२१

प्रमोहानंतसत्त्वेनसंतापोषधिवेगुना ।। अभ्याक्रांतो दुःखश्रेणेनमज्जता कैकयीसुतः ।।२०।। विनिश्वसन्नेवभृशं दुर्मनास्ततः प्रमूढसंज्ञः परमापदं गतः ।। शमं न लेभे हृदयज्वरार्दितो नरर्षभो यूथहतो यथर्षभः ।।२१।। गुहेनसार्धंभरतः समागतो महानुभावः सजनः समाहितः ।। सुदुर्मनास्तंभरतंतदापुनर्गुहः समाश्वासयदग्रजंप्रति ।।२२।। इत्यार्षेरामायणेअयोध्याकांडेपंचाशीतितमः सर्गः ।। ८५ ।। आचचक्षेऽथसद्भावंलक्ष्मणस्यमहात्मनः ।। भरतायाप्रमेयायगुहोगहनगोचरः ।। १ ।। १ ।।

समाहितः एकाग्रचित्तं सजनः सपरिवारः गुहेनसार्धंसमागतोमिलितोभरतोऽग्रजंप्रतिसुदुर्मनावभूवतां
दृष्ट्वातंभरतंगुहः पुनराश्वासयत् २२ इतिपंचाशीतितमः सर्गः ८५ अथ आश्वासनानंतरं सद्भावं ज्येष्ठानुरक्तंरूपं साधुत्वम् १

न ह्यप्रमोमेदीभूतास्मिः १४ १५ अनर्हस्य शोकानर्हस्य धर्मप्रेक्षस्य धर्मप्रेक्षत इति धर्मप्रेक्षः तस्य धर्मदृष्टेरित्यर्थः
तादृशः वाचामगोचरः शोकः उपस्थितः प्राप्तः १६ दहनः शोकाग्निः अन्तर्दाहेन चिन्ताग्निजातेन राघवं भरतं संतापयति स्म
गूढ इति स्म वनदाहाग्निसंतप्तं पर्यन्तवनदाहीष्मणा शुष्कपादपं गूढोऽग्निः कोटरसंतप्तोऽग्निरिव १७ शोकाग्नि

एवं संभाषमाणस्य गुहस्य भरतं तदा बभौ नष्टप्रभः सूर्यो रजनी चाभ्यवर्त्तते १४ स
न्निवेश्य स तां सेनां गुहेन परितोषितः शत्रुघ्नेन समं श्रीमान् शयनं समुपाविशत् १५ राम
चिन्तामयः शोको भरतस्य महात्मनः उपस्थितो ह्यनर्हस्य धर्मप्रेक्षस्य तादृशः १६ अन्तर्दा
हेन दहनः संतापयति राघवम् वनदाहाग्निसंतप्तं गूढोऽग्निरिव पादपम् १७ प्रस्रुतः सर्वगा
त्रेभ्यः स्वेदं शोकाग्निसंभवम् यथा सूर्यांशुसंतप्तो हिमवान् प्रस्रुतो हिमम् १८ ध्यान
निर्दरशैलेन विनिश्वसितधातुना दैन्यपादपसंघेन शोकायासाधिशृङ्गिणा १९

संभवं स्वेदं प्रस्रुतः भरत इति शेषः कर्त्तरि निष्ठा गत्यर्थत्वात् १८ दुःखपर्वतरूपकं श्लोकद्वयेनाह ध्यानेत्यादि ध्यानविषय ध्यानान्येव
निर्दरशैलाः विदारणरहितशिलासमूहा यस्मिन् विनिश्वसितमेव गैरिकादिधातुर्यस्मिन् श्वाससंपर्केण भूषणानामन्यवर्णाज
ननात् दैन्यकरणानां स्वस्वविषयप्रवृत्तिवैमुख्यं तदेव पादपसंघो यस्मिन् शोकश्चायासश्च तावेव शृङ्गाणि यस्मिन् १९ राम ३०१

अपितु अक्लिष्टकर्मणो रामस्य विषये दुष्टो दुष्टभावो न व्रजसि कच्चित् ननु कातेदोषशंका तत्राह इयंते इति रामसंदर्शनमात्रप्रयोजनागमने
एतावत्सेनया व्यर्थत्वान्ममसंदेह इति भावः ७ ८ एतस्मिन् कालेकष्टं त्वदाशंकितेरामद्रोहरूपं ज्ञायते सकालो माभूत् हि
व

कच्चिन्न दुष्टो व्रजसि रामस्याक्लिष्टकर्मणः इयं ते महती सेना शंकां जनयतीव मे ७ तमेवाम
६ भिभाषंतं मा का शंकाविनिर्मलः भरतः श्लक्ष्णया वाचा गुरुं वचनमब्रवीत् ८ मा भूत्स
कालो यत्कष्टं न मां शंकितुमर्हसि राघवः स हि मे भ्राता ज्येष्ठः पितृसमो मम ९ तं निव
र्तयितुं यामि काकुत्स्थं वनवासिनम् बुद्धिरन्या न ते कार्या गुरुहत्यब्रवीत् १० स तु सं मि
हृष्टवदनः श्रुत्वा भरतभाषितम् पुनरेवाब्रवीद्वाक्यं भरतं प्रतिहर्षितः ११ धन्यस्त्व
न त्वया तुल्यं पश्यामि जगतीतले अयत्नादागतं राज्यं यस्त्वं त्यक्तुमिहेच्छसि १२ शाश्व
ती खलु ते कीर्तिर्लोकाननुचरिष्यति यस्त्वं कृच्छ्रगतं रामं प्रत्यानयितुमिच्छसि १३

एतो राघवो ज्येष्ठो भ्राता पितृसमः तो मां शंकितुं नार्हसि ९ तेत्वया १० ११ १२ चरिष्यति प्रचरिष्यति १३ १३ १३ राम २

हेत्वर्थसंहितं हेत्वर्थाभ्यामुपपत्तिप्रयोजनाभ्यां युक्तम् १ ऊर्जितः महान् ते त्वया कामः कामनाविषयो मम सत्कारः कृतः सखे
त्वं कथं तत्राह यो मे इति तत्र हेतुः येन सर्वं कृतमित्यर्थः २ ३ कतरेण केन मार्गेण गहनो दुःप्रवेशः ४

एवमुक्तस्तु भरतो निषादाधिपतिं गुहम् प्रत्युवाच महाप्राज्ञो वाक्यं हेत्वर्थसंहितम् १
ऊर्जितः खलु ते कामः कृतो मम गुरोः सखे यो मे त्वमीदृशीं सेनामेकोभ्यर्चितुमिच्छसि २
इत्युक्त्वा तु महातेजा गुहं वचनमुत्तमम् अब्रवीद्भरतः श्रीमान्निषादाधिपतिं पुनः ३
कतरेण गमिष्यामि भरद्वाजाश्रमं गुह गहनोयं भृशं देशो गङ्गानूपो दुरत्ययः ४
तस्य तद्वचनं श्रुत्वा राजपुत्रस्य धीमतः अब्रवीत्प्राञ्जलिर्वाक्यं गुहो गहनगोचरः ५
दासास्त्वनुगमिष्यन्ति धन्विनः सुसमाहिताः अहं त्वानुगमिष्यामि राजपुत्र महायशः ६

गहनं वनं गोचरो देशो यस्य सः ५ दासास्त्विति अहं तु गहनविषये न काचिच्छङ्केति भावः ६ ६ ६६ ६ ६६

गुपिचानेन प्रयोजनमस्तीत्याह असंशयमिति विजानीतेतं देशमित्यर्थः १३ १४ प्रह्वः कृतप्रणामः १५ अयं देशो निष्कुटश्चैव गृहारामश्चैव गृहारामास्तु निष्कुटा इति कोशः वयं वंचिताः अत्रागमनानिवेदनात् निवेदने हि प्रत्युद्गमनादिकं तु शक्यत इत्यु

तस्मात्पश्यतु काकुत्स्थ त्वां निषादाधिपो गुहः॥ असंशयं विजानीते यत्रतौ रामलक्ष्मणौ॥१३॥ एतत्तु वचनं श्रुत्वा सुमंत्राद्भरतः शुभम्॥ उवाच वचनं शीघ्रं गुहः पश्यतु मामिति॥१४॥ लब्ध्वानुज्ञां संप्रविष्टो ज्ञातिभिः परिवारितः॥ आगम्य भरतं प्रह्वो गुहो वचनमब्रवीत्॥१५॥ निष्कुटश्चैव देशोयं वंचिताश्चापि ते वयम्॥ निवेदयामस्ते सर्वं स्वके दासकुले वस॥१६॥ अस्ति मूलं फलं चैव निषादैः समुपार्जितम्॥ आर्द्रं मांसं च शुष्कं च वन्यं चोच्चावचं महत्॥१७॥ आशंसे स्वाशिता सेना वत्स्यत्येनां विभावरीम्॥ अर्चितो विविधैः कामैः श्वः ससैन्यो गमिष्यसि॥१८॥ इत्यार्षे रामायणे अयोध्याकांडे चतुरशीतितमः सर्गः॥८४॥ सीतारामाभ्यां नमः राम

पचारोक्तिः सर्वं राज्यं ते निवेदयाम वयं त्वदीयाः अतः स्वकीयदासगृहे वस १६ वन्यं नीवारश्यामाकादि १७ स्वाशितासुष्ठु भोजिता वत्स्यति वत्स्यतीत्याशंसे प्रार्थये अतो र्चितः श्वो गमिष्यसीति संबंधः १८ इति चतुरशीतितमः सर्गः ८४

सर्वे ग्रामकादासास्तु गंगां नदीमेवान्वाश्रिताः नदीरक्षाः नदीतरणमार्गविघ्नकर्तारो नावारोपितमांसमूलफलाशनाः बलोपेताः सन्तस्ति
ष्ठंतु ६ बलेवत्ताम वाहन्तो वा स्थिति पंचशतसंख्याकनावां प्रत्येकं सन्नद्धानां पञ्च सन्नाहवतां यूनां वाहकानां केवर्तानां श
ते शतमारुह्य तिष्ठत्वित्यभ्यचोदयत् ७ ८ वेश्वितैरपि युद्धे त्वेतत् कार्यं साहसं दाशदुष्ट इति यदा राममविरोधेन दुष्टस्तदेयं

तिष्ठंतु सर्वदाशाश्च गंगामन्वाश्रितां नदीम् ॥ ॥ बलयुक्ता नदीरक्षा मांसमूलफलाशनाः
७ ॥ नावां शतानां पंचानां कैवर्तानां शतं शतम् ॥ सन्नद्धानां तथा यूनां तिष्ठंत्वित्यभ्यचोदयत्
८ ॥ यदा तुष्टस्तु भरतो रामस्येति भविष्यति ॥ इयं स्वस्तिमती सेना गंगामद्य तरिष्यति ॥ ९ ॥ इत्यु
क्त्वोपायनं गृह्य मत्स्यमांसमधूनि च ॥ अभिचक्राम भरतं निषादाधिपतिर्गुहः ॥ १० ॥ तमा
यांतं तु संप्रेक्ष्य सूतपुत्रः प्रतापवान् ॥ भरतायाचचक्षेथ विनयज्ञो विनीतवत् ॥ ११ ॥ एष ज्ञा
तिसहस्रेण स्थपतिः परिवारितः ॥ कुशलो दंडकारण्ये वृद्धो भ्रातुश्च ते सखा ॥ १२ ॥

सेनास्वस्तिमतीतरिष्यति रामस्यानौकास्ति चेत्तान्निहन्म इतिभावः ९ अभिचक्राम दर्शनार्थम् ॥ १० ॥ ११ ॥ स्थपतिः
निषादप्रभुः दंडकारण्ये कुशलः तत्रसंचारसमर्थः घ्नां रैत्ति ज्ञसेवतीतरोभ्य ॥ १२ ॥

यदा तु खलु यस्माद्धेतोर्दुर्बुद्धिर्भरतः स्वयमागतस्ततो महतीसेनास्य दृश्यते रामपीडां चिकीर्षन् यत्नः स्यात्प्रायेण दुर्बुद्धिता वादः भरतागम
नचिन्हमाह स इति महाकायः महाप्रमाणाः इक्ष्वाकुकुलचिन्हभूतः कोविदारध्वजो रथे दृश्यते इतो भरत एवायमिति भा
वः ३ नन्वायातु भरतः किमस्माकमत आह वधयिष्यतीति स्वामावैरिति प्रोषः वधिष्यति वा अन्नु पश्चाद्दाशरथिं राममेव

यथा तु खलु दुर्बुद्धिर्भरतः स्वयमागतः ॥ स एष हि महाकायः कोविदारध्वजो रथे ॥ ३ ॥ वधयि
ष्यति वा दासानथवास्मान्वधिष्यति ॥ अथ दाशरथिं रामं पित्रा राज्याद्विवासितम् ॥ ४ ॥ सं
पन्नां श्रियमन्विच्छंस्तस्य राज्ञः सुदुर्लभाम् ॥ भरतः केकयीपुत्रो हन्तुं समधिगच्छति ॥ ५ ॥
भर्ता चैव सखा चैव रामो दाशरथिर्मम ॥ तस्यार्थकामाः सन्नद्धा गंगानूपे तु तिष्ठत ॥ ६ ॥

धिष्यतीति प्रोषः ४ ननु रामवधे अस्य किं फलमत आह संपन्नामिति संपूर्णामित्यर्थः तस्य राज्ञः रामस्य सुदुर्लभां तस्मिन्
जीवति दुष्प्रापां अथ तो रामं हन्तुं समधिगच्छति ५ नन्वेवमपि [illegible] का भीतिरत आह भर्तेत्यादि एवं चात्र च्छयत्वा
दस्माकं भीतिरिति भावः अथ स्वामिभ्रातृसखित्वादेव रामस्यैव कर्तव्यमतो यूयं तस्य रामस्यार्थकामाः प्रयोजनेच्छवः सन्न
द्धा अत्र गंगानूपे मत्सन्निधौ तिष्ठत ६

 गंगामनुगंगामत्यदी कृत्वैकः परिवर्हः यात्रोपयुक्तं वैरमा सुप्रकारमजातं तेन क्षोभमानो चमूं विधानैः वात अवस्थाक
 त्यजै निवेशपतदाधमस्वनिवृतेने विचिंतमानो विचिंतयमानो भरतं उवास॥२४॥इति अ०श्रीतितमः सर्गः॥८३॥

निवेश्य गंगामनु तां महानदीं चमूं विधानैः परिवर्ह शोभिनीम्॥ उवास रामस्य तदा महात्मनो विचिंतयानो भरतो निवर्तनम्॥२४॥ इत्यार्षे रामायणे अयोध्याकांडे त्र्यशीतितमः सर्गः॥८३॥ ततो निविष्टां ध्वजिनीं गंगामन्वाश्रितां नदीम्॥ निषादराजो दृष्ट्वैव ज्ञातीन्स त्वरितोऽब्रवीत्॥१॥ महतीयमितः सेना सागराभा प्रदृश्यते॥ नास्यान्तमवगच्छामि मनसापि विचिंतयन्॥२॥

इति श्रुष्टम दे वशकपास मासः

गंगामनु आश्रितां निविष्टां कुचित्कार्येऽभिनिवेशवतीम्॥१॥ इतः इह गंगातीरे नास्यान्तं न मिसर्थे तं धिरार्थः॥२॥

म ह

गुहप्रसादेनसावधानेन॥२०॥२१॥ अनुस्थितांगमनेऽनुद्योगां॥२२॥ इदानीमेतैस्यंग्राभिप्रायेणात तदिच्छाप्रासर्वतोनिवेशयत
स्थान दींतरिष्याम इति संबंधः॥२३॥ और्ध्वदेहनिमित्तार्थं एतच्छरीरपातोत्तरकालिकदैहिमवसरत्वप्रयोजनायनदी

गुहस्तत्र रामसखा वीरो गुहो ज्ञातिगणैर्वृतः॥ निवसत्यप्रमादेन देशं तं परिपालयन्॥२०॥ उ
पेत्य तीरं गंगायाः प्राश्रय चक्रवाकैरलंकृतं॥ व्यवतिष्ठत सा सेना भरतस्यानुयायिनी॥२१॥ नि
रीक्ष्यानुस्थितां सेनां तां गंगां च शिवोदकाम्॥ भरतः सचिवान्सर्वानब्रवीद्वाक्यकोविदः॥
२२॥ निवेशयत मे सैन्यमभिप्रायेण सर्वतः॥ विश्रान्ताः प्रतरिष्यामः श्व इदानीं महानदीम्॥२३॥
दातुं च तावदिच्छामि स्वर्गतस्य महीपतेः॥ और्ध्वदेहनिमित्तार्थमवतीर्योदकं नदीम्॥२४॥
तस्यैवं ब्रुवतोमात्यास्तथेत्युक्त्वा समाहिताः॥ न्यवेशयंस्तां छंदेन स्वेन स्वेन पृथक्पृथक्॥
॥२५॥

मवतीर्योदकंमहीपते दातुमिच्छामी स्वर्गः॥२४॥ स्वेनस्वेन छंदेनस्वेस्वेछयाः॥२५॥ सीतारामाभ्यां नमः सीताराम

॥रा॰वा॰अ॰ ॥२९७॥

लापकोच्छादकाः लापकाः तैलाभ्यंगादिलापनकारिणः उच्छादकाः ग्रामर्दकाः धूपकाः गृहादिषु धूपादिवासकाः शौंडिकाः मद्यकाराः शुंडाकरिकरमद्यं ॥१४॥ तुन्नवायाः सूच्या सीवनकर्तारः ग्रामघोषमहत्तराः ग्रामस्थ

सुवर्णकाराः प्रख्यातास्तथा केवलधारकाः ॥ लापकोच्छादका वैद्या धूपकाः शौंडिकास्तथा ॥१४॥ रजकास्तुन्नवायाश्च ग्रामघोषमहत्तराः ॥ शैलूषाश्च सहस्त्रीभिर्यान्ति कैवर्तकास्तथा ॥१५॥ समाहिता वेदविदो ब्राह्मणा वृत्तसंमताः ॥ गोरथैर्भरतं यांतमनुजग्मुः सहस्रशः ॥१६॥ सुवेषाः शुद्धवसनास्ताम्रमृष्टानुलेपिनः ॥ सर्वे ते विविधैर्यानैः शनैर्भरतमन्वयुः ॥१७॥ प्रहृष्टमुदिता सेना सान्वयात्कैकेयीसुतम् ॥ भ्रातुरानयने यांतं भरतं भ्रातृवत्सलम् ॥१८॥ ते गत्वा दूरमध्वानं रथयानाश्वकुंजरैः ॥ समासेदुस्ततो गंगां शृंगिवेरपुरं प्रति ॥१९॥

जनमेजनकर्तारो इति प्रायेणमहांतः शैलूषा नटाः ॥ कैवर्तकादयः प्राः ॥१५॥ गोरथैः शकटैः ॥१६॥

ताम्रेचन्दनकुंकुमादिसवं धृतस्ताम्रवर्णाम्रृष्टं संपूर्णं मनुलेपो अनुलेपनं येषां ते ॥१७॥ प्रहर्षः कायिकोत्तेमौच्यादि मोदो मानसोहर्षः ॥१८॥ शृंगिवेरपुरं प्रति दूरमध्वानं गत्वा गंगामासेदुरिति संबंधः ॥१९॥

परिष्वजानाः परिष्वज्यमानाः नगरे चरंतीति नागरिकाः चरतीति ठक् ॥१०॥ तत्र नगरे संमताः प्रसिद्धाः नैगमा वणिजः प्रकृतयः
श्रेणयः ॥११॥ श्रेणीर्विविच्याह मणिकारा इति शाणा टंकमणिशोधकाः सूत्रकर्मविशेषज्ञाः तंतुवायाः शस्त्रोपजीविनः शस्त्र
निर्मातोपजीविनः ॥१२॥ मायूरकाः मयूरपिच्छैः छत्रव्यजनादिकारिणः क्राकचिकाः करपत्रैः काष्ठच्छेदनादिदारुच्छेदनेन उपजीवं

इत्येवं कथयंतस्ते संप्रहृष्टाः कथाः शुभाः ॥ परिष्वजानाश्चान्योन्यं ययुर्नागरिकास्तदा ॥१०॥ ये च
तत्रापरे सर्वे संमता ये च नैगमाः ॥ रामं प्रतिययुः सर्वा हृष्टाः प्रकृतयस्तदा ॥११॥ मणिकाराश्च ये के
चित्कुंभकाराश्च शोभनाः ॥ सूत्रकर्मविशेषज्ञा ये च शस्त्रोपजीविनः ॥१२॥ मायूरकाः क्राक
चिका रोचका वेधकास्तथा ॥ दंतकाराः सुधाकारास्तथा गंधोपजीविनः ॥१३॥ सीताराम

तिनेक्राकचिकाः वेधका मणिमुक्तादिवेधकर्तारो रोचकाः काचकुप्यादिकर्तारः दंतकाराः गजदंतादिभिः समुद्गकादि
कर्तारो दंतलेखकाश्च सुधाकाराः सुधालेपकाः गंधोपजीविनः गंधद्रव्यविक्रायकाः ॥१३॥

॥रा० बा० स्कं० ॥ २ यथाविधिकल्पितानि राजसंहननोक्तविधिना कृतसन्नाहानि ३ । ४ समारूढानि सादिभिरिति शेषः ४ कैकेयीच सुवत्कृत्स्नं पुत्रा
॥२९६॥

ऋग्वतः प्रययुस्तस्य सर्वे मंत्रिपुरोहिताः ॥ अधिरुह्य हयैर्युक्तान् रथान् सूर्यरथोपमान् ॥२॥
नवनागसहस्राणि कल्पितानि यथाविधि ॥ अन्वयुर्भरतं यांतमिक्ष्वाकुकुलनंदनम् ॥३
षष्टीरथसहस्राणि धन्विनो विविधायुधाः ॥ अन्वयुर्भरतं यांतं राजपुत्रं यशस्विनम् ॥४
शतं सहस्राण्यश्वानां समारूढानि राघव ॥ अन्वयुर्भरतं यांतं सत्यसंधं जितेंद्रियम् ॥५॥ कै
केयी च सुमित्रा च कौसल्या च यशस्विनी ॥ रामानयनसंहृष्टा ययुर्यानेन भास्वता ॥६॥
प्रयाता श्वार्यसंघाता रामं द्रष्टुं सलक्ष्मणम् ॥ तस्यैव च कथाश्चित्राः कुर्वाणा हृष्टचेतसः ॥७
मेघश्यामं महाबाहुं स्थिरसत्वं दृढव्रतम् ॥ कदा द्रक्ष्यामहे रामं जगतः शोकनाशनम् ॥८॥
दृष्ट एव हि नः शोकमपनेष्यति राघवः ॥ तमः सर्वस्य लोकस्य समुद्यन्निव भास्करः ॥९॥

क्षया ॥६॥ ऽश्वार्यसंघाताः त्रै। बीर्णीकसमूहः ७। ॥८१॥

हितं सत्वाः स्तिरविन्ना पुनः प्रकृतिमापन्ना हर्षेण ययौ २ प्रतएव मम श्यामलेप्या दौतदृढ्रेवः प्राणेनेत्तेसे कवनं प्रलेकाये
॥राम २९६॥

गुरुंत्वमेवप्रसादयित्वान्निवर्त्तसेइतिक्रोधः ।२९। वचनस्ययोगाय वचनैस्मेलनाय वचनप्रधानान् स्वात्सापयेत्तिप्रोषः ।३०। संपरिपू

सराघवःसत्यधृतिःप्रतापवान्ब्रुवन्सुयुक्तंदृढसत्यविक्रमः ॥ गुरुंमहारण्यगतंयश
स्विनंप्रसादयित्वाभरतोब्रवीत्तदा ॥२९॥ तूर्णंत्वमुत्थायपतुमेत्रागच्छवचनस्ययोगाय
वचनप्रधानान् ॥ स्नानेतुमिच्छामिहितेवनेस्थोप्रसादयाम्येजगतोहिताय ॥३०॥ सस्सूत
पुत्रोभरतेनसम्यगात्तापतःसंपरिपूर्णकामः ॥ आश्वाससर्वान्प्रकृतिप्रधानान्वचस्य
मुख्यांश्चसुहृज्जनांश्च ॥३१॥ ततःसमुत्थायकुलेकुलेतेराजन्यवैश्यावृषलाश्चविप्राः
अयूयुजन्नुष्ट्ररथान्खरांश्चनागान्हयांश्चैवकुलप्रसूतान् ॥३२॥ इत्यार्षेरामाय
णेअयोध्याकांडेद्व्यशीतितमःसर्गः ॥ ८२॥ ततःसमुत्थितःकाल्यमास्थायस्यंदनोत्त
मम् ॥ प्रययौभरतःशीघ्रंरामदर्शनकांक्षया ॥१

तीकामत्तस्यापिरामदर्शने उत्कटे छत्वात् ।३१। कुले
कुलेगृहे कुलप्रसूतान् उत्तमान् ।३२। इति द्व्यशीतितमः सर्गः ।८२। काल्ये प्रातःकाले ।१।१।१।१।१।।

त

 ॥ यदि प्रातः श्वासप्यतिस्म १ छवत् १ यद्यहं इ छान्दरूपमितिपावत ॥ २३ ॥ निवर्तमेति वर्तनं निमित्तं बलस्य यात्रां स

तूर्णमुत्थाय गच्छ त्वं तस्मे त्वमसमग्रासनात ॥ यात्रामाज्ञापय क्षिप्रं बलस्यैवममानय ॥ २२ ॥
एवमुक्तः स मंत्री तु भरतेन महात्मना ॥ प्रहृष्टः सोदिशत्सर्वं यथासंदिष्टमिष्टवत् ॥ २३ ॥
ताः प्रहृष्टाः प्रकृतयो बलाध्यक्षा बलस्य च ॥ श्रुत्वा यात्रां समाज्ञप्तां राघवस्य निवर्तने ॥ २४ ॥
ततो योधाङ्गनाः सर्वा भर्तॄन्सर्वान्गृहे गृहे ॥ यात्रागमनमाज्ञाय त्वरयन्ति स्म हर्षिताः
॥ २५ ॥ ते हयैर्गोरथैः शीघ्रैः स्यन्दनैश्च मनोजवैः ॥ सह योधैर्बलाध्यक्षा बलं सर्वमचोद
यत ॥ २६ ॥ सज्जं तु तद्बलं दृष्ट्वा भरतो गुरुसन्निधौ ॥ रथं मे त्वरयस्वेति सुमंत्रं पार्श्वतोब्रवी
त् ॥ २७ ॥ भरतस्य तु तस्याज्ञां प्रतिगृह्य प्रहर्षितः ॥ रथं गृहीत्वोपययौ युक्तं परमवाजिभिः
॥ २८ ॥

मातृस्पृशो श्रुत्वा प्रकृतयो बलाध्यक्षाश्च प्रहृष्टा इत्यन्वयः ॥ २४ ॥ यात्रागमनं [illegible] ॥ २५ ॥ गोरथैः प्राकटैः ॥ २६ ॥ स
[illegible] गमनाय सन्नद्धम् ॥ २७ ॥ २८ ॥

ननु त्वन्मात्राप्रयासेन राज्यसंपादनात् अस्माभिरेवमुक्तमत आह यदीति वनदुर्गस्थं वनरूपदुर्गस्थम् ।१५। द्विपदां मनुष्याणां वरः श्रेष्ठो राजा भरतस्य राज्यस्येति शेषः ।१६। मध्येके विचाकांत द्वाकामिति ।१७। यथार्यो लक्ष्मणात्तथाहं ते लक्ष्मणा इवेत्यर्थः ।

पुत्रि मात्रा कृते पापे नाहं तदपि रोचये ॥ इह स्थो वनदुर्गस्थं नमस्यामि कृतांजलिः ॥१५॥ राममेवानुगच्छामि स राजा द्विपदां वरः ॥ त्रयाणामपि लोकानां राघवो राज्यमर्हति ॥१६॥ तद्वाक्यं धर्मसंयुक्तं श्रुत्वा सर्वे सभासदः ॥ हर्षान्मुमुचुरश्रूणि रामे निहितचेतसः ॥१७॥ यदि त्वार्यं न शक्ष्यामि विनिवर्तयितुं वनात् ॥ वने तत्रैव वत्स्यामि यथार्यो लक्ष्मणस्तथा ॥१८॥ सर्वोपायं च वर्तिष्ये विनिवर्तयितुं वनात् ॥ समक्षमार्यमिश्राणां साधूनां गुणवर्तिनाम् ॥१९॥ विष्टिकर्मान्तिकाः सर्वे मार्गशोधकरक्षकाः ॥ प्रस्थापिता मया पूर्वं यात्रा च मम रोचते ॥२०॥ एवमुक्त्वा तु धर्मात्मा भरतो भ्रातृवत्सलः ॥ समीपस्थमुवाचेदं सुमंत्रं मंत्रकोविदम् ॥२१॥ रा

८

निष्ठेत्र लक्ष्मणो यथार्यं प्राप्य वने रामानुवर्तमानः ।१८। आर्यमिश्रैर्वणिकास्तेच ते मिश्राः पूज्यास्तेषां प्रत्यक्षं समक्षमित्यन्वयः ।१९। विष्टयः भृतिं विना कर्मकृतः कर्मान्तिकाः कर्मान्तेऽभृतिमिहातारः ।२०॥

॥रा॰वा॰अ॰। धर्मज्ञः कुलक्रमागतज्येष्ठाभिषेचनरूपधर्मज्ञः धर्मकांक्षया ज्येष्ठानुवर्तनरूपधर्माभिलाषया त्मं मनसा जगाम सस्मार
॥२७४॥ ९ न गर्हे सर्वलोपिकं यमेव समनुचिंतितं मां प्रतीयसीत्पुत्रवानिसर्गः ॥१०॥ विद्यास्नातस्य सर्वविद्यानंतरभाविस्नान ९ क्र

तत्कृत्वा भरतो वाक्यं शत्रुघ्नेनाभिपरिप्लुतः ॥ जगाम मनसा रामं धर्मज्ञो धर्मकांक्षया ॥९॥
सर्वाष्यकलत्रसा बाल्या कलत्रं हं स सत्यसंधुवा ॥ वि॰ स्नातोपसभामध्ये जगर्हे च पुरोहितम् ॥१०॥
चरितब्रह्मचर्यस्य विद्यास्नातस्य धीमतः ॥ धर्मे प्रयतमानस्य को राज्यं मद्विधो हरेत् ॥११॥
कथं दशरथाज्जातो भवेद्राज्यापहारकः ॥ राज्यं चाहं च रामस्य धर्मं वक्तुमिहार्हसि ॥१२॥
ज्येष्ठः श्रेष्ठश्च धर्मात्मा दिलीपनहुषोपमः ॥ लब्धुमर्हति काकुत्स्थो राज्यं दशरथो यथा ॥
१३॥ अनार्यजुष्टमस्वर्ग्यं कुर्यां पापमहं यदि ॥ इक्ष्वाकूणामहं लोके भवेयं कुलपांसनः ॥१४॥

स्नातस्य विधिः चरितब्रह्मचर्यादि ॥११॥ राज्यं चाहं च रामस्य उभयमपि रामस्य स्वमिति प्रोक्तः । अतो धर्मं वक्तुमिह सभायामर्हति
नेदं राज्यमन्यायमित्यर्थः ॥१२॥१३॥१४॥ ॥रा॰म॰।२७४॥

घनापाये शरदि ॥३॥ धर्मस्य परिपालनं रूपम् ॥५॥ सतां धर्मं जीवितो वा कच्छकरणादिति वं रूपम् ॥६॥ निहतकंटकं एमस्य वनवा
सदा नातथा ॥७॥ दीच्या द्यलित दिशि प्रसकसिंहासनाधीश्वराः पेचकेवलाः सिंहासनरहिताः चोदीच्याः श्वपराणाः द्वीप।

साविरुद्धज्ञानसंपूर्णा सभासुरुचिरा तदा ॥२॥ घनापाये पूर्णचंद्रेव प्रावर्त्तत ॥३॥ राजन्
तत्प्रकृतीः सर्वाः समस्ताः प्रेक्ष्य धर्मवित् ॥ इदं पुरोहितो वाक्यं भरतं मृदु चाब्रवीत् ॥४॥ तात
राजा दशरथः स्वर्गतो धर्ममाचरन् ॥ धनधान्यवतीं स्फीतां प्रदाय पृथिवीं तव ॥५॥
रामस्तथा सत्यधृतिः सतां धर्ममनुस्मरन् ॥ नाजहात् पितुरादेशं शशी ज्योत्स्नामिवोदितः ॥६॥ पित्रा भ्रात्रा च ते दत्तं राज्यं निहतकंटकम् ॥ तद्भुंक्ष्व मुदितामात्यः क्षिप्रमेवाभिषेचय ॥७॥ उदीच्याश्च प्रतीच्याश्च दाक्षिणात्याश्च केवलाः ॥ कोट्यापरान्ताः सामुद्रा रत्नान्यभिहरन्तु ते ॥८॥

वासिनः सामुद्राः पोतवणिजः कोट्या कोटिसंख्योपलक्षितानि रत्नानि ते अभिहरंतु उपायनीकुर्वंतु ॥८॥८॥८॥
भि

||रा०वा०अ०||
||२७३||

१५ ह्रद इव दशरथसुतशोभितासभापुरासदशरथेवयथातथाबभौ ह्रदोयथामुद्रः स्मिन्नलिंगत्वापि ह्रदयोर्द्गाभावाच्चं ह्रद इवमुखमितिवन्नदृष्टोपमा ह्रद सभयोः साधर्म्यविशेषणेन ह तिमिनागसंवृतः मत्स्यैर्नागैश्चसंकुलः स्तिमितंनिश्चलंजलंयस्मिन् मणयोमुक्ताद्याः शंखाः शर्कराः सुवर्णाद्याः यस्मिन् तिकाश्चयस्मिन् सभायांजलस्थानेसभातेजः एत

ततोभरतमायांतं शतक्रतुमिवामराः ॥ प्रत्यनंदन्प्रकृतयोयथादशरथंतथा ॥ १५ ह्रद इवतिमिनागसंवृतः स्तिमितजलोमणिशंखशर्करः ॥ दशरथसुतशोभितासभासदशरथेवबभौयथापुरा ॥ १६ ॥ इत्यार्षेरामायणेऽयोध्याकांडेएकाशीतितमःसर्गः ॥ ८१ ॥ तामार्यगणसंपूर्णांभरतःप्रग्रहांसभाम् ॥ ददर्शबुद्धिसंपन्नःपूर्णचंद्रांनिशामिव ॥ १ ॥ आसनानियथान्यायमार्याणांविशतांतदा ॥ वस्त्रांगरागप्रभयाद्योतितासासभोत्तमा ॥ २ ॥

देवध्वनयुता स्तिमितजल इत्युक्तम चित्रस्थतिमिनागसंवृतत्वेनमणयश्चरत्नेभ्यादिभुवि ज्ञेतएवयुक्तंत्वाखपिचित्रेषु ॥ १६ इत्येकाशीतितमःसर्गः ॥ ८१ ॥ प्रग्रहाःप्रकृष्टैर्वसिष्ठादिभिर्गृहः परिगृहोधिष्ठानेयस्यांसा निशापक्षेप्रकृष्टग्रहवी दिमहवतीमि १ आर्याणांत्रैवर्णिकानांआसनानिविशतांयासनेयूपविशतांमित्यर्थः २ सीता रामआख्यानमः सीता राम० ॥ २७३ ॥

राजधर्मवित् राजपुरोहितकर्तव्यधर्मवेत्ता यतः स्वकृत्यस्य स्वयं संपादयितुं प्रतीक्ष्याहसभामित्यादि ९ मणिरत्नसमाकुलां मणिरत्नैश्च
निविष्टां सगणाः सशिष्यगणाः १० ११ गणवल्लभान् सेनानायकान् आत्ययिकं कालविलंबासहिष्णु १२ सराजपुत्रं राज

तयातस्मिन्निवलपतिवसिष्ठोराजधर्मवित् ॥ समामिक्ष्वाकुनाथस्य प्रविवेश महायशाः ॥ ९ ॥
स्थितकुंभमयींदिव्यांमणिरत्नसमाकुलाम् ॥ स धर्मामिव धर्मात्मा सगणः प्रत्यपद्यत ॥ १० ॥
स कांचनमयीं पीठं परार्ध्यास्तरणावृतम् ॥ अध्यास्ते सर्ववेदज्ञो दूताननुशशास ह ॥ ११ ॥
ब्राह्मणान्क्षत्रियान्योधानमात्यान्गणवल्लभान् ॥ क्षिप्रमानयताव्यग्राः कृसमात्ययि
कं हि नः ॥ १२ ॥ सराजपुत्रं शत्रुघ्नं भरतं च यशस्विनम् ॥ युधाजितं सुमंत्रं च ये च तत्र हिता जनाः
॥ १३ ॥ ततो हलहलाशब्दो महान्समुदपद्यत ॥ रथैरश्वैर्गजैश्चापि जनानामुपगच्छताम् ॥ १४

पुत्रैरितरैः सहितं शत्रुघ्नं युधाजिन्नामा कश्चिन्मंत्री १३ हलहलेति शब्दानुकरणम् १४ सीतारामाभ्यां नमः

शोकैः शोकोत्पादकैः स्वरं धयत हिनस्तीत्यर्थः ॥ ३ ॥ ४ ॥ कैकेय्या हेतुना मद्विषये जायमाने सति तमागधादरपकृतमनुचितं कर्म

स तूर्यघोषः सुमहान्दिवमापूरयन्निव ॥ भरतं शोकसंतप्तं भूयः शोकैररंधयत् ॥ ३ ॥
ततः प्रबुद्धो भरतस्तं घोषं संनिवर्त्य च ॥ नाहं राजेति चाप्युक्त्वा शत्रुघ्नमिदमब्रवीत् ॥ ४ ॥
पश्य शत्रुघ्न कैकेय्या लोकस्यापकृतं महत् ॥ विसृज्य मयि दुःखानि राजा दशरथो गतः ॥ ५ ॥
तस्यैषा धर्मराजस्य धर्ममूला महात्मनः ॥ परिभ्रमति राजश्रीर्नौरिवाकर्णिका जले ॥ ६ ॥
यो हि नः सुमहान्नाथः सोऽपि प्रव्राजितो वनम् ॥ अनया धर्ममुत्सृज्य मात्रा मे राघवः स्वयम् ॥ ७ ॥
इत्येवं भरतं वीक्ष्य विलपन्तं विचेतनम् ॥ कृपणं रुरुदुः सर्वाः सस्वरं योषितस्तदा ॥ ८ ॥

पश्य एवं रूपाणि दुःखानि दुःखकराणि मयि विसृज्य राजा गतः ॥ ५ ॥ अकर्णिका कर्णधाररहिता ॥ ६ ॥ ७ ॥ ८ ॥

जान्हवींसमासाद्यप्रभिद्याप्यप्रवर्त्तितानरेंद्रमार्गो विराजते इत्युत्तरेणान्वयः। २१ स चेंद्रोपलतालगणास्तेनमंडितम्। २२। इत्य
प्रीतितमः सर्गः नांदीमुखींतमानयन्नाभ्युदयप्रारंभवृक्षारानिं गत्याव प्रोषां दृष्ट्वेति प्रोषः सविप्रोषस्ताः राजंतिराजपुत्रेवा

।जान्हवींतुसमासाद्यविविधद्रुमकाननाम्॥प्रीतिलामलपानीयांमहामीनसमाकुलाम्
।२१॥सचेंद्रुतालगणासंडितंसुधानभः स्पपायोममलेनविराजते॥नरेंद्रमार्गःसततयाविराज।
तेक्रमेरणरम्यःशुभ्रशिल्पिनिर्मितः॥२२॥इत्यार्षेरामायणेश्वयोध्याकांडेऽष्टप्रीतितमःस
र्गः॥८०॥ततोनांदीमुखींरात्रिंभरतंसूतमागधाः तुष्टुवुःसविप्रोषस्ताःस्तवैर्मंगलसंहि
तैः॥१॥सुवर्णकोणाभिहतःप्राणदद्यामदुंदुभिः॥दध्मुःशंखांश्चशतशःनाद्याश्चोच्चाव
चांस्ततः॥२॥

वेष्टितविप्रोषस्तवं जानेतिताद्दशाः मंगलसंहितैः मंगलप्रतिपादकैः।१।सुवर्णकोणाः सुवर्णदंडः याम दुंदुभिः यामावसान
सूचकोदुंदुभिः नाघातमंगलादीन।२।

निवेशान्वर्त्तयतिस्म लोकत्रयेत्ता बहूनां पोतानां च याये युते अनेन प्राकारादिसंसूचितं परिखाः सगर्त्ताः पर्यंतभि
त्तयस्ताभिः परिवारिताः परिवेष्टिता इत्यर्थः तत्र परिखावक्केदेन इंद्रकीलप्रतिमाः इंद्रकीलपर्वतसदृशाः प्रति
माश्च त्रप्रतिमाये शुनिवेशेषु एवमुच्चाः परिखा इति यावत् प्रतोलीवरैः व्याप्त्रेषैः शोभिताः १ प्रासाददेव

बहुपोतसमायाकीर्णा अपि परिखाः परिवारिताः॥ तत्रेंद्रकीलप्रतिमाः प्रतोलीवरशोभिताः॥१८॥
प्रासादमालाविततास्सौधप्राकारसंवृताः॥ पताकाशोभिताः सम्यक् सुनिर्मितमहापथाः॥
१९॥ विसर्पद्भिरिवाकाशे विटंकाग्रविमानकैः॥ समुच्छ्रितैर्निवेशास्ते बभुः शक्रपुरोप
माः॥२०॥

गृहालिते यां मालाभिः श्रेणीभिर्विततानाविस्तृताः सौधै राजगृहसदृशैः प्राकारैः संवृताः॥१९॥ आकाशे विसर्प-
द्भिरिव ऊर्ध्वं गच्छद्भिरिव विटंकैः कपोतपालिकाततः शृंगैर्विमानैः सप्तभूमिकप्रासादैः समुच्छ्रितैः ते
रूपलक्षितास्ते निवेशा बभुः शक्रपुरोपमाः अमरावतीसदृशाः॥२०॥

श्रुत्वाप्येत्यादि श्लोकद्वयमेकं वाक्यं यथा मार्गकरणानंतरं पुष्पिताः मार्गशिबिरादिनिवेशाधिकारिताः प्रयुक्ताः परस्परेणा
ताः यथात्तन्निश्चयाभरताज्ञापनं शिबिरादिनिवेशश्चनु चक्रुर्नात्ताप्य बहुस्वादुःफलेषु रमणीयेषु देशेषु योयाद्देशोभरत।

श्रुत्वाप्याप्ययथातत्त्विश्च ज्ञात्वैधिकृता नराः ॥ रमणीयेषु देशेषु बहुस्वादुफलेषु च ॥१५
॥यो निवेशस्त्वभिमतो भरतस्य महात्मनः ॥ भूयस्तं शोभयामासुर्भूषाभिर्भूषितोपमम् ॥
१६॥ नक्षत्रेषु प्रशस्तेषु मुहूर्तेषु च तद्विदः ॥ निवेशं स्थापयामासुर्भरतस्य महात्मनः ॥१७

स्याभिमतो निवेशस्तं तथा कृत्वा भूयोऽधिकं भूषाभिः शोभयामासुः वितानकनककलशरत्नध्वजादिभिर्भूषयामासुः
निवेशः शिबिरं भूषितोपमं भूषणमास दृष्टो श्वतिरमणीयमिति यावत् ॥१५॥१६ तद्विदः वास्तुशास्त्रज्ञाः निवेशान् शिबिरानिति ॥१७॥

॥ रा० वा० सु० ॥ परिवाहान् स्वल्पप्रवाहान् बंधनेन बहूदकान् चक्रुः ॥ ११ ॥ खानयामासुः खननं उदपानान् कूपवाप्यादीन् वेदिकाभिः
॥ २९० ॥ परितोऽलंकृतान् ॥ १२ ॥ ससुधेत्यादि श्लोकद्वयमेकं वाक्यं ससुधाकुट्टिमतलः तत्र तत्र संछाद्य जलाश्रयसमीपे विश्रा

॥ प्रचिरेणैव कालेन परिवाहान् बहूदकान् ॥ चक्रुर्बहुविधाकारान् सागरप्रतिमान् बहून् ॥
॥ ११ ॥ निर्जलेषु च देशेषु खानयामासुरुत्तमान् ॥ उदपानान् बहुविधान् वेदिकापरिमण्डितान् ॥
॥ १२ ॥ ससुधाकुट्टिमतलः प्रपुष्पितमहीरुहः ॥ मत्तोद्घुष्टद्विजगणः पताकाभिरलंकृतः ॥ १३ ॥
चन्दनोदकसंसिक्तो नानाकुसुमभूषितः ॥ बह्वशोभत सेनायाः पन्थाः स्वर्गपथोपमः ॥ १४ ॥

मार्थं निवासाय सुधालिप्तकुट्टिमतलाभिर्लिप्तः कुट्टिमोऽस्त्री निबद्धा भूरित्यमरः क्वचित्सुधाभिः क्वचिन्मृत्तिकाभिरेव बद्ध
तलः इत्यर्थः प्रपुष्पितमहीरुहः जलसेचनेनेति शेषः ॥ १३ ॥ ॥ सुं ॥ २९० ॥

ततः शाखाः स्थाणून् प्रकृतं अपसारयंत इति शेषः॥६॥ टंकैः पाषाणदारकैः दात्रैर्लवित्रैः॥७॥ अपरे बलवत्तराः बलिनः रूढ
मूलान् वीरणस्तंबान् उशीरजातितृणविशेषान् विधमंति हस्ताभ्यामेव ते निःसारयंति दुर्गाणि स्थलानि उन्नतान् प्रदेशान् न

लतावल्लीश्च गुल्मांश्च स्थाणूनश्मन एव च॥ जनास्ते चक्रिरे मार्गं छिंदंतो विविधान् द्रु
मान्॥६॥ अवृक्षेषु च देशेषु केचिद्वृक्षानरोपयन्॥ केचित्कुठारैष्टंकैश्च दात्रैश्छिंदन क्व
चित्क्वचित्॥७॥ अपरे वीरणस्तंबान् बलिनो बलवत्तराः॥ विधमंति स्म दुर्गाणि स्थलानि च तत
स्ततः॥८॥ अपरे पूरयन्कूपान् पांसुभिः श्वभ्रमायतम्॥ निम्नभागांस्तथा केचित्समांश्चक्रुः
ततस्ततः॥९॥ बबंधुर्बंधनीयांश्च क्षोदनीयान् चुक्षुदुः॥ बिभिदुर्भेदनीयांश्च तांस्तान्दे
शांस्ततस्ततः॥१०॥

न विधमंति खननेन समीकुर्वंति॥८॥ कूपान् मार्गमध्यवर्तिनः श्वभ्रं प्रतं दीर्घं गर्तं च पांसुभिरपूरयन्॥९॥ बंध
नीयान् सेतून् क्षोदनीयान् क्षोद्यान् रक्षदृषिलाभूयिष्ठप्रदेशान् चुक्षुदुः चूर्णयामासुः भेदनीयान् जलनिर्गमनार्थं भेदयन्॥१०॥

॥रा० वा० अयो०॥ कर्मान्तिकाः वेतनजीविनः स्थपतयः रथ्यादिकर्तारः पुरुषाः ग्र्थ्या यन्त्रज्ञपुरुषाः यन्त्रकोविदाः तेषां प्रणीयादियन्त्रकरणाकुशलाः वर्द्धकयस्तक्षणाः मार्गिणो मार्गकरणसमर्थाः वृक्षतक्षकाः मार्गनिरोधकवृक्षच्छेदकाः॥ सूपकाराः सूदाः
॥२८९॥ सुधाकाराः प्रासादिषु सुधालेपनकारकाः वंशकर्मकृतः वंशैः कटप्रत्ययादिकर्मकृतः समर्थाः द्रष्टारः पू

कर्मान्तिकाः स्थपतयः पुरुषा यन्त्रकोविदाः॥ तथा वर्धकयश्चैव मार्गिणो वृक्षतक्षकाः॥२॥ सूपकाराः सुधाकारा वंशकर्मकृतस्तथा॥ समर्था ये च द्रष्टारः पुरतस्ते प्रतस्थिरे॥३॥ स तु हर्षात्तमुद्देशं जनौघो विपुलः प्रयान्॥ अशोभत महावेगः समुद्र इव पर्वणि॥४॥ ते स्ववारं समास्थाय वर्त्मकर्माणि कोविदाः॥ करणैर्विविधोपेतैः पुरस्तात्संप्रतस्थिरे॥५॥

र्वानुभूतमार्गभागद्रष्टारः॥३॥ स तु जनौघः हर्षात्तमद्दर्शनकुतूहलात् तमुद्देशं प्रयात् रामाधिष्ठितदेशमुद्दिश्य गच्छन् अशोभत पर्वणि सागरस्य महावेगा जलौघ इव॥४॥ ते मार्गशोधकाः स्ववारं स्वस्वसमूहं समास्थाय प्राप्य विविधोपेतैः पिटकखनित्रदात्रादिनानाप्रकारोपेतैः करणैः कर्म कर्तुं पुरस्तात्संप्रतस्थिरे॥५॥५॥५॥५॥५॥५॥५॥५॥५॥५॥५॥५॥ रामा॥२८९॥

संप्लवरोगस्मान्नप्रजनप्रतिज्ञाविषये गुरुक्तमनुत्तमं नृपात्मजेन प्रभाषितं तद्वचनं निशम्य स्थितानां जनानां तं प्रति भरतं प्रति हर्षप्र
हर्षजाः आर्याननने त्रसंभवाः हर्षपूर्णमुखस्थने त्रजबिंदवो निपेतुरित्यन्वयः ॥१६॥ हेरदंकिपतो शिल्पिभिः पंथा ऽस्तु कं भर
तवाक्यं निशम्य विगतशोकाः ततः प्रोक्तो येषां ते सामात्या हृष्टा ऊचुः हे नरवर तव वचनात् रामे त्वयि च भक्तिमान् शि

अनुत्तमं तद्वचनं नृपात्मजप्रभाषितं संसदि वै निशम्य च ॥ प्रहर्षजास्तं प्रति बाष्पबिंद
वो निपेतुरार्याननने त्रसंभवाः ॥१६॥ ऊचुस्ते वचनमिदं निशम्य हृष्टाः सामात्याः सप
रिषदो वियातशोकाः ॥ पंथानं नरवर भक्तिमान्जनश्च व्यादिष्टस्तव वचनाच्च शि
ल्पिवर्गः ॥१७॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकांडे एकोनाशीतितमः सर्गः ॥ अथ भूमिप्र
देशज्ञाः सूत्रकर्मविशारदाः ॥ स्वकर्माभिरताः शूराः खनका यंत्रकास्तथा ॥१॥

ल्पिवर्गः पंथानं कर्तुमादिष्टः जनो रक्षकजनश्च रन्तराणां कर्तुं व्यादिष्टः ॥१७॥ इत्येकोनाशीतितमः सर्गः ॥७९॥ भूमिप्रदेश
ज्ञाः गर्तः सजलनिर्जलादिभूमिभागज्ञाः सूत्रकर्मविशारदाः शिविरादिनिर्माणे सूत्रमहत्ताकुशलाः खनकाः स्वकर्म
णा खननेऽभिरताः परसेनया व ध्मेपि खननेन दक्षाः शूरा एव शूराः यंत्रकाः जलप्रवाहादिनियंत्रणसमर्थाः ॥१॥

पुरस्कृतं धम्यमानः कृतं शब्दवत महायत्त शालाशाः स्वजितेहो बाहूमिलश्चर्षः ॥ ११ ॥ मातुः पद्मिनीं केवलमातः व्यपदेशां मातरं तामामालिस्पर्षः ॥ १२ ॥ शिलाभिः खनकैः यत्र पद्मः भावस्तत्र पंथाः गमननमार्गः क्रियतां विषमाणि च निम्नोन्नतानि च समानि क्रियतां रथादि सवेग सर्पमिति भावः पथिविद्यमाने दुर्गे विप्रो राजनतान् चारयंतीति पथि दुर्गविचारकाः ॥ १३ ॥

॥ तत्रैव तेन रथ्याया भ्रमभिक्षि च पुरस्कृतम् ॥ गच्छानि सिध्यामि वैणा मंह व्यवाहमिवा ध्वरात
॥ ११ ॥ नलकामा करिष्यामि स्वामि मां मातः पद्मिनी ॥ कने वत्साम्य हं दुर्गतिमो राजामविष्य
ति ॥ १२ ॥ क्रियतां शिलाभिः पंथाः समानि विषमाणि च ॥ रथिराक्ष्यान्तं पांतु पथि दुर्ग
विचारकः ॥ १३ ॥ एवं संभाषमाणां तां तेरभद्रे तो नर्पाल जन्म ॥ तस्य वा च जननः सर्वैः भीम हाक
मनु जमम ॥ १४ ॥ एवं तेभाषमाणां तस्य पद्मशीरु पतिष्ठतां म ॥ यस्त्वं ज्येष्ठेन पश्चतं पथि
वीं दातु मिच्छसि ॥ १५ ॥

एवं संभाषमाणां तां व्रतिसर्वीविजनः भीम च्युमंगवत्तु तमेवाक्यमवाच ॥ १५ ॥ तदेवाह ए
वमिति एवं रभराज्यविषयं भाषमाणां तस्या तेप मचिन्ता शीरुपतिष्ठ तां ज्येष्ठानुसरणादि निभावः तदेवाह यस्त्वमि
ति ज्येष्ठे ज्येष्ठायप थिवीदातु मि च्छसि एतः शीत्वाम पति ष्ठताम ॥ १५ ॥

आभिषेचनिकं अभिषेचनप्रयोजनकं वस्तुजातं स्वजनो मंत्र्यादिः श्रेणयः पौराः ॥४।५ भांडमुपकरणम् ।६ राजता राजत्वम् ।७।

आभिषेचनिकं सर्वमिदमादाय राघव ॥ प्रतीक्षते त्वां स्वजनः श्रेणयश्च नृपात्मज ॥४॥ राज्यं गृहाण भरत पितृपैतामहं ध्रुवम् ॥ अभिषेचय चात्मानं पाहि चास्मान्नरर्षभ ॥५॥ आभिषेचनिकं भांडं कृत्वा सर्वं प्रदक्षिणं ॥ भरतस्तं जनं सर्वं प्रत्युवाच दृढव्रतः ॥६॥ ज्येष्ठस्य राजता नित्यमुचिता हि कुलस्य नः ॥ नैवं भवंतो मां वक्तुमर्हंति कुशला जनाः ॥७॥ रामः पूर्वो हि नो भ्राता भविष्यति महीपतिः ॥ अहं त्वरण्ये वत्स्यामि वर्षाणि नव पंच च ॥८॥ युज्यतां महती सेना चतुरंगमहाबला ॥ आनयिष्याम्यहं ज्येष्ठं भ्रातरं राघवं वनात् ॥९॥ आभिषेचनिकं चैव सर्वमेतदुपस्कृतम् ॥ पुरस्कृत्य गमिष्यामि रामहेतोर्वनं प्रति ॥१०॥ सीतारामममध्या

८ पूर्वो ज्येष्ठः अरण्ये वत्स्यामि रामप्रतिनिधित्वेनेति शेषः । ९ आनयिष्यामि आनेष्यामि ।१० रामहेतोः रामाभिषेकार्थं ।१०।

२५ प्राणैस्तु प्रचिक्षेपः प्रा... ततः कथंचित्तेन पुनः लब्धसंज्ञां विलपंतीं संवादि दत्तां संप्राप्ताम् २६ इत्यष्टसप्ततितमः सर्गः ७८ राजकर्तारो राज्याभिषेककर्तारः १ ... गतो दशरथो गुरुतरः ज्येष्ठं राज्यार्हं २ ... त्वमद्य भव नो राजा भवेत्

सा पादमूले कैकेय्या मंथरा निपपात ह। निश्वसंती सुदुःखार्ता कृपणं विललाप ह ॥२५॥ प्राणैस्तु प्रचिक्षेप विमूढसंज्ञां समीक्ष्य कुब्जां भरतस्य माता। प्रसादयामास समार्तरूपां क्रौंचीं विलग्नामिव वीक्षमाणाम् ॥२६॥ इत्यार्षे रामायणे अयोध्याकांडे अष्टसप्ततितमः सर्गः ॥७८॥ ततः प्रभातसमये दिवसेऽथ चतुर्दशे। समेत्य राजकर्तारो भरतं वाक्यमब्रुवन् ॥१॥ गतो दशरथः स्वर्गं यो नो गुरुतरो गुरुः। रामं प्रव्राज्य वै ज्येष्ठं लक्ष्मणं च महाबलम् ॥२॥ त्वमद्य भव नो राजा राजपुत्र महायशः। संगत्या नापराध्नोति राज्यमेतदनायकम् ॥३॥

ननु ज्येष्ठे विद्यमाने कथमहं राजा स्यामित्यत्राह संगत्या ज्येष्ठस्य वनवासं प्रति पितृराज्ञासंगत्या तव चाराज्यं प्रति तदाज्ञासंगत्या राज्यं कुर्वन्नपि भवान्नापराध्नोति धर्मविरोधज्येष्ठविरोधलोकविरोधान्न प्राप्नोति पित्रा त्यागात् अस्माभिः प्राप्यपालनीयत्वादिति सर्वं ३ ||

१८ गृहीत्वा कुब्जां कैकेयीमभिनिर्भर्त्स्य कुब्जामोचनार्थमागतामभितिरोषः ॥१९॥ परुषैर्मर्मस्पर्शिभिः शत्रुतः एव दुःखैः पुत्रं शरणमागता कुब्जामोचनार्थमिति शेषः ॥२०॥ प्रवृत्तः सर्वभूतानामवध्याः प्रमदाः क्षम्यतामित्यब्रवीत् ॥२१॥ मातृघातकं मां प्रति यदि रामो

तेन भाण्डेन संकीर्णं श्रीमद्राजनिवेशनम् ॥ अशोभत तदा भूयः शारदं गगनं यथा ॥१८॥ स ब
ली बलवत्क्रोधाद्गृहीत्वा पुरुर्षभः ॥ कैकेयीमभिनिर्भर्त्स्य बभाषे परुषं वचः ॥१९॥ तैर्वाक्यैः
परुषैर्दुःखैः कैकेयी भृशदुःखिता ॥ शत्रुघ्नभयसंत्रस्ता पुत्रं शरणमागता ॥२०॥ तां प्रेक्ष्य
भरतः क्रुद्धं शत्रुघ्नमिदमब्रवीत् ॥ अवध्याः सर्वभूतानां प्रमदाः क्षम्यतामिति ॥२१॥ हन्याम
हमिमां पापां कैकेयीं दुष्टचारिणीम् ॥ यदि मां धार्मिको रामो नासूयेन्मातृघातकम् ॥२२॥
इमामपि हतां कुब्जां यदि जानाति राघवः ॥ त्वां च मां चैव धर्मात्मा नाभिभाषिष्यते ध्रुवम्
॥२३॥ भरतस्य वचः श्रुत्वा शत्रुघ्नो लक्ष्मणानुजः ॥ न्यवर्तत ततो रोषात्तां मुमोच च मन्थराम्
॥२४॥

नासूयेत् न कुप्येत् कुप्येत् तदाहमिमां मातरमपि हन्यां ॥२२॥ जानाति चेत् स्पृते नाभिभाषिष्यते स्त्रीघाति नाभि। इति मन्वेति शेषः ॥२३॥ दोषात् दोषं त्यक्त्वा ॥२४॥

 धनुर्व्रतः कनीयस्त्वेन उपवधनुर्व्रत इत्यर्थः ॥ १० ॥ भस्मतां प्राप्नुतां प्राप्नुताम् तयाकृतौ श्रमयेति शेषः ॥ ११ ॥ १२ ॥ १३ ॥ समुपक्रान्तः प्रारब्धवान्

प्रांशुघ्रष्टतदा तासां वने स्मिन् प्रादुःस्थितः ॥ धीमतः प्रचारान्सर्वानिसुवा च धनुर्व्रतः ॥ १० ॥ तीव्रमुत्पादितं दुःखं मातृणां मे प्रयापितुः ॥ परामेषेन प्रामसमकर्मणाः फलं मस्तुताम् ॥ ११ ॥ एवमुक्त्वा च तेना प्रकलत्वी जनसमावृता ॥ गृहीता केशवत् कुञ्जासात दृढं हस्ते नादत् तु ॥ १२ ॥ ततः सम्भ्रान्तचित्तास्तस्याः सर्वसखीजनः ॥ कुम्भमात्ता यत्र प्रांशुघ्नं पलायत सर्व प्राः ॥ १३ ॥ श्रमेत्र यतः कन्याच्छतस्याः सर्वसखीजनः ॥ यथा वै समुपक्रान्तो निःश्वासेनः करिष्यति ॥ १४ ॥ सानुक्रोशं च दासीं च धर्मिता च पश्चिनीम ॥ कोपात्प्रारतं यामः साहिनो स्तु ध्रुवा गतिः ॥ १५ ॥ स च तेषां तासां वाक्यः प्रांशुघ्नः प्रांशुतापनः ॥ विचकर्ष तदा कुञ्जां क्रोधात्तोयं पचवीतले ॥ १६ ॥ तस्यानुकृष्यमाणायां मे चरायां ततस्ततः ॥ चित्रं बहुविधं भाण्डं पथि व्योम न्यप्रशीर्यत ॥ १७ ॥

तत्क्रमः ॥ १४ ॥ अतः सानुक्रोशामिति वदान्याँ वदान्यो वल्गु वाग्दात्रोरिति वैजयन्ती सानो ध्रुवा गतिरस्ति ॥ २८६ ॥
अत तत्तो प्रारतं याम इत्यमेव पतेत् स्वपः ॥ १५ ॥ १६ ॥ भाण्डं मूल्यगत्म ॥ १७ ॥

पित. निःस्नेहदोषोस्तीत्याशंकां परिहरति पूर्वमिति योराज्ञानाशीर्वाणागतः सन् उत्पथं प्रपन्नस्यापसमारूढःप्रासः ग्रहीतो लक्ष्मणोनुजयानयो
स्य मिथःक विषयो समीक्ष्य विचार्य उरो प्यवलिप्तस्येति शास्त्रानुसारेण वनप्रव्राजनात्पूर्वमेव निर्वासोनेद मनुचितमिति भावः

पूर्वमेव तु निर्वासः सम्भवेच्यनयानयोः ॥ उत्पथ्येयः समारूढो नापीतराजाव प्रोगतः ॥४॥ इति
सम्भाषमाणोतु भ्रातुर्घोलक्ष्मणानुजे ॥ भ्रागद्वारेभूत्तदा कुब्जा सर्वाभरणभूषिता ॥५॥ लि
प्ताचन्दनसारेणराजवस्त्राणिविभ्रती ॥ विविधं विविधैस्तैस्तैर्भूषणैश्चापिभूषिता ॥६॥ मे
खलादामभिश्चित्रैरन्यैश्च शुभभूषणैः ॥ बभासेबहुभिर्वद्धा रज्जुबद्धेव वानरी ॥७॥ तामस
मीक्ष्य तदा द्वास्थो मन्त्री पापस्य कारिणीम् ॥ गृहीत्वाकरुणां कुब्जां भ्रातुर्घ्राता यन्यवेदयत् ॥
८ यस्याः कृतेवनेरामो न्यस्तदेहश्च वः पिता ॥ सेयं पापा नृशंसा च तस्याः कुरु यथामति ॥९॥

४ भ्राग्द्वारे भ्रातुर्घाधिष्ठितद्वारेकुब्जादैवादागताभूत् ५ राजवस्त्राणिराजार्हवस्त्राणि ६ वानरी [illegible] करूपत्वात् ७ स्वकर्माणि
दंप ८ वनेरामस्तिष्ठतीतिशेषः यथामतिनिग्रहमितिशेषः ९

तानयोत्तजत्रौ श्रपरातःक्रियाभस्मोद्धारादिक्रियाः उदिदृ पूपेति शेषः॥२६॥ इतिसप्तसप्ततितमः सर्गः॥७७॥ यात्रां गमनं तन्यात्रां समीहंतं विचारयंतं॥१॥ योरामः दुःखे दुःखजनके संकटे प्राप्ते सर्वभूतानां गतिः स्मरणमात्रेण सर्वदुःखनाशकः आत्मनः स्वस्य स्वावयोश्च किंवक्तव्यं स्वनेनाति संकटे भगवान्स्मरणीय एव दुःखेनाप्रोत सर्वथैनान्यदिति सूचितं सरामः

शुश्रूषितापरिस्रस्याप्तौरिक्ता क्षौदीनभाषितो॥ श्रमात्यास्त्वरयंतिस्मतंतन्यौचापराक्रियाः॥२६॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अयोध्याकांडे सप्तसप्ततितमः सर्गः॥७७॥ अथ यात्रां समीहंतं शत्रुघ्नो लक्ष्मणानुजः॥ भरतं शोकसंतप्तमिदं वचनमब्रवीत॥१॥ गतिर्यः सर्वभूतानां दुःखे किं पुनरात्मनः॥ सरामः सत्वसंपन्नः स्त्रियाप्रव्राजितो वनम्॥२॥ बलवान्वीर्यसंपन्नो लक्ष्मणो नाम योप्यसौ॥ किंनमोचयते रामं कृत्वापि पितृनिग्रहम्॥३॥

स्त्रियाप्रव्राजितो कृतभर्त्रे कथा कैकेय्या वनेप्रव्राजितः सचसत्वसंपन्नोपि तत्र इत्यनुचितं कृतं॥२॥ रामोराज्ञ्या कोपज्ञयापितृवचनोल्लंघनेकृतवानित्यपयशोभयादेवं कृतोतु लक्ष्मणस्तुकथमनुमतिं कृतवानित्याह बलवानिति किंनमोचयते प्रव्राजनादितिशेषः॥३॥

१ हृतिमान प्रश्रात्वभावः वेद्यः सर्वतः सर्वज्ञमिश्र जीवै ध्यावितिको प्राः ।२०। वृत्तस्य कृतदाहस्यसावशेषास्थिनिचये रास्थि संचायनाख्य कर्मणि प्राप्ते चांतरा जं कृतस्याप्यवशेषो भूमिस्थ [illegible] किं विलंबसे ।२२। त्री

ततः श्रुत्वा तिमान्वै घः पितुरेवो पुरोहितः ॥ वशिष्ठो भरतं वाक्यमुत्थाप्य तमुवाच ह ॥२१॥
त्र्योदशाये दिवसे पितुर्वृत्तस्य ते विभो ॥ सावशेषास्थिनिचये किमिह त्वं विलंबसे ॥
२२॥ त्रीणि द्वंद्वानि भूतेषु प्रवृत्तान्यविशेषतः ॥ तेषु चापरिहार्येषु नैवं भवितुमर्हसि
२३॥ सुमंत्रश्चापि शत्रुघ्नमुत्थाप्याभिप्रसाद्य च ॥ श्रावयामास तत्त्वज्ञः सर्वभूत
भवाभवम् ॥२४॥ उत्थितौ च नरव्याघ्रौ प्रकाशेते यशस्विनौ ॥ वर्षातपपरिग्लानौ
पृथगिंद्रध्वजाविव ॥२५॥

णि द्वंद्वानि जन्ममरणे सुखदुःखे लाभालाभौ चेति भूतेषु प्राणिषु अविशेषतः प्र
त्तानि संति तेषु परिहार्याणि च ते एवं भवति शोकाक्रांतत्वं भवितुं त्वं नार्हसि ।२३। सर्वभूतभवं सर्वभूतानामुत्पत्तिविनाशौ
२४।२५।

।टी० वा० अ० ७७।नन्विति बहून्याभरणादीनि दिग्भवत्तपस्यायां गतेषु किं ते व्यपेक्षितं गुहारोऽतिप्रचारप्रतिपक्षे वीरास्मदिष्ट वरस्तीका
॥२८४॥ रप्रतिभवान् तदघनः कः करिष्यतीति त्वयि गते इति शेषः ।१५। पार्थिवेण विहीना नावदीर्यते नभि ह्यते सोऽप्यपि वीऽप्यव

न नु मोऽस्येष्यानेष्ववन्ते व्याभरणोषु च। प्रचारपतिनः सर्वे तस्त्वं नः को वा करिष्यति ॥१५
अवदारणकाले तु पृथिवी नावदीर्यते। विहीना पार्थिवेनाराज्ञा धर्मज्ञेन महात्मना ॥१६
पितरि स्वर्गमापन्ने रामे च वनमाश्रिते। किं मे जीवितसामर्थ्यं प्रवेक्ष्यामि हुताशनम् ॥१७
हीनो भ्रात्रा च पित्रा च शून्यामिक्ष्वाकुपालिताम्। अयोध्यां न प्रवेक्ष्यामि प्रवेक्ष्यामि
तपोवनम् ॥ १८ ॥ तयोर्विलपितं श्रुत्वा व्यसनं चान्ववेक्ष्य तत्। भृशमार्ततरा भूयः स
र्व एवानुगामिनः ॥ १९ ॥ ततो विषण्णौ श्रान्तौ च शत्रुघ्नभरतावुभौ। धरण्यां स्म चेष्टे
तां भग्नशृंगाविवर्षभौ ॥ २० ॥

दारणकाले तु प्रलयकालेऽपि नावदीर्यत इत्यन्वयः ।१६। जीवितसामर्थ्यं जीवनशक्तिः
।१७।१८। अनुगामिनो ऽनुचराः यथार्ता तथा भृशमभूवन्निति शेषः ।१९। समचेष्टेतां व्यलुठेताम् ।२०। सीतारामाभ्यां नमः। ॥ राम २८४॥

सतुभरतःतद्दृष्ट्वादीनःदुःखितोभूत्वारुदन्धरणीतलेपपातउत्थाप्यमानःरज्जुभिःपुरुषैरुत्थाप्यमानः शक्रस्ययंत्रध्वजःयंत्रबद्धोध्व
जोयंत्रध्वजइवेतिसंबंधः श्चेत्रोस्यांततःपतितेननतेनोपमा।९।अंतकालेप्रलयपक्षेअवकाले।१०।११।गुणांगानिगुणलक्षणेन

सतुदृष्ट्वारुदन्दीनःपपातधरणीतले॥उत्थाप्यमानःशक्रस्ययंत्रध्वजइवोच्छ्रितः॥९॥अ
भिपेतुस्ततःसर्वेतस्यामात्याःशुचिव्रतम्॥अंतकालेनिपतितंययातिमृषयोयथा॥१०॥शत्रुघ्न
श्चापिभरतंदृष्ट्वाशोकपरिप्लुतम्॥विसंज्ञोन्यपतद्भूमौभूमिपालमनुस्मरन्॥११॥उन्मत्त
इवनिश्चेताविललापसुदुःखितः॥स्मृत्वापितुर्गुणांगानितानितानितदातदा॥१२॥मंथरा
प्रभवस्तीव्रःकैकेयीग्राहसंकुलः॥वरदानमयोक्षोभ्योऽमज्जयच्छोकसागरः॥१३॥सुकुमा
रंचबालंचसततंलालितंत्वया॥क्वतातभरतंहित्वाविलपंतंगतोभवान्॥१४॥सीतारामाभ्यां

गुणास्यांगभूतानिविचित्रवस्त्राभरणदानादिकर्माणिस्मृत्वाविललाप।१२।वरदानमयत्वाद्अक्षोभ्यः अमज्जयत्शत्रुस्मानितिशेषः
।१३।१४।

॥रा०बा०स०॥ और्ध्वदेहिकं उर्ध्वदेहमूर्द्ध्वं पारलौकिकं तद्दद्वाविति संबंधः ॥३॥ ४॥ शब्देन रोदनशब्देन पिहितं प्रावृतं ततः कंठोपसाः प्रो
॥२८३॥ धनार्थमस्थिसंचयनार्थं पितुश्चितामूले २ दंवाक्रमाह ॥५॥ तद्देवाहतांतेति निरुपद्रतः ॥६॥ यस्या रघुनाथ्यापगतिरव

दासीदासांश्च यानानि वेश्मानि सुमहांति च ॥ ब्राह्मणेभ्यो ददौ पुत्रो राज्ञस्तस्यौर्ध्वदेहिकम् ॥३॥ त
तः प्रभातसमये दिवसे ऽथ त्रयोदशे ॥ विललाप महाबाहुर्भरतः शोककर्षितः ॥४॥ शब्दापिहि
तकंठस्तु शोधनार्थमुपागतः ॥ चितामूले पितुर्वाक्यमिदमाह सुदुःखितः ॥५॥ तात यस्मिन्नि
सृष्टोऽहं त्वया भ्रातरि राघवे ॥ तस्मिन्वनं प्रव्रजिते शून्ये त्यक्तोस्म्यहं त्वया ॥६॥ यस्या गतिरनाथा
याः पुत्रः प्रव्राजितो वनम् ॥ तामंबां तात कौसल्यां त्यक्त्वा त्वं क्व गतो नृप ॥७॥ दृष्ट्वा भस्मारुणां
तच्च दग्धास्थिस्थानमंडलम् ॥ पितुः शरीरनिर्वाणं निष्टनन्विषसाद ह ॥८॥ सीतारामाभ्यां नमः

ते ऽप्येवं पुत्रस्त्वर्थः ॥७॥ भस्मारुणां भस्मपुंजं स्थितिदाहादरुणां च दग्धास्थिदग्धान्यस्थीनि यस्मिन्स्थानमंडलं चितास्थानं मं
डलं पितुः शरीरनिर्वाणं शरीरनाशस्थानं तद्दृष्ट्वा निष्टनन् नितरां स्तनन् शब्दं कुर्वन् विलपन् विषसाद ॥८॥८॥८॥८॥

२२॥ भूमौ शयाना इति शेषः दुःखं शोच्यं व्यनयंत अगमयत् ननु द्वादशाहेन भूपालः क्षत्रियः षोडशेऽहनीति क्षत्रियस्याषो
डशाहाशौचसम्भवात्कथं दशाह इत्युच्यत इति चेत्सत्यं क्षत्रियस्तु दशाहेन स्वकर्मनिरतः शुचिरित्यादिपरशाहोक्तेः दिशो

ततो रुदंत्यो विवशा विलप्य च पुनः पुनः॥ यानेभ्यः सरयूतीरमवतेरुर्वरांगनाः॥२२॥ कृ
त्वोदकं ते भरतेन सार्धं नृपांगना मंत्रिपुरोहिताश्च॥ पुरं प्रविश्याश्रुपरी[illegible]तनेत्रा भूमौ
दशाहं व्यनयंत दुःखम्॥२३॥ इत्यार्षे रामायणे अयोध्याकांडे षट्सप्ततितमः सर्गः॥ ७६॥॥
ततो दशाहेऽतिगते कृतशौचो नृपात्मजः॥ द्वादशेऽहनि संप्राप्ते श्राद्धकर्माण्यकारयत्॥१॥
ब्राह्मणेभ्यो ददौ रत्नं धनमन्नं च पुष्कलम्॥ वास्तिकं बहु शुक्लं च गाश्चापि शतशस्तथा॥२

षः शास्त्रानुसारेणोक्तमिति न दोषः॥२३॥ इति षट्सप्ततितमः सर्गः॥७६॥ ततः इति दशाहेऽतिगते एकादशेऽह्नि कृतशौचो
नृपात्मजोऽनुष्ठितप्रेतविमुक्तिदैकादशाहश्राद्धो द्वादशेऽहनि संप्राप्ते श्राद्धकर्माणि द्वितीयमासिकादिसपिंडीकरणांत
श्राद्धकर्माण्यकारयदित्यर्थः॥१॥ वस्तानामजानां समूहो वास्तिकं छागसमूहं शुक्लं शुद्धं दानार्हमित्यर्थः॥२॥

॥रा०वा०स्व०॥ निर्यासो गुग्गुल्वादिः सरलं पद्मकं काष्ठभेदः देवदारूणि देवदारुकाष्ठानि क्षेपयंति चितायामिति शेषः॥१६॥ तत्र चितादे
॥२८२॥ शं गत्वा चितामध्ये तं वेशयामासुः स्थापयामासुः॥१७॥ जेपुः पैतृमेधिकमंत्रान् तस्य परलोकसुखप्राप्त्यर्थमिति शेषः तदृत्विजः ते

चंदनागरुनिर्यासान् सरलं पद्मकं तथा॥ देवदारूणि चाहृत्य क्षेपयंति तथा परे॥१६॥ गंधानु
च्चावचांश्चान्यांस्तत्र गत्वाथ भूमिपम्॥ ततः संवेशयामासुश्चितामध्ये तमृत्विजः॥१७॥ तदा
हुताशनं हुत्वा जेपुस्तस्य तदृत्विजः॥ जगुश्च ते यथाशास्त्रं तत्र सामानि सामगाः॥१८॥ शि
बिकाभिश्च यानैश्च यथार्हं तस्य योषितः॥ नगरान्निर्ययुस्तत्र वृद्धैः परिवृतास्तथा॥१९॥ प्रस
व्यं चापि तं चक्रुरृत्विजोऽग्निचितं नृपम्॥ स्त्रियश्च शोकसंतप्ताः कौसल्याप्रमुखास्तदा॥२०
क्रौंचीनामिव नारीणां निनादस्तत्र शुश्रुवे॥ आर्तानां करुणं काले क्रोशंतीनां सहस्रशः॥२१॥

यथार्हं वर्तिकाः॥१८॥१९॥ प्रसव्यमपदक्षिणं अग्निचितं अग्निचितवंतं स्वकर्मेध्यादि प्रवृत्तं कर्तारमित्यर्थः स्त्रियश्च प्रसव्यं॥राम २८२॥
चक्रुरित्यन्वयः॥

९।१०॥ अविचारितं प्राचीनवैभवादि स्मरणरहितं यथा तथा॥११॥ ऋत्विजो यज्ञकर्मणि वृताः पुरोहिताः शान्तीयेष्टिकादिक्रिया

विधवापृथिवीराजनत्वयाहीनानराजते॥हीनचंद्रेवरजनीनगरीप्रतिभातिमाम्॥९॥एवंवि

चेष्टमानंतंभरतंदीनमानसम्॥अब्रवीद्वचनंभूयोवसिष्ठस्तुमहानृषिः॥१०॥प्रेतकार्याणि

यान्यस्यकर्त्तव्यानिविशांपतेः॥तान्यव्यग्रंमहाबाहोक्रियतामविचारितम्॥११॥तथेतिभ

रतोवाक्यंवसिष्ठस्याभिपूज्यतत्॥ऋत्विक्पुरोहिताचार्यांस्त्वरयामाससर्वशः॥१२॥येत्व

ग्नयोनरेंद्रस्यचाग्न्यगाराद्बहिष्कृताः॥ऋत्विग्भिर्याजकैश्चैवतेह्रियंतेयथाविधि॥१३॥

शिबिकायामथारोप्यराजानंगतचेतनम्॥बाष्पकंठाविमनसस्तमूहुःपरिचारकाः॥१४॥

हिरण्यंचसुवर्णंचवासांसिविविधानिच॥प्रकिरंतोजनामार्गंनृपतेरग्रतोययुः॥१५॥

प्रवर्तकाः उपनीयवेदाध्यापकस्त्वाचार्यः॥१२॥ अग्न्यगाराद्बहिष्कृताः श्रौताः आवसथ्या बहिः स्वदेशप्रतिष्ठापिताः याजकैरुपद्र

ष्टभिर्हूयंतेस्म॥१३॥१४॥हिरण्यंरजतम्॥१५॥

३७ कुशलप्रश्नमेवाह पुत्रेष्विति पुत्रेषु शिष्येषु तिविलेन कृत्स्नेन आनुपूर्व्या प्रधानक्रमेण पिता मे शेरस्यानुत्रातिचपौरान् कुशलं पृच्छतीति पूर्वेणान्वयः ३८ शुश्रूषंते वचः शिष्या इति शुश्रूषंता प्रतिप्रश्नः धर्मेषु दंशिता

संग्रामात्पुनरागम्य कुंजरेण रथेन वा ॥ पौरान्स्वजनवन्नित्यं कुशलं परिपृच्छति ॥ ३७ ॥ पुत्रेष्वग्निषु दारेषु प्रेष्यशिष्यगणेषु च ॥ निखिलेनानुपूर्व्या च पिता पुत्रानिवौरसान् ॥ ३८ ॥ शुश्रूषंते च वः शिष्याः कच्चिद्धर्मेषु दंशिताः ॥ इति नः पुरुषव्याघ्रः सदाराम(?)भिभाषते ॥ ३९ ॥ व्यसनेषु मनुष्याणां भृशं भवति दुःखितः ॥ उत्सवेषु च सर्वेषु पितेव परितुष्यति ॥ ४० ॥ सत्यवादी महेष्वासो वृद्धसेवी जितेंद्रियः ॥ स्मितपूर्वाभिभाषी च धर्मं सर्वात्मनाश्रितः ॥ ४१ ॥ सम्यग्योक्ता श्रेयसां च न विगृह्यकथारुचिः ॥ उत्तरोत्तरयुक्तौ च वक्ता वा

स्रवहि तामस्पावः सेवेत इति त्तत्रियान्प्रतिप्रश्नः कच्चिदिति प्रश्नो ३९ सत्पुरुषसंभावितगुणानभिधायरामस्यासाधारणगुणानाह व्यसनेष्विति व्यसने दुःखं ४० ४१ श्रेयसां समयोक्ता संपादकः विगृह्यकलहं कृत्वा जल्पवितंडात्मककथारुचिर्यथा प्राकृतस्तथा रामो नेत्यर्थः ॥ ४२ ॥

प्रथितमुवाचेत्युक्तं विशदयति दुंदुभीति दुंदुभिस्वनकल्पेन भेरीस्वनसदृशेन गंभीरेणागंभीरार्थकेन अनुना
दिना दिशः प्रति ध्वनयुतास्वरेणानादयन् जीमूतध्वनिमेघस्ववत्स्थितो राजा उवाचेति पूर्वेणान्वयः ॥ २ स्वरं विशदयन्नु
नराहराजेति राजलक्षणापुक्तेन राजवाक्यानुरूप लक्षणापुक्तेन कांतेनमधुरेनारसयुक्तेनमाधुर्यवता स्वरेणान्

दुंदुभिस्वनकल्पेन गंभीरेणानुनादिना ॥ स्वरेणामहता राजा जीमूतध्वनादयन् ॥ २ ॥ राज
लक्षणापुक्तेन कांतेनानुपमेनच ॥ उवाचरसयुक्तेन स्वरेणान् पतिर्नृपान् ॥ ३ ॥ विदितंभव
तामेतद्यथामे राज्यमुत्तमं पूर्वकैर्ममराजेंद्रैः सुतवत्परिपालितम ॥ ४ ॥ सोहमिक्ष्वाकुभिः स
र्वैर्नरेंद्रैः प्रतिपालितम ॥ श्रेयसायोक्तुमिच्छामि सुखाहं मखिलं जगत् ॥ ५ ॥

खि

पतिर्दशरथो नृपानुवाच ॥ ३ ॥ स्वकृतराज्यपरिपालनस्य पूर्वकृतपालनादविशेषमुक्त्वाहविदितमिति उत्तमम
तिविपुलमेतद्राज्यं मम पूर्वकैः पूर्वराजेंद्रैरघुप्रभृतिभिः ॥ सुतवत्परिपालितं प्रतिप्रेम्णा सुरक्षितं यथैतद्भवतां वि
दितमित्यर्थः ॥ ४ ॥ ततः किं तत्राह सोहमिति श्रेयसाश्रीरामराज्याभिषेकद्वाराविशिष्टेन सुखेन योक्तुकामोस्मि ॥ यतइ

विदितंभवद्भि

अ०१० विस्तीर्णेषु दर्शितेषु नियताः राजमुखमात्रनिरीक्षकाः। ५०। उपोपविष्टैः सभायां तत्समीपोपविष्टैः सहस्रच
क्षुरिंद्रः। ५१। इत्यार्षे श्रीमद्रामायणे विषमपदव्याख्याने अयोध्याकांडे प्रथमः सर्गः। १। अथ परस्याभिषेक।

अथ परस्ताविस्तीर्णेषु विविधेष्वासनेषु च॥ राजानमेवाभिमुखा निषेदुर्नियता नृपाः॥ ५०॥
स लब्धमानैर्विनयान्वितैर्नृपैः पुरालयैर्जानपदैश्च मानवैः॥ उपोपविष्टैर्नृपतिर्वृतो बभौ
सहस्रचक्षुर्भगवानिवामरैः॥ ५१॥ इत्यार्षे श्रीमद्रामायणे अयोध्याकांडे प्रथमः सर्गः
॥ १॥ ततः परिषदं सर्वामामंत्र्य वसुधाधिपः॥ हितमुद्धर्षणं चैवमुवाच प्रथितं वचः॥ १॥

स सर्वप्रजार्थत्वात्तदनुमतये आह तत इति॥ ततो राजादिनिवेशानंतरं परिषदं पौरजानपदसमूहं आमंत्र्य अभि
मुखीकृत्य उद्धर्षणं आह्लादकं हर्षजनकं प्रथितं सर्वजनश्राव्यं यथा भवति तथा उवाच॥ १॥

एवमनुसंधानस्य प्रयोजनमाह आत्मनश्चेति । अत आत्मनश्च प्रजानां च श्रेयसे प्रियेण च प्रजानिष्ठरामविषय
प्रीतिरूपहेतुना च भक्त्या च रामपालनेन प्रजा धन्या भवेयुरिति प्रजाविषयस्नेहेन च सत्पयो मंत्रिगणः रामाभिषे-
कायत्वरितवान् ४५ त्वरापि त्वाच नानानगरवासिनस्तत्राधिकृतान् भिन्नभिन्नजनपदस्वामिनो मेदिन्यामवः

आत्मनश्च प्रजानां च श्रेयसे च प्रियेण च ॥ प्राप्तकालेन धर्मात्मा भक्त्या त्वरितवान्नृपः ॥ ४४ ॥
नानानगरवास्तव्यान्पृथग्जानपदानपि ॥ समानिनाय मेदिन्याः प्रधानान्पृथिवीपतिः ॥ ४६
तान्वेश्मनानाभरणैर्यथार्हं प्रतिपूजितान् ॥ ददर्शालंकृतो राजा प्रजापतिरिव प्रजाः ॥ ४७ ॥
न तु केकयराजानं जनकं वा नराधिपः ॥ त्वरया चानयामास पश्चात्तौ श्रोष्यतः प्रियम् ॥ ४८
अथोपविष्टे नृपतौ तस्मिन्परपुरार्दने ॥ ततः प्रविविशुः शेषा राजानो लोकसंमताः ॥ ४९ ॥

प्रधानांश्च मंत्रिद्वारा समानिनाय ४६ वेश्म नानाभरणैः उत्तद्धानैः प्रजापतिर्ब्रह्मा ४७ त्वरया रामाभिषेक-
विषत्वरया । प्रियं रामाभिषेकम् ४८ दर्शनप्रकारमाह प्रविविशुरिति सभामिति शेषः शेषाः केकयजनकव्यतिरि-

रामा०

॥अ०८

उपसंहरति तथेति तथा पूर्वोक्तरीत्या सर्वप्रजाकान्तैः स्त्रीबालयुववृद्धानां प्रियैः पितुः प्रीत्युत्पादकैर्गुणैः रामः स्व[illegible]तः संदद्भ्स्वतो[illegible] दीप्तः सूर्य इवांशुभिरिव विरुरुचे बभावित्यर्थः ॥३३॥ एवं रामगुणान्प्रदर्श्य राज्ञोभिषेकेच्छां दर्शयति तमेवमिति मेदिनी तदभिमानिनी देवता तद्वर्तिप्रजाश्च नाथं प्रभुं कामयत तस्मे नीयत्वोचितोऽभूदित्यर्थः

तथा सर्वप्रजाकान्तैः प्रीतिसंजननैः पितुः ॥ गुणैर्विरुरुचे रामो दीप्तः सूर्य इवांशुभिः ॥३३॥
तमेवंवृत्तसंपन्नमप्रमेयपराक्रमम् ॥ लोकनाथोपमं नाथमकामयत मेदिनी ॥३४॥
एतैस्तु बहुभिर्युक्तं गुणैरनुपमैः सुतम् ॥ दृष्ट्वा दशरथो राजा चक्रे चिंतां परंतपः ॥३५॥
अथ राज्ञो बभूवैव वृद्धस्य चिरजीविनः ॥ प्रीतिरेषा कथं रामो राजा स्यान्मयि जीवति ॥३६॥

३४ न केवलं लोकस्तेन नाथमकामयत राजापि प्रीत्याह एतैरिति एतैः पूर्वोक्तैर्गुणैर्बहुभिरसंख्येयैरनुपमैर्युक्तं सुतं दृष्ट्वा राजा दशरथश्चिंतां मनोरथं चक्रे ॥३५॥ चिंताप्रकारमाह अथेति मयि जीवति रामो राजा कथं भवेत् ॥ तादृशस्य तस्य दर्शनजा एषा प्रीतिरानंदो मे कथं स्यादिति चिंता बभूवेत्यन्वयः ॥३६॥

पं २

राम०८॥

ःक्रोध त्व

अप्रधृष्यः प्रधर्षयितुमशक्यः सर्वथा विजय्येत्यर्थः । एवं कल्याणगुणपरिपूर्णमुक्तम् । अथ षड्भिर्दोषराहित्यमाह अनसूयः असूयारहितः जितक्रोधः रहितः न दृप्तः नगर्वितः न च मत्सरी परसंपद्द्वेषवान् ।३०। भूतानां प्राणिनामवमानकर्ता न । कालवशः कालपारतंत्र्यं तदनुसारी न भवतीत्यर्थः । दशवर्षसहस्राणि दशवर्षशतानि च

अप्रधृष्यश्च संग्रामे क्रुद्धैरपि सुरासुरैः ॥ अनसूयो जितक्रोधो न दृप्तो न च मत्सरी ॥३०॥ न
चावमंता भूतानां न च कालवशानुगः ॥ एवं श्रेष्ठैर्गुणैर्युक्तः प्रजानां पार्थिवात्मजः ॥३१॥
संमतस्त्रिषु लोकेषु वसुधायाः क्षमागुणैः ॥ बुद्ध्या बृहस्पतेस्तुल्यो वीर्ये चापि शचीपतेः ॥३२॥

वत्स्यामि मानुषे लोके पालयन्पृथिवीमिमामिति । भगवतैव कालनियमस्योक्तत्वात् । उक्तगुणोपसंहारपूर्वकं गुणांतरमाह एवमिति । एवमुक्तप्रकारैर्गुणैः पार्थिवात्मजो रामः । प्रजानां मध्ये श्रेष्ठैर्लोकोत्तरैर्गुणैर्युक्तः ३१ त्रिषु लोकेषु संमतः पूजितः क्षमागुणैः क्षांतिप्रधानैर्गुणैर्वसुधायाः भूमेस्तुल्य इति परेण संबंधः ॥३२॥ ३२

शास्त्रसमूहेषु न्यायवैशेषिकवेदान्तादिसमूहेषु व्यामिश्रकेषु संस्कृतप्राकृतादिसभाषात्मककाव्यनाटकादिषु च श्रेष्ठं निपुणतां प्राप्त इत्यर्थः। अर्थधर्मौ संगृह्य तदविरोधेन सुखतन्त्रः कामसेवीत्यर्थः। न चालसः कर्तव्यकार्येषु निरुत्साहत्वमालस्यं तद्रहितः॥२७॥ वैहारिकाणां क्रीडार्थयोजनानां गीतवाद्यचित्रकर्मादीनां विज्ञाता। अर्थविभागविद्धर्माय यशसेऽर्थायात्मने स्वजनाय च पंचधा विभजन्वित्तमिहामुत्र च शोभते इत्युक्तप्रकारेणार्थविभा

श्रेष्ठं शास्त्रसमूहेषु प्राप्तो व्यामिश्रकेषु च। अर्थधर्मौ च संगृह्य सुखतन्त्रो न चालसः॥२७॥
वैहारिकाणां शिल्पानां विज्ञातार्थविभागवित्। आरोहे विनये चैव युक्तो वारणवाजिनाम्॥२८॥
धनुर्वेदविदां श्रेष्ठो लोकेऽतिरथसंमतः। अभियाता प्रहर्ता च सेनानयविशारदः॥२९॥

गज्ञः। वारणवाजिनां गजानामश्वानां च आरोहे आरोहणे विनये विविधशिक्षाप्रदाने युक्तः सक्तः॥२८॥ धनुरादिस्वरूपप्रतिपादको वेदो धनुर्वेदस्तद्विदां श्रेष्ठः। लोके सर्वेषामतिरथानां संमतस्तैः पूजित इत्यर्थः। अभियाता शत्रूणामभिमुखं गन्ता प्रहर्ता तत्राभिगम्य प्रहरति च। सेनानयः चक्रादिव्यूहन्यासः तत्र विशारदो निपुणः॥२९॥ राम राम सीता

शास्त्रसमूहेषु न्यायवैशेषिकवेदांतादिसमूहेषु व्यामिश्रकेषु संस्कृतप्राकृतादिसभाषात्मककाव्यनाटकादिषु च
श्रेष्ठं निपुणतां प्राप्तः इत्यर्थः अर्थधर्मौ संगृह्य तदविरोधेन सुखतंत्रः कामसेवीत्यर्थः न चालसः कर्त्तव्यकार्येषु नि
रुत्साहत्वमालस्यं तद्रहितः ॥२७॥ वैहारिकाणां क्रीडाप्रयोजनानां गीतवाद्यचित्रकर्मादीनां विज्ञाता अर्थवि
भागविद्धर्मोपायप्राप्तस्य धनस्यात्मने स्वजनाय च पंचधा विभजनवृत्तिमिहामुत्र च शोभते इत्युक्तप्रकारेणार्थविभा

श्रेष्ठं शास्त्रसमूहेषु प्राप्तो व्यामिश्रकेषु च ॥ अर्थधर्मौ च संगृह्य सुखतंत्रो न चालसः ॥२७॥
वैहारिकाणां शिल्पानां विज्ञातार्थविभागवित् ॥ आरोहे विनये चैव युक्तो वारणवाजिनाम् ॥२८
धनुर्वेदविदां श्रेष्ठो लोकेऽतिरथसंमतः ॥ अभियाता प्रहर्त्ता च सेनानयविशारदः ॥२९॥ ॥ ॥

गजः वारणा वाजिनो गजानामश्वानां च आरोहे आरोहणे विनये विविधातिनयने युक्तः सक्तः ॥ धनुरादिस्वरू
पप्रतिपादको वेदो धनुर्वेदस्तद्विदां श्रेष्ठः लोके सर्वैर्बाणैरतिरथानां संततैः पूजित इत्यर्थः । अभियाता शत्रूणामभिमु
खं गंता प्रहर्त्ता तत्राभिगम्य प्रहरतीति च सेनानयः चक्रादिव्यूहन्यासः तत्र विशारदो निपुणः ॥२९॥ रामराम सीता

रिण

शास्त्रज्ञः शास्त्राणि चतुर्दशविद्यास्थानानि जानातीति शास्त्रज्ञः । कृतज्ञः परेणाल्पमपि कृतमुपकारं जानाती
ति तथा गुरूणामांतरं तारतम्यं तद्विवेचने कोविदः । यद्वा गुरूणामांतरमभिप्रायस्तज्ज्ञः पक्षछंदस्तमे
व मित्युत्तरान्वयः प्रथममात्मीयत्वेन परिग्रहः प्रग्रहः परिगृहीतस्यैनेरंतर्येणानुवर्तनमनुग्रहः । तयोर्यथा
न्यायं युक्तायुक्तविचारानतिक्रमस्तत्र विचक्षणः ॥२५॥ सत्संग्रहे सज्जनस्वीकारे प्रग्रहणे तत्परिपालने विच

शास्त्रज्ञः कृतज्ञश्च गुरूणामांतरकोविदः ॥ प्रग्रहानुग्रहयोश्च यथान्यायं विचक्षणः ॥२५॥ स
त्संग्रहप्रग्रहयोः स्थाने विनिग्रहे स च ॥ आयकर्मण्युपायज्ञः संदृष्टव्ययकर्मवित् ॥२६॥

क्षणः इति पूर्वश्लोकेनैव विवरणात् । यद्वा सत्संग्रहः सदाचारः । तस्य प्रग्रहणे रक्षणे रक्षतेरस्यर्थः । दुष्टनिग्रहस्य प्रति
ष्ठानं पालनस्य च स्थानविस्तस्मयज्ञः इत्यर्थः । आयकर्मणि न्यायप्राप्तधनार्जनकर्मणि उपायज्ञः । पुष्पेषु
म्योम धुकरस्तवत्तजाम्योऽपीडनेनैव धनं संपादयितुं चतुर इत्यर्थः । संदृष्टव्ययकर्मवित् । कश्चिदायस्य चार्द्धं न च
तु भोगेन वा पुनः पादमार्गैस्त्रिभागैर्वा व्ययः कार्यो न परेतिहेति शास्त्रदृष्टव्ययकर्मज्ञः ॥२६

॥ २४० ६

धर्मकामार्थतत्वज्ञः पूर्वान्हादिकालेषु कर्त्तव्य धर्मकामार्थफलविशेषज्ञ इत्यर्थः स्मृतिमान् ज्ञातार्थविस्मरण
रहितः प्रतिभानं प्रतिभा तद्वान् लौकिके कृतकल्पो दक्षः समयाचारे धर्मे विशारदः कुशलः ॥ २२ ॥ निभृतो विनीतः सं
वृताकारो गूढाभिप्रायः गूढमंत्रः फलपर्यंतमन्याविदितमंत्रः सहायवान् प्रशस्तमंत्रियुक्तः त्यागः सत्पात्र।

धर्मकामार्थतत्वज्ञः स्मृतिमान्प्रतिभानवान् ॥ लौकिके समयाचारे कृतकल्पो विशारदः ॥ २२
निभृतः संवृताकारो गुप्तमंत्रसहायवान् ॥ क्षमोघक्रोधहर्षभयत्यागसंपन्नकालवित् ॥ २३ ॥
दृढभक्तिः स्थिरप्रज्ञो नासद्ग्राही न दुर्वचाः ॥ निर्लज्जेद्रिरप्रमत्त व्यसनदोषपरदोषवित् ॥ २४ ॥ ॥

दाने संयमोन्यायेनार्जने तयोः कालज्ञः ॥ २३ ॥ दृढभक्तिः स्वाश्रितेषु दृढस्नेहः स्वनुसरणीयवप्रीष्ट दशरथादिषु दृढानु
रागो वा स्थिरप्रज्ञो कर्त्तव्यार्थे विस्मृतिहीनः नासद्ग्राही अश्लिष्टस्तु महतामपीत्यर्थो लोन ॥ न दुर्वचाः परोद्वेजकवचनरहि
तः निर्लज्जेद्वि निरालस्यः अप्रमत्तः प्राप्तार्थातन वधानरहितः स्वीयानां दोषः स्वदोषः ॥ २५ ॥ २४ ॥ २५ ॥ २४ ॥ यम० ६ ॥

एवं श्रेष्ठगुणैर्युक्तत्वोपदेशेपि दार्ढ्याय सत्यत्वप्रत्यायनाय च पुनरुपदिशति सत्विति। श्रेष्ठैरन्यैरसाधारणैर्गुणैर्यु
क्तः स पार्थिवात्मजो रामः बहिश्चरः प्राण इव प्रजानां गुणतो गुणैः। प्रियो बभूव प्राणत्वेन निरूपणात्प्रजानां रामग
मदाद्यधिकमभितं वस्तु नास्तीति द्योत्यते। १९। वेदमधीत्य स्नायादिति स्मृतेरखिलवेदाध्ययनव्रताचरणानं

स तु श्रेष्ठैर्गुणैर्युक्तः प्रजानां पार्थिवात्मजः॥ बहिश्चर इव प्राणो बभूव गुणतः प्रियः॥१९॥
सम्यग्विद्याव्रतस्नातो यथावत्सांगवेदवित्॥ इष्वस्त्रे च पितुः श्रेष्ठो बभूव भरताग्रजः॥२०॥
कल्याणाभिजनः साधुरदीनः सत्यवागृजुः॥ वृद्धैरभिविनीतश्च द्विजैर्धर्मार्थदर्शिभिः॥२१॥

तरभाविस्नानकर्मयुक्तः यथावत् तत्त्वतः सांगवेदवित् सांगवेदार्थज्ञः इषवो मंत्रहीनाः अस्त्राणि मंत्रपूर्वकाणि इ
षवश्चास्त्राणि च इष्वस्त्रं तस्मिन्नित्यर्थः। २०। कल्याणानामभिजनो जन्मभूमिः साधुः वेदप्रामाण्याभ्युपगंता अदीनः
लोभहेतुसहसेव्य पुरुषं प्रति अकातरतः सत्यवाक् प्रतिकृच्छ्रकार्येष्वपि यथार्थवचननिरतः। ऋजुः सुखाराध्यः अभि

राम०

सं

मृदुः स्वकरोपासनस्थिरचित्तः स्वर्तिकं देवं अंगीकृतापरित्यागी भव्यो दृश्यः प्रश्नसूयकोऽन्यनिष्ठासूयाप्रविषयः
भूतानां प्राणिनां प्रियरूपसत्यवादी ।३२। तेनोक्तगुरूपासनहेतुना कीर्तिः शौर्यादिजा । यशो दानादिजा प्रसिद्धिः
तेजः शौर्यम् ।३३। गांधर्वे संगीतशास्त्रे ।३४। कल्याणानाम् अभिजनो वासस्थानं साधुः । स्वयं परिग्रहकृदुः अदीनः

मृदुश्च स्थिरचित्तश्च सदा भव्योनसूयकः ॥ प्रियवादी च भूतानां सत्यवादी च राघवः ॥३२॥॥
बहुश्रुतानां वृद्धानां ब्राह्मणानामुपासिता ॥ तेनास्येहातुला कीर्तिर्यशस्तेजश्च वर्द्धते ॥ दे
वासुरमनुष्याणां सर्वास्त्रेषु विशारदः ॥३३॥ सम्यग्विद्याव्रतस्नातो यथावत्सांगवेदवित्
गांधर्वे च भुवि श्रेष्ठो बभूव भरताग्रजः ॥३४॥ कल्याणाभिजनः साधुरदीनात्मा महा
मतिः ॥ द्विजैरभिविनीतश्च श्रेष्ठैर्धर्मार्थनैपुणैः ॥३५॥ यदा व्रजति संग्रामं ग्रामार्थे नगर स्या
स्य वा ॥ गत्वा सौमित्रिसहितो नाविजित्य निवर्त्तते ॥३६॥

त्मा दोषहेतावप्यक्षुभितचित्तः यस्य सः । अभिविनीतः शिक्षितः । धर्मार्थयोश्च नैपुणं येषां तैः ।३५। ग्रामे
ति लुप्तषष्ठीकं पृथक्पदम् । ग्रामस्य नगरस्य वार्थे संग्रामे यदा व्रजतीत्यर्थः ।३६। सीताराम सीता राम
१

कुलोचितमतिः इक्ष्वाकुवंशोचितमतिं दयादाक्षिण्यप्रारण्यागतसंरक्षणादिधर्मैकप्रवणा बुद्धिः क्षा
त्रं स्वधर्मं दुष्टनिग्रहपूर्वकप्रजापालनरूपं बहु मन्यते गौरवेण जानातीत्यर्थः ततः क्षात्रधर्मात् सं
जातया कीर्त्या स्वर्गफललाभात्मतया मन्यते जानातीत्यर्थः ॥१६॥ अश्रेयसि अश्रेयस्करे निषिद्धकर्मणि

कुलोचितमतिः क्षात्रं स्वधर्मं बहु मन्यते ॥ मन्यते परया कीर्त्या महत्स्वर्गफलं ततः ॥१६॥ ना
श्रेयसि रतो नित्यं न विरुद्धकथारुचिः ॥ उत्तरोत्तरयुक्तौ च वक्ता वाचस्पतिर्यथा ॥१७॥ अ
रोगस्तरुणो वाग्मी वपुष्मान्देशकालवित् ॥ लोके पुरुषसारज्ञः साधुरेको विनिर्मितः ॥१८

नरतः न सक्तः धर्मविरुद्धकथारुचिर्न वादादिषु बृहस्पतिरिव स्वोक्तनिर्वाहकयुक्तिवक्ता ॥१७॥
अरोग इत्यनेन सत्कर्मानुष्ठानसामर्थ्यं दर्शितं वपुष्मान् विपुलांसत्वादिलक्षणवपुर्विशेषवान्
देशकालवित् धर्माचरणयोग्यदेशकालज्ञः पुरुषसारज्ञः सकृद्दर्शनमात्रेण पुरुषबलज्ञः साधुः
शिष्टः दीनादीन् इति यावत् सर्गमो लोके एक एव ज्ञातः ॥१८॥१८॥१८॥१८॥

नचानृतकथ इति अनृता असत्या कथा प्रबंधकल्पना यस्य तथा न असत्काव्यालापवर्जित इत्यर्थः प्रजाभिः
पेडित यामरा विशेषेणास्वीभिः प्रजाभिरनुरक्तः अनुरागविषयीकृतः नत्वेतुमाह प्रजाश्चाप्यनुरज्यते अनुरं
जयतीत्यर्थः उभयत्राप्यंतर्भावितणयर्थः स्वयं पूर्वं प्रजा रंजयित्वा ततस्ताभिरनुरंजितो भवतीत्यर्थः अनेन परस्प

नचानृतकथो विद्वान् वृद्धानां प्रतिपूजकः॥ अनुरक्तः प्रजाभिश्च प्रजाश्चाप्यनुरज्य
ते॥१४॥ सानुक्रोशो जितक्रोधो ब्राह्मणप्रतिपूजकः॥ दीनानुकंपी धर्मज्ञो नित्यं प्रग्र
हवाञ्छुचिः॥१५॥

रानुरागोदयोक्तिः।१४। अनुक्रोशो दया दुःखितेषु तद्वान्। जितक्रोधो वशीकृतकोपः नत्ववशतयाऽनिमित्तेन क्रो
ध उत्पद्यत इत्यर्थः ब्राह्मणानां प्रत्युद्गम्य पूजको ब्राह्मणप्रतिपूजकः याजकादित्वात्षष्ठीसमासः। दीनानुकंपी
दीनानुकंपया तदभिलषितपूरकः ख्यातो नयेन रुक्षप्रग्रहो दुष्टनिग्रहस्तद्वान् शुचिः परस्वानाकांक्षी यो ऽर्थे शौ
शुचिः स हि शुचिर्नमृद्वारि शुचिः शुचिरिति मनुस्मरणात्।१५॥

अपासमकृतज्ञत्वमाह कथंचिदिति । स्वस्माद्यत्किंचित्फललाभाय कृतेन एकेन सकृत्कृतेनोपकारेण तुष्यति सदा प्रीतिं प्राप्नोति अपकाराणां स्वस्मिन्कृतापराधानां शतमप्यनंतमपि न स्मरति न चिंतयति । उक्तत्वे हेतुमाह आत्मवत्तया दयार्द्रचित्ततः करुणान्वितेनेत्यर्थः ॥११॥ अपासमगुणवृद्धकसत्संगमाह शीलेति ॥ शीलेन सच्चरित्रेण ज्ञानेन वेदार्थज्ञानेन अस्त्राणां योग्या अभ्यासः तस्या अंतरेषु अवकाशेष्वपि एतादृशैः सज्जनैः सह शास्त्ररहस्यं कथय।

कथंचिदुपकारेण कृतेनैकेन तुष्यति ॥ न स्मरत्यपकाराणां शतमप्यात्मवत्तया ॥११॥
शीलवृद्धैर्वयोवृद्धैर्ज्ञानवृद्धैश्च सज्जनैः ॥ कथयन्नास्त वै नित्यमस्त्रयोग्यान्तरेष्वपि ॥१२॥
बुद्धिमान्मधुराभाषी पूर्वभाषी प्रियंवदः ॥ वीर्यवान्न च वीर्येण महता स्वेन विस्मितः ॥१३॥

न्नास्त तिष्ठतीत्यर्थः अन्यदा तु किमुत ॥१२॥ बुद्धिमान् प्रशस्तबुद्धिः कथं सर्वे जनाः सुखं वसेयुरिति एवं सर्वदा लोकरक्षणचिंतापर इत्यर्थः मधुराभाषी मधुरभाषणशीलः पूर्वभाषी आगतान्प्रति प्रथमभाषणेन स्वामि। मस्त्यप्रदर्शक इत्यर्थः प्रियंवदः आवृत्तो मधुरमर्थतः प्रियं भाषत इत्यर्थः परेषामाश्चर्यकारिणापि स्ववीर्येण

न केवलं पितुरेवानन्दकरो मातुरपीत्याह कौशल्येति ॥ अमिततेजसा अपरिच्छिन्नपराक्रमेण पुत्रेण कौश
ल्या शुशुभे वज्रपाणिना प्रार्थितेनेति शेषः । देवानां वरेण वामनेन अदितिरिवेत्यर्थः । च । स्वभावसिद्धगु
णाद्युत्कर्षवत्ति सहीति । रूपोपपन्नः दिव्यसौन्दर्यनिधिः च शब्दः सौशील्यौदार्यसमुच्चयार्थः । वीर्यवान्

कौशल्या शुशुभे तेन पुत्रेणामिततेजसा ॥ यथा वरेण देवानामदितिर्वज्रपाणिना ॥८॥
स हि रूपोपपन्नश्च वीर्यवाननसूयकः ॥ भूमावनुपमः सूनुर्गुणैर्दशरथोपमः ॥९॥ स तु
नित्यं प्रशान्तात्मा मृदुपूर्वं च भाषते ॥ उच्यमानोऽपि परुषं नोत्तरं प्रतिपद्यते ॥१०॥

पराभिभवसमर्थः । असूयागुणेषु दोषाविष्करणात् दूषितः भूमौ अनुपमः उत्कृष्टगुणविषय इति शेषः सूनुः कौ
सल्यायाः इति शेषः दिविलब्धितेरूपं दृष्टोऽसीति भावः गुणैरौदार्यैः गीत चेष्टाभिर्दशरथोपमः दीपादुत्पन्नदीप ॥ पवनतः
तु शब्देन दशरथाद्वैलक्षण्यमच्यते सततमः केनचित्परुषमुच्यमानोऽपि परुषमुत्तरं न प्रतिपद्यते न श्रय त्युक्तिं किं तु नि

प्रशान्तात्मा समदृष्ठः पूर्वक्तं भाषते ॥१०॥

एवं सर्वेषां प्रियत्वाविशेषेपि रामे गुणातिरेककृतप्रीतिविशेषोस्तीत्याह तेषामिति भ्रातॄणां प्राणिनां मध्ये स्वयं
भूर्ब्रह्मेव तेषां पुत्राणां मध्ये गुणवत्तरः ॥ श्रेष्ठ इति शब्देन गुणवान् तादृग्गुणप्रकाशेनिरवधिकतेजस्कोरामः
पितुः रतिकरो निरवधिप्रीतिकरो बभूव ॥ ६ ॥ तत्र हेतुमाह सहीति ॥ उदीर्णस्य दृप्तस्य नैसर्गिकं गर्वेण सर्वजग

तेषामपि महातेजा रामो रतिकरः पितुः ॥ स्वयंभूरिव भूतानां बभूव गुणवत्तरः ॥ ६ ॥ स हि देवै
रुदीर्णस्य रावणस्य वधार्थिभिः ॥ अर्थितो मानुषे लोके जज्ञे विष्णुः सनातनः ॥ ७ ॥

दिनाशयतो रावणस्य वधार्थिभिर्देवैः प्रार्थितो विष्णुर्मानुषे लोके जज्ञे आविर्भूतः यत्र देवा अपि मनु
ष्यगंधमसहमाना योजनादुपरि स्थित्वा हविराददते तेपि यस्य भयात् तकवद्दूलिमुद्रहंति सोस्मिन्मानुषे लोके जा
तः किमिदं सौलभ्यमिति भावः विष्णुर्व्यापकं परात्परं वस्तु सनातनो नित्यः ॥ ७ ॥

महातेजाः सत्पुत्रलाभकृतनिरवधिकतेजस्को राजा दशरथोपि महेंद्रवरुणोपमौ त्वद्विरपायमैत्रीसंपन्नौ
प्रोषितौ देशांतरगतौ तौ निरवधिकप्रीतिविषयौ उभौ भरतशत्रुघ्नौ सुतौ सस्मार सर्वसंपत्समृद्ध्यापि मे पुत्रद्वया
सन्निधानमेव न्यूनतेत्यस्मरदिति भावः ॥ ४ ॥ रामलक्ष्मणयोः सन्निधाने कथमितरपुत्रस्मरणमित्यत आह सर्वे

राजापि तौ महातेजाः सस्मार प्रोषितौ सुतौ ॥ उभौ भरतशत्रुघ्नौ महेंद्रवरुणोपमौ ॥ ४ ॥
सर्व एव तु तस्येष्टाश्चत्वारः पुरुषर्षभाः ॥ स्वशरीराद्विनिर्वृत्ताश्चत्वार इव बाहवः ॥ ५ ॥

इति तु शब्दः शंकाव्यावृत्त्यर्थः चत्वारश्चतुर्धावस्थिताः पुरुषर्षभाः सर्वे अविशेषेणैव तस्य दशरथस्य स्वशरी
राद्विनिर्वृत्ता निष्पन्नाश्चत्वारो बाहव इव इष्टाः प्रिया आसन् ॥ स्वशरीरादित्यस्य तौपमात् लोके कस्यचिच्चतुर्भु
जस्य बाहुषु सत्सु यथा तस्यैकोपि नाप्रियो भवति तथा ॥ ५ ॥

रामभक्तशिरोमणिर्भरतः कथं स्वनाथं विहाय मातुलकुले न्यवसदित्यपेक्षायां भ्रात्रा शत्रुघ्नेन सह संततं रा
ममनुस्मरन्स्थितः इत्याह स तत्रेति ॥ स भरतस्तत्र मातुलगृहे अश्वपतिनाम्ना मातुलेन युधाजिता सत्कारसत्कृ
तः जात्याश्वप्रदानादिसत्कारेणापूजितोपि पुत्रस्नेहेन पुत्रविषयस्नेहतुल्यस्नेहेन लालितः विशिष्टभो
जनाच्छादनाभरणप्रदानादिभिरुपलालितोपि स तत्र भ्रात्रा सदा रामं चिंतमानेन सह स्वनाथं चिंतयन्न्य

स तत्र न्यवसद्भ्रात्रा सह सत्कारसत्कृतः ॥ मातुलेनाश्वपतिना पुत्रस्नेहेन लालितः
॥२॥ तत्रापि निवसंतौ तौ तर्प्यमाणौ च कामतः ॥ भ्रातरौ स्मरतां वीरौ वृद्धं दशरथं नृपम
॥३॥

वसत् न तु मातुलोपलालनमात्रादिति भावः ॥२॥ तत्रापि तादृशसत्कारवत्यपि मातुलगृहे कामतः कामैरभि
मतविषयैस्तर्प्यमाणौ निवसंतौ भ्रातरौ वृद्धं दशरथं नृपं स्मरतां अस्मरतां अडभावश्चार्षः दशरथो वृद्धो
भून्न राज्यभरणेऽसमर्थः समस्तौ अपीदानीं रामे राघवो वा राज्यं कारयेदित्यचिंतयतामिति भावः ॥३॥ राम

॥रामः॥

पायाः श्रीजानक्याः परित्यागवर्णनेन चपलतरत्वं स्पष्टमभिहितम् । अथ तदुत्तरकाण्डे श्रुतिवचनपरिपाल
नमुनिगणसंरक्षणलवणवधादिसंतारणदेवदत्तजनमनजादिप्रवल्लतरसेनापतेर्ग्राममनसुकेदविभीषणादि
संस्थापनसाकेतवासिमोक्षा । निजधामगमनादि सल्ललितचरित्रनिरूपणेन सत्त्वमत्वं निरूप्यते । तत्रा
दौ तद्रूपो ह्यतत यामभरतशत्रुघ्नयोर्मातुलकुलगमनमाहग्राह्यतेत्यादिना । मातुलसमुद्रेण गच्छता भरतेन भ्रा
वि रामविप्रयुक्तप्रजाभरणादूरता भिधानेनतदास्वगमनमुहूर्तो एवेति पारते ज्येष्ठस्यचिन्तम् अहमपि दाशा
रथिमिमम्मात्रनुवर्तनेनाकि मित्येवमघेन विद्यते यस्यसः । नित्यशत्रूणां कामादीनां हन्ता शत्रुघ्नः । शत्रूनति
दुःसाध्यलवणादीन् हन्ति ध्यात्यप्रमितिमाविद्यतिसंधानेन शत्रुघ्न इति वसिष्ठेन कृतनामधेयः । प्रीतिपुर
स्कृतो भरतविषयस्नेहेन पुरस्कृतो भरतेन निष्ठ प्रीत्या च पुरस्कृतो वहुमतो नीतो ननु ज्येष्ठानुवर्तनेन कृतिष्ठेन का
र्यमिति विधिपरतेत्रगतः इत्यर्थः अनेन परस्परानुरागः सूच्यते । १। श्रीसीतारामाभ्यां नमः । सीतासीता

श्रा०
२४

लोके राम एव सत्पुरुषः रिपूणामपि वात्सल्य इत्यर्थः सत्यधर्मो वेदपरायणो परमा गतिर्यस्य सः सत्यधर्मैकनिरत इत्यर्थः किंच धर्मः तत्फलभूतया श्रिया शोभया येन सह साक्षाद्रामाद्विनिर्वृत्तः रामगतो वर्त्तति व्यापित इत्यर्थः ॥२९॥ रामगुणसमुदायस्य जगत्येकत्र वासासंभवादेकैकगुणयोगेन चंद्रादीन्दृष्टांतयति प्रजेति प्र

रामः सत्पुरुषो लोके सत्यधर्मपरायणः ॥ साक्षाद्रामाद्विनिर्वृत्तो धर्मश्चापि श्रिया सह ॥२९
प्रजासुखत्वे चंद्रस्य वसुधायाः क्षमागुणैः ॥ बुद्ध्या बृहस्पतेस्तुल्यो वीर्ये साक्षाच्छचीपतेः ॥३०॥ धर्मज्ञः सत्यसंधश्च शीलवाननसूयकः ॥ दांतः सांत्वयिता श्लक्ष्णः कृतज्ञो विजितेंद्रियः ॥३१॥

जासुखत्वे प्रजानां सुखकरत्वे चंद्रस्य तुल्य इत्यन्वयः ॥३०॥ संधा प्रतिज्ञा अनसूयकोऽन्यविषयासूयारहितः दांतः दमावान् सांत्वयिता कुपितान् दुःखितान्प्रति सांत्ववचनेन दुःखं प्रशमयिता श्लक्ष्णः प्रियवचनशीलः कृतज्ञः स्वल्पमपि कृतमुपकारं बहुतया जानन्नित्यर्थः विजितेंद्रियः विषयचापल्यरहितः ॥३१॥ रामसीतासीताराम

रामः
२४

पुनः संशयं विधाय निश्चिकथ्यमिति मयि धर्मेण पृथिवीमनुशासति सति भवंतो ममात्मजं युवराजं द्रष्टुं कथमिच्छति
२५ तत्र स्तस्यानंतकल्याणगुणौर्वशीकृतास्ते तमेवनाथमिच्छाम इत्याह ते तमूचुरित्यादि हे नृपते पुत्रस्य बहवः क
ल्याणगुणाः संतीति तत्रतु प्रजापालनमेव गुणगणरतिभावः॥२६॥ के ते गुणास्तत्र्याकांक्षायां तान्वक्तुं प्रतिजानीते हे देव गु
णावतः प्रशस्तबहुगुणस्य देवकल्पस्य देवतुल्यस्य धीमतो रामस्य प्रियाञ्श्रवणमपि प्रीतिजनकान् आनंदनान्।

कथं नु मयि धर्मेण पृथिवीमनुशासति॥ भवंतो द्रष्टुमिच्छंति युवराजं ममात्मजम्॥२५॥ ते
तमूचुर्महात्मानं पौरजानपदैः सह॥ बहवो नृप कल्याणा गुणाः पुत्रस्य संति ते॥२६॥ गु
णान्गुणवतो देवदेवकल्पस्य धीमतः॥ प्रियानानंदनान्कृत्स्नान्प्रवक्ष्यामोऽद्य ताञ्छृणु॥२७
दिव्यैर्गुणैः शक्रसमो रामः सत्यपराक्रमः॥ इक्ष्वाकुभ्योपि सर्वेभ्योह्यतिरिक्तो विशांपते॥२८॥

अनिष्टनिवारणपूर्वकेष्टप्रापकत्वेनानंदजनकांतान्सर्वान्कृत्स्नान्गुणान् अद्य प्रथमवक्ष्यमाणावसरे गु
णगणस्य वक्तो निरतिशयानंदमग्नो भविष्यसि किंच चिन्मनःसत्त्वेभ्यः श्रोतव्यमित्यर्थः॥२७॥ दिव्यैरमानुषैर्गु
णैरिंद्रसमः सत्यपराक्रमः। अमोघविक्रमः इक्ष्वाकुवंश्यप्रभवेभ्योतिरिक्तोऽधिकः॥२८॥ रामरामराम

हे पार्थिव त्वमनेकवर्षसाहस्रः सहस्राण्येव साहस्राणि अनेकानि वर्षसाहस्राणि यस्य सः तादृशो वृद्धस्त्वं पार्थिवेषु पृथिवीप्रशासनार्हेषु वरं राजानमभिषिंचस्व युवराजानमिति शेषः मासां न विधेरनित्यत्वात् इजभावः ॥२१॥ महता गजेन शत्रुंजयाख्येन यान्तं गच्छन्तं छत्रेणासाधारणेन वृतं छत्रेणावृताननं रामं द्रष्टुमिच्छामः कृताभिषेकं द्रष्टुं

अनेकवर्षसाहस्रो वृद्धस्त्वमसि पार्थिव ॥ स रामं युवराजानमभिषिंचस्व पार्थिव ॥२१॥
इच्छामो हि महाबाहुं रघुवीरं महाबलम् ॥ गजेन महता यान्तं रामं छत्रावृताननम् ॥२२॥
इति तद्वचनं श्रुत्वा राजा तेषां मनःप्रियम् ॥ अजानन्निव जिज्ञासुरिदं वचनमब्रवीत् ॥२३॥
श्रुत्वैव वचनं यन्मे राघवं पतिमिच्छथ ॥ राजानः संशयोऽयं मे किमिदं ब्रूत तत्त्वतः ॥२४॥

मिति शेषः ॥२२॥ इति पूर्वोक्तप्रकारेण तद्वचनं तेषां पौरादीनां वचनं श्रुत्वा तद्वचनं मन्ये वतेषां मनःप्रियं मनःसंतोषं जानन्नप्यजानन्निव प्रजामरवास्त्वयं जिज्ञासुरिदं वक्ष्यमाणं वचनमब्रवीत् ॥२३॥ हे राजानः मद्वचनं श्रुत्वैव न तु पूर्वापरं पर्यालोच्य रामं पतिं राजानमिच्छथेति यत् अयं मे संशयः संशयप्रकारमाह किमिदमिति इदं राघवाभिषेकप्रार्थनं किंनिमित्तकमिति शेषः इति तत्त्वतो ब्रूत कथयत तत्त्वधीः ॥२४॥

वसिष्ठमंत्रं महामेघं नर्दं ध्वानं दृष्ट्वा वर्हिणः मयूराः इव मुदिताः नृपाः नंदनं प्रयत्नेन प्रशंसापूर्वकमंगीचक्रुः ॥ १७ ॥ ततः स्निग्धः स्नेहाभिव्यंजकः अनुनादः सामंतसंततहर्षजवाक्यप्रतिध्वनिः संजज्ञे सभायामिति शेषः जनौघानामुद्घुष्टेन शब्देन सन्नादः प्रतिध्वनिः विमानं राजस्थानं कंपयन्निव संजज्ञे बहिरिति शेषः ॥ १८ ॥ तस्येत्यादि श्लोकद्वयमेकं वाक्यम् ॥ ब्राह्मणा वसिष्ठाद्याः बलमुख्याः सेनाप्रधानाः राजानः पौरैर्नागरिकैः ॥ जानप

रितिब्रुवंतं मुदिताः प्रत्यनंदन्नृपा नृपम् ॥ वसिष्ठमंत्रं महामेघं नर्दंतं इव बर्हिणः ॥ १७ ॥ स्निग्धोनुनादः संजज्ञे ततो हर्षसमीरितः ॥ जनौघोद्घुष्टसन्नादो विमानं कंपयन्निव ॥ १८ ॥ ततस्तु धर्मविद्वत्तो भावमाज्ञाय सर्वशः ॥ ब्राह्मणा बलमुख्याश्च पौरजानपदैः सह ॥ १९ ॥ समेत्य मंत्रयित्वा तु समतां गतबुद्धयः ॥ ऊचुश्च मनसा ज्ञात्वा वृद्धं दशरथं नृपम् ॥ २० ॥

दैश्च समेत्य संमंत्र्य मंत्रयित्वा युक्तायुक्तं विचार्य धर्मार्थविदः । वार्धके युवराजस्थापनं स्वधर्मः प्रजानामर्थसाधनं चेति ज्ञात्वा तत्तस्य दशरथस्य भावं च न मूलत्वात् सर्वशः सर्वप्रकारेण देशकालेंगितादिभिः ज्ञात्वा समेत्य ज्ञात्वा ॥ १९ ॥ समतां एकरूपतां गताः प्राप्ताः बुद्धयो येषां ते चैकमत्यं प्राप्ताः संतः मनसा च ज्ञात्वा वृद्धे

तस्मिन्सुतेमहींनिवेश्य अनेनरामकर्तृकपरिपालनरूपेणश्रेयसामहीमिमांपरिदृश्यमानसर्वजनोपेतांसंयोज्यगतक्लेशोभविष्यामीतिसंबंधः संयोज्येह मिमांमहीमितिपाठेश्रेयसाप्रशस्ततरेणरामेणमहींसंयोज्येराज्याभिषेकद्वारेणेत्यर्थः एवंसतितस्मिन्सुतेतत्पालनभारंनिवेश्यगतक्लेशोभविष्यामीत्यर्थः ॥ १४ ॥ मेइदंअभिषेकरूपंकार्यंयत्यदिमयासाधुसुमंत्रितंभवतामनुरूपार्थं अनुकूलप्रयोजनसंपादकंचतत्दाभवं

अनेनश्रेयसासद्यःसंयोज्यचमहीमिमाम् ॥ गतक्लेशोभविष्यामिसुतेतस्मिन्निवेश्यवै ॥ १४
यदिदंमेनुरूपार्थंमयासाधुसुमंत्रितम् ॥ भवंतोमेनुमन्यंतांकथंवाकरवाण्यहम् ॥ १५ ॥
यद्यप्येषाममप्रीतिर्हितमन्यद्विचिंत्यताम् ॥ अन्यामध्यस्थचिंतातुविमर्दाभ्यधिकोदयाः ॥ १६ ॥

तोमेममअनुमन्यंतांअनुमतिंप्रयच्छंतुरतोतिरिक्तंवाकथंकेनप्रकारेणकिंवाकरवाणितद्वदंत्विति्शेषः ॥ १५ ॥ एषाराज्याभिषेकविषयचिंताममप्रीतिः प्रियापि यद्यपितथापि अतोन्यद्धितमस्तिचेद्धितंचिंत्यतांयतोमध्यस्थानारागद्वेषहीनानांचिंतातु अन्यास्वजनचिंतापेक्षयाविलक्षणातत्रहेतुर्विमर्दाभ्युदयमाह विमर्दाभ्यधिकोदयेतिविमर्देनपूर्वापरपक्षसंघर्षेणोतहेतुनाअभ्यधिकोदयाअधिकार्थप्रादुर्भाववती ॥ १६ ॥

राज्यार्हस्त्वं पुत्रस्य दर्शीपति ऽनुजात इति अनुरूपः जातः मत्संवर्धितसर्वगुणविशिष्टो जात इत्यर्थः अत्र
अवगुणावत्तर इति पूर्वमुक्त्वा । अनुजातो हि मामित्युक्तिस्तु पौरमुखेन रामस्य सर्वाधिकगुणवत्त्वं वक्तुमिति
ध्येयम् ॥११॥ पुष्येणानक्षत्रेण युक्तं चन्द्रमिव प्रकाशमानं तं रामं यौवराज्ये नियोक्तास्मि नियोक्ष्ये ॥१२॥ स

अनुजातो हि मां सर्वैर्गुणैः श्रेष्ठो ममात्मजः ॥ पुरंदरसमो वीर्ये रामः परपुरंजयः ॥११॥ तं
चंद्रमिव पुष्येण युक्तं धर्मभृतां वरम् ॥ यौवराज्ये नियोक्तास्मि प्रीतः पुरुषपुंगवम् ॥१२॥
अनुरूपः स वो नाथो लक्ष्मीवाँल्लक्ष्मणाग्रजः ॥ त्रैलोक्यमपि नाथेन येन स्यान्ना
थवत्तरम् ॥१३॥

वो युष्माकं नाथो राजा अनुरूपो योग्यः येन राज्ञा न केवलं यूयमेव नाथवन्तो ऽपि तु त्रैलोक्यमपि नाथव
त्तरं एवं प्रभावो राम इति भावः यद्वा स रामो वो युष्माकमनुरूपो नाथः । अनु अनुकूलं रूपं यस्य सः निरुपमसौं
दर्यशालि दिव्यमंगलविग्रह इत्यर्थः । यद्वा अनुगतं रूपं यस्य सो ऽनुरूपः सर्वव्याप्यात्यर्थः ॥ नाथत्वे हेतुर्ल

रा०
११

तत्कृतमपि परिपालनेन मद्नुभवसाद्धिकमित्याह मयेति ॥ पूर्वैरिक्ष्वाकुप्रभृतिभिराचरितं पंथानं सन्मार्गं प्र-
जापालनरूपमनुगच्छता अनुसरता नित्यमनिद्रेणासदा जागरूकेण मया यथाशक्ति सामर्थ्यानुसारेणेति वि-
नयोक्तिः ६ ॥ जरितं संजातजरं कृतम् वर्षसहस्राणि बहूनि वर्षसहस्राणि प्राप्य विश्रांतिं प्रजाचिंतारहित्यरूपविरतीं

मयाप्याचरितं पूर्वैः पंथानमनुगच्छता ॥ प्रजा नित्यमनिद्रेण यथाशक्त्यभिरक्षिताः ॥ ५ ॥
इदं शरीरं कृत्स्नस्य लोकस्य चरता हितम् ॥ पांडुरस्यातपत्रस्य छायायां जरितं मया ॥ ७ ॥ प्राप्य
वर्षसहस्राणि बहून्यायूंषि जीवतः ॥ जीर्णस्यास्य शरीरस्य विश्रांतिमभिरोचये ॥ ८ ॥ राज
प्रभावजुष्टां च दुर्वहामजितेंद्रियैः ॥ परिश्रांतोस्मि लोकस्य गुर्वीं धर्मधुरं वहन् ॥ ९ ॥ सो
हं विश्राममिच्छामि पुत्रं कृत्वा प्रजाहिते ॥ संनिकृष्टानिमान्सर्वाननुमान्य द्विजर्षभान् ॥ १० ॥

८ राजप्रभावजुष्टां राजतेजसा पालितां अजितेंद्रियैर्विषयपरैर्दुर्वहां वोढुमशक्यां गुर्वीं बहुसाधननिर्वाह्यां
लोकस्य धर्मधुरं धर्मस्थापनरूपभारं वहन् अहं परिश्रांतोस्मि ॥ ७ ॥ स एव श्रांतोहं प्रजाहिते प्रजारक्षणविषये पुत्रं
कृत्वा नियुज्य अनुमान्य कृतानुमतिकान्कृत्वा विश्रामं विश्रांतिं निर्वृतिमिच्छामि ॥ १० ॥ रामायणम॰ रामा

रा०
११

 संयाने सम्यग्याने स्वर्गप्रापकक्रियाजातमित्यर्थः ॥ २ ॥ धारणांगतः धैर्यं प्राप्तः कारयामास तत्कर्त्तारत्विग्भिस्त्रिभिः प्रेरयामास सर्वैः

 उद्धृत्य तैलादिवसत्तैलात्तस्मात्तैलपाधिना आपीतवर्णं वदनं यस्य तं स्ववर्णं गौरत्वेप्याभावात्प्रसुप्तमिव स्थितम् ॥ ४ ॥ ५ ॥ व्यवसितं मनो

प्रस्थितो केन मद्दत्तो राजपुत्र महाप्रभः ॥ प्राप्तकालं नरपतेः कुरु संयानमुत्तमम् ॥ २ ॥ वशिष्ठस्य वचः श्रुत्वा भरतो धारणांगतः ॥ प्रेतकृत्यानि सर्वाणि कारयामास धर्मवित् ॥ ३ ॥ उद्धृत्य तैलसंक्लेदात्स तु भूमौ निवेश्य तम् ॥ आपीतवर्णवदनं प्रसुप्तमिव भूमिपम् ॥ ४ ॥ निवेश्य शयने चाग्र्ये नानारत्नपरिष्कृते ॥ ततो दशरथं पुत्रो विललाप सुदुःखितः ॥ ५ ॥ किं ते व्यवसितं राजन्प्रोषिते मय्यनागते ॥ विवास्य रामं धर्मज्ञं लक्ष्मणं च महाबलम् ॥ ६ ॥ क्व यास्यसि महाराज हित्वेमं दुःखितं जनम् ॥ हीनं पुरुषसिंहेन रामेणाक्लिष्टकर्मणा ॥ ७ ॥ योगक्षेमं तु तेऽव्यग्रं कोऽस्मिन्कल्पयिता पुरे ॥ त्वयि प्रयाते स्वस्तात रामे च वनमाश्रिते ॥ ८ ॥

षिते प्रोषिते देशांतरगते । रामेणा

हीनमिमं दुःखितं जनं हित्वा क्व यास्यसीत्यन्वयः ॥ ७ ॥ तेऽव्यग्रं प्रजानां योगक्षेमं त्वयि प्रयाते कः कल्पयिष्यति ॥ ८ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥

दिष्ट्या मार्गेप्सन सह लक्ष्मणेन तव ज्ञातौ । स्कूमल ज्ञातौ सहितः ते श्रात्मा स्वभावः धर्मज्ञे पत्नोनुवर्तनरूप धर्मान्न चलितः ।६२। ६३। शोक
संरोधात शोकनिरोधात तत एव मोहात स्खलितं क्षुभितम ।६४। लालप्यमानस्य भृशं विलपतः विचेतनस्य मूर्च्छितस्य प्र

दिष्ट्या न चलितो धर्मादात्मा ते सहलक्ष्मणोः ॥ वत्स सत्यप्रतिज्ञो हि सत्ती लोकान् वाप्स्यसि ॥६२॥ इ
त्युक्त्वा शोकमातीय भरतं भ्रातृवत्सलम् ॥ परिष्वज्य महाबाहुं रुरोद भृशदुःखिता ॥६३॥ एवं
विलपमानस्य दुःखार्तस्य पुनः पुनः ॥ मोहाच्च शोकसंरोधाद्बभूव स्खलितं मनः ॥६४॥ लालप्य
मानस्य विचेतनस्य प्रणष्टबुद्धेः पतितस्य भूमौ ॥ मुहुर्मुहुर्निश्वसतश्च दीर्घं सा तस्य शोकेन जगाम
रात्रिः ॥६५॥ इत्यार्षे रामायणे अयोध्याकांडे पंचसप्ततितमः सर्गः ॥ ७५ ॥ तमेवं शोकसंतप्तं भरतं
कैकेयीसुतम् ॥ उवाच वदतां श्रेष्ठो वसिष्ठः श्रेष्ठवाग्ऋषिः ॥१॥ सीतारामाभ्यां नमः सीतारामः

नष्टबुद्धेः क्षुभितोन्तःकरणस्य धर्मस्य संशयथा भवति तथा ।६५। इति पंचसप्ततितमः सर्गः ।७५। वसिष्ठः ।१। भरतागमनं श्रुत्वा आगत इ
ति शेषः ।१॥

॥रा० वा० अ०॥२८०॥ भक्त्या शिवविष्ण्वादिदेवताभक्त्या मार्गे तत्तद्योग्यलक्षणैर्वैष्णवादिशास्त्रमाश्रित्य यस्तु तत्त्वतो पुंनेति विवदमाने
षु वास्तविकमेददर्शिषु यत्पापं प्रवृत्तपौर्विवादपश्यतः स्पष्टावतत्त्वस्य कलहप्रियस्यापापं तेन पापेन स युज्येत सर्योऽपि

भक्त्या विवदमानेषु मार्गमाश्रित्य पश्यतः। तस्य पापेन युज्येत यस्यार्योऽनुमते गतः॥ ५८॥ विहीनां पतिपुत्राभ्यां कौसल्यां पार्थिवात्मजः। एवमाश्वासयन्नेव दुःखार्त्तो निपपात ह॥ ५९॥ तथा तु शपथैः कष्टैः शपमानमचेतनम्। भरतं शोकसंतप्तं कौसल्या वाक्यमब्रवीत्॥ ६०॥ मम दुःखमिदं पुत्र भूयः समुपजायते। शपथैः शपमानो हि प्राणानुपरुणत्सि मे॥ ६१॥

भ्रान्तिविस्तरद्वारा भेदं युक्तिनिवेशातः साधयेदुदरव्याधियुक्तो भवति मानवस्तस्मान्न वर्णयति सूर्यः केदशानामप वा ये पुत्री
यो प्रायो वीत्तिवभेदबुद्धेः परिगाराना च्च उपासनायां भेदपरिकल्पनं तं तु भूषणामेव न दूषणाम्॥ ५८। ५९। ६०। भूयः सम्य
धिकं उपरुणत्सि पीडयसे॥ ६१॥

॥रा० २८०॥

परदारान्निषेवतो यस्यापं तत्पापं प्रतिपद्यतां मूढोऽभ्युपाधितिरोगः ॥५३॥ विप्रलुब्धप्रजातस्य स्वन्नाद्यदानेन प्रणाय संतानस्य स्त्रीं दे
षा
दातत्यामृतस्य प्र दाविप्रलब्धमविवर्जिताप्रजाता यस्याजायायेनतस्य ब्राह्मणतास्य स्पर्धः ॥४५॥ ॥५५॥ विहंतुविघ्नयतु वाल

धर्मदारान्परित्यज्य परदारान्निषेवताम् ॥ स्वकधर्मरतिर्मूढो यस्यापोनुमत्तेगतः ॥५३॥ वि
प्रलुब्धप्रजातस्य दुष्कृतं ब्राह्मणस्य तत् ॥ तदेतत्प्रतिपद्यतां यस्यायोनुमत्तेगतः ॥५४॥ पानीय
दूषके पापं तत्पैव विवदापके ॥ यत्तदेकः स लभतां यस्यापोनुमत्तेगतः ॥५५॥ ब्राह्मणाय
द्यतां पूजां विहंतु कलुषेंद्रियः ॥ बालवत्सां च गां दोग्धु यस्यापोनुमतेगतः ॥५६॥ तर्षार्त स
तिपानीये विप्रलंभेन योजयेत् ॥ यस्यापे लभते तत्सा घ स्यायोनुमत्तेगतः ॥५७॥

वत्सां शास्त्रोक्तदोहनाधिकं दोग्धु ॥५६॥ विप्रलंभेन वे चनया योजयन् ॥ प्रप्रपत्त्कोन्मिति यावत ॥५७॥ ॥५७-२०॥

॥रा०वा०रघु०॥४६॥ सतां कीर्त्याः सद्भिः क्रियमाणत्वाद्याय्यायाः भ्रश्यतु तामामुक्तस्पृशः ॥४७॥ शून पैत्रीव शाला घनर्थे ॥४८॥ ४९॥ अर्थिनामाम
॥२७९॥

देवतानां पितॄणां च मातापित्रोस्तथैव च ॥ मा स्म कार्षीत्स शुश्रूषां यस्यार्योऽनुमते गतः ॥४६॥ स
तां लोकात्सतां कीर्त्याः सज्जुष्टात्कर्मणस्तथा ॥ भ्रश्यतु क्षिप्रमद्यैव यस्यार्योऽनुमते गतः ॥४७॥ श
पास्पमातृसशुश्रूषामनर्थे सोऽवतिष्ठताम् ॥ दीर्घबाहुर्महावक्षा यस्यार्योऽनुमते गतः ॥४८॥ बहु
भृत्यो दरिद्रश्च ज्वररोगसमन्वितः ॥ समायात्सततं क्लेशं यस्यार्योऽनुमते गतः ॥४९॥ आशामाशंस
मानानां दीनानामूर्ध्वचक्षुषाम् ॥ अर्थिनां वितथां कुर्याद्यस्यार्योऽनुमते गतः ॥५०॥ मायया रम
तां नित्यं परुषः पिशुनोऽशुचिः ॥ राज्ञो भीतस्त्वधर्मात्मा यस्यार्योऽनुमते गतः ॥५१॥ ऋतुस्नातां स
तीं भार्यामृतुकालानुरोधिनीम् ॥ अतिवर्तेत दुष्टात्मा यस्यार्योऽनुमते गतः ॥५२॥ ५२ ॥ ५२ ॥ ५२

प्रणवितथां कुर्यादिति संबंधः आशां प्रशंसमानानां स्तुवतां ऊर्ध्वचक्षुषां दातृमुखनिरीक्षकाणाम् ॥५०॥ मायया वंचनया राज्ञे
भीतः इति प्रकारेण पिशुनत्वाद्दोषः ॥५१॥ ऋतुकालानुरोधिनीं ऋतुस्नानकालत्वात्तत्संनिहिताम् ॥५२॥ ५२ । ५२ । ५२राम ॥२७९॥

न

लोभ्रूये तिम्नस्य नभरतीयान पुत्रदारादीन लोभाद्विविक्रयः खदव्यतारक्षेदिस्रर्वैः लोभात्तवत्ता मांसानि वर्जनीयानि विक्रयेरति स्म तेः ॥३८॥ समुपोढे प्राप्ते ॥३९॥ चीरं जीर्णं मलिनं वस्त्रं ॥४०॥४१॥ अपात्रवर्षी अपात्रे दाता ॥४२॥ दस्युभिर्विप्रलुप्यंतां

लोह्रसपामधुमांसेन लोहेन च विषेण च ॥ सदैव विप्र पापस्य तस्य पापेऽनुमते गतः ॥३९॥ स्वेन्या
मे समुपोढे तु प्राप्ते दुष्टे भयेऽकेरे ॥ पलायमानो बध्येत तस्य पापेऽनुमते गतः ॥३९॥ कपालपाणिः
पृथिवीमटतां चीरसंवृतः ॥ भिक्षमाणोऽथ चोन्मत्तो यस्य पापेऽनुमते गतः ॥४०॥ मद्योपसक्तोऽभ
वतु स्त्रीष्वक्षेषु च नित्यशः ॥ कामक्रोधाभिभूतश्च यस्य पापेऽनुमते गतः ॥४१॥ मा स्म धर्मे मनो भू
याद्धर्मं स निषेवताम् ॥ अपात्रवर्षी भवतु यस्य पापेऽनुमते गतः ॥४२॥ संचितान्यस्य वित्तानि विवि
धानि सहस्रशः ॥ दस्युभिर्विप्रलुप्यन्तां यस्य पापेऽनुमते गतः ॥४३॥ उभे संध्ये प्रस्वपतु यस्य पापे परि
कल्पितेऽत्र च पापं भवेत्तस्य यस्य पापेऽनुमते गतः ॥४४॥ यद्ग्निदायके पापं गुरुतल्पगे ॥ मित्र
द्रोहे च यत्पापं तत्पापं प्रतिपद्यताम् ॥४५॥

यस्य पापं

।त्यागभोगविहीना निभवंत्विति भावः ॥४३॥ उभे संध्ये व्याप्येति शेषः ॥४॥
४॥४५॥

अस्मिन् यत्किंचिद् दुष्कर्मपापं परेभ्यो न प्रकटयिष्यतीति विश्वासात् मिथः एकांते कथितं किंचित्परिवादं कुत्सचित्स्त्रापत्नादिदोषम् ३२ अकर्त्ता प्रत्युपकारक ती अत एवाकृतज्ञः सज्जने त्यजअज्ञात्मा स्वकृतं परुसः ख्याते एव लोके विदि ख्या

विश्वासात्कथितं किंचित्परिवादं मिथः क्वचित् ॥ विवृणोतु तद्दुष्टात्मा यस्पापैरनुमतो गतः ॥३२॥ अकर्त्ता चाकृतज्ञश्च सज्ञात्मा निरपत्रपः ॥ लोके भवतु विख्यातः स पापैरनुमतो गतः ॥३३॥ प्रवेदौरे ग्रामसे अस्वगृहे परिवारितः ॥ स एकोमृष्टमश्नातु यस्पापैरनुमतो गतः ॥३४॥ अप्राप्य सद्गृहान्दाराननपत्यश्च मीयताम् ॥ धनवाप्य क्रियां धर्म्यां यस्पापैरनुमतो गतः ॥३५॥ मात्मनः संततिं दृष्ट्वा स्त्रीषु दारेषु दुःखितः ॥ आयुःसमसमप्राप्य यस्पापैरनुमतो गतः ॥३६॥ राजस्त्रीबालवृद्धानां वधे यत्पापमुच्यते ॥ भ्रस्तस्यागच्छतु त्वा पातत्पापं प्रतिपद्यताम् ॥३७॥ श्म

भवतु ३३ ३४ प्रमीयतां म्रियतां धर्म्यां क्रियां अग्निहोत्रादि कामनवाप्य म्रियतामित्यन्वयः ३५ दुःखित इत्यस्य भवतिति शेषः अप्राप्येत्यस्य म्रियतामिति शेषः ३६ राजस्त्रीत्यादौ यस्यापदे इत्याद्यनुषंगः ३७ ॥

सत्रयागे तपस्विभ्यो ऽन्त्यविभ्यः प्रतिश्रुत्य प्रतिज्ञापत्तं चापलं पतताम् ॥२६॥ स तां धर्मं प्रपराङ्मुखतया ऽवद्रुम् ॥२७॥ सूक्ष्मार्थं पलो
के साधक रहस्यार्थं वेदान्तादि चिकित्साशास्त्रं नाग्रायनु विस्मरतु ॥२८॥ व्यूढो विशालो वाहुः यं सो ऽपि यस्य तेराज्यस्य प्राप्तिराज्ये स्थातए

तं भृत्यं च तपस्विभ्यः सत्रे वै प्रतदक्षिणाम् ॥ तां विप्रलपतां पापं यस्यापाङ्गेनुमते गतः ॥२६॥ हस्त्यश्व
रथ संवाध्ये युद्धे शास्त्रसमाकुले ॥ मा स्म कार्षीत्स तां धर्मं यस्यापाङ्गेनुमते गतः ॥२७॥ उपदिष्टं सुसू
क्ष्मार्थं सत्येयलेन धीमता ॥ स नाशयतु दुष्टात्मा यस्यापाङ्गेनुमते गतः ॥२८॥ स च तं व्यूढबाहुं स
चंद्रार्कसमतेजसम् ॥ द्रष्टो द्रष्टुमासीनं यस्यापाङ्गेनुमते गतः ॥२९॥ पापसंकृतसंस्कारं स्वगां
व पासो भ्रातु निर्घृणाः ॥ गुरुं भ्रातुःप्य व जानातु यस्यापाङ्गेनुमते गतः ॥३०॥ गवां स्पृशतु पादे
न गुरून्परिवदेच्च सः ॥ मित्रे द्रुह्येत सोऽत्यर्थं यस्यापाङ्गेनुमते गतः ॥३१॥ सीतारामाभ्यां नमः ॥

वसिष्ठासनासीनेरामेममाद्राक्षीत् ता दृष्टारामदर्शनभाग्यरहितो ज्येष्ठानुवर्तनरहितोभवत्विसर्थः ॥२९॥ कृतसंस्कारं तिलमुद्ग
तेऽत्यात्मके छागं छागमां संवत्सराद्यादिनिमित्तं विना ग्रहणातु ॥ स्वभ्रातनजंपापं प्राप्नोतु ॥३०॥ गवामिति गुरूनिति मो
घः परिवदेत अपवदेत मित्रे मित्राय ॥३१॥

स मम यं पि वा वृद्धो वस्त्र स्त्रोत्वा ऽच्छ्यं येषः वस्याप्रप्तति ह निति मस्म संधः सत्यवृत्तिज्ञः सतां श्रेष्ठः मन्मुकुट मणिार्मिमा यो तमोऽयस्यान्
मत्तस्मतिवनेगतः तस्य कृत शास्त्रानुगा गुरु श्रिष्टाेत श्रुति स्मृति मार्गगा वृद्धिर्मीभूत इत्ताधिकान यो भावादर्पं परमः प्राप्यपः
यूतः परं प्रपंचः सामान्येन प्रायश्चकरणं निर्वि प्रोक्तेन सामान्यमितिन्याेन स्वस्मिन्नपि पर्य वस्यती त्यभि प्रायात् २१ प्रद्यप्रे

कृत शास्त्रानुगा वुद्धिर्मीभूत् स्य कदाचन ॥ सत्यसंधः सतां श्रेष्ठो यस्यार्येनुमते गतः ॥२१॥ प्रे
द्यपापीयसां पातुस्तर्ये चरतिमिह तु ॥ हृतु पादेन गां सज्ञो यस्यार्येनुमते गतः ॥२२॥ कार्यपित्वा
महत्कर्म भर्तारं त्वमनर्थकम् ॥ अधर्मस्तस्य सोस्यात्तु यस्यार्येनुमते गतः ॥२३॥ परिपालय
मानस्य राज्ञो भूतानि पुत्रवत् ॥ ततस्तद्दुह्यतो पापं यस्यार्येनुमते गतः ॥२४॥ वलिषड्भागमुद्धृत्य
नृपस्यारक्षतः प्रजाः ॥ अधर्मो यस्य सोस्यात्तु यस्यार्येनुमते गतः ॥२५॥

अभावेपापीयसां अपत्ति प्रायेन पापि
नोऽवृत्तिमेह तु अश्मिमस्वेमूत्रादि करोतु २२ यो भर्तारं स्वं महत्कर्म कारयित्वा अनर्थकं भृति रहितं करोति तस्य भर्तुः योऽध
र्मः सोस्यात्तु २३ परिपालयमानस्य पुत्रवद्भूतानि परिपालयति राज्ञि ते दुह्यतो तस्मै दुह्यतो यत्पापं तत्तस्यास्तु २४ वलिषड्
भागं वलिः करं तत्र दूतं षड्भागमुद्धृत्य आदाय प्रजा अरक्षितु यो ऽधर्मः सोऽस्यात्तु २५ ॥

ग्र च गात वातस्य छ्वत्वेराजसंस्कारादि कृत्वा पश्चान्मांत त्वनयेत्याह कामंवेति तित्त पत्त प्यते तपः करोतीत्यर्थः ॥१५॥ समाचितं व्या
तं निर्यापितं दत्तं ॥१६॥ वतो प्राचीनेस्तू चिना प्रत्तुये वसंभ र्त्सितः केकेयीप क्षत्वधियागाहितो विपयेपित भ्रांतः विपोग खिन्ने

कामं वा स्वयमेवाद्य त्वमानेतुमर्हसि ॥ प्रव्राजितो ऽरुषत्वया घ्रुत्तप्यतेमेतपः स्मृतः ॥१५॥ इदं हित
वविस्तीर्णं धनधान्यसमाचितम् ॥ हस्त्यश्वरथसंपूर्णं राज्यं निर्यापितं त्वया ॥१६॥ इत्यादि
बहुभिर्वाक्यैः क्रूरैः संभर्त्सितो न च ॥ विप्रयोगभरतोतीव वशोतु दैवसूचिना ॥१७॥ पपात च
रैणोतस्मात्तदा संभ्रान्तचेतन ॥ विलप्य बहुधा सेनो ध्वतं जोस्तदा भवत् ॥१८॥ एवं विल
पमानोतेप्राञ्जलिर्भरतः स्थितः ॥ कैकेयीं प्रांज्यापत्य वाचेदं लोके वै भिरावृताम् ॥१९॥ अप्रा
पैक स्मादजानंते गर्हसि मामनकिंचित्विषम् ॥ विप्रलोभेनु मम प्रीतिं स्थिरां जानासि राघवे ॥२०॥

नाश्वासार्थमागतस्य ते पि स्वदेहे तु वचनश्रवणादिति भावः ॥१७॥ असंज्ञइति छेदः ॥१८॥ विलपमानां इदं ते राज्यकामस्या॥
त्यादिभाषमाणाम् ॥१९॥ अजानंते अ त्वस्य वृत्तांतमिति शेषः राघवे पूर्वं स्थितां विप्रलोभं मम प्रीतिं जानास्येव इदानीं तु ततो

गधिकापितवृद्धे रपितेबसंकालेनात

॥२०॥

समेत्य मातृविलपितादृशानसमयेप्यालिंगनकारणात्प्रोचं विप्रोषितां मनस्विनीति ॥ १० ॥ इदं ज्येष्ठासंगुच्छेति च षः राज्यप्राप्तिरूप कामा
ह तं प्राप्तमिति क्रूरेण रामविवासनरूपेण कर्मणा कैकेय्याप्तं सकण्टकं प्राप्तं तत्स्वत्व प्राप्तमिति भावः ॥ ११ ॥ त्वमपि मे पुत्रस्य
नित वराज्येन मे दुःखमपि तु चीरवसनत्वादि वनचारि वनं प्रस्थाप्य राजानं मारितवती कैकेयी तत्र ता दृशा प्रस्थापने कं गुणं

हृष्टैतौ रुदतीं दुःखां त्वमे सा दीर्घमनस्विनी ॥ भरतं स्त्वस्तु वाचेदं कौशल्यामुह्य दुःखिता ॥ १० ॥ इदं तेरा
ज्यकामस्य राज्यं प्राप्तमकंटकम् ॥ संप्राप्तं वत कैकेय्या शीघ्रं क्रूरेण कर्मणा ॥ ११ ॥ प्रस्थाप्य चीरव
सनं पुत्रं मे वनवासिनं ॥ कैकेयी कं गुणं तत्र पश्यति क्रूरदर्शिना ॥ १२ ॥ क्षिप्रं मामपि कैकेयी प्रस्था
पयितुमर्हति ॥ हिरण्यनाभो यत्रास्ते सुतो मे सुमहायशाः ॥ १३ ॥ अथवा स्वयमेवाहं सुमित्रानुच
रा सुखम् ॥ अग्निहोत्रं पुरस्कृत्य प्रस्थास्ये यत्र राघवः ॥ १४ ॥

पश्यति इति न जाने स्थितेतु रामे स एव पितृवाक्यान्नमे वाभिषिच्य रक्षेदतो व्यर्थो यं तत्प्रयास इति भावः ॥ १२ ॥ मामपि प्रस्था
पयितुमर्हति मां प्रतीतस्या दुःखहेतुत्वस्वभावादिति भावः हिरण्यनाभः हिरण्यवर्णनाभियुक्तः इदं मनोधारणात्मलं
क्ष्म रामं ॥ १३ ॥ कैकेयीकृतपापानुवेधिनं तत्राज्ञसंस्कारे ऽग्निकाऽनास्तीति ध्वनयन्नाह अथवेति अग्निहोत्रं पुरस्कृत्य

राज्ञा मदर्थं यो ऽभिषेकः समीहितस्तं चिंतितो भूत्तमभिषेकं न जानामि तत्र हेतुमाह विप्रकृष्टे इति ग्प्रति दूरतरे स्त्यर्थः ॥ ३ ॥ ४ ॥

ग्भिषेकं न जानामि यो ऽभूद्राज्ञा समीहितः ॥ विप्रकृष्टे त्वहं देशे शत्रुघ्नसहितो वसम् ॥ ३ ॥ वन
वासं न जानामि रामस्याहं महात्मनः ॥ वनवासं च सौमित्रेः सीतायाश्च यथाभवत् ॥ ४ ॥ तथैव
क्रोशतस्तस्य भरतस्य महात्मनः ॥ कौशल्या शब्दमाज्ञाय सुमित्रां चेदमब्रवीत् ॥ ५ ॥ आ
गतः क्रूरकामायाः कैकेय्या भरतः सुतः ॥ तमहं द्रष्टुमिच्छामि भरतं दीर्घदर्शिनम् ॥ ६ ॥ ए
वमुक्त्वा सुमित्रां सा विवर्णा मलिनांबरा ॥ प्रतस्थे भरतो यत्र वेपमाना विचेतना ॥ ७ ॥ स तु रामानु
जश्चापि शत्रुघ्नसहितस्तदा ॥ प्रतस्थे भरतो येन कौशल्याया निवेशनं ॥ ८ ॥ ततः शत्रुघ्न
भरतौ कौशल्यां प्रेक्ष्य दुःखितौ ॥ पर्यष्वजेतां दुःखार्त्तां पतितां नष्टचेतनाम् ॥ ९ ॥ सीतारम

तथैव श्रावयेदेव ॥ ५ ॥ दीर्घदर्शिने कमिताः कालांतरभाविफलज्ञानक्षमबुद्धिं भरतमेवत्तं द्रष्टुमिच्छामि ॥ ६ ॥ ७ ॥ चापि भ्यां सुमं
त्रादयः येन मार्गेण कौशल्याया निवेशनं प्राप्यते इति शेषः ॥ ८ ॥ कौशल्यां स्वगृहात्प्रस्थितां ॥ ९ ॥

अवनीं राज्यं विप्रवासितकल्मषः दूरीकृतकलंकः ॥३४॥ इति विलप्य संक्रुद्धः पन्नग इव निःश्वसन् अरण्ये तत्रत्ये वधनिबंधनस्थाने तोमरैरंकुशैश्च विद्धो नाग इव भुवि पपात भरत इति शेषः ॥३५॥ उत्सवक्षये उत्सवान्ते इंद्रध्वज इव ॥३६॥ इति चतुःसप्ततितमः सर्गः ॥७४॥ दीनां स्वमनोऽभिषितभंगात् ॥१॥ अमात्यमध्ये इत्यमिधानाद्रत्तागमनं श्रुत्वा समागता मंत्रिणो भरतम्

अहमप्यवनीं प्राप्ते रामे सत्यपराक्रमे॥ कृतकृत्यो भविष्यामि विप्रवासितकल्मषः॥३४॥ इति नाग इवारण्ये तोमरांकुशचोदितः॥ पपात भुवि संक्रुद्धो निःश्वसन्निव पन्नगः॥३५॥ संरक्तनेत्रः शिथिलांबरस्तथा विधूतसर्वाभरणः परंतपः॥ बभूव भूमौ पतितो नृपात्मजः शचीपतेः केतुरिवोत्सवक्षये॥३६॥ इत्यार्षे श्रीमद्रामायणे अयोध्याकांडे चतुःसप्ततितमः सर्गः॥७४॥ दीर्घकालात्समुत्थाय संज्ञां लब्ध्वा च वीर्यवान्॥ नेत्राभ्यामश्रुपूर्णाभ्यां दीनामुद्वीक्ष्य मातरम्॥१॥ सोऽमात्यमध्ये भरतो जननीमभ्यकुत्सयत्॥ राज्यं न कामये जातु मंत्रये नापि मातरम्॥२॥

पृष्ठीनितरमं ततः प्रविष्टाः इत्यवगम्यते अभ्यकुत्सयत् लोकस्यैव समापिके कैकेयीकृतव्यवहारे परमानिष्ठतारव्यापनायोक्तिरियं वा सर्वलोकस्य क्षेत्रजमर्हं इत्यर्थः अयमपि प्रयोजकत्वानुमंतृत्वाद्यपि स्वस्य पृच्छतं विषये नास्तीति मंत्रिणः प्रत्याययति राज्यमित्यादि मातरं नैव मंत्रये अपि रेवार्थे राज्यमहं रामार्थं न प्रेरयामि यतो राज्यं न कामये॥२॥

यस्याः पुत्रसहस्राणि संति सापि प्रशोचति याकौशल्या त्वमेकेन विना किं न शोचिष्यतीति किंवक्तव्यम्॥२८॥२९ अपचितिं पूजां इमां च
क्ष्यमाणाम्॥३०॥ तामेवाह स्वानादित्वेति॥३१॥ गृध्रकंठैः गाढदकंठैरित्यर्थः॥३२॥ अस्य पापस्य मरणांतिक प्रायश्चित्तं विनानि

यस्याः पुत्रसहस्राणि सापि शोचति कामधुक्॥ किं पुनर्या विनारामं कौशल्या विनशिष्यति॥२८
एक पुत्रा च साध्वी च विवत्सा यात्वया कृता॥ तस्मात्त्वं सततं दुःखं प्रेत्य चेह च लप्स्यसे॥२९॥ अ
हं त्वपचितिं भ्रातुः पितुश्च सकलामिमाम्॥ वर्धनं यशसश्चापि करिष्यामि न संशयः॥३०॥ आ
नाययित्वा तनुतं ज्येष्ठं कौशल्यायां महाद्युतिम्॥ स्वयमेव प्रवेक्ष्यामि वनं मुनिनिषेवितम्॥३१॥ नह्य
हं पापसंकल्पे पापे पापं त्वया कृतम्॥ शक्तो धारयितुं पौरैरश्रुकंठैर्निरीक्षितः॥३२॥ सा त्वमग्निं
प्रविश वा स्वयं वा विश दंडकान्॥ रज्जुं बध्वा यथा वा कंठे न हि तेऽन्यत्परायणम्॥३३॥३३॥३३॥

वर्त्तकांतरं नास्तीत्यभिप्रायेणाह सात्वमिति। कंठे रज्जुं बध्वेत्यस्मिन् पक्षे इति शेषः परायणं गतिः॥३३॥ सीतारामाभ्यां नमः॥

सुरभि

॥रा० वा० ग्र०॥ ॥२७४॥

कर्षकेणात्ताड्यमानौ विश्रमे स्थितौ पुत्रौ च दृष्ट्वा पुत्रौ चामीति संबंधः ॥२३॥ यौ दृष्ट्वाऽहं परितप्ये तौ मम कायात्प्रसूतौ कायप्रसूतत्वं परः परस्मान्नास्ति पुत्रसमः प्रियः इत्यर्थ एतेनोपसंहारः ॥२४॥ यं दृष्ट्वा परमोऽहं परितप्ये इति पुत्रसहस्रैः साक्षात्पुत्रसंतानपूजितैः तां रुदतीं दृष्ट्वा इंद्रो विस्मितः परमाधिकं किमपि न मन्यते ॥२५॥ इह संसारे भूयसीं सा वीतस्य ॥२६॥ सदाऽप्रतिमसर्वो

एतौ दृष्ट्वा कृशौ दीनौ सूर्यरश्मिप्रतापितौ ॥ वध्यमानौ बलीवर्दौ कर्षकेण दुरात्मना ॥२३॥ मम कायात्प्रसूतौ हि दुःखितौ परमपीडितौ ॥ यौ दृष्ट्वा परितप्येऽहं नास्ति पुत्रसमः प्रियः ॥२४॥ यस्याः पुत्रसहस्रैस्तु कृत्स्नं व्याप्तमिदं जगत् ॥ तां दृष्ट्वा रुदतीं शक्रो न सुतान्मन्यते परम् ॥२५॥ इंद्रो ह्यश्रुनिपातं तं स्वगात्रे पुण्यगंधिनम् ॥ सुरभिं मन्यते दृष्ट्वा भूयसीं तामिहेश्वरः ॥२६॥ समप्रतिमवृत्ताया लोकधारणकाम्यया ॥ श्रीमत्या गुणमुख्यायाः स्वभावपरिचेष्टया ॥२७॥ सोतरा

समं वृत्तं चरित्रं यस्याः श्रीमत्याः ऐश्वर्यदानैश्वर्यशालिन्याः गुणमुख्यायाः सत्यसेतुप्रमुख्यगुणावत्याः लोकधारणकाम्यया वृत्ताया इति शेषः स्वभावपरिचेष्टया स्वभावः प्रीतिपरिचेष्टः परिदेवनं यस्याः प्रीतिपरिपूर्णाया इत्यर्थः प्रबध्यते तृतीया ॥२७॥

॥ रा०म० २७४ ॥

१अर्द्धदिवसेदिवसस्यार्द्धं व्याप्य वहनेन भ्रांतौ दृष्ट्वा १६ सुरराजः सुराजस्य अनिलस्थो व्रजटच १७।१८।१९ कुतो निमित्तः किं निमित्तकः

तावदर्धदिवसं भ्रांतौ दृष्ट्वा पुत्रौ महीतले ॥ रुरोद पुत्रशोकेन बाष्पपर्याकुलेक्षणा ॥ १६ अधस्ता
द्व्रजतस्तस्य सुरराजो महात्मनः ॥ बिंदवः पतितागात्रे सूक्ष्माः सुरभिगंधिनः ॥ १७ निरीक्षमाणस्ता
तां प्राक्रोदद्दर्श सुरभिं स्थिताम् ॥ आकाशे विष्ठितां दीनां रुदंतीं भृशदुःखिताम् ॥ १८ तां
दृष्ट्वा शोकसंतप्तां वज्रपाणिर्यशस्विनीम् ॥ इंद्रः प्रांजलिरुद्विग्नः सुरराजोऽब्रवीद्वचः ॥ १९
भयं कच्चिन्न चास्मासु कुतश्चिद्विद्यते महत् ॥ कुतो निमित्तः शोकस्ते ब्रूहि सर्वहिते
षिणि ॥ २० एवमुक्ता तु सुरभिः सुरराजेन धीमता ॥ प्रत्युवाच ततो धीरा वाक्यं वाक्यवि
शारदा ॥ २१ शांतं पापं न वः किंचित्कुतश्चिदमराधिप ॥ अहं तु पुत्रौ शोचामि विषम
स्थितौ ॥ २२

२० २१ वो युष्माकं किंचिदपि भयं कुतोपि हेतोर्नास्ति पापं शांतं प्रथममंगलमागमशंकाहेतुभूतं पापं नास्तीत्यर्थः अहं हे त्वि
त्यादि सार्द्धश्लोकमेकं वो काम २२

॥रा॰ वा॰ अयो॰
॥२७३॥

हे पापनिश्चये विपुक्तां पतिपुत्राभ्यां वियुक्तां कौसल्यां कृत्वा कं लोकं नरकलोकं ॥१२॥ बंधुसंश्रयं बंधूनामाश्रयं कौसल्यायाः आत्मसंभवं औरसं सं
धिराबिंः एवं गुणविशिष्टं किं नावबुध्यसे न जानासि इत्यर्थः ॥१३॥ औरसपुत्रविभक्तो मातुरसह्यतर इति दर्शयितुं अंग गादंगा
त्संभवसि हृदयादभिजायसे आत्मा वै पुत्रनामासीति श्रुत्यर्थं दर्शयति धायाह अंगप्रत्यंगज इति अंगानि करचरणादीनि प्र

कौसल्यां धर्मसंयुक्तां वियुक्तां पापनिश्चये ॥ कृत्वा कं प्राप्स्यसे त्वद्य लोकं निरयगामिनि ॥१२॥
किं नावबुध्यसे क्रूरे नियतं बंधुसंश्रयम् ॥ ज्येष्ठं पितृसमं रामं कौसल्यायात्मसंभवम् ॥१३॥
अंगप्रत्यंगजः पुत्रो हृदयाच्चापि जायते ॥ तस्मात्प्रियतरो मातुः प्रियत्वान्न तु बांधवः ॥१४॥ ए
कदा किल धर्मज्ञा सुरभिः सुरसंमता ॥ वहमानौ ददर्शोर्व्यां पुत्रौ विगतचेतसौ ॥१५॥ सीताराम

त्यंगानि अंगुल्यादीनि तेभ्यो जायते इत्यंगप्रत्यंगजः हृदयाच्चापि जायते प्रधानरागस्थानभूत हृदयप्रदेशाच्चापि जायते त
स्मादौरसत्वात्पुत्रो मातुः प्रियतरः प्रियत्वादेव न बांधवः बंधुभूत दत्तपुत्रादिवन्न भवतीत्यर्थः ॥१४॥ पुत्रार्थे इतिहासमाह
एकदेति कस्मिंश्चित्पूर्वकाले इत्यर्थः सुरभिः कामधेनु पुत्रौ स्वकीयौ वृषभौ न तथा व्यपदिष्टौ वहमानौ हलम ॥१५॥

तदेवाह त्वदिति जीवल्लोके चापरलोके प्रतिपादितः प्रापितः ॥६॥ नतेहमभिभाष्यः मत्संभाषणं त्वया न कार्यमित्यर्थः ॥७॥ त्वमश्वप
तेः कन्या न तत्कुलोचिता कन्या न भवसीत्यर्थः पितुः कुलस्य प्रध्वंसिनी दुश्चरित्रा व्यवस्थापिका ॥९॥ त्रिदिवं गतः गमितः ॥१०॥

त्वत्कृते मे पिता वृत्तो रामश्चारण्यमाश्रितः ॥ अयशो जीवलोके च त्वयाहं प्रतिपादितः ॥६॥ मा
तृरूपे ममामित्रे नृशंसे राज्यकामुके ॥ न तेहमभिभाष्योस्मि दुर्वृत्ते पतिघातिनि ॥७॥ कौसल्या
च सुमित्रा च याश्चान्या मम मातरः ॥ दुःखेन महताविष्टास्त्वां प्राप्य कुलदूषिणीम् ॥८॥ न त्व
मश्वपतेः कन्या धर्मराजस्य धीमतः ॥ राक्षसी तत्र जातासि कुलप्रध्वंसिनी पितुः ॥९॥ यत्त्वया
धार्मिको रामो नित्यं सत्यपरायणः ॥ वनं प्रस्थापितो दुःखात्पिता च त्रिदिवं गतः ॥१०॥ यत्प्रधा
नासि तत्पापं मयि पित्रा विनाकृते ॥ भ्रातृभ्यां च परित्यक्ते सर्वलोकस्य चाप्रिये ॥११॥ ११॥

यत्त्वच्छब्देन पापकर्मोच्यते यत्प्रधाने यस्यास्तासि यत्प्रधाना असि तत्पापकर्मप्रधाना तत्पापं त्वत्कर्मजनितं पापं पित्रा विनाकृते पितृ
रहिते भ्रातृभ्यां च परित्यक्ते ग्रत एव सर्वलोकस्याप्रिये च मयि त्वमुदितिप्रोषः ८ त्वयत्यापं कृतवती तत्पितृभ्रातृवियो
गरूपेण लोके दृश्यते च मयि फलितमिति भावः ॥११॥

एवं सा मान्यत्तोभ्रुदुतप्राणिनि दित्वा पुनस्तदपाधस्मरणेन प्रवृद्धरोषः क्रूरे निंदति नीतेत्यादिना॥१॥ भ्रंशस्व त्याभवनं प्रविशोत
र्धिः मृतं भर्तारमुद्दिश्य रुदती मा भव धर्मत्यागेन भार्यापतिभावस्य नष्टत्वादिति भावः॥ न प्रयातिरं तु स्पष्टमेव॥२॥ अदूषयत्त्व

नीत्वा गामहि पित्वा तु मातरं भरतः स्थितम्॥ रोषेण महता विष्टः पुनरेवाब्रवीद्वचः॥१॥ राज्याद्भ्रंशस्व कैकेयि नृशंसे दुष्टचारिणि॥ परित्यक्ता हि धर्मेण मा मृतं रुदती भव॥२॥ किं नु तेऽदूषयद्राजा रामो वा भृशधार्मिकः॥ ययोर्मृत्युर्विवासश्च त्वत्कृते तुल्यमागतौ॥३॥ भ्रूणहत्यामसि प्राप्ता कुलस्यास्य विनाशनात्॥ कैकेयि नरकं गच्छ मा च भर्तुः सलोकताम्॥४॥ यत्त्वया हीदृशं पापं कृतं घोरेण कर्मणा॥ सर्वलोकप्रियं हित्वा ममाप्यापादितं भयम्॥५॥

सेवेधिकिं गुणादिकमदूषयत् तत्तुल्ये प्राप्ते॥३॥ भ्रूणहत्यां भ्रूणहत्यातुल्यपापं सलोकतां समानलोकत्वम्॥४॥ ईदृशं रामविवास
नभर्तृमरणरूपं घोरेण कर्मणा कर्मणा घोरत्वे सामान्यविशेषपक्षवरदूषपक्षवरद्वयई दृशाविशेषस्यापत्ते सर्वलोकप्रि
यं रामं हित्वा विवास्य भयं त्वद्दोषतो राममातृसज्जे दिति वेरूपम्॥५॥

स्वकुलाचारक्रममभिधाय स्वमातुः कुलाचारक्रममप्याह त्वयेति जनेन्द्राः त्वत्पितृवंश्या राजानोपि कुलपूर्वगाः कुलपूर्वं कुलज्ये
ष्ठं गच्छन्तीति राजत्वेनेति तादृशास्त्वयि हे सुमहाभागे त्वयि त्वयं गर्हितो बुद्धिमोहः कथं संभूतः।२४। सर्वे पातालं बुद्धिमहं नानुवर्तिष्ये

त्वयापि च महाभागे जनेन्द्राः कुलपूर्वगाः॥ बुद्धिमोहः कथमयं संभूतस्त्वयि गर्हितः॥२४॥ न तु का
मं करिष्यामि तवाहं पापनिश्चये। त्वया व्यसनमारब्धं जीवितान्तकरं मम॥२५॥ एष त्विदानीमे
वाहमप्रियार्थं तवानघे॥ निवर्तयिष्यामि वनाद्भ्रातरं स्वजनप्रियम्॥२६॥ निवर्तयित्वा
रामं च तस्याहं दीप्ततेजसः॥ दासभूतो भविष्यामि सुस्थितेनान्तरात्मना॥२७॥ इत्येवमुक्त्वा भर
तो महात्मा प्रियेतरैर्वाक्यगणैस्तुदंस्ताम्॥ शोकार्दितश्चापि ननाद भूयः सिंहो यथा पर्वतग
ह्वरस्थः॥२८॥ इत्यार्षे रामायणे अयोध्याकाण्डे त्रिसप्ततितमः सर्गः॥७३॥ सीतारामाभ्यां नमः

इत्याह न त्विति।२५। न केवलं त्वदिष्टाकरणं किं त्वनिष्टमपि करिष्यामीत्याह एष त्विति तवाप्रियार्थं तवाप्रियसंपादनार्थं।२६। दास
भूतः दासवद्वशगः।२७। प्रियेतरैः दुःखकरैः।२८। इति त्रिसप्ततितमः सर्गः।७३।

॥रा० वा० स्रु० ॥२७१॥

नस्पूर्वेषां विगर्हिता इयं बुद्धिः ज्येष्ठे विद्यमाने कनिष्ठस्याभिषेकबुद्धिः ते कथमुत्पन्ना ॥१९॥ अस्या बुद्धेः पूर्वगर्हितत्वमेव दर्शयति अस्मिन्निति अस्मदीये कुले सर्वेषां ज्येष्ठो नत्वाप्येति कज्येष्ठः अपरे भ्रातरस्तस्मिन् समाहिताः ज्येष्ठाधीनाः प्रवर्तन्ते तेष्वयाचमनुः ज्येष्ठ एव तु [illegible] द्वितीयास्स कलंपेत्र केधते अन्येतमन्त्र जीवेयुर्य थैव पितरं तथेति ॥२०॥ राजधर्मेनावेक्षसे न

उत्पन्ना तु कथं बुद्धिस्तवेयं पापदर्शिनि ॥ साधुचारित्रविभ्रष्टे पूर्वेषां नो विगर्हिता ॥१९॥ अस्मिन्कुले हि पूर्वेषां ज्येष्ठो राज्येभिषिच्यते ॥ अपरे भ्रातरस्तस्मिन्प्रवर्त्तन्ते समाहिताः ॥२०॥ न हि मन्ये नृशंसे त्वं राजधर्ममवेक्षसे ॥ गतिं वा न विजानासि राजवृत्तस्य शाश्वतीम् ॥२१॥ सततं राजपुत्रेषु ज्येष्ठो राजाभिषिच्यते ॥ राज्ञामेतत्समं तत्स्यादिक्ष्वाकूणां विशेषतः ॥२२॥ तेषां [illegible] धर्मैकरक्षाणां कुलचारित्रशोभिनाम् ॥ अत्र चारित्रशौण्डीर्यं त्वां प्राप्य विनिवर्तितम् ॥२३॥

जानासि राजवृत्तस्य राजधर्मस्य शाश्वतीमव्यभिचरितां गतिं फलमपि न जानासीति मन्ये ॥२१॥ सततं सर्वराज्ञां समं यद्राजपुत्रेषु ज्येष्ठस्याभिषेकः इक्ष्वाकूणां तत्र ज्येष्ठाभिषेचने विशेषतः स्यात्संभाव्यते ॥२२॥ धर्मैकरक्षन्तीति तेषां कुलक्रमागतचारित्रेण शोभावतां सच्चारित्रविषयकशौण्डीर्यं गर्वस्तदद्य त्वां प्राप्य विनिवर्तितेत्यन्वयः

...तिवर्तितमिच्छसि ॥२३॥

नकेवलंत्वंममैव राम प्राङ्क्रपेक्ष्यः किंतु पितुरपीत्याह त्वं हीति मेरुः स्वजनितमेरुवनं प्रयात्वरक्षणार्थमाश्रितः ऋश्यपापरैराक्रमणीयः
स्यात् एवं राजा दशरथ आर्षीमिव पुरा राममाश्रितः ॥१५॥ सोहं रामेकेवलः भारं राज्यभारं महाधुर्य्यं समुद्यतं च तं धुरमासाद्य दम्यो
वत्सतर इव केनौजसा केनवलेनवहे प्रत्राम विनेतिप्रोषः ॥१६॥ योगैः उपायैः बुद्धिवलेन महताधारणाघर्षणा युक्ता बुद्धिवले

त्वं हि नित्यं महाराजो बलवन्तं महाबलः ॥ ऋश्यपाश्रितोभूद्गमीत्मामेरुर्मेरुवनं यथा ॥१५॥ सोहं
कयमिमं भारं महाधुर्यसमुद्यतं दम्यो धुरमिवासाद्य वहेयं केन चौजसा ॥१६॥ ऋपि वा मे
भवेच्छक्तिर्योगैर्बुद्धिवलेन वा ॥ सकामां न करिष्यामि त्वामहं पुत्रगर्धिनीम ॥१७॥ न मे विकां
क्षा जायेत त्यक्तुं त्वां पापनिश्चयाम ॥ यदि रामस्य नावेक्षा त्वयि स्यान्मातृवत् सदा ॥१८॥ सीतारम

नय द्यपि भवेत् ऋपि पुत्रगर्धिनीं पुत्रराज्याभिलाषवतीं त्वां सकामां पूर्णकामनां न करिष्यामि ऋन्यथा त्वमिवाहमपि लोके दूषि
तः स्यामिति भावः ॥१७॥ किंच रामस्य त्वयि मातृवत् सदा भक्ति पूर्वमवेक्षा तां यदि न स्यात्तदानीं पापनिश्चयां त्वां त्यक्तुं मे वै कांक्षा राहि
त्यं न जायेत त्यक्तुं कांक्षैव जायेत रामस्य त्वयि मातृवत् प्रतिपत्तिसंभावात्त्वां त्यक्तुं नेच्छामीत्यर्थः ॥१८॥ सीतारामाभ्यां नमः

कांक्षा

॥रा०वा०अ०
॥२७०॥

आर्य्यो रामः गुरुवृत्तज्ञः मातृवृत्तिं जानातीति तादृशः त्वयि स्ववृत्तिं मातृवृत्तिं शुश्रूषां वर्त्तते करोतीत्यर्थः ॥९॥ दीर्घदर्शिनी त्वत्तो दूरका
लभाविज्ञानवती ज्येष्ठा न तु त्वयि धर्मं त्वच्चित्तानुवर्त्तनरूपं धर्मं समास्थाय यथा भगिन्यां वर्त्तते तथा त्वयि वर्त्तते इत्यर्थः ॥१०॥ तस्या
स्तादृशधर्मयुक्तायाः ॥११॥ किं कारणं फलं पश्यसि ॥१२॥ अहं राघवं शक्तिमपि यथा यादृशप्रकारकं लुब्धया त्वया न विदितः इति म

ननु त्वार्य्योऽपि धर्मात्मा त्वयि वृत्तिमनुत्तमाम् ॥ वर्त्तते गुरुवृत्तिज्ञो यथा मातरि वर्त्तते ॥९॥ तव ज्येष्ठा
हि मे माता कौशल्या दीर्घदर्शिनी ॥ त्वयि धर्मं समास्थाय भगिन्यामिव वर्त्तते ॥१०॥ तस्याः पुत्रं
कृतात्मानं चीरवल्कलवाससम् ॥ प्रस्थाप्य वनवासाय कथं पापे न शोचसि ॥११॥ अपापदर्शि
नं शूरं कृतात्मानं यशस्विनम् ॥ प्रव्राज्य चीरवसनं किं नु पश्यसि कारणम् ॥१२॥ लुब्धाया वि
दितो मन्ये न तेऽहं राघवं यथा ॥ तथा ह्यनर्थो राज्यार्थं त्वयानीतो महानयम् ॥१३॥ अहं हि पुरु
षव्याघ्रावपश्यन् रामलक्ष्मणौ ॥ केन शक्तिप्रभावेन राज्यं रक्षितुमुत्सहे ॥१४॥

न्ये तत्र हेतुः तथा हि तत एव राज्यार्थं महानयमनर्थः पित्रा राज्यार्हज्येष्ठवनवासादिरूप आनीतः संपादितः ॥१३॥ राघवं प्रत्यहं यादृ
श इत्युक्तं विवृणोति अहं हीति शक्तिप्रभावेन शक्ष्यामीति शेषेणान्वयः शक्तिरेव मम शक्ष्यतीति प्रायः इति भावः ॥१४॥१४॥ १४॥ राम०२७०॥

दुःखेदुःखकराणां शुशोकाग्न्याराधानं दग्धोऽसि ॥३॥ कालरात्रिः प्रलयकालोपस्थितसर्वसंहारशक्तिः मे पितांगारमालिंग्य नावबुद्धवानस्मे
ति त्वां कोऽनौ मे राजेति संबंधः अस्मिन्कुले सुखत्वं प्रापरिहृतं ॥५॥ वृत्तो मृतः ॥६॥ महाराजः कस्माद्विनाशितः कस्माद्रामः प्रव्राजि

दुःखेमेदुःखमकरोः शोकेशोकारमिवादधाः ॥ राजानंप्रेतभावस्थंकृत्वा रामंचतापसम् ॥३॥ कु
लक्षयत्वममभावायकालरात्रिरिवागता ॥ अंगारमुपगुह्यास्मपितामेनावबुद्धवान् ॥४॥ मस
मापादितोराजात्वयामेपापदर्शिनि ॥ सुखंपरिहृतंमोहात्कुलेऽस्मिन्कुलपांसनि ॥५॥ त्वां
प्राप्यहिपितामेद्यसत्यसंधोमहायशाः ॥ तीव्रदुःखाभिसंतप्तोवृत्तोदशरथोनृपः ॥६॥ वि
नाशितोमहाराजःपितामेधर्मवत्सलः ॥ कस्मात्प्रव्राजितोरामः कस्मादेववनंगतः ॥७॥ कौस
ल्याचसुमित्राचपुत्रशोकाभिपीडिते ॥ दुष्करंयदिजीवेतांप्राप्यत्वांजननींमम ॥८॥ सीताराम

तः खेपैतामहे वैनिवाः त्वमेव कृतमितिभावः ॥७॥ न केवलं पितृभ्रातृपीडा अपि तु मात्रोरपीत्याह कौसल्येत्यादि मम जननीं त्वा
मेवमभ्यप्राप्य यदि जीवेतां तदपि दुष्करं दुर्लभमेव ॥८॥
२ स च कस्माद्वनं गतः

 पुत्रशोकेन परिघूनः विलपन्निस्वर्षिः ॥५१॥ धर्मज्ञ राजनीतिज्ञः ॥५२॥ माशोकं कुर्विति प्रोषः अनामयं निरूप दूवं राज्यं चैतत्वदधी
 नं ॥५३॥ तिकल्पये वेतसंस्कारे सामं ह्रस्य ॥५४॥ इति द्विसप्ततितमः सर्गः ॥७२॥ अथ सर्वानि यमूलत्वं मातुस्तद्वचना देवरीत्वा

तमपश्यन्विप्रं पुत्रे महीपालो महायशाः ॥ पुत्रशोकपरिद्यूनः पंचत्वमुपपेदिवान ॥५१॥ त्वया
त्विदानी धर्मज्ञ राजत्वमवलंब्यताम ॥ त्वत्कृते हि मया सर्वमिदमेवंविधं कृतम ॥५२॥ माशो
कं मा च संतापं धैर्यमाश्रय पुत्रक ॥ त्वदधीना च नगरी राज्यं चैतदनामयम ॥५३॥ तत्पुत्र शी
घ्रं विधिना विधिज्ञैर्वसिष्ठमुखैर्द्विजैः सहितो मुनीन्द्रैः ॥ संकाल्य राजानम दीनसत्वमात्मानमु
र्व्यामभिषेचयस्व ॥५४॥ इत्यार्षे रामायणे वाल्मीकीये अयोध्याकांडे द्विसप्ततितमः सर्गः
७२ ॥ श्रुत्वा च पितरं वृत्तं भ्रातरौ च विवासितौ ॥ भरतो दुःखसंतप्त इदं वचनमब्रवीत ॥१॥ किं तु
कार्यं हतस्येह मम राज्येन शोचतः ॥ विहीनस्याथ पित्रा च भ्रात्रा त्रापितृसमेन च ॥२॥

तामुपालभते ऽक्रुद्धेति विद्धतेम तमित्स्वर्षिः ॥१॥ हतस्य त्वयाऽद्या रद्धःखं प्राप्ति तस्य ॥२॥२॥

कस्यचिद्वैतोरिति श्लोषः स्वपापो निरपराधः ॥४४॥ भ्रूणो गर्भः ॥४५॥ स्त्रीस्वभावेन धर्माधर्महिताहितोचितानुचितविवेकशून्यतारूपेण ॥४६॥

कश्चिन्न ब्राह्मणाद्धनं हृतं रामेण कस्यचित् ॥ कश्चिन्नाढ्यो दरिद्रो वा तेनापापो विहिंसितः ॥४४॥ क
श्चिन्न परदारान्वा राजपुत्रोऽभिमन्यते ॥ कस्माच्चेदं उ कारणे भ्रूणहेव विवासितः ॥४५॥ स्वभा ॥
स्य चपलत्वान्माता तत्कर्म पापात्मकम् ॥ तेनैव स्त्रीस्वभावेन व्याहर्तुमुपचक्रमे ॥४६॥ एवमु ॥
क्ता तु कैकेयी भरतेन महात्मना ॥ उवाच वचनं हृष्टा मूढा पण्डितमानिनी ॥४७॥ न ब्राह्मणाद्ध ॥
नं किंचिद्धृतं रामेण कस्यचित् ॥ कश्चिन्नाढ्यो दरिद्रो वा तेनापापो विहिंसितः ॥ न रामः परदारांश्च
चक्षुर्भ्यामपि पश्यति ॥४८॥ मया तु पुत्र श्रुत्वैव रामस्यैवाभिषेचनम् ॥ याचितस्ते पिता राज्यं रामस्य च
विवासनम् ॥४९॥ स स्ववृत्तिं समास्थाय पिता ते तत्तथाकरोत् ॥ रामस्तु सहसौमित्रिः प्रेषितः सहसीत ॥
या ॥५०॥

४७ ॥ ४८ ॥ रहा राज्ये तमस्याभिषेचनं श्रुत्वा ते राज्यं रामस्य च विवासनं ते पिता याचित इति संबंधः ॥४९॥ स्ववृत्तिं स्वस्य सत्यस्थितिलक्षणां
वृत्तिं तथाकरोत् तुभ्यं राज्यं दत्तवानिति स्पर्धः ॥५०॥

कालधर्मपरिक्षिप्तः मृत्युनाव्याप्तः इमां तु वाचं सिद्धार्था इत्यादि वक्ष्यमाणाम्॥३७॥ द्वितीये तिराजमरणापेक्षया रामवनगमनरूपाप्रियस्य
द्वितीयत्वम्॥३९॥ क्वेदानीं गत इति शेषः समागतो मिलितः॥४०॥ विप्रियं रामविवासनप्रतिपादकं प्रियशंकया एतच्छ्रुत्वा तेन भरतेन

इमां तु पश्चिमां वाचं व्याजहार पिता तव॥ कालधर्मपरिक्षिप्तः पाशैरिव महागजः॥३७॥ सिद्धार्था
स्तु नरा राममागतं सीतया सह॥ लक्ष्मणं च महाबाहुं द्रक्ष्यंति पुनरागतम्॥३८॥ तच्छ्रुत्वा वि
षण्णो देवं द्वितीयाप्रियशंसनात्॥ विषण्णवदनो भूत्वा भूयः पप्रच्छ मातरम्॥३९॥ क्व चेदा
नीं स धर्मात्मा कौसल्यानंदवर्धनः॥ लक्ष्मणेन सह भ्रात्रा सीतया च समागतः॥४०॥ तथा पृ
ष्टा यथान्यायमाख्यातुमुपचक्रमे॥ माता स्य युगपद्वाक्यं विप्रियं प्रियशंकया॥४१॥ स हि
राजसुतः पुत्र चीरवासा महावनम्॥ दंडकान्सह वैदेह्या लक्ष्मणानुचरो गतः॥४२॥ त
च्छ्रुत्वा भरतस्त्रस्तो भ्रातुश्चारित्रशंकया॥ स्वस्य वंशस्य माहात्म्यात्प्रष्टुं समुपचक्रमे॥४३॥

प्रियं भविष्यतीति तर्केण युगपत्तराजमरणास्य कालमेव आख्यातुमुपचक्रमे॥४१॥४२॥ चारित्रशंकया रामस्य धर्मच्युतिशं
कया त्रस्तः स्ववंशस्य महात्म्यं प्रसदाचाराभावपूर्वकसदाचारनिरतत्वेन तस्मात्तासंस्य सप्रष्टुं दंडकारण्यगमनकारणमिति

कालधर्मपरिक्षिप्तः मृत्युना व्याप्तः इमां तु वाचं सिद्धार्था इत्यादि वक्ष्यमाणाम् ॥३७॥ द्वितीयेति राजमरणापेक्षया रामवनगमनरूपाप्रियस्य द्वितीयत्वम् ॥३९॥ क्व चेदानीं गतः इति शेषः समागतो मिलितः ॥४०॥ विप्रियं रामविवासनप्रतिपादकं प्रियशंकया एतच्छ्रुत्वा तेन भरतेन सम्

इमां तु पश्चिमां वाचं व्याजहार पिता तव। कालधर्मपरिक्षिप्तः पाशैरिव महागजः ॥३७॥ निर्याते
तु नगराद्रामे समागते सीतया सह। लक्ष्मणे च महाबाहौ दुष्प्राप्ते पुनरागतम् ॥३८॥ तच्छ्रुत्वा वि-
षण्णो देवं द्वितीयाप्रियशंसनात् ॥ विषण्णवदनो भूत्वा भूयः पप्रच्छ मातरम् ॥३९॥ क्व चेदा-
नीं स धर्मात्मा कौसल्यानंदवर्धनः। लक्ष्मणेन सह भ्रात्रा सीतया च समागतः ॥४०॥ तथा पृ-
ष्टा यथान्यायमाख्यातुमुपचक्रमे। मातास्य सुमहद्वाक्यं विप्रियं प्रियशंकया ॥४१॥ स हि
राजसुतः पुत्र चीरवासा महावनम्। दंडकान्सह वैदेह्या लक्ष्मणानुचरो गतः ॥४२॥ त-
च्छ्रुत्वा भरतस्त्रस्तो भ्रातुश्चारित्रशंकया। स्वस्य वंशस्य माहात्म्यात्प्रष्टुं समुपचक्रमे ॥४३॥

प्रियं भविष्यतीति तत्केकयापुत्रापत्तराजमरणास्मकालमेव आख्यातुमुपचक्रमे ॥४१॥४२॥ चारित्रशंकया रामस्य धर्मच्युतिशं-
कया त्रस्तः स्ववंशस्य महात्म्यं प्रसदाचाराभावपूर्वकसदाचारनिरतत्वं तस्मात्तत्संस्मृत्य प्रष्टुं दंडकारण्यगमनकारणमिति

मत्तप्रमुदितानिम त्तप्रमुदितस्वंगकोकिलादिसंततिताद्यानात्रीण्यवंतीतिचरतिसंयोगेभ्रस्पर्शसंयोगेषुविविधकुसुमस्तावग
हदीर्घिकाक्रीडापर्वतादिप्रकृतसापान्यसंततगुराणवंतिगृहस्थंतमनुकूलानितान्यानितानंदानिपश्यामि २५ यतः स्वत
स्तपर्तौः विक्रोशद्भिरिवद्रुमैरुपलक्षितानि २६ गृह्याणिपिसूर्योदयेपिमत्तानामत्त॰ वसुरक्तोरागपुंकाम घुरोरमराणि

उद्यानानि पुरभ्रांतिमत्तप्रमुदितानि च ॥ जनानां रतिसंयोगे व्याप्तं तद्गुणवंति च ॥ २५ ॥ तान्ये
तान्यद्य पश्यामि निरानंदानि सर्वशः ॥ स्रस्तपर्णैरनुपथं विक्रोशद्भिरिव द्रुमैः ॥ २६ ॥ नाद्या
पि श्रूयते शब्दो मत्तानां मृगपक्षिणाम् ॥ सुरक्तां मधुरां वाणीं कलं व्याहरतां मुहुः ॥ २७ ॥ चंदना
गरुसंपृक्तः धूपसंमूर्छितोऽतुलः ॥ प्रवाति पवनः श्रीमान् किंनु नाद्य यथापुरा ॥ २८ ॥ भेरीमृदं
गवीणानां कोणसंघट्टितः पुनः ॥ किमद्य शब्दो विरतः सदा दीनगतिः पुरा ॥ २९ ॥ सीताराम

पोवाणीं कलं व्यापाभवतीति पाप्नुहुर्व्याहरतां मृगपक्षिणां क्रीडामृगशुकसारिकादीनां मत्तानां शब्दो न श्रूयते २७ चंदनागरु
संपृक्तः चंदनागरुणोर्धूपसंपृक्तः धूपेन संमूर्छितो व्याप्तः श्रीमान् समागतो यः २८ कोणो मेर्यादिवादनदंडः तेन संघट्टितः तदा
घातजनितो यः पुरा सदा प्रदीनागतिरनुभूतः स किंविरतः २९

अनुज्ञातः गुहेनेति शेषः ३ शीघ्रमतिवेगेन ग्रामाणि नगराणि ४ ततः ग्रामनगराणि अतिक्रमणानंतरं तृतीयेहनि श्रृंगिवेरपुरतः प्रति निवृत्तिदिवसात् ५ शून्यामिव शून्यनगरीमिव ६ चिंताप्रकारमाह कच्चिदिति नञ् शब्दो वितर्के ७ त्वरितः प्रविवेश राजाकाम

अनुज्ञातः सुमंत्रोथ योजयित्वा हयोत्तमान् अयोध्यामेव नगरीं प्रययौ गाढदुर्मनाः ३ स वनानि सुगंधीनि सरितश्च सरांसि च पश्यन्नतिययौ शीघ्रं ग्रामाणि नगराणि च ४ ततः सायाह्नसमये तृतीयेहनि सारथिः अयोध्यां समनुप्राप्य निरानंदां ददर्श ह ५ स शून्यामिव निःशब्दां दृष्ट्वा परमदुर्मनाः सुमंत्रश्चिंतयामास शोकवेगसमाहतः ६ कच्चिन्न सगजा साश्वा सजना सजनाधिपा रामसंतापदुःखेन दग्धा शोकाग्निना पुरी ७ इति चिंतापरः सूतो वाजिभिः शीघ्रयायिभिः नगरद्वारमासाद्य त्वरितः प्रविवेश ह ८ सुमंत्रमभिधावंतः शतशोथ सहस्रशः क्व राम इति पृच्छंतः सूतमभ्यद्रवन्नराः ९ तेषां शशंस गंगायामहमापृच्छ्य राघवं अनुज्ञातो निवृत्तोस्मि धार्मिकेन महात्मना १०

वस्यां शाला इति तात्पर्यं त्वरितः प्रविष्टवानित्यर्थः ८ अभ्यद्रवन् सूतसन्मुखमाजग्मुः ९ गंगायां गंगातीरे रामेणानुज्ञातस्तमापृच्छ्य निवृत्तोस्मि ततः परं वनं तेन जानामीति शशंस १०

पुष्पस्तवकपदकरणिवत्तत्सादिवन्निर्वाह्यं जितेंद्रियाः इत्यनेन विहारोऽनाम्य इति सूच्यते ३७ मृगपक्षिजुष्टां तां नदीमासाद्य हृष्टः
३८ इति षट्पंचाशः सर्गः एवं रामस्य चित्रकूटगमनपर्यंतं वृत्तांतं अभिधाय गुहसुमंत्रादिवृत्तांतं महर्षिः प्रस्तौति कथयित्वेति रामे ८।

र्यनेकनानामृगपक्षिसंकुले विचित्रपुष्पस्तवकद्रुमैर्युते ॥ वनोत्तमे व्यालमृगानुनादिते
तदा विजह्रुः सुसुखं जितेंद्रियाः ॥ ३७ ॥ सुरम्यमासाद्य तु चित्रकूटं नदीं च तां माल्यवतीं सु
तीर्थां ननंद हृष्टो मृगपक्षिजुष्टां जहौ च दुःखं पुरविप्रवासात् ॥ ३८ ॥ इत्यार्षे रामायणे अ
योध्याकांडे षट्पंचाशः सर्गः ॥ ५६ ॥ कथयित्वा सुदुःखार्तः सुमंत्रेण चिरं सह । रामे दक्षिणकू
लस्थे जगाम स्वगृहं गुहः १ भरद्वाजाभिगमनं प्रयागे च सहासनम् । आगिरेर्गमनं तेषां तत्रस्थै
रभिलक्षितम् २

दक्षिणकूलस्थे सुमंत्रेण सह दुःखार्तो गुहश्चिरं रामगुणान्कथयित्वा रामम् दृष्टिपथादतिक्रांते तेन सह स्वगृहं
जगाम १ तेषां सीतारामादीनां भरद्वाजसमीपगमनं प्रयागे तेन सहासनं चित्रकूटावधिगमनं च शृंगिवेरपुरस्थैर्गुहप्रेषितैश्चारैरभिलक्षितं सु
मंत्रेण सम्यग्विदितमित्यर्थः गंगोत्तरणात् तृतीयदिवसे भरद्वाजाश्रमात्प्रतिनिवृत्त दूतास्तद्वार्तां कथयामासुः ते दूतेभ्यो ज्ञात्वा तद्दिन एव शृंगिवेरा
त्सुमंत्रः प्रतिनिवृत्त इति ... तिरिति वोध्यं ... वाम स्वनिर्गमदिनाद्दिने षष्ठे धीरात्रे के हा हा लक्ष्मण हा सीते हा रामेति ... इति पाठसंगा।
... दिनद्वयेन शृंगिवेरपुरे श्रीरामागमनं तत्तृतीयदिने गंगोत्तरणं तदादिन त्रयं सुमंत्रस्य तत्र स्थितिः तत्र तृतीयदिवसे मध्याह्ने प्रयाणा

[illegible]

३० एवं गृहाधिष्ठितदेवतापूजां कृत्वा पुनः स्नानपूर्वकं वैश्वदेवादिप्रकारमाह श्लोकद्वयेन वास्तुसंशमनीयानि वास्तुदोषशमनार्थानि गर्भन्यासादीनि मंगलानि मंगलप्रदानि पाठादीनि पापसंशमनं पापशमनसाधनं बलिं चकारेति संबंधः ३१ ३२ वेदिस्थलानां अष्टदिग्वर्तिनां

ऋष्यादेवगणान्सर्वान्विवेशावसथं शुचिः बभूव च मनोल्हादो रामस्यामिततेजसः ३० वैश्वदेवबलिं कृत्वा रौद्रं वैष्णवमेव च वास्तुसंशमनीयानि मंगल्यानि प्रवर्तयन् ३१ जपं च न्यायतः कृत्वा स्नात्वा नद्यां यथाविधि पापसंशमनं रामश्चकार बलिमुत्तमम् ३२ वेदिस्थलविधानानि चैत्यान्यायतनानि च आश्रमस्यानुरूपाणि स्थापयामास राघवः ३३ वन्यैर्माल्यैः फलैर्मूलैः पक्वैर्मांसैर्यथाविधि अद्भिर्जपैश्च वेदोक्तैर्दर्भैश्च ससमित्कुशैः ३४ तौ तर्पयित्वा भूतानि राघवौ सह सीतया तदा विविशतुः शालां सुशुभां शुभलक्षणौ ३५ तां वृक्षपर्णच्छदनां मनोज्ञां यथाप्रदेशं सुकृतां निवाताम् वासाय सर्वे विविशुः समेताः सभां यथा देव[वि]

विधानानि चैत्यं गणपत्याद्यायतनं आयतनानि विष्ण्वादेः आश्रमस्यानुरूपाणि सूक्ष्ममार्गेणोसर्पिः स्थापयामास मंत्रतस्तत्तद्देवतानां तत्तत्र आवस्थानं कल्पयामासेत्यर्थः ३३ ३४ ३५ वृक्षपर्णैः कृतं छदनं आच्छादनं यस्यास्ताम् ३६ रामाय नमः सीतायै नमः

त

पशुवधदोषशंकां वारयति कर्त्तव्य इति यज्ञार्थपशुहिंसायां न दोष इति भावः शास्त्रदृष्टः शास्त्रबोधितः विधिः कर्त्तव्यः धर्मं तदनुकूलं धर्मशास्त्रमनुस्मर एवं देहीत्यर्थः २३ २४ ऐणेयं मांसं श्रपयस्व सौम्य मुहूर्तः दिवसश्चायं ध्रुवसंज्ञकः २५ २६ निष्टप्तं नितरां तप्तं छिन्न

मृगं हत्वानय क्षिप्रं लक्ष्मणेह शुभेक्षण कर्त्तव्यः शास्त्रदृष्टो हि विधिर्धर्ममनुस्मर २३ भ्रातुर्वचनमाज्ञाय लक्ष्मणः परवीरहा चकार च यथोक्तं स तं रामः पुनरब्रवीत् २४ ऐणेयं श्रपयस्वैतत् शालां यक्ष्यामहे वयम् त्वर सौम्य मुहूर्तोयं ध्रुवश्च दिवसो ह्ययम् २५ स लक्ष्मणः कृष्णमृगं हत्वा मेध्यं प्रतापवान् अथ चिक्षेप सौमित्रिः समिद्धे जातवेदसि २६ तं तु पक्वं समाज्ञाय निष्टप्तं छिन्नशोणितम् लक्ष्मणः पुरुषव्याघ्रमथ राघवमब्रवीत् २७ अयं कृष्णः समाप्ताङ्गः श्रितः कृष्णमृगो यथा देवता देवसंकाश यजस्व कुशलो ह्यसि २८ रामः स्नात्वा तु नियतो गुणवाञ्जप्यकोविदः संग्रहेणाकरोत्सर्वान्मन्त्रान्सत्रावसानिकान् २९ रामायः

न्नशोणितं उपरतरुधिरस्यंदं २७ कृष्णः कृष्णमृगः समाप्ताङ्गः सम्पूर्णाङ्गः श्रितः पक्वः कृष्णमृगो यथा पूर्वं वैकल्यदग्धत्वादिरहितः सवर्णोस्मि गरव दृश्यत इत्यर्थः देवता शालाधिदेवताम् २८ गुणवान् कर्मापेक्षितशुद्ध्यादिगुणवान् सत्रावसानिकान् शालासमाप्तिप्रयोजनान् मन्त्रान्

रा॰ २८

आत्मानं सन्निवेशं यथाप्रमुखं कल्पयतः प्रभुः कृतेनोरिहायते स्मिस्तत्का वराणि जं तू शम्ल तीनि गृहनिर्माणाहीणि आनय आवसं कुरुष्व हे लक्ष्मणेति संबंधः १८ १९ २० निष्ठितां ग्रंतर्बहिः काष्ठभित्यासु प्रतिष्ठापितां बद्धकटां बद्धकवाटां वसतिलोपर्णशालां दृष्ट्वा दसःवदः

ततोब्रवीन्महाबाहुर्लक्ष्मणं लक्ष्मणाग्रजः सन्निवेशं यथान्यायमात्मानमस्यपयेत्प्रभुः १८
लक्ष्मणानय दारूणि दृढानि च वराणि च कुरुष्वावसथं सौम्य वासे मेभिरतं मनः १९ त
स्य तद्वचनं श्रुत्वा सौमित्रिर्विविधान्द्रुमान् आजहार ततश्चक्रे पर्णशालामरिंदमः २०
तां निष्ठितां बद्धकटां दृष्ट्वा रामः सुदर्शनाम् शुश्रूषमाणमेकाग्रमिदं वचनमब्रवीत् २१
ऐणेयं मांसमाहृत्य शालां यक्ष्यामहे वयम् कर्तव्यं वास्तुशमनं सौमित्रे चिरजीविभिः २२
द सौ

कटो वर्षावारकोपस्याभित्तिवासः दर्शनीयां शोभनैर्दर्शिनाम् शुश्रूषमाणां परिचर्यां कुर्वंतम् एकाग्रं स्वतः किं वाज्ञापयिष्यंतीति सावधानम् २१ ऐणेयं हरणविकारं शालां शालाधिष्ठातृदेवतां किमर्थं [illegible] मत आह कर्तव्यं वास्तुशमनमिति गृहार्थकेन वास्तुशब्देन गृहाधिष्ठितं शिखिपर्जन्यप्रभृतीनि वेद्यवलिभिः पूजनम् २२
तिपंचचत्वारिंशद्देवता उच्यंते तासां शमनं होमम् १

११ १२ संपन्नसरसोदकं स्वादूदकसहितम् १३ स्वाजीवः सुखेन आजीवो जीवनोपायो ऽस्मिन् १४ अयं वासो भवेत् वासयोग्यो भवेत् १५
वाल्मीकिमभिवादयन् चित्रकूटे स्थित एव वाल्मीकी रामराज्यप्राप्तौ यदा काव्यं करिष्यति तदा तं समागतः इति बालकाण्डकथयो

समभूमितले रम्ये द्रुमैर्बहुभिरावृते पुण्ये रंस्यावहे तात चित्रकूटस्य कानने ११ ततस्तौ
पादचारेण गच्छन्तौ सह सीतया रम्यमासेदतुः शैलं चित्रकूटं मनोरमम् १२ तं तु प
र्वतमासाद्य नानापक्षिगणायुतम् बहुमूलफलं रम्यं संपन्नं सरसोदकम् १३
मनोज्ञोऽयं गिरिः सौम्य नानाद्रुमलतायुतः बहुमूलफलो रम्यः स्वाजीवः प्रतिभाति मे
॥ रा० वा० अ० ॥ अभ्यतीत्य स त्वरः स तु राजगृहं पर्यंते राजमार्गमतीत्य मातामहान्ततः पुरमप्रपत्त ततो मातामह्यादि समागमार्थं तदेतः पुरं श्रीमान्भरत आविवेश ॥ २७ ॥ स भरतमातामहं पु धाजितं मातुलं चामात्ताम हीं मामुलानी चाप छेन शत्रुघ्नेन सहितो ययौ विलम्ब यः ॥ २८

॥ २६१ ॥

अभ्यतीत्य ततो पश्यदेतः पुरमनुत्तमम् ॥ ततस्तत्र भरतः श्रीमानाविवेशानिवारितः ॥ २७ ॥ समात्ता
महमाप चक्षुमातुलं चयुधाजितम् ॥ रथमारुह्य भरतः शत्रुघ्नसहितो ययौ ॥ २८ ॥ रथान्मं
डलचक्रांश्च योजयित्वा परः शतम् ॥ उष्ट्रगोश्वखरैर्भृत्या भरतं यान्तमन्वयुः ॥ २९ ॥ बले
न गुप्तो भरतो महात्मा सहार्यकस्यात्मसमैरमात्यैः ॥ आदाय शत्रुघ्नमपेतशत्रुर्गृहाद्ययौ सि
द्ध इवेन्द्रलोकात् ॥ ३० ॥ इत्यार्षे रामायणे अयोध्याकाण्डे सप्ततितमः सर्गः ॥ ७० ॥ स प्राङ्मुखो
राजगृहादभिनिर्याय वीर्यवान् ॥ ततः सुदामां द्युतिमान्संतीर्यावेक्ष्य तां नदीम् ॥ १ ॥ ॥ ॥ ॥

मंडलाकाराणि चक्राणि येषां तान् रथान् योजयित्वा ॥ २९ ॥ बलेन स्वीयेन मातुलीयेन च आर्यकस्य मातामहस्य ॥ ३० ॥ इति सप्ततितमः सर्गः ॥ ७० ॥ सुदामां तदाख्यां नदीं अवेक्ष्य तां संतीर्य इदं मार्गांतरं चतुरंगबलानामनोचितम् दृत्वा तु शीघ्रं तत्र गरशत्रपेक्षं तारमार्गो

समागच्छत् प्रेमालिंगनादिना संगतोऽभूत् ननु हीनप्रेष्यं हीनसख्यं हीनगेहनि। विवासमित्युपवासकपरिगणितं हीनजातिसख्यं महाकुलप्रसूतस्य रघुराजकुमारस्य कथमुपपद्यते इति चेत्सत्यं न शूद्रा भगवद्भक्ता विप्रा भागवताः [illegible] स्मृताः सर्ववर्णेषु ते शूद्रा ये ह्यभक्ता जनार्दने इति महाभारतोक्तेः सख्यमतिविधु

ततो निषादाधिपतिं दृष्ट्वा दूरादुपस्थितम् सह सौमित्रिणा रामः समागच्छद्गुहेन सः ३५ तमार्तः संपरिष्वज्य गुहो राघवमब्रवीत् यथायोध्या तथेदं ते राम किंकरवाणि ते ईदृशं हि महाबाहो कः प्राप्स्यत्यतिथिं प्रियम् ३६ ततो गुणवदन्नाद्यमुपादाय पृथग्विधम् अर्घ्यं चोपानयत्क्षिप्रं वाक्यं चेदमुवाच ह ३७ स्वागतं ते महाबाहो तवेयमखिला मही वयं प्रेष्या भवान्भर्ता साधु राज्यं प्रशाधि नः ३८

रीतोऽनन्निषादाधिपतिर्नाम भक्तवत्सलस्य भगवतो रामभद्रस्य सख्यमुपपद्यत एव अनुसंहितं च परमर्षिणा गुहेन सहितो रामः संगतो ३५ तमार्तः ध्यत्तव ल्के त्वदधीनेन संततम् इदमस्तु ईदृशवचने कारणमाह ईदृशं हीति ३६ अन्नाद्यं अन्नमोदकादि तदाद्यं भोज्यादि सं ३७ स्वेष्टदेवं श्रीरामं स्वपुरमागतमालोक्य परमानंदनिर्भरो गुहः स्वराज्यमपि सर्वं स्व श्रीरामाय निवेदयति स्वागतमिति नोऽस्माकं राज्यं स्वादिकं च प्रशाधि स्वीकुरु ३८

देवदीनां समात्सलिलेपस्यास्तां अनेन गंगाजलेश्च वाहादन्यत्रानीतमपि सकलपापक्षयपतमर्थमिति ध्वनितं २९ तं गंगातीरे स्थितं इंगुदीवृक्षं हयैर्ययतुः ३० ते अभियाय समीपं गत्वा अवतरत्त् अवातरत् ३१ उपतस्थे सेवार्थं समीपं प्राप्तः ३२ आत्मसमः प्राणसमः निषादजात्यः निषादजातौ समुत्पन्नः बलवान् प्राणतः सेवो

श्रावाढमित्येव राघवम् उक्त्वा तमिंगुदीवृक्षं तत्रोपययतुर्हयैः ३० रामोभिया
यतं रम्यं वृक्षमिक्ष्वाकुनंदनः रथादवतरत्तस्मात्सभार्यः सहलक्ष्मणः ३१ सुमं
त्रोप्यवतीर्याथ मोचयित्वा हयोत्तमान् वृक्षमूलगतं राममुपतस्थे कृतांजलिः ३२
तत्र राजा गुहो नाम रामस्यात्मसमः सखा निषादजात्यो बलवान् स्थपतिश्चेति वि
श्रुतः ३३ स श्रुत्वा पुरुषव्याघ्रं रामं विषयमागतम् वृद्धैः परिवृतोमात्यैर्ज्ञातिभिश्चा
प्युपागतः ३४

तत्र स्थपतिर्निषादाधिपतिः ३३ उपागतः रामसमीपं प्राप्तः विषयं स्वदेशं २४ रा०

भूषणान्याह फलेति द्विजैः पक्षिभिः २३ विष्णुपादस्पर्शिनि ब्रह्माण्डबाह्यजलदेशाद्द्रुतेन लोकाच्च च्युताम् अपापां पा
पैर्वर्ज्जितां रहितां तत्र हेतुः पापनाशिनीं दर्शनमात्रेणेति शेषः शिंशुमारो जलकपिरिति वैजयन्ती नक्रैर्मकरैः २४ साग

भ्रमदामिव यत्नेन भूषितां भूषणोत्तमैः फलपुष्पैः किसलयैर्वृतां गुल्मैर्द्विजैस्तथा २३ वि
ष्णुपादच्युतां दिव्यामपापां पापनाशिनीम् शिंशुमारैश्च नक्रैश्च भुजंगैश्च समन्वितां
२४ शंकरस्य जटाजूटात्तभ्रष्टां सागरतेजसा समुद्रमहिषीं गंगां सारसक्रौंचनादिताम्
२५ आससाद महाबाहुः शृंगिवेरपुरं प्रति २६ तामूर्मिकलिलावर्त्तामन्ववेक्ष्य महा
रथः सुमंत्रमब्रवीत्सूतमिहैवाद्य वसामहे २७ अविदूरादयं नद्या बहुपुष्पप्रवा
लवान् सुमहानिंगुदीवृक्षो वसामोत्रैव सारथे २८ द्रक्ष्यामि सरितां श्रेष्ठां संमान्य
सलिलां शिवाम् देवमानवगंधर्वमृगपन्नगपक्षिणाम् २९ लक्ष्मणश्च सुमंत्र

रतेजसा भगीरथतपसा २५ शृंगिवेरपुरे प्रतिष्ठितामिति शेषः २६ ऊर्मिभिः कलिलाः संपृक्ताः आवर्ता यस्यास्तां गं
गा तीरे अद्य निवसामेति सुमंत्रमब्रवीत् २७ इंगुदी तापसतरुः १८

मन्ववेक्ष्य प्रासादाद्य इह गंगा

स्तिमिता निश्चलाया तो गंभीरा च तां १७ आभोगपुलिनानि विशालानि सैकतानि निर्मलवालुकानि निर्मलसैकतानि इत्यर्थः १८
१९ २० कुड्मलरूपैः कुमुदखण्डैः कुमुदसमूहैरुपशोभिताम् पुष्परजसा ध्वस्तास्ते युक्तां समदामिव मदसहितामिव प्रम

क्वचित्स्तिमितगंभीरो क्वचिद्वेगसमाकुलाम् क्वचिद्गंभीरनिर्घोषां क्वचिन्मन्दैरवनिस्वनाम् १७
देवसंघाप्लुतजलां निर्मलोत्पलसंकुलाम् क्वचिदाभोगपुलिनां क्वचिन्निर्मलवालुकाम् १८
हंससारससंघुष्टां चक्रवाकोपशोभिताम् सदामत्तैश्च विहंगैरभिसन्नादितांतराम् १९ क्वचित्तीररुहैर्वृक्षैर्मालाभिरिव शोभिताम् क्वचित्फुल्लोत्पलच्छन्नां क्वचित्पद्मवनाकुलाम् २० क्वचित्कुमुदखण्डैश्च कुड्मलैरुपशोभिताम् नानापुष्परजोध्वस्तां समदामिव च क्वचित् व्यपेतमलसंघातां मणिनिर्मलदर्शनाम् २१ दिशागजैर्वनगजैर्मत्तैश्च वरवारणैः देवोपवाह्यैश्च मुहुः सन्नादितवनांतराम् २२

दामिवस्थितां व्यपेतो दूरीकृतो मलसंघातः पापसमूहो यया तां युक्तामणिवत्स्वच्छरूपजलां दिशागजाद्यालोडनेपि निर्मलत्वमित्यतिशायो व्यतिरेकालंकारः २१
देवोपवाह्यैः देवानां क्रीडार्थयानभूतैर्वरगजैः २२

तत्रकोसलाद्दक्षिणादेशे त्रिपथगां त्रिभिः पथिभिर्गच्छतीति त्रिपथगा तां स्वर्भूमिपातालगामिनीमित्यर्थः १२ कालेकी
र्त्या कालेशेविता शम्भुप्रीतिहृदाश्रयां तां १३ स तत्र शिवामित्यनेन महत्त्वं निरूपयामास पितृसान्निध्यानां घटिकाः सूचितः तदु
क्तं भारते भुक्त्वा वा यदि वा भुक्त्वा स्नात्वा वा यदि वा दिवा नैव कालनियमः कश्चिद्गङ्गां प्राप्य नरो हरिमिति १४ देवानामाक्रीड:

तत्र त्रिपथगां दिव्यां शीततोयामशैवलां ददर्श राघवो गङ्गां रम्यामृषिनिषेविताम् १२ आश्र
मैरविदूरस्थैः श्रीमद्भिः समलंकृतां कालेऽप्सरोभिर्हृष्टाभिः सेविताम्भोहृदां शिवाम् १३ देव
दानवगंधर्वैः किंनरैरुपशोभिताम् नागगंधर्वपत्नीभिः सेवितां सततं शिवाम् १४ देवाक्री
डशताकीर्णां देवोद्यानयुतां नदीम् देवार्थमाकाशगमां विख्यातां देवपद्मिनीम् १५ जलाघा
ताट्टहासोग्रां फेननिर्मलहासिनीम् क्वचिद्वेणीकृतजलां क्वचिदावर्तशोभिताम् १६

क्रीडापर्वतैर्हिमवति उभयतीरवर्तिभिर्युक्तां देवार्थं देवानां स्नानपानादिप्रयोजनाय देवशर्मिणा आकाशगां देवपद्मि
नीं देवभोग्यपद्मसंवर्ती १५ गङ्गां स्त्रीत्वेन वर्णयति जलेति जलाघातः शिलासु जलपतनं तेन तच्छब्देनाट्टहासेनो
ग्रां अट्टहासेनोग्राम् फेनरूपो निर्मलो हासो मन्दहासस्तद्वतीं वेणीकृतजलां द्विजलसंयोगात् १६

स्नात्वा स्नानोदकनित्तविरहितानां दाराणां दामुखेसायंकाले स्वकीयपात्रपात्रस्य चतुर्विधसंदेशं गता ७ दुस्त्यजामपिराज्यश्रि
पतस्ताभिःकृत्स्नगतवासिनि नियोजयितुं परमऋषिः कोसलानभिवर्णयति तत्र शति ततो रघोनकोसलानस्यवर्तिते तितती
येनान्वयः कदानशीलराजनायेश्रुतान् चैत्योदेवताधिष्ठानवद्दे पूर्यैश्च समावृतान् ८ गोकुलैराकुलतयानि

तथाविलपतां तेषामतप्तानां चराघवः स्वचतुर्विधसंप्रशापाद्यपार्कः राणादामुखे ७ ततो धान्य
धनोपेतान् दानशीलजनानन्शिवान् ग्वकुतश्चिद्भयान् रम्यां श्चैत्ययूपसमावृतान् ८ उ
द्यानाम्रवणोपेतान् संपन्नसलिलाशयान् तुष्टपुष्टजनाकीर्णान् गोकुलाकुलसेविता
न् ९ लक्षणीयान्नरेंद्राणां ब्रह्मघोषाभिनादितान् रथेनपुरुषव्याघ्रः कोसलानत्यव
र्तत १० मध्येनमुदितंस्फीतं रम्योद्यानसमाकुलम् राज्यंभोग्यंनरेंद्राणां ययौ धृतिमतां वरः
११

विउत्तयासेवितान् ९ नरेंद्राणां लक्षणीयान् एकेकशोनगरसदृशत्वेन नरेंद्राणां नरेंद्रैर्लक्षितुं योग्यान्कोसला
न्कोसलदेशस्य ग्रामान त्यवर्तते तिसंबंधः १० नरेंद्राणां मांडलिकानां भोग्यं राज्यं देशं मध्येन मध्यगत्सवलेवे
न ययौ प्राने देशो भागं प्रपन्नागमदित्यर्थः ११ ॥

अथ सर्वभूतानुकंपी रामो निर्गमिनं कालेऽपि श्लाचारपरिभ्रष्टस्तत्र स्वदेशमापृच्छति विप्रालानिति पालवातदंतेगत्वा १
हे पुरि श्रेष्ठे त्वां त्वत्तं वधि देवतानि च आपृच्छे शार्थयामि २ प्रार्थनाप्रकारमेवाह निवर्त्तेति ३ ज्ञानपदंजनेश्वर

विश्रालानकोसलान्रम्या शालावान्त्समपूर्वजैः अयोध्याभिमुखो धीमान्प्रांजलिर्वीक्ष्य बुवी
त् १ आपृच्छे त्वां पुरश्रेष्ठे काकुत्स्थपरिपालिते देवतानि च यानि त्वां पालयंत्यावसंति च २ नि
वृत्तवनवासस्त्वामनृणो जगतीपतेः पुनर्द्रक्ष्यामि मात्रा च पित्रा च सह संगतः ३ ततो रुचि
रताम्राक्षो भुजमुद्यम्य दक्षिणम् अश्रुपूर्णमुखो दीनोऽब्रवीज्जानपदं जनम् ४ अन
क्रोशो दया चैव यथार्हं मयि वः कृतः चिरं दुःखस्य पापीयो गम्यतामर्थसिद्धये ५ तेऽभिवाद्य म
हात्मानं कृत्वा चापि प्रदक्षिणाम् विलपंतो नरा घोरं व्यतिष्ठन्त क्वचित्क्वचित् ६ सीतारामाभ्यां

प्रीनार्थं तत्रागमत् दुःखितं दृष्ट्वा तेषां दुःखनिवारणाय समदुःखितः स्वयमप्यश्रुपूर्णमुखो दीन इवाब्रवीत् दिक्षपयैः
४ अनुक्रोशः आदरः दया कारुण्यं यथार्हं यथायोग्यं मयि वो युष्माभिः कृतः दुःखस्य चिरदीर्घकालाभवः पा
पीयः अशोभनं अतो भवद्भिर्गम्यताम् वयमप्यर्थसिद्धये पित्रनुज्ञातार्थसिद्धये पादुर्भावप्रयोजनसिद्धये इति सरदं

रा०बा०अ०
१८१२

१५ मृगयां किं शोचरिति सत्राह राजर्षीणां वांस्जनपदाः णामिति हि यस्मादस्मिन्लोके राजर्षीणां मृगया वनेऽर्थमस्ति काले यज्ञादिकाले मनुजैः सदाचारपरैर्वृता स्वीकृता चलद्येषु रघुसिद्धार्थमभिकांक्षामि किं चि त्कोद्यामीति संबंधः १६ ननु स्त्रीद्यूतमृगयामद्यवाक्पारुष्योग्रदंडताः अर्थस्य दूषणं चेति राज्ञो व्यसनमस्स कमि

कदाहं पुनरागम्य सरय्वाः पुष्पिते वने ॥ मृगयां पर्यटिष्यामि मात्रा पित्रा च संगतः ॥ १५ ॥ राजर्षीणां हि लोकेस्मिन् रत्यर्थं मृगया वने ॥ काले वृतां तां मनुजे धन्विनामभिकांक्षिताम् ॥ १६ ॥ नात्यर्थमभिकांक्षामि मृगयां सरयूवने ॥ रतिर्ह्येषातुला लोके राजर्षिगणसंमता ॥ १७ ॥ स तं मध्वानमैक्ष्वाकः सूतं मधुरया गिरा ॥ तं तमर्थमभिप्रेत्य ययौ वाक्यमुदीरयन् ॥ १८ ॥ इत्यार्षे रामायणे अयोध्याकांडे एकोनपंचाशः सर्गः ॥ ४९ ॥ सीतारामाभ्यां नमः रामाय ॥

स्युक्तेर्व्यसनानां निषेधान्न तत्कथं तत्राह इच्छेत्युत आह नात्यर्थमिति प्रजाप्याप चिंतादिवैमुख्यापादकतया अत्यंत रतेरेव तस्या निषेधान्न तु सर्वथैव निषेधो स्यत आह एषा रतिः क्रीडा लोके राजर्षिगणसंमता अतो तुला न सर्वथा निषिद्धेत्यर्थः १७ तं तमर्थमभिप्रेत्य विषयीकृत्य मधुरया गिरा सूतं प्रति वाक्यमुदीरयन् सन्ययौ

२८ ... ॥ ४९ ॥ ... सर्गः समाप्तः

रा०म०१८२१

७ प्रजानांपालितानां स्वतघंश्जाविषयेपापरहितंतद्दोषान्वेदमितिपावतरामंश् जारं जनश्रीलं सुवसुतं परित्यक्तुमिहे
र्हतीति संबंधः ८ कौसल्यात् श्रुतिं क्रम्यसयौ ९ शिवां निवारि शिवहेतीम् १० गोयूजानूपां गोयुक्तान्यनूपानि जल
प्रायप्रदेशा यस्याम् ११ स्पंदिकां तदाख्याम् १२ स राम महीं स्फीतां नदीमधीद कोसलदेशामिस्पष्टः राष्ट्रावृतां श्रीवांतर जनपदा

कथ्येनाम महाभागा सीता जनकनंदिनी सदाप्तरविष्वमिरता दुःखान्यनुभविष्यति ७ स्नुषो दशरथो राजा
निःस्नेहः स्वसुते शति प्रजानाम नु रमे परित्यक्तुमिहार्हति ८ स्ता वाचो मनुष्याणां मनाम संवासवा
सिनाम् ९ राघवन्नति यशोवीरः कौसल्यान्कोसलेश्वरः ९ ततो वेदश्रुतिं नाम शिववारिवहां नदी
म् उत्तीर्याभिमुखः प्रायादगस्त्याध्युषितां दिशाम् १० गत्वा तु सुचिरं कालं ततः शीतवहां नदीम् गो
मतीं गोयुतानूपामतरत्सागरंगमाम् ११ गोमतीं चाप्यतिक्रम्य राघवः शीघ्रगैर्हयैः मयूरहंसाभिरु
तामतरत्स्यंदिकां नदीम् १२ स महीं मनुना राज्ञा दत्तामिक्ष्वाकवे पुरा स्फीतां राष्ट्रावृतां रामो वैदेहीम
न्वदर्शयत् १३ सूतरत्येवमाभाष्य सारथिं तमभीक्ष्णशः हंसमत्तस्वरः श्रीमानुवाच पुरुषोत्तमः १४

वृतां वैदेहीमन्वदर्शयदिति संबंधः १३ आभाष्य संबोध्य हंसमत्तस्वरः मत्तहंसस्वरः १४ सीतारामाभ्यां नमः राम

रा०वा०अ०
१२०

अथ रामस्य तां तमाह रामोपीतिषिनैव रात्रिशेषेणानेनान्विहायागतः तेनैव महदंतरं बहुदूरम् १ गच्छतः व्यपायात् निर्गमात् वि
षयांतं कोसलीदेशांतं २ विकृष्टसीमांताः सीमांतायेषुतान् बीजावापार्थसज्जी कृतक्षेत्रानित्यर्थः शनैरिव शीघ्रं ययौरमणीय
देशीदिदर्शनपारवश्यादति शीघ्रमपिगमनं शनैरिवप्रतिभादित्यर्थः ३ ग्रामाः महाग्रामाः संवासाः स्वल्पग्रामाः तेषुवासि

रामोपिरात्रिशेषेण तेनैव महदंतरम् जगाम पुरुषव्याघ्रः पितुराज्ञामनुस्मरन् १ तथैवाक्र
तस्य व्यपायाद्रजनी शिवा उपास्य स शिवां संध्यां विषयांतं व्यगाहत २ ग्रामान्विकृष्टसीमांता
न्पुष्पितानि वनानि च ४ पश्यन्नतिययौ शीघ्रं शनैरिव हयोत्तमैः ३ शृण्वन्वाचो मनुष्याणां
ग्रामसंवासवासिनाम् विगर्हतां हि कैकेयीं क्रूरां क्रूरतरा कर्मरता राजानं धिक् दशरथं कामस्य
वशमास्थितम् ४ हा नृशंसाद्य कैकेयी पापा पापानुबंधिनी तीक्ष्णा संभिन्नमर्यादा तीक्ष्णा
कर्मणि वर्तते ५ या पुत्रमीदृशं राज्ञः प्रवासयति धार्मिकम् वनवासे महाप्राज्ञं सानुक्रोशं जितेंद्रि
यम् ६

नां मनुष्याणां वाचः शृण्वन्नतिययाविति पूर्वेणासंबंधः ताः वाचश्चाह राजानं धिगित्यादि वशमास्थितं प्राप्तं ४ पापा
पापकर्मा रध्व शतिरापापानुबंधिनी पापकर्म निरता तीक्ष्णा क्रूरा संभिन्नमर्यादा त्यक्तमर्यादा ५ ईदृशं कस्याराज्ञः

राम०१२०

अयोध्याकांडे

मातामहस्तत्कारमुक्त्वा मातुलस्तत्कारमाह ऐरावतानित्यादिना ऐरावतान् ऐरावतकुलोद्भवान् ऐन्द्रशिरान् ऐरावता
जोत्पत्तिहेतुभूतं इन्द्रशिरनामकदेशोद्भवान् । नागान् गजान् ॥२२॥ अन्तःपुरे अतिसंवृद्धान् पालनेन वर्द्धितान् ॥२३॥ २४ ॥ २५ ॥ सस्व

ऐरावतानैन्द्रशिरान् नागान् वै प्रियदर्शनान् ॥ खरान् शीघ्रान् सुसंयुक्तान् मातुलोऽस्मै धनं ददौ ॥२२
अन्तःपुरेऽतिसंवृद्धान् व्याघ्रवीर्यबलान्वितान् ॥ दंष्ट्रायुधान् महाकायान् शुनश्चोपायनं ददौ ॥२
३॥ स दत्तं केकयेन्द्रेण धनं तन्नाभ्यनन्दत ॥ भरतः कैकयीपुत्रो गमनत्वरया तदा ॥२४॥ बभूव ह्य
स्य हृदये चिन्ता सुमहती तदा ॥ त्वरया चापि दूतानां स्वप्नस्यापि च दर्शनात् ॥२५॥ स स्ववेश्माभ्यतिक्र
म्य नरनागाश्वसंकुलम् ॥ प्रपेदे सुमहच्छ्रीमान् राजमार्गमनुत्तमम् ॥२६॥ सीतारामाभ्यां नमः

वेश्माभ्यतिक्रम्येत्यनेन स्ववेश्मप्रवेशोऽर्थसिद्धः तथा च स भरतः मातामहादिभ्यो लब्धधनः सात्रापरिकरसन्नह
नाय स्ववेश्म प्रविष्टस्तत्र गमनसंविधानं कृत्वा ततोऽभ्यतिक्रम्य निर्गत्य नरादिसंकुलं राजमार्गं प्रपेदे सुमहती श्रीः
सुमहत् श्रीः तद्वान् ॥२६॥

म. सोरिव मयागमेम त्युहेतुकम प्रागमइवेत्यर्थः ३२ विलपंतीनां दुःखं दृष्ट्वेति शेषः रविरस्तं जगामेत्यत्र हेतूपदुःखदर्शनासहिष्णु तया शीघ्रगतिरभूदित्याशयः ३३ नष्टोऽज्वलनानां हेतापो होमाद्यर्थमग्नौ धोयस्यां सा प्रशांतान्यध्ययनानि सत्कथाः प

इत्येवं विलपंतीनां स्त्रीणां वेश्मसु राघवम् जगामास्तं दिनकरो रजनी चाभ्यवर्तत ३३ नष्टज्वलनसंताप प्रशांताध्यायसत्कथा तिमिरेणानुलिप्तेव तदा सा नगरी बभौ ३४ उपशांतवणिक्पण्या नष्टहर्षा निराश्रया अयोध्या नगरी चासीन्नष्टतारमिवांबरम् ३५ तथा स्त्रियो राम निमित्तमातुरा यथा सुते भ्रातरि वा विवासिते विलप्य दीना रुरुदुर्विचेतसः सुतैर्हि तासामधिको हि सोऽभवत् ३६ प्रशांतगीतोत्सवनृत्यवादना व्यपास्तहर्षा पिहितापणोदया तदा ह्ययोध्या नगरी बभूव सा महार्णवः संक्षपितोदको यथा ३७ ॥ इत्यार्षे रामायणे इत्यष्टचत्वारिंशः सर्गः ॥ ४८

प्रशांताध्ययनाः सत्कथाः यस्यां सा ३४ उपशां
तानि वणिजां पण्यानि यस्यां सा पण्यकल्पना प्रवृत्त्येत्यर्थः रामाश्रयरहितत्वान्निराश्रया ३५ तासां सुतेभ्यः [illegible]ः स रामोऽधिको भवत् अतो राम निमित्ते रुरुदुरिति संबंधः ३६ वादनं वादित्रं प्रशांतानि गीतोत्सवनृत्यवादनानि यस्यां सा पिहितं व्यापणानां पण्य वस्तूनामुदयः प्रसारणं यस्यां सा संक्षपितोदकः क्षीणोदको यथा ३७ इत्यष्टाचत्वारिंशः सर्गः ४८।

रा०वा०अ०
१८९

थनालंबं अ्थय्कतेतत्तुहेतुरनायकमिति कैकेय्याः कृते कैकेयीनिमित्तं विलोपो नाशः २६ तेयूयंपुरुषाः सद्यः क्षीणकाश इति शेषः विष
मालोड्य विषं पेषयित्वा अश्रुतिं वापि गच्छत नविद्यते श्रुतिः कैकेय्या नामश्रवणं यस्मिन्देशे तं देशं गच्छतेत्यर्थः २७ मि

उपद्रुतमिदं सर्वमनालंबमनायकं कैकेय्यास्तु कृते सर्वं विनाशमुपयास्यति २५ नहि प्रव्रजिते रामे
जीविष्यति महीपतिः मृते दशरथे व्यक्तं विलोपस्तदनन्तरं २६ ते विषं पिबतालोड्य क्षीणपुण्याः
सुदुःखिताः राघवं वानुगच्छध्वमश्रुतिं वापि गच्छत २७ मिथ्याप्रव्राजितो रामः सभार्यः सहलक्ष्
मणः भरते संनिबद्धाः स्मः सौनिके पशवो यथा २८ पूर्णचंद्राननः श्यामो गूढजत्रुररिंदमः
आजानुबाहुः पद्माक्षो रामो लक्ष्मणपूर्वजः २९ पूर्वाभिभाषी मधुरः सत्यवादी महाबलः सौ
म्यश्च सर्वलोकस्य चंद्रवत्प्रियदर्शनः ३० तास्तथा विलपंतस्तु नगरे नागरस्त्रियः चुक्रुशुर्दुःख
संतप्ता मृत्योरिव भयागमे ३१

मिथ्याप्रव्राजितमिथ्यावरकल्पनया प्रव्राजितोऽभूत् ततः कैकेयीवशगे भरते राजनि सति
सौनिके पशुमारकसमीपे पशवो यथा निश्चितमरणाः स्थितिं कृतितथासन्निविष्टाः स्मः भवामः २८ इदानीं तद्गुणकीर्तनेनात्मा
नमध्यर्थयति पूर्णेत्यादि २९ पूर्वाभिभाषी सोहार्दप्रदर्शनाय पूर्वभाषणशीलः ३० ३१ रा०स०१९८

४ नूनं पुरुषशार्दूलो मत्तमातंगविक्रमः शोभयिष्यत्यरण्यानि वि
चरन्स महारथः ३१

वयं त्रिपः पूर्वपुरुषाः १८ अप्राप्तदुःखस्य प्राप्तिर्योगः प्राप्तस्य रक्षणं क्षेमः १९ अप्रतीतेन अप्रसन्नेन शोकसमर्पणासोत्कंठातत्संप्रि तजनसंसक्तेन अतएवामनोज्ञेन उद्वेगकारिणा हृत्तचेतसा चित्तनाशकेन वासेन कोनु संप्रियेत न कोपि तत्स्पादं वा सहत्या

वयंपरिचरिष्यामः सीतांपूर्वंचराघवम् इतिपौरस्त्रियोभर्तॄन्दुःखार्तास्तत्तदब्रुवन् १८ युष्माकं राघवोरण्येयोगक्षेमंविधास्यति सीतानारीजनस्यास्य योगक्षेमंकरिष्यति १९ कोन्वनेनाप्रतीतेनसोत्कंठितजनेनच संप्रियेतामनोज्ञेनवासेनहृतचेतसा २० कैकेय्यायदिचेद्राज्यंस्यादधर्म्यमनाथवत् नहिनोजीवितेनार्थः कुतःपुत्रैःकुतोधनैः २१ ययापुत्रश्चभर्ताचत्यक्तावैश्वर्यकारणात् कंसापरिहरेदन्यंकैकेयीकुलपांसनी २२ कैकेय्यानवयंराज्येभृतकाहिवसेमहि जीवंत्याजातुजीवंत्यःपुत्रैरपिशपामहे २३ यापुत्रंपार्थिवेंद्रस्यप्रवासयतिनिर्घृणा कस्तांप्राप्यसुखंजीवेदधर्म्यांदुष्टचारिणीम् २४

ज्य इति भावः २० पारिचरिति समुदायोपदर्शि कैकेय्याराज्येयदि अधर्म्यं अधर्मयुक्तं अनाथवत् नाथरहितंस्यात् तस्मिन्राज्येनः अस्माकं जीवितेनाप्यर्थो नास्ति पुत्रादिभिः किमुत तर्हि नेत्यर्थः २१ परिहरेत् त्यागात् परिहरेत् सर्वानपि परित्यजेदित्यर्थः २२ जीवंत्याः कैकेय्या राज्ये तस्याः भृत्यभूताः जीवंतः सत्यो न हि वसेमहि न वसेम ममपुत्रैरपि शपामहे २३ अधर्म्यां अ

९२

रा०बा०स्वा०
१८९

स्यनालंबमत्र एतेतत्र हेतुरनायकमिति कैकेय्याः कृते कैकेयीनिमित्ते विलोपो नाशः २६ तेयूयं पुरुषाः सद्यःक्षीणाः शतिशेषः विषमालोड्य विषं घोषयित्वा अश्रुतिं वापि गच्छतन विद्यते श्रुतिः कैकेय्या नाम यत्र ताद्दशं स्थानं गच्छत तेऽप्यर्थः २७ मि

उपद्रुतमिदं सर्वमनालंबमनायकम् कैकेय्यास्तु कृते सर्वं विना रामं भविष्यति २५ नहि प्रव्रजिते रामे जीविष्यति महीपतिः मृते दशरथे व्यक्तं विलोपस्तदनंतरं २६ ते विषं पिबतालोड्य क्षीणपुण्याः सुदुःखिताः राघवं वानुगच्छध्वम श्रुतिं वापि गच्छत २७ मिथ्या प्रव्राजितो रामः सभार्यः सहलक्ष्मणः भरते संनिविष्टाः स्मः सौनिके पशवो यथा २८ पूर्णचंद्राननः श्यामो गूढजत्रुररिंदमः आजानुबाहुः पद्माक्षो रामो लक्ष्मणपूर्वजः २९ पूर्वाभिभाषी मधुरः सत्यवादी महाबलः सौम्यश्च सर्वलोकस्य चंद्रवत्प्रियदर्शनः ३० तास्तथा विलपंत्यस्तु नगरे नागरस्त्रियः चुक्रुशुर्दुःखसंतप्ता मृत्योरिव भयागमे ३१

मिथ्या प्रव्राजितमिथ्या वरकल्पनया प्रव्राजितो ऽभूत् ततः कैकेयीवशगे भरते राजनि सति सौनिके पशुमारकसमीपे पशवो यथा निश्चितमरणाः स्थिता इति तथा संनिविष्टाः स्मः भवामः २८ इदानीं तद्गुणकीर्तनेनात्मानमप्यये पतिपूर्णस्यादि २९ पूर्वाभिभाषी सौहार्दप्रदर्शनाय पूर्वभाषणशीलः ३० ३१

रा०स०१८९

४ नूनं पुरुषशार्दूलो मत्तमातंगविक्रमः शोभयिष्यत्यरण्यानि विचरन्स महारथः ३१

तदेव दर्शयंतिविचित्रेत्यादि विचित्रैः कुसुमैः आपीडः शिरोभूषणामेषां तेव द्वा मंजरीः पुष्पस्तवकान् धर्तुं शीलं येषां छंदसोहृस्वः नगाः वृक्षाः रामे परमात्मानं मत्वा स्वतिरस्कारकं कारकरूपमंत्रोच्चारपूर्वकं स्वशाकोटेई तपुष्पांजलिभी राघवम
र्चिष्यंतीतिभावः १२ गिरयोदर्शयिष्यंतिस्वनिष्ठवस्तूनीति शेषः १३ १४ पादद्वयारमयिष्यंति स्वमूलाकीर्णमाताप[...]व

विचित्रकुसुमापीडा बहुमंजरीधारिणाः राघवं दर्शयिष्यंतिनगाभ्रमरशालिनः १२ अकाले चापिमुख्यानि पुष्पाणि चफलानि च दर्शयिष्यंत्यनुक्रोशाद्गिरयोराममागतम् १३ प्रस्रविष्यंतितोयानिविमलानिमहीधराः विदर्शयंतो विविधान्भूयश्चित्रांश्चनिर्झरान् १४ पादपापर्वताग्रेषुरमयिष्यंतिराघवम् यत्ररामोभयंनात्रनास्तितत्रपराभवः १५ सहिशूरो महाबाहुःपुत्रो दशरथस्य च पुराभवतिनोदूरादनुगच्छामराघवम् १६ पादच्छायासुखोदकीतादृशस्यमहात्मनः सहिनाथोजनस्यास्य सगतिःसपरायणम् १७

कुसुमरचितशय्यासु सीतासमेतंराघवरमयिष्यंतीत्यर्थः यत्ररामः तत्र[...]लीतिभावः १५ तत्रहेतुःसहिशूरइति राघवोनोऽस्माकमदूरात्पुराभवति आसन्नोभवद्यावत्पः यावत्पुरेत्यादिनाभविष्यदर्थे लट् अतः राघवमनुगच्छामेति प्रार्थनायांलोट् १६ छायापदेनत्वनुगमहेतुभूता सेवालक्ष्यते येरामम[...]गच्छामतादृशस्यमहात्मनः श्रीरामचंद्रस्यपादसेवैवनः परमसुखसाधनभूतासःरामःगतिःप्राप्तव्योपरायणोसर्वे

येराघवंन पश्यंति तेषां नृणां हृदिभिः किमिति संबंधः अयं भावः निरवधिककरुणासागर कल जजद्दुहरामापतररूपेणावतीर्णस्वदेशे
स्वपुर एव वा स्थितं भगवंतं श्रीराममपरमादरेणापश्यंतो ये पुत्रदारादिषु रमंते ते पापिष्ठाः पुनः पुनः संसरंतीति ७ वने रामं
परिचरन्यो नुगच्छति स सलक्ष्मणः सीता च भाग्यवती यस्मात्सह रामं सीता तासहितं राममित्यर्थः ८ आत्मानं तावत्सीता

किं नु तेषां गृहैः कार्यं किं दारैः किं धनेन वा पुत्रैर्वा किं सुखैर्वापि ये न पश्यंति राघवम् ७ एकः स्य
रुषो लोके लक्ष्मणः सह सीतया यो नु गच्छति काकुत्स्थं रामं परिचरन्वने ८ आपगाः कृतपुण्याः ।
पद्मिन्यश्च सरांसि च येषु यास्यति काकुत्स्थो विगाह्य सलिलं शुचिः ९ शोभयिष्यंति का
कुत्स्थमटव्यो रम्यकाननाः आपगाश्च महानूपाः सानुमंतश्च पर्वताः १० काननं वापि शैलं
वा यं रामो नुगमिष्यति प्रियातिथिमिव प्राप्तं नैनं शक्ष्यंत्यनर्चितुम् ११ विचित्रकुसुमापीडा
बहुमंजरिधारिणः राघवं दर्शयिष्यंति तोयानि विमलानि महीधराः विदर्शयंतो विविधान्भूयश्चि
त्रांश्च निर्झरान् १२

लक्ष्मणाद्यो भाग्यवानिति कस्तर्हि पितुः शोकः अचेतनाश्चापि आपगादयः सभाग्या न तु पूर्वमित्याहुः आप
गा इति विगाह्य स्नात्वा ९ रम्यकाननाः चारुवनदेशाः महानूपाः नलप्रायतीरप्रदेशाः १० अनर्चितुमिति अर्चितं प्रदातुं एवेत्यर्थः ११

इति सप्तचत्वारिंशः सर्गः ४७ तेषामित्यादि श्लोकद्वयमेकं वाक्यं मुमूर्षया ऽपलक्षितानां ग्रामवासिनां दुर्मनसां खिन्ना नामित्यर्थः सत्वानि प्राणवः उद्गतानि उत्क्रान्तानीव बभूवुः प्रवाससाधना तात इति भावः १२

इत्यार्षे रामायणे अयोध्याकांडे सप्तचत्वारिंशः सर्गः ॥ ४७ तेषामेवं विषण्णानां पीडितानाम
तीव च बाष्पविप्लुतनेत्राणां सशोकानां मुमूर्षया १ अभिगम्य निवृत्तानां रामं नगरवासिनाम्
उद्गतानीव सत्वानि बभूवुरमनस्विनाम् २ स्वं स्वं निलयमागम्य पुत्रदारैः समावृताः अश्रूणि
मुमुचुः सर्वे बाष्पेणापिहिताननाः ३ न चाहृष्यन्न चामोदन्वणिजो न प्रसारयन् न चाप्रोभंत प
ण्यानि नापचन्गृहमेधिनः ४ नष्टं दृष्ट्वा नाभ्यनंदन्विपुलं वा धनागमम् पुत्रं प्रथमजं लब्ध्वा
जननी नाप्यनंदत ५ गृहे गृहे रुदंत्यश्च भर्तारं गृहमागतम् व्यगर्हयंत दुःखार्ता वाग्भिस्तोत्रै
रिव द्विपान ६

बाष्पेणापिहिताननाः अश्रुव्याप्तमुखा इत्यर्थः ३ हर्षो वाह्यसंतोषो मस्रवविकासादिः मोदः अंतरोह
र्षः परस्मैपदमार्षं प्रसारयन्प्रसारयन्नित्यर्थः प्रसारितान्यपि पण्यानि नाशोभंत ४ चिरनष्टधनस्य विपुलस्य
गमे लाभे दृष्ट्वापि नाभ्यनंदन् वा हवार्थे नाभ्यनंदन्नेवेत्यर्थः ५ व्यगर्हयंत रामं प्रतिनिवृत्य किमर्थं पुनरागतास्त्वेवं वाग्भि

ततः मार्गानुसारेणार्थमार्गानुसारेणाकिंचित्तरां किंचित्कालं गत्वा ततो मार्गिणा आनु रथमार्गादर्शनात् पुनर्महताविषादेन समभिप्लुताः व्यग्नाः १३ किमिदं सद्यमार्गादर्शनां इतः परं किं करिष्यामः अहो दैवेनोपहता वयं इति व

ततो मार्गानुसारेणागत्वा किंचित्ततः त्वराम् मार्गिना शाद्विषादेन महता समभिप्लुताः १३ रथमार्गानुसारेणाप्रवर्तितमनस्विनः किमिदं किं करिष्यामो दैवेनोपह इति १४ ततो यथागतं तैर्नैव मार्गेणाक्रान्तचेतसः अयोध्यामगमन् सर्वे पुरीं व्यथितसज्जनाम् १५ आलोक्य नगरीं ताञ्च त्वयं व्याकुलमानसाः अप्रवर्तयंत ते शूलिनयनैः शोकपीडितैः १६ एषा रामेण नगरी रहिता नाति शोभते आपगा गरुडेनेव हृदादुद्धृतपन्नगा: १७ चन्द्रहीनमिवाकाशं तोयहीनमिवार्णवम् अपश्यन्निहतानन्दं नगरं ते विचेतसः १८ ते तानि वेश्मानि महाधनानि दुःखेन दुःखोपहता विशन्तः नैव प्रज्ञास्वजनं जनं वा निरीक्षमाणाः प्रविशन्ति हर्षाः १९।

दंतोऽस्रवर्तत १४ व्यथिताः स

ज्जना यस्यां तां सज्जनपदेन कैकेय्या व्याप्ततिः १५ त्वयं अहं प्रति व्याकुलं गंतव्यं तवेसेव रूपं मानसं येषां ता दृष्ट्वा अश्रु वार्तयंत अमुंचन् १६ १७ १८ ते पौराः महाधनानि अमर्ष्यानिताति वेश्मानि स्वस्ववेश्मानीत्यर्थः विशन्तोपि दुःखेन सहितं स्वजनं अन्यजनं वा निरीक्षमाणाः शोपि दुःखोपहताः सन्तः स्वपरवेश्मविवेकं त्वज

रा० वा० अ० तयाऽवितयाः सोधात्रिपादस्मतः त्यक्त्वा गत इदमनुचितं तस्येति भावः ५ ६ निर्धनं प्रायोपवेशनं मरणम्
१८६ महाप्रस्थानं मरणादीक्षापूर्वकं मृत्योरभिमुखगमनं तद्रहितानां जीवितं किमर्थं कस्मै फलाय हितं न कस्यापी

कथं रामो महाबाहुः सत्त्वाधितपःक्रियः भक्तं जनमभिप्रेत्य अप्रवास्त राघवो गतः ५ योनः सदापाल
यति पितापुत्रानिवौरसान् कथं रघूणां संश्रेष्ठ स्त्यक्त्वानो विपिनं गतः ६ इहैव निधनं यामस्म।
हाप्रस्थानमेव वा रामेण रहितानां हि किमर्थं जीवितं हितम् ७ संति शुष्काणि काष्ठानि प्रभूतानि
महंति च तैः प्रज्वाल्य चितां सर्वे प्रविशामो यथाावकम् ८ किं वक्ष्यामो महाबाहुः रनसूयः प्रियंव
दः नीतः स राघवोस्माभिरिति वक्तुं कथं क्षमम् ९ सा नूनं नगरी दीना दृष्ट्वास्मान्राघवं विना भ
विष्यति निरानंदा सस्त्री बालवयोधिका १० निर्यातास्तेन वीरेण सह नित्यं महात्मना विहीनास्ते
न च पुनः कथं द्रक्ष्याम तां पुरीम् ११ स्त्री वक्ष्यभावाचो वा हूनुष्मात्तजनाः विलपंतिस्मदुःखार्ता

सर्वः खतोमरणामेवश्रेयः ७ ८ राममतीतेपश्यंतं जनं प्रति किं वक्ष्यामः अस्माभिः राघवो वने नीतः प्रापितः इति
वक्तुं कथं क्षमम ९ १० ११ १२ राम० १८६

विवासरावषष ९८

पूर्वोक्तं निगमयति तत इति सम्मंत्रः अयोध्याभिगमनं निमित्तदर्शनात् अयोध्यातपनकुलमंगलसूचकनिमित्तदर्शना
द्वैतोत्तरथं उदङ्मुखं चकार निमित्तस्वीकारार्थमित्यर्थः ततो निमित्तस्वीकारानंतरं ससारथिः सारथिसहितः र

ततः समास्थाय रथं महारथः ससारथिर्दाशरथिर्वनं ययौ उदङ्मुखं तं तु रथं चकार सः अयोध्याभिगत्य
निमित्तदर्शनात् ३४ इत्यार्षे रामायणे अयोध्याकाण्डे षट्चत्वारिंशः सर्गः ४६ प्रभातायां
तु शर्वर्यां पौरास्ते राघवं विना शोकोपहतनिश्चेष्टा बभूवुर्हतचेतसः १ शोकजाश्रुपरिद्यु
ना वीक्षमाणास्ततस्ततः आलोकमपि रामस्य न पश्यंति स्म दुःखिताः २ ते विषादार्तवदना रहि
तास्तेन धीमता कृपणाः करुणा वाचो वदंति स्म मनीषिणः ३ धिगस्तु खलु निद्रां तां ययाप
हृतचेतनाः नाद्य पश्याम हे रामं पृथूरस्कं महाभुजम् ४

पौरसमास्थायाददिताभरखवतयावनेप्रयाविस
न्वयः ३४ इति षट्चत्वारिंशः सर्गः ४६ शोकेनोपहता अतएव निश्चेष्टाः हतचेतसो मूर्छिताः १ परिद्यूनाः
क्लिन्नाः आलोकं आलोकसाधनं रथरेखादिकमपि २ ३ ययानिद्रया या अपामहरत्तिनत्यर्थः हे इति संबोधनं वा परस्परं ४

 सुप्रजाः प्रभप्रजावती ॥१७॥ तौ च कुशलं ब्रूयाः इति शेषः ॥१८॥ तस्मै भरताय धनं ददाविति संबंधः ॥१९॥ रुक्मनिष्काणि वक्षोभूष

 णानि निष्काः स्त्रीहेम्नि दीनारे स्यातत्केकयः प्रातैपलैवक्षौविभूषणे कर्षइतिवैजयंती धनम् एकरूपमादिशत ॥२०॥ प्रमा

ता

गच्छतां अनुजानीते त्वां कैकेयीसुप्रजास्त्वया ॥ मातरं कुशलं ब्रूयाः पितरं च परंतप ॥१७॥ पु

रोहितं च कुशलं प्रेचान्ये द्विजसत्तमाः ॥ तौ च तातमहेष्वासौ भ्रातरौ रामलक्ष्मणौ ॥१८

स्तु

तस्मै हस्तुत्तमा न्मित्रान् कंबलान्यजिनानि च ॥ अभिसत्कृत्य कैकेयो भरताय ददौ ध

नम् ॥१९॥ रुक्मनिष्कसहस्रे द्वे षोडशाश्वशतानि च ॥ सत्कृत्य कैकेयीपुत्रं केकयो धनमा

दिशत् ॥२०॥ तथामात्यानभिप्रेतान्विश्वास्यांश्च गुणान्वितान् ॥ ददावश्वपतिः शीघ्रं भ

रतायानुजीविनः ॥२१॥

सहशागांस्त्वजेती तस्मात्स्तान् अभिप्रेतान् सहायभूतानित्यर्थः विश्वास्यान् विश्वसनी

यान् अश्वपतिः केकयराजो ददौ गच्छतेति भरतायानात्तापयामास ॥२१॥

परिच्छदो धनुः कवचादि र्याकुलावर्ती यावर्तैराकुलामिरूर्षयः २८ भयदर्शी नामयं प्रोक्तितानामपभयमार्गि
राजमार्गमिरूर्षयः २९ त्वमेवरथमास्थायोदक्षरवः प्रयाहिमत्यतितिवृत्तिदुत्पादनेन जनमोहनाय न
तुवयं व्रतभंगापतेः ३० तदेवाहमुहूर्तमितिनविद्युः व्रतमेवगत इतिनजानीयुः ३१ प्रसाम्यमार्गान्तरेणश्रसा

समंतीर्थमहाबाहुः भश्रीमानशिवमकंठकम् प्रापत्महामार्गमिथभयदर्शीनाम् २९ मोहनार्थं
तुपौराणांसूतंरामोब्रवीद्वचः उदङ्मुखःप्रयाहित्वंरथमास्थायसारथे ३० मुहूर्तंत्वरितंगत्वानिव
र्तयरथंपुनः यथानविद्युःपौरामांतथाकुरुसमाहितः ३१ रामस्यतुवचःश्रुत्वातथाचक्रेचसारा
थिः प्रसाम्यचरामस्यस्यंदनंप्रत्यवेदयत् ३२ तौसंप्रयुक्तंतुरथंसमास्थितौतदा सो
तौरघुवंशवर्धनौ प्रचोदयामासततस्तुरंगमान्ससारथिर्येनपथातपोवनम् ३३ तत

गम्यप्रत्यावेदयत् गन्तेहतार्थमतापसत् ३२ संप्रयुक्तंतम्यगानीयदर्शितरथंसमास्थितौसमाहठौ रघभूतामि
तिज्ञेषः येनपथातपोवनंप्राप्यतेतेनपथासुमंत्रःतुरंगमान्प्रचोदयामासः ३३ ३३ सीतासीतारामाभ्यांनमः

शीघ्रगमने हेतुमाह यतइति इक्ष्वाकुपुरवासिनो मामनुरक्ता एते इदानीमिव भूयोपि पुनरपि वृक्षमूलानि सं
श्रिता न स्वपेयुः तथा यत्नो तिष्ठंति तावच्छीघ्रं गच्छाम इति पूर्वेणा संबंधः २२ तत्र हेत्वंतरमाह पौराहीति नृपात्म

अथतो भूयोपि नेदानीमिक्ष्वाकुपुरवासिनः स्वपेयुरनुरक्ता मां वृक्षमूलानि संश्रिताः २२ पौरा ह्या
त्मकृताद्दुःखाद्विप्रमोच्या नृपात्मजैः न तु खल्वात्मना योज्या दुःखेन पुरवासिनः २३ अब्रवी
ल्लक्ष्मणो रामं साक्षाद्धर्ममिव स्थितम् रोचते मे तथा प्राज्ञ क्षिप्रमारुह्यतामिति २४ अथ रामोऽब्रवी
त्सूतं शीघ्रं संयुज्यतां रथः गमिष्यामि ततोऽरण्यं गच्छ शीघ्रमितः प्रभो २५ सूतस्ततः संत्वरितः
स्यंदनं तैर्हयोत्तमैः योजयित्वा तु रामाय प्रांजलिः प्रत्यवेदयत् २६ अयं युक्तो महाबाहो रथ
स्ते रथिनां वर त्वरयारोह भद्रं ते ससीतः सहलक्ष्मणः २७ तं स्यंदनमधिष्ठाय राघवः सपरि
च्छदः शीघ्रगामाकुलावर्तां तमसामतरन्नदीम् २८

जैः पौराः पुरवासिनः आत्मकृतात् आत्मनिमि
त्तकाद्दुःखाद्विप्रमोच्याः न तु आत्मनिमित्तकेन दुःखेन योज्याः संयोज्या इत्यर्थः २३ आरुह्यतां रथ इति शेषः २४
ततः संयोजितेन तेन रथेनेत्यर्थः शीघ्रं गच्छ रथप्रयोजनाय इति शेषः प्रभो समर्थ २५ २६ प्रक्तः सज्जः २७ ॥

गोकुलैराकुलं व्याप्तं तीरं यस्यास्तस्यास्तमसायास्तीरे इति दूरतः द्विजसंघे शब्दे शब्दति दूरदेशे अतिसंधायागमनसौकर्यायैव वसत प्रकृतिभिः सहितं तमसातीरे वा समात्रैवोध्यम् १७ निशाम्य अवलोक्य निद्रालान् इति शेषः १८ अस्मद्व्यपेक्षान् अस्मास्वेव विशेषतो अपेक्षावतः अतएव गृहेषु निरपेक्षान् निरपेक्षान् अमात्यान् संप्रतं अत्र हस्तोदयः समपेक्षितुमान् १९ एवं ते पौरा अस्मन्निव

गोकुलाकुलतीरायास्तमसाया विदूरतः अवसत्तत्र तां रात्रिं रामः प्रकृतिभिः सह: १७ उत्थाय तु महातेजाः प्रकृतीस्तानिशाम्य च अब्रवीद्भ्रातरं रामो लक्ष्मणं पुण्यलक्षणम् १८ अस्मद्व्यपेक्षान्सौमित्रे निरपेक्षान्गृहेष्वपि वृक्षमूलेषु संसुप्तान्पश्य लक्ष्मण सांप्रतम् १९ यथैते नियमं पौराः कुर्वन्त्यस्मन्निवर्तने अपि प्राणानसिष्यन्ति न तु त्यक्ष्यन्ति निश्चयम् २० यावदेव तु संसुप्तास्तावदेव वयं लघु रथमारुह्य गच्छामः पन्थानमकुतोभयम् २१ ततो रामायतन्मा
स्ता

वर्तने पथा नियमं यत्नं कुर्वन्ति तथा जाने अपि प्राणानसिष्यन्ति सन्त्यक्ष्यन्ति निश्चयं अस्मन्निवर्तनरूपं निश्चयं तु न सन्त्यक्ष्यन्तीति संबंधः २० अतो यावदित्यादि लघु शीघ्रम् २१

॰ष्कृतमस्ति र्हि खपएव श्वाहारीकृसवत्स्यामीत्यर्थः वनवासोपक्रमादिदिवसात्प्रातमसातीरस्यपुरस्पदेत्रकाश्चोपवासः का
र्य इतिभावः ॰ तदेवाहसतद्धीति वन्येसत्येपीत्यन्वयः १० ११ संयम्यवध्वाप्रभूतप्रवमानस्मिद्धप्रवमवतः कृत्वाप्रत्यनंतरः

॰श्वभिरेवहिसौमित्रेवत्स्यामस्तरुनिश्रामिमाम् एतद्धिरोचतेमह्यंवनेपिविविधेसति १० एवमुक्त्वा
तुसौमित्रिंसुमंत्रमपिराघवः अप्रमत्तस्त्वमश्वेषुभवसौम्येत्युवाचह ११ सोश्वान्सुमंत्रःसंयम्यसूर्ये
स्तंसमुपागते प्रभूतयवसान्कृत्वाबभूवप्रत्यनंतरम् १२ उपास्यतुशिवांसंध्यांदृष्ट्वारात्रिमुपस्थि
ताम् रामस्यशयनंचक्रेसूतःसौमित्रिणासह १३ तांशय्यांतमसातीरेवीक्ष्यवृक्षदलैःकृताम्
रामःसौमित्रिणासार्धंसभार्यःसंविवेशह १४ सभार्यंसंप्रसुप्तंतंभ्रातरंवीक्ष्यलक्ष्मणः कथया
माससूतायरामस्यविविधान्गुणान् १५ जाग्रतोरेवतांरात्रिंसौमित्रेःसूतयोः तमसा
तीरेरामस्यब्रुवतोगुणान् १६

प्रत्यनंतरम् १२ शयनंशयनस्थानंप्राकरणंपांसूत्सेपणादिनाचक्रेरसन्व
यः १३ वृक्षदलैःवृक्षपत्रैःसौमित्रिणासार्धंसूतेनकृतांशय्यांवीक्ष्यसभार्यःसंविवेश १४ गुणान्कथयामासजागरणा
र्थमितिभावः १५ १६

सस्त्रीपुंसा स्त्रीपुंसैः सहिता अयोध्या घ्यभ्रृ ति ४ कुतस्तत्राह अनुरक्ता इति बहुभिर्गुणैरिति सर्वांनपि नो अस्मदर्थे अस्मन्निमित्तमभीक्ष्णं मुहुर्मुहुः रुदंतौ पितरौ अंधौ न भवेतामपि वे तामेव अतः शोचामीत्यर्थः ६ अपि वा तदनु शोको अस्माकं व येत्याह भरत इति ७ अनृशंसत्वं अक्रूरत्वम् ८ अथ यल्लक्ष्मणानुगमनेन संतुष्य आह त्व

अयोध्यायाः प्रत्यागतान् राजधानीं पितुर्मम सस्त्रीपुंसागतानस्मात्कोचिष्यतिन संशयः ४ अनुरक्ता हिमनुजा राजानं बहुभिर्गुणैः त्वां च मां च नरव्याघ्र शत्रुघ्नभरतौ तथा ५ पितरं चानुशोचामि मातरं च यशस्विनीम् अपि तौ अंधौ भवेतानौ रुदंतौ तावभीक्ष्णशः ६ भरतः खलु धर्मात्मा पितरं मातरं च मे धर्मार्थकामसहितैर्वाक्यैराश्वासयिष्यति ७ भरतस्यानृशंसत्वं संचिंत्याहं पुनः पुनः नानुशोचामि पितरं मातरं च महाभुजः ८ त्वया कार्यं नरव्याघ्र मामनुव्रजता कृतं अन्वेष्टव्या हि वैदेही रक्षणार्थं सहायता ९

येति मामनुव्रजता त्वया तु यत्कार्यं कर्तव्यं तात् कृतमेव हि यतस्त्वदनुव्रजनाभावे वैदेहीरक्षणार्थं सहायता सहायसमूहो अन्वेष्टव्यः स्यात् त्वमेकोपि सहायसमूहस्थानीय इति भावः ९ ।।।।।।।

ते

निवर्तनैर्निवर्तननिमित्तैर्विक्रोशतां तेषामनुसहायमार्गमिति यिक प्रवाहत्वाद्राघवं वारयंतीवैमत्ताद् दृष्ट्वा दृष्टेः सर्थः ३२
संपरिवर्स्य ध्वश्रमनिवृत्त्यर्थं मविपरिवेष्टनं कारयित्वा तोय परिप्लुतांगान् स्नापितान् तमसाया अविदूरे अचारय
त् भद्रितपचस्तान करोत् ३३ इति पंच चत्वारिंशः सर्गः ४५ सीतामुद्वीक्ष्य सौमित्रिमब्रवीदित्यत्तेन सीता दृष्टेनाप्यवो

एवं विक्रोशतां तेषां द्विजातीनां निवर्तनम् ददृशे तमसा तत्र वारयंतीव राघवम् ३२ ततः सुमं
त्रोपि रथाद्विमुच्य श्रांतान्हयान् संपरिवर्त्य शीघ्रम् पीतोदकांस्तोयपरिप्लुतांगानचारयद्वै त
मसाविदूरे ॥३३॥ **इत्यार्षे रामायणे वाल्मीकीये अयोध्याकांडे पंचचत्वारिंशः सर्गः ॥ ४५ ॥** ततस्तु तमसातीरे
रम्यमाश्रित्य राघवः सीतामुद्वीक्ष्य सौमित्रिमिदं वचनमब्रवीत् १ इयमद्य निशा पूर्वा सौ
मित्रे प्रहिता वनम् वनवासस्य भद्रं ते स नोत्कंठितुमर्हसि २ पश्य शून्यान्यरण्यानि रुदंतीव स
मंततः यथानिलयमायद्भिर्निलीनानि मृगद्विजैः ३

यदिसचाम्यते १ हे सौमित्रे वनवासस्य वनवा
सस्यावधिनि शानां मध्ये यद्युश्च वतारं पनिशावनं वनवासप्रति पूर्वा प्रथमा प्रहिता प्राप्ता वनवासाये कौ दिवसो गा
मितस्त्वमुत्कंठितुम घप्रभृति गृह सौख्यादि वोत्कंठां कर्तुं नार्हसि २ यथाप्यायाः गोस्वस्वनिलयमायद्भिरागच्छद्भि
र्मृगद्विजैर्निलीनानि सशब्दमतत्नीनतया प्राणानि शून्यत एवारण्यानि अरण्यानि रुदंतीव अस्मान दृष्ट्वा रिक्तानानीववं

एवमपि गच्छंतमेव दृष्ट्वाहुः बहूनामिति यद्विजाः इहागतास्तेषां बहूनां यत्नादिहलोके विततास्त्विन्नताः संभृतसंभारास्य येः
तेषां समाप्तिस्त्वन्निवर्तनोद्योगाश्च निवर्ततिसर्वेयज्ञास्त्वयैव विच्छिन्नाः स्युरिति भावः २८ न केवलं वयमेवापितु तिर्यक्स्था
वरा अपि त्वन्निवृत्तिमाकांक्षंत इत्याहुः भक्तीति जंगमाजंगमानि सर्वाण्यपि भूतानि भक्तिमंति स्नेहवंति ते युत्वान्निवृत्ति
याचमानेषु भक्तेषु त्वं भक्तिं स्नेहं प्रदर्शय तिवृपेति शेषः २९ तेषां चाप्रकारमाह अन्नेति मूलैः स्थावरत्वादुन्नत

बहूनां विततायत्वाद्विजानां यत्र हायनाः तेषां समाप्तिरायत्ता तव वत्स निवर्तने २८ भक्तिमंतीह
भूतानि जंगमाजंगमानि च याचमानेषु तेषु त्वं भक्तिं भक्तेषु दर्शय २९ अनुगंतुमशक्तास्त्वां
मूलैरुद्धृतवेगिनः उन्नता वायुवेगेन विक्रोशंतीव पादपाः ३० निश्चेष्टाहारसंचारा वृक्षैक
स्थाननिष्ठिताः पक्षिणोपि प्रयाचंते सर्वभूतानुकंपिनम् ३१

त्वं तं हत्वेव गास्वतस्त्वामनुगंतुम

शक्ताः उन्नताः उच्छ्रिताः पादपाः वायुवेगेन वायुवेगजशाखाचलनशब्दैर्विक्रोशंतीव त्वन्निवर्तनायेति शेषः ३०
चेष्टा गात्रचलनादिरूपा आहारार्थसंचारश्च ते अन्योनिर्गताः तद्रहिताः वृक्षरूपैकस्थान एव निष्ठिता नियताः
नस्थिताः न त्वाहारार्थमपि मुखभवतीर्णाः एवं मरणपर्यंतव्यापारेण त्वां याचंते निवृत्तिमिति शेषः ३१ राम० १८२

वाजपेयसमुत्थानि वाजपेययाजिनो राजवच्छत्रादिसंवेधस्य श्रुता वुक्तेः मेघानिव जलासये शारदमेघवत्पांडुरा लिङ्गत्रा तस्य यः २२ एतन वाप्तातपत्रस्य पुराप्राप्तमेतच्छत्रस्य वाजपेयकैः वाजपेययागप्राप्तं २३ वेदमन्त्रानुसारिणीत स्मात् सानुसारिणी श्रौतो लोकैर्हृते स्त्रीनिमित्ते वनवासानुसारिणी वेदाभ्यासादि परित्यज्य वनवासोन्मुखीकृतो यः २४ एषु स्माकं त्वया सह वनी आगमनेन काप्यनुपपत्तिरित्याहुः इदयेच्छति येनो स्माकं परं धनं वेदास्तेस्माकं इदयेच्छेवावतिष्ठं

वाजपेयसमुत्थानि छत्राण्येतानि पश्य नः ।
पृष्ठतो ऽनुप्रयातानि मेघानिव जलात्यये ॥ २२ ॥
अनवाप्तातपत्रस्य रश्मिसंतापितस्य ते ।
एभिश्छायां करिष्यामः स्वैश्छत्रैर्वाजपेयकैः ॥ २३ ॥
या हि नः सततं बुद्धिर्वेदमन्त्रानुसारिणी ।
त्वत्कृते सा कृता वत्स वनवासानुसारिणी ॥ २४ ॥
हृदयेष्वेव तिष्ठन्ते वेदा ये नः परं धनम् ।
वत्स्यन्त्यपि गृहेष्वेव दाराश्चारित्ररक्षिताः ॥ २५ ॥
न पुनर्निश्चयः कार्यस्त्वद्गतौ सुकृता मतिः ।
त्वयि धर्मव्यपेक्षे तु किं स्याद्धर्ममपेक्षितुम् ॥ २६ ॥
याचितो नो निवर्तस्व हंसशुक्लशिरोरुहैः ।
शिरोभिर्निभृताचार महीपतनपांसुलैः ॥ २७ ॥

ते एष उच्चारतो तेषामन्यकापि हानिरिति भावः चारित्रेण पातिव्रत्येन रक्षिता दाराः गृहे ष्वेव तिष्ठंति चारित्राणामेवात्र दुष्प्रकल्पनाम् दुष्प्राप्तात् स्य यः २५ पदयपि त्वद्गतौ त्वदनुगमने स्माकं मतिः सुकृता निश्चिता अतः पुनर्वनगमननिश्चयो स्माकं न कार्योस्ति कृतत्वादेव तत्पापे किंचिद्भुमरति प्रोचः त्वयि धर्मव्यपेक्षे धर्माविवचनरूपधर्मनिर्ये दे सति किं भूते धर्मपरे स्थिते त्वयि न किमपि सर्वे धर्ममार्गो व्याप्तिं जसेपुः २६ तस्मादस्माभिर्हंसशुक्लशिरोरुहैः पलितकेशैः शिरोभिर्मतावच्छोगाङ्गरणामेन महीपतनपांसुलैः रजोव्याप्तैर्देहैर्याचितस्त्वं हे निभृताचार निश्चलधर्मो नुष्ठान निवर्तस्व २७

रा०वा०अ०
१८१

आर्तप्रलापान् आर्तवाक्यानि प्रलपतः कथयतः १७ ब्राह्मण्यमाचारस्तद्वरणोनेत्तरे रथगमने दोषो भवतीति रथादव
तीर्य तदागमनपर्यंतं सन्निकृष्टपदन्यासो भूत्वा वनपरायणः एव श्रानेऽजगामन तु निवृत्तो नापि स्थितः इत्यर्थः १८ कु

एवमार्तप्रलापांस्तान्वृद्धान्प्रलपतो द्विजान् अवेक्ष्य सहसा रामो रथादवततार ह १७ पद्भ्यामेव ज
गामाथ ससीतः सहलक्ष्मणः सन्निकृष्टपदन्यासो रामो वनपरायणः १८ द्विजातींस्तु पदा
तींस्तान् रामश्चारित्रवत्सलः नशशाक घृणाचक्षुः परिमोक्तुं रथेन सः १९ गच्छंतमेव तं दृ
ष्ट्वा रामं संभ्रांतमानसाः ऊचुः परमसंतप्ता रामं वाक्यमिदं द्विजाः २० ब्राह्मण्यं कृत्स्नमेतत्त्वां
ब्रह्मण्यमनुगच्छति द्विजस्कंधाधिरूढास्त्वामग्नयोऽप्यनुयांत्यमी २१ रामायनमः सीतापे

तोहेतोरित्यत आह द्विजातीनिति रथेन परिमोक्तुं न शशाक अस्पंतं रथवेगालंघनेन निवृत्तेयितुं न शशाक इत्यर्थः
तत्र घृणाचक्षुर्हेतुः घृणादयातत्सूचकं चक्षुर्यस्येत्यर्थः १९ गच्छंतमेव वक्ष्यमाणनिवृत्तिहेतुप्रदर्शने
पिपितवर्चनचिकीर्षया गच्छंतमेवेत्यर्थः २० ब्राह्मण्यं ब्राह्मणानां समूहः ब्रह्मण्यं ब्राह्मणहिते द्विजस्कंधा
धिरूढाः पात्राणि हरेतोतिशेषः २१

रम०१८१

धर्मेणजवाक्यपरिपालनरूपं यः कामयन्ते चितेस्वीकृतवंतः प्रस्तेनधर्मेणालिलाव ११ वाष्पेणापिहितं पिहितं लोचनं रजुहुपैः
स्वगुरोर्वृद्धं पुरवासिनं सौमित्रिसहितो राम स्तकरैर्व उत्सृज्यालंकारः गुरोरितं प्रोप्रेक्षेः १२ प्रोजसा तपोबलेन एवं
त्रिविधंयपानं यावद्धः ते यामध्ये वयः प्रकं पप्रिरसः प्रतिष्ठुत्वा दन्यावनाम्रातस्मा द्वारादिदेवत्स्यमाराम् चुः १३

यथा यथा दाशरथिर्धर्ममेवास्थितो भवत् तथा तथा प्रकृतयो रामं पतिमकामयत् ११ वाष्पेणापिहितं दीनं रामः सौमित्रिणा सह चकर्षेव गुरोर्वृद्धं जनं पुरनिवासिनम् १२ ते द्विजास्त्रिविधं वृद्धा ज्ञानेन वयसौजसा वयःप्रकंपशिरसो दूरादूचुरिदं वचः १३ वहंतो जवना रामं भो भो जात्यास्तुरंगमाः निवर्तध्वं न गंतव्यं हिता भवत भर्तरि १४ कर्णवंतो हि भूतानि विशेषेण तुरंगमाः यूयं तस्मान्निवर्तध्वं याचनां प्रतिवेदिताः १५ धर्मतः स विशुद्धात्मा वीरः शुभदृढव्रतः उपवाह्यस्तु वो भर्ता नापवाह्यः पुराद्वनम् १६

रामस्य परमकं गोसमसादयितं तुरगमान्प्रसादः व
हंत इति रथे नद्धा पर्यंतः जात्या उत्तमजातीयाः भर्तरि रामविषये हिता भवत वनं मा नयत इति यावत् ब्राह्मणायां चामतिक्रम्य युष्मदनुमनेन भर्तुः रक्षितमिति भावः १४ एवं प्रार्थितानामपि तेषां विनामनदः स्वादाहुः कर्णवंतीति विशेषतः यूयं कर्णवंतः तस्माद्वदम्भिर्वै न गंतव्यं गपितु याचनाम् अस्मदीयां प्रतिवेदिताः ज्ञातवंतो निवर्त्तध्वं १५ धर्माद्युपवाह्यः प्रशमीपं प्राप्तयोयः वंः युष्माभिः नत प्राद पत्नी पक्वनं वा ह्यः प्राप्तरोति पः १६

न

३८ रा°

संप्रश्रितं सविनयं संक्षिप्तं च ॥१॥ येषां कुशलमिच्छसि तेषां कुशलं मे त्वरया हानेन प्रकाशनका पीप द्माप द्मवती श्रीस्त्वां वृणुते अतोऽपात्रायैरथो युज्यतां राज्यश्रीरिति हार्दोक्तिः ॥२॥ एवमुक्तो भरतः दूतान्संत्वरयंतीति महाराजमापृच्छे इति।

एवमुक्तास्तु ते दूता भरतेन महात्मना ॥ ऊचुः संप्रश्रितं वाक्यमिदं तं भरतं तदा ॥१॥ कुशलास्ते नरव्याघ्र येषां कुशलमिच्छसि ॥ श्रीश्च त्वां वृणुते पद्मा युज्यतां चापि ते रथः ॥२॥ भरतश्चापि तान्दूतानेवमुक्तोऽभ्यभाषत ॥ आपृच्छेऽहं महाराजं दूताः संत्वरयंति माम् ॥३॥ एवमुक्त्वा तु तान्दूतान्भरतः पार्थिवात्मजः ॥ दूतैः संचोदितो वाक्यं मातामहमुवाच ह ॥४॥ राजन्पितुर्गमिष्यामि सकाशं दूतचोदितः ॥ पुनरप्यहमेष्यामि यदा मे त्वं स्मरिष्यसि ॥५॥ भरतेनैवमुक्तस्तु नृपो मातामहस्तदा ॥ तमुवाच शुभं वाक्यं शिरस्याघ्राय राघवम् ॥६॥

तान्दूतानभ्यभाषतेति योजना ॥३॥ स चोदितः शीघ्रं प्रच्छेत्येवं प्रेरितः ॥४॥ यदा मे स्मरिष्यसीति प्रोक्तविवक्षायां पंचम्यामित्यर्थः ॥५॥६॥

याच्यमानः निवर्तस्वेति प्रार्थ्यमानः ताभिः प्रकृतिभिः अनुरक्तमप्रजाभिः ससंभ्रमम् संवेत्ते ४ स्वाः प्रजा इव स्वपुत्रानि
च ५ अयोध्यानिवासिनो युष्माकमिति शेषः ६ प्रियाणि इहलोकसुखजनकानि हितानि परलोकसुखजनका
नि ७

स याच्यमानः काकुत्स्थः स्वाभिः प्रकृतिभिस्तदा कुर्वाणः पितरं सत्यं वनमेवान्वपद्यत ४
अवेक्षमाणः सस्नेहं चक्षुषा प्रपिबन्निव उवाच रामः सस्नेहं ताः प्रजाः स्वाः प्रजा इव ५
या प्रीतिर्बहुमानश्च मय्ययोध्यानिवासिनाम् मत्प्रियार्थं विशेषेण भरते सा विधीय
ताम् ६ स हि कल्याणचारित्रः कैकेय्यानंदवर्द्धनः करिष्यति यथावद्वः प्रियाणि च हिता
नि च ७ ज्ञानवृद्धो वयो बालो मृदुर्वीर्यगुणान्वितः अनुरूपः स वो भर्ता भविष्यति भ
यापहः ८ स हि राजगुणैर्युक्तो युवराजः समीक्षितः अपि चापि मया शिष्टैः कार्यं वो भर्तृशा
सनम् ९ न संतप्येद्यथा चासौ वनवासं गते मयि महाराजस्तथा कार्यो मम प्रियचिकीर्षया १०

वयसा बालोपि ज्ञानवृद्धः वीर्यगुणान्वितोपि मृदुः ८ हि यस्माद्भरतो वः युष्माकं युवराजः समीक्षितः निश्चितः राज्ञेति शेषः
अतो मया शिष्टैः रपि लक्ष्मणादिभिः वः युष्माभिः सर्वैः रपि भर्तुः राज्ञः शासनं कार्यमिति संबंधः ९ मयि वनं गते पि
ता असौ महाराजः यथा न संतप्येत् मम प्रियचिकीर्षया भवद्भिस्तथा कार्यः अनुकूलाचरणेन सदा समाश्वासनीयः १० ॥ राम० १८०

अभिवाद्य चरणौ स्पृष्ट्वा प्रीतस्सेऽन्तेसे चैव वर्तमानसमीपे लट् २९ वाक्योप चौरवाक्य रचनायां रामारमणीया ३० ३१ इति चतु
श्चत्वारि श्लोकाः सर्गे ४४ एवं सुमित्रापार्श्वे श्लोकाः समासनपर्यन्तो कथापरिसमाप्य संप्रति रामगमनं च तां ते प्रतीति अनुरक्ता इति वनवा

अभिवाद्य घनमसंतं श्रूरं स्सहद्दंसतम ॥ मुदा सैवे प्रोह्लसे पुत्रमे घरणजिरिवाचलम् ॥ २९ ॥ प्रा
श्वासपंतीविविधैश्च वाक्यैवाक्योप चौरकुशलान्ववा ॥ रामसंतांमातरसेवकाद्दे
वीसमित्राविरामतामा ॥ ३० ॥ निशम्य तद्धृष्टमरामात्र वाक्यं रामस्य मातुर्नरदेवपत्न्याः ।
सद्यः शरीरविनवाशश्लोकः श्रारक्रतेमे घरवात्म्यतोयः ॥ ३१ ॥ इ सार्ध श्लोकमा पराशे योः ॥
ध्याको ३ च तु श्चत्वारि श्लोः सर्गे ॥ ४४ ॥ अनुरक्तामहात्मानं रामं सत्यपराक्रमम् अन्व
जग्मुः प्रयांतं तेवनवासायमानवाः १ निवर्तितेपि च बलात्सुहृद्दर्गेचराजनि नैवतेसन्यवर्त
ताराम स्यानुगताराथम् २ अयोध्यानिलयानांहि पुरुषाणांमहायशाः बभूवगुणसंपन्नः
पूर्णचंद्र इव प्रियः ३

साय प्रशांतमित्सन्वयः १ सुहृद्वर्गे राजसदृशं भूतावरोधवर्गे राजनि च बलान्निवर्तिते चैते पौ
राः २ तदनिवृत्तौ हेतुमाह अयोध्येति ३

२१ २२ २३ एतः रामे राम विषये अशिवे अशुभं न दृश्यते अतः शोकः प्रलापादिः दुःखं मनोव्यथा मास्तु २४ हे अ
न घोयस्मात्वपाऽशेषोऽयं जनः त्वत्परिवाररूपत्वात्त्वया समाश्वास्यः अतो देवि त्वं हृदि विक्लवं दुःखं किं करोषि २५

निवृत्तवनवासं तं द्रष्टासि पुनरागतम् जहि शोकं च मोहं च देवि सत्यं ब्रवीमि ते २१ शिरसा
चरणावेतौ वंदमानमनिंदिते पुनर्द्रक्ष्यसि कल्याणि पुत्रं चंद्रमिवोदितम् २२ पुनःप्रविष्टं
दृष्ट्वा तमभिषिक्तं महाश्रियं समुत्स्रक्ष्यसि नेत्राभ्यां शीघ्रमानंदजं जलम् २३ मा शो
कं देवि दुःखं वा न रामे दृश्यतेऽशिवम् क्षिप्रं द्रक्ष्यसि पुत्रं त्वं ससीतं सहलक्ष्मणम् २४ त्व
या शेषो जनश्चायं समाश्वास्यो यतोऽनघे किमिदानीमिदं देवि करोषि हृदि विक्लवम् २५
नार्हा त्वं शोचितुं देवि यस्यास्ते राघवः सुतः नहि रामात्परो लोके विद्यते सत्पथे स्थितः २६ अभि
वादयमानं तं दृष्ट्वा ससुहृदं सुतम् मुदाश्रु मोक्ष्यसे क्षिप्रं मेघरेखेव वार्षिकी २७
पुत्रस्ते वरदः क्षिप्रमयोध्यां पुनरागतः कराभ्यां मृदुपीनाभ्यां चरणौ पीडयिष्यति २८

२६ मेघरेखा मेघपंक्तिः २७ २८ अभिवाद्य चरणौ स्पृष्ट्वा प्रोक्तसे उत्तमे वचने वर्तमानसमीपे लट् २९

देवतानां देवतं पूज्यं दैवतं देवतानां चेति स्मृतेः भूतानां भूतसत्तमः एको विष्णुर्महद्भूतमिति श्रुतेः तस्य वने वा पुरे वा के गुण
ऽरताः दोषजनका इत्यर्थः १६ सह रामः इत्यन्वयः सरामः पृथिव्या वैदेह्या श्रिया च विजयलक्ष्म्या च एता
भिस्तिसृभिः सह क्षिप्रमभिषेक्ष्यतीहेति संबन्धः १७ कालांतरे विराज्यार्हं तं जनानुरागप्रदर्शनेनाह दुःखजमिति पत्तः ख

दैवतं देवतानां च भूतानां भूतसत्तमः । तस्य के ह्यगुणा देवि वने वाप्यथवा पुरे १६ पृथि
व्या सह वैदेह्या श्रिया च पुरुषर्षभः । क्षिप्रं तिसृभिरेताभिः सह रामोभिषेक्ष्यति १७ दुः
खजं विसृजत्यस्रं निष्क्रामंतमुदीक्ष्य यम् । अयोध्यायां जनः सर्वः शोकवेगसमाहतः
१८ कुशचीरधरं देवं गच्छंतमपराजितम् । सीतेवानुगता लक्ष्मीस्तस्य किं नाम दुर्लभम्
१९ धनुर्ग्रहवरो यस्य बाणखड्गास्त्रभृत्स्वयम् । लक्ष्मणो व्रजति ह्यग्रे तस्य किं नाम दुर्लभ
म् २०

योध्यायां विद्यमानः सर्वो जनः यं निष्क्रामंतमुदीक्ष्य दुःखजमश्रु विसृजति अनन्तरराज्यमवश्यं भावीति शेषः १८
स तं यापितमवने विषयस्त्वं नातीति श्लोचेतीत्याह कुशचीरमिति कुशचीरधरमपि देवं दीप्यमानं यं लक्ष्मी
रिव सीतानुगता तस्य किं दुर्लभं रवशब्द एवार्थे सीतारूपेण लक्ष्मीरेवेति भावः एतेन सविभुरवेति ध्वनितं
१९ धनुर्ग्रहेति धनुर्ग्रहाः शूरास्तेषां वरः श्रे छः २०

वृत्रासुरात्पेतिमिध्वजसुतं दानवेंद्रं हतं दृष्ट्वा यस्मै रामाय दिव्यान्यस्त्राणि ददौ कदाचिद्वामोदेऽकारस्यं वैजयंतपुरे निरुध्य दशार
प्रवितेथि शंवरसुतं हतवान् तेन प्रीतो वृत्रा रामाय दिव्यास्त्राणि ददाविति सर्वत्र गम्यते ११ । १२ पृथिवी तत्प्याः प्राणिनः क
पुनः प्राशनेस्थासंति गम्यते तस्य कुत्रापि नमप्रिति भावः १३ रामस्य याश्रीः सर्वजन संपन्नशरीर शोभा या च श्री
र्येयाद् श्रीचकल्याणसत्वता प्रशस्तवलयुक्ता एतैरसाधारणैर्हेतुभिः रामः क्षिप्रं राज्यमवाप्स्यतीति संबंधः १४ इदानीं
येन सूर्यस्तपति तेजसेद्धः इत्यादिश्रुतिप्रतिपाद्यं श्रीरामस्य परात्मत्वं दर्शयति सूर्यस्यापीत्यादिना सूर्यस्यापि सर्यो भवेत् सर्व

ददौ चास्त्राणि दिव्यानि यस्मै ब्रह्मा महौजसे । दानवेंद्रं हतं दृष्ट्वा तिमिध्वजसुतं रणे ॥ ११
सशरः पुरुषव्याघ्रः स्वबाहुबलमाश्रितः । असंत्रस्तो ह्यरण्येसौ वेश्मनीव निवत्स्यते ॥ १२
यस्येषुपथमासाद्य विनाशं यांति शत्रवः । कथं न पृथिवी तस्य प्राशने स्थातुमर्हति ॥ १३
या श्रीः शौर्यं च रामस्य या च कल्याणसत्वता । निवृत्तारण्यवासः सन्क्षिप्रं राज्यमवाप्स्यति ॥
१४ सूर्यस्यापि भवेत्सूर्यो ह्यग्नेरग्निः प्रभोः प्रभुः । श्रियः श्रीश्च भवेदग्र्या कीर्त्याः कीर्तिः क्षमा
क्षमा ॥ १५

प्रकाशकस्य सूर्यस्यापि सूर्यः प्रकाशको भवेत् तस्य भासा सर्वमिदं विभातीति श्रुतेः अग्नेरग्निः सर्वपावकस्याग्नेरपि पावकः यद्वा ।
सर्वदाहकस्याग्नेरपि दाहकः प्रभोः प्रभुः सर्वनियंतुर्ब्रह्मादेरपि नियंता पतिः पतीनामित्यादिश्रुतेः श्रियः श्रीः संपदोपि संप
त्प्रदा सर्वशोभायापि श्रीः सौभाग्यकरः श्रीरेव ह्यनेन यामति प्रापं धत्ते ईश्वरी सर्वभूतानामिति श्रुतेः तस्या अप्यमतिशायहे

दीप्तिरग्न्याकीर्तिः ख्यातिः प्रज्ञापनावहेः क्षमा क्षमा
[illegible] १५

तदेवाह कीर्तिभूतामिति यः कीर्तिभूतां कीर्त्तिरूपां पताकां ध्वजं लोके त्रैलोक्ये भ्रामयति प्रवर्तयति प्रभुः सर्वभूतपालकः सत्
वात्मजः सर्वलोकानुकंपप्रादमसत्यव्रतपरोऽतः किन्नप्रापः किंतु प्राप्यो पन्नप्राप्तसर्वश्रेयप्रख्यानत्वस्यभावदतिरिक्ते
भावात् ७ समित्राजन्मोत्तरीयभगवदाराधनजनितदुष्कृतपरिपाके नष्ट्रीरामं परमात्मानं मत्वामनसि निधाय वने स्नातपा
दिषु संचरतो रामस्य सूर्यादिबाधानास्ति ग्रापितुत्तत्सेवैवमविष्यतीति को ग्रा मा मा भ्रामयति व्यक्तं रामस्य सादि द्रो
कत्रयेरा सूर्यः रामस्य शौचं ग्रपहतपाप्मत्वादि रूपं सर्वनियंतृत्वादि रूपं माहात्म्यं च व्यक्तं विस्ताय ग्रं प्रभिगात्रं रामदेहं संतापयितुं

कीर्तिभूतां पताकां यो लोके भ्रामयिता प्रभुः । स सत्यव्रतपरः किं नु प्राप्तस्तवात्मजः ७ व्यक्तं
रामस्य विज्ञाय शौचं माहात्म्यमुत्तमम् । न गात्रमंशुभिः सूर्यः संतापयितुमर्हति ८ शिवः स
र्वेषु कालेषु काननेभ्यो विनिःसृतः । राघवं युक्तशीतोष्णः सेविष्यति सुखोऽनिलः ९ शया

न

नमं घरात्रौ पितेवाभिपरिष्वजन् । रश्मिभिः संस्पृशन् शीतैश्चंद्रमाह्लादयिष्यति १०॥

नार्हति भीषोदेति सूर्य इति श्रुतिप्रामाण्यात्परमात्मसंतापकरत्वेन युक्तमिति भावः ८ भीषास्माद्वातः पवत इत्यादिश्रुत्यनुसारे
णाभगवद्दीनो वायुरपि सेवां करिष्यतीत्यभिप्रेत्याह शिवइति युक्तशीतोष्णः प्रवृत्त एव सुखः सुखस्पर्श इत्यर्थः ९ जगदाह्ला
दकरस्यापि भावतः श्रीरामस्य प्रात्मनुसारेणा चंद्रोप्याल्हादयिष्यतीत्याशयेनाह शयानमिति चंद्रमाश्चंद्रः ल्हादयिष्य

४

रा० वा० अ०
१७७

कृपणं यथा तथा रुदितेन वा किं अ(पु?)युक्तमेवेत्यर्थः तत्र हेतुः सदृशो युक्त इति ता दृशस्य च न कदापि शाय इति भावः पुरुषोत्तम इत्यनेन
इत्यनेन तस्य परमात्मत्वं व्यंग्यं एवं च सर्वव्यापकत्वेन त्रापि सन्निधानाद्विलापादि व्यर्थमित्यपि व्यंग्यम् २ । तदेवाह यस्तेति
१ श्लोकैकमेकं वाक्यं आर्यैकौ शल्यं यस्तव पुत्रः प्रेत्यफलोदये प्रेत्य फलस्य स्वर्गादिनिमित्त उदयस्य उद्भवो यस्मिन् शश्वच्छिष्टै

तवार्यसदृशो पुत्रः स पुत्रः पुरुषोत्तमः किं ते विलपितेनैवं कृपणं रुदितेन वा २ यस्त
वार्य गतः पुत्रस्त्यक्त्वा राज्यं महाबलः साधु कुर्वन्महात्मानं पितरं सत्यवादिनम् ३ शि
ष्टैराचरिते सम्यक् शश्वत्प्रेत्यफलोदये रामो धर्मे स्थितः श्रेष्ठो न स शोच्यः कदाचन
४ वर्तते चोत्तमां वृत्तिं लक्ष्मणोऽस्मिन् सदानघः दयावान्सर्वभूतेषु लाभस्तस्य महात्मनः
५ अरण्यवासे यत् दुःखं जानती वै सुखोचिता अनुगच्छति वैदेही धर्मात्मानं तवात्मज
म् ६

राचरिते धर्मे पितृवाक्यपरिपालनरूपे धर्मे सम्यक् स्थितः सन् हत्त्वा प्राप्तराज्यम पि सत्यवादिनं पितरं साधु सिद्धसंक
ल्पं कुर्वन् गतः वनमिति शेषः स रामो न शोच्य इत्यन्वयः ३ ४ सुसहायसंपत्ते अन शोच्य इत्याह वर्तते चेति उत्तमां वृ
त्तिं पितृतुल्य शुश्रूषा व्यापारं वर्तते वर्तते करोति अत एव तस्य रामस्य लाभः स एवमित्यर्थः ५ अरण्यवासे यद्दुःखं तत्
जानती भर्तृत्तिद्दपरा मत्रापि वैदेह्यप्यनुगच्छति अतः शोकत्वं धर्मात्मानमनुगतस्य भगवतो न दुःखलेशसंग इति रा० १७७
भावः ६

वालवत्सा गौरिव वत्सलाऽहं सिंहेन गौरिव कैकेय्या वत्साद्विवत्सा कृतेति संबंधः १८ यावंतः कल्याणगुणाः संति तावद्गुणैः जुष्टं पुत्रम् १९ कल्प्यते देवेनेति शेषः कल्प्यते इति पाठे विद्यत इत्यर्थः २० दीपयते संतापयति उत्तमप्रभः उत्कटकि

साहं गौरिव सिंहेन विवत्सा वत्सला कृता कैकेय्या पुरुषव्याघ्र बालवत्सेव गौर्बलात्
१८ नहि तावद्गुणैर्जुष्टं सर्वशास्त्रविशारदम् एकपुत्रा विना पुत्रमहं जीवितुमुत्सहे १९
नहि मे जीविते किंचित्सामर्थ्यमिह कल्प्यते अपश्यंत्याः प्रियं पुत्रं लक्ष्मणं च महाब
लम् २० अयं हि मां दीपयते समुत्थितस्तनूजशोकप्रभवो हुताशनः महीमिमां रश्मि
भिरुत्तमप्रभो यथा निदाघे भगवान्दिवाकरः॥२१॥इत्यार्षे रामायणेऽयोध्या॥
कांडे त्रिचत्वारिं शः स॥र्गः॥ ४३॥ विलपंतीं तथा तां तु कौसल्यां प्रमदोत्तमाम्
इदं धर्मे स्थिता धर्म्यं सुमित्रा वाक्यमब्रवीत् १

रणः २१ इति त्रिचत्वारिंशः सर्गः ४३ पुत्रविवास
जनितशोकेन विलपंतीं कौसल्यां सुमित्रा समाश्वासयति विलपंतीमित्यादिना इदं वाक्यमित्यन्वयः॥१॥

इति षष्ठेऽह्नि वरतमानकथा समाप्ताः

११ गोरूपां च धृं १२ १३ उदयाद्यपुधनिहिंत्रिं प्रोत्तुदयामुकुष्यमापुधं धनुर्निस्त्रिंशः खड्गप्रपयेस्तौ १४ कन्याः स्वद्विजातपुष्पे दूर्वेः तत्र कन्यानां सुमनसः पुष्पाणि द्विजानां फलानि च प्रदि प्रांतः प्रतिगृहीत्वा ततः दृष्ट्वा भूत्वा सकलपौरजनो सर्वापके दापु

कदाप्रेक्ष्यनरव्याघ्रावरण्यात्पुनरागतौ भविष्यतिपुरीहृष्टासमुद्र इवपर्वणि ११ कदायो ध्यांमहाबाहुःपुरींवीरःप्रवेक्ष्यति पुरस्कृत्यरथेसीतांवृषभोगोवधूमिव १२ कदाप्रा णिसहस्राणिराजमार्गेममात्मजौ लाजैरवकरिष्यंति प्रविशन्तावरिंदमौ प्रविशंतावरिं दमौ प्रविशंतौकदायोध्यांप्रेक्ष्यामिशुभकुंडलौ उदग्रायुधनिस्त्रिंशौसशृंगाविवप र्वतौ १४ कदासुमनसःकन्याद्विजातीनांफलानिच प्रदिशंतःपुरीहृष्टाःकरिष्यंतिप्रद क्षिणम् १५ कदापरिणतोबुध्यावयसाचामरप्रभः १६अभ्युपैष्यतिधर्मात्मात्रिवर्षइवमां ललन् १६ निःसंशयंमयामन्येपुरावीर कदर्ययापातुकामेनवत्सेषुमातृणांशातिता स्तनाः १७

रीं प्रदक्षिणां करिष्यंति १५ बुध्यापरिणतः ज्ञानेनवृद्धः वयसाचामरप्रभस्तरुणतरः देवानां सदा तरुणत्वात् मामां प्रति त्रिवर्षइव लन्वत् क्रीडां कुर्वन् कदाभ्युपैष्यति १६ कदर्यया क्षुद्रया शातिताः कृताः १७

कैकेय्या कर्त्र्या रामः स्थानाद्राज्याद्यथेप्सितः यथेष्टं पातयित्वा भ्रंशयित्वा पर्वतवाहिता हस्तिना रक्षसां भागस्तत्पादिरूपः इव प्रविद्धः प्रक्षि-
प्तः इतः परं तद्दर्शनमसंभावितं रक्षोभिर्नीतादिति ध्वन्यम् ५ ६ वनेत्वदृष्टदुःखानां प्रदृष्टवतद्दुःखानामित्यर्थः कैकेय्यनुमते

पातयित्वा तु कैकेय्या रामं स्थानाद्यथेप्सितः प्रविद्धो रक्षसां भागः पर्वतीवाहितास्तिना ५ नाग-
राजगतिर्वीरो महाबाहुर्धनुर्धरः वनमाविशते नूनं सभार्यः सहलक्ष्मणः ६ वने त्वदृष्टदुःखा-
नां कैकेय्यनुमते त्वया त्यक्तानां वनवासाय कान्वद्यावस्था भविष्यति ७ ते रत्नहीनास्तरु-
णाः फलकाले विवासिताः कथं वत्स्यन्ति कृपणाः फलमूलैः कृताशनाः ८ अपीदानीं स ।
कालः स्यान्मम शोकक्षयः शिवः सभार्यं यत्सह भ्रात्रा पश्येयमिह राघवम् ९ श्रुत्वैवोप-
स्थितौ वीरौ कदायोध्या भविष्यति यशस्विनी हृष्टजना सूच्छ्रितध्वजमालिनी १० ।

तैरुपस्थितेनेति शेषः त्यक्तानां सीतारामलक्ष्मणानाम् ७ रत्नहीनाः रत्नं स्वजातिश्रेष्ठेपीत्यमरः प्रवरशय्यासनादिहीनास्तस्य-
र्थिः तरु तौ च तरुणी च तरुणाः फलकाले युवावस्थत्वेन राज्यभोगकाले ८ शोकक्षयः शोकस्य क्षयो यस्मिन्सः अ-
पि इदानीं स्यात् इदानीमेव स्यात् यदि राघवं पश्येयमित्युत्कंठोक्तिः ९ उपस्थितौ नगरसमीपमागतौ १० । १०

मातुलस्य च चान्मातामहस्य ॥४॥ प्रत्र वस्त्राभरणादि महार्हवस्तुसमूहे न्यपत्त विंशतिको ऽथ विंशतिकोटि मूल्यानि तद्धर्मा

रमानि च महार्हाणि स्त्राणाभरणानि च ॥ प्रतिगृह्य विशालाक्ष मातुलस्य च दापय ॥४॥ प्र
त्र विंशतिकोट्यस्तु नृपते र्मातुलस्य ते ॥ दशकोट्यस्तु संपूर्णास्तथैव च नृपात्मज ॥५॥ प्रति
गृह्य तु तत्सर्वमनुरक्तः सुहृज्जने ॥ दूतानुवाच भरतः कामैः संप्रतिपूज्य तान् ॥६॥ कच्चित्स
कुशली राजा पिता दशरथो मम ॥ कच्चिच्चारोग्यता रामे लक्ष्मणे वा महात्मनि ॥७॥ आर्या च
धर्मनिरता धर्मज्ञा धर्मदर्शिनी ॥ अरोगा चापि कौशल्या माता रामस्य धीमतः ॥८॥ कच्चित्सु
मित्रा धर्मज्ञा जननी लक्ष्मणस्य या ॥ शत्रुघ्नस्यापि वीरस्य अरोगा चापि मध्यमा ॥९॥ आ
त्मकामा सदा चण्डी क्रोधना प्राज्ञमानिनी ॥ अरोगा चापि कैकेयी माता मे किमुवाच ह ॥१०॥

॥१०॥ [illegible]

तुलस्य ॥५॥ सुहृज्जने मातुलादिरूपे प्रदाय्येति शेषः कामैः अभिमतवस्तुजातैः ॥६॥ अप्यक्रमेण कुशलं पृच्छति राजे
त्यादि ॥७॥८॥९॥ मातुः स्वभावानुवादपूर्वं तस्या आरोग्यं पृच्छति आत्मकामेति आत्मप्रयोजनकामा प्राज्ञमानिनी ॥

रा० वा० ग्रं० हे कौशल्ये त्वां न पश्यामि अतस्त्वं मां पाणिना साधु सम्यक् स्पृश स्पृष्टता ज्ञानेनायमिति भावः कौशल्यादर्शने हेतुमाह राममिति दृष्टिर्दर्शनशक्तिः समनस्का प्रागात्मचिदानंदघने विलीनत्वादन्यत्पदार्थान्तरं न स्पृशतीति परमार्थः ३४ उपो पविश्य शयनसमीपे उपविश्य ३५ इति द्विचत्वारिंशः सर्गः ४२ सन्नं खिन्नम् १ जिह्मतां कौटिल्यरूपं विषं त्यक्त्वा निर्विषा निर्मुक्ता

१७५

न त्वां पश्यामि कौशल्ये साधु मां पाणिना स्पृश ॥ रामं मे ऽनुगता दृष्टिरद्यापि न निवर्त्तते ॥ ३४ ॥ तं राममे वानुविचिंतयंतं समीक्ष्य देवी शयने नरेंद्रम् ॥ उपोपविश्याधिकमार्तरूपा विनिश्वसंतं विललाप कृच्छ्रम् ॥ ३५ ॥ इत्यार्षे रामायणे वाल्मीकीये अयोध्याकांडे द्विचत्वारिंशः सर्गः ॥ ४२ ॥ ततः समीक्ष्य शयने सन्नं शोकेन पार्थिवम् कौशल्या पुत्रशोकार्त्ता तमुवाच महीपतिम् १ राघवे नरशार्दूले विषं त्यक्त्वा हि जिह्मगाम् विचरिष्यति कैकेयी निर्मुक्तेव हि पन्नगी २ विवास्य रामं सुभगा लब्ध कामा समाहिता त्रासयिष्यति मां भूयो दुष्टाहिरिव वेश्मनि ३ अथास्मिन्नगरे रामश्चरन्भैक्षं गृहे वसेत् कामकारो वरं दातुमपि दासं ममात्मजम् ४ प

मुक्तकंचुकी पन्नगीव २ ३ भवतु भरतस्य राज्यवरदानं तथा पि अस्मिन्नेव नगरे रामो भैक्षं चरन् गृहे वसेदिति यदि भूतयावत्तं स्यात् तं वरं दातुं ममापि कामकारः इष्टाचरणं किंच आत्मजं रामं अस्य दासमपि दातुं वरं मम कामकारः इष्टमेव तन्निर्वियोगशोकाभावात् प्राणतोप्यतिप्रियवियोजनदुःखं तु दुःसहमिति भावः ४ रा० ० १७५

नयंतु केचिद् अत्र मनुष्या इति शेषः आश्वासविहाभावः २७ द्वारदर्शिनः द्वारपालाः कौशल्यायाः गृहमनयन् तत्र गृहे तैर्विनीतवत् पर्यंके न्यवेशयत तरजेति शेषः २८ लुलितं कलुषं २९ ३० ३१ येन रोत्तमाः ते कालं तावत्कालपर्यंतं जीविष्यंति

कौशल्यायाः गृहं शीघ्रं राममातुर्नयंतु माम् न ह्यन्यत्र ममाश्वासो हृदयस्य भविष्यति २७
इति ब्रुवंतं राजानमनयन्द्वारदर्शिनः कौशल्यायाः गृहं तत्र न्यवेशयत विनीतवत् २८ ततस्तत्र प्रविष्टस्य कौशल्याया निवेशनम् अधिरुह्यापि शयनं बभूव लुलितं मनः २९ पुत्रद्वयविहीनं च स्नुषया च विवर्जितम् अपश्यद्भवनं राजा नष्टचंद्रमिवांबरम् ३० तच्च दृष्ट्वा महाराजो भुजमुद्यम्य वीर्यवान् उच्चैः स्वरेण प्राक्रोशद्धा राघव जहासि माम् ३१ सुखिता बत तं कालं जीविष्यंति नरोत्तमाः परिष्वजंतो ये रामं द्रक्ष्यंति पुनरागतम् ३२ अथ रात्र्यां प्रपन्नायां कालरात्र्यामिवात्मनः अर्धरात्रे दशरथः कौशल्यामिदमब्रवीत् ३३ रामम मरा

ते सुखिताः पुनरागतं रामं परिष्वजंतो द्रक्ष्यंति अहो भाग्यं तेषामिति शेषः ३२ अथ कौसल्यायाः गृहप्रवेशानंतरं आत्मनः कालरात्र्यामिव संहाररात्र्यामिव रात्र्यां प्रपन्नायां मध्यप्राप्तायाम् ३३

श्वापदानां व्याघ्रादीनां आसमंतान्नर्दितं शब्दं प्राप्य २० सकामा भवेति वक्रोक्तिः विधवात्वे हेतुर्नहीत्यादि २१ अपस्नातः स्नातत्वा
तः अरिष्टं कश्मलमयम् २२ तदेवाह शून्येति शून्या निर्मनुष्या अत्वरा गृहपर्णतभागाः वेश्मान्ता गृहमध्यभागा अस्य सा

अनमिस्तावनानां सा नूनं भयमुपैष्यति श्वापदानर्दितं श्रुत्वा गंभीरं रोमहर्षणम् २० सकामा भव कैकेयि विधवा राज्यमावस नहि तं पुरुषव्याघ्रं विना जीवितुमुत्सहे २१ इत्येवं विलपन् राजा जनौघेनाभिसंवृतः अपस्नात इवारिष्टं प्रविवेश पुरोत्तमम् २२ शून्यचत्वरवेश्मान्तां संवृतापणदेवताम् क्लान्तदुर्बलदुःखार्तां नात्याकीर्णमहापथाम् २३ तामवेक्ष्य पुरीं सर्वां राममेवानुचिंतयन् विलपन्प्राविशद्राजा गृहं सूर्य इवांबुदम् २४ महाह्रदमिवाक्षोभ्यं सुपर्णेन हृतोरगम् रामेण रहितं वेश्म वैदेह्या लक्ष्मणेन च २५ अथ गद्गदशब्दस्तु विलपन्वसुधाधिपः उवाच मृदु मंदार्थं वचनं दीनमस्वरम् २६

संवृतापणा देवता पिहितापणा देवता गृहा

क्लान्ताः दुःखार्ता अजनाय स्पां नात्याकीर्णाः अत्येतप्राणिसंमर्दरहितो महापन्था यस्यां तां अनेन संचार रहिताः सर्वे राममनुगता
इति द्योत्यते २३ २४ सुपर्णेन हृतोरगो महाह्रदमिवेति रिपूर्णानि भयप्रवेशद्योतकमुपमानं २५ मृदुमंदोच्चाराणाते अश्रुत्व

मंदार्थं अश्रुपूर्णं दीनं प्रोच्चं स्वरं गद्गद कंठध्वनिरहितम् २६

निवत्स्य निवत्स्य पुनः पुनरित्यर्थः रथवर्त्मनि सीदतः रथमार्गदर्शनेच्छि रूपतः मत्तस्यागूढगाति १२ पुत्रेन नगरांतेन गरवा हृदये प्रांञ्जा
प्रमत्वा १३ १४ वीज्यमानः चामरव्यजनादिभिरिति शेषः महार्हाभिः उत्तमरूपालंकारवतीभिः १५ क्वचिन्नदीतीरा

निवत्स्यैव निवत्स्यैव सीदतो रथवर्त्मनि राज्ञो नातिविभो रूपं मत्तस्यां ऽऽमतो यथा १२ विलप्याप
सदुःखार्त्तः प्रियं पुत्रमनुस्मरन् नगरांतमनुप्राप्य बुध्वा पुत्रमथाब्रवीत् १३ वाहनानां च मु
ख्यानां वहतां तं ममात्मजम् पदानि पथि दृश्यन्ते स महात्मा न दृश्यते १४ यः सुखेषूपधाने
षु शेते चंदनरूषितः वीज्यमानो महार्हाभिः स्त्रीभिर्मम सुतोत्तमः १५ स नूनं क्वचिदेवाद्य
वृक्षमूलमुपाश्रितः काष्ठं वा यदि वाश्मानमुपधाय शयिष्यते १६ उत्थास्यति च मेदिन्याः कृ
पणः पांसुगुंठितः विनिःश्वसन् प्रस्रवणात् करेणूनामिवर्षभः १७ द्रक्ष्यंति नूनं पुरुषा दीर्घ
बाहुं वनेचराः राममुत्थाय गच्छंतं लोकनाथमनाथवत् १८ सा नूनं जनकस्येष्टा सुता सुखसदो
चिता कंटकाक्रमणक्लांता वनमद्य गमिष्यति १९

दो ग्र प्रमापाषाणाः १३ वेदितुं त्यादिरा हित्येन कृपणाः
व प्रस्रवणात् गिरिस्थ्यादिश देशात् १७ अनाथवद् गच्छंतमित्यन्वयः १८ सुखस्य सदा नुचिता त्ता दृश्यपि कंटके ध्वाक्रमतो न पदवि

निवसनिवसत्पुनः पुनरित्यर्थः रथवर्त्मसु सीदतः रथमार्गदर्शनेच्छिः नृपतेः गतत्रपा नह्यपि १२ पुत्रेन नगरान्तेन गत्वा यद्देशं प्राप्तवान् १३ १४ वीज्यमानः चामरव्यजनादिभिरिति शेषः महार्हाभिः उत्तमरूपाभिः कामवतीभिः १५ क्वचिन्नदीतीरा

निवसेवनिवसेवसीदतो रथवर्त्मसु राज्ञो नातिवभौ रूपं मत्तस्यान्द्रुमतोयथा १२ विलप्य सदुःखार्तः प्रियपुत्रमनुस्मरन् नगरान्तमनुप्राप्तं बुध्वापुत्रमथाब्रवीत् १३ वाहनानां च मुख्यानां वहतां तं ममात्मजम् पदानि पथि दृश्यन्ते समहात्मा न दृश्यते १४ यस्सुखेषूपधाने षु प्रोतेचन्दनरूषितः वीज्यमानो महार्हाभिः स्त्रीभिर्ममसुतोत्तमः १५ सनूनं क्वचिदेवाद्य वृक्षमूलमुपाश्रितः काष्ठं वा यदि वाश्मानमुपधाय प्रशयिष्यते १६ उत्थास्यति च मेदिन्याः कृपणः पांसुगुण्ठितः विनिश्वसन्प्रस्रवणात्करेणूनामिवर्षभः १७ द्रक्ष्यन्ति नूनं पुरुषा दीर्घ बाहुं वनेचराः राममुत्थाय गच्छन्तं लोकनाथमनाथवत् १८ सा नूनं जनकस्येष्टा सुता सुखसदो चिता कण्टकाक्रमणक्लान्ता वनमद्य गमिष्यति १९

दोषः प्रमापापाराः १३ वदितुत्पादित हिते न कृपराः व प्रस्रवणात् गिरिप्रस्रवादिदेशात् १७ अनाथवदगच्छन्तमिति सम्बन्धः १८ सुखस्पसदानुचिता ताता दृष्टपि कं टके व्याक्रमतो न पदवि

रा० वा० अ०
१७३

न केवलं त्वयि संबंधाभावः त्वत्संबंधिष्वपि मम संबंधो नास्तीत्याह नाहं तेषामित्यादि श्लोकः ७ न केवलमैहिकव्यव हारस्त्यागः किंतु पारलौकिकस्यापीत्याह अग्रहत्तामिति प्रचते पापां अग्रहत्तो य चत्वामग्नि प्रवेशताय प्रदक्षिणाम नयं तत्सर्वं अस्मिन् लोके पाणिग्रहणसाध्य क्रीडादि परलोके ऽग्निहोत्रादिसाध्य स्वर्गादि च अहं तु जानामि न जानामि ८ तमश्र

ये च त्वामनुजीवंति नाहं तेषां न ते मम केवलार्थपरां हि त्वां त्यक्ष धर्मीत्सजाम्यहम् ७ अगृग
हत्तोय चते पापामग्निप्रवेशनं पेषत्त अहं तु जानामि तत्सर्वमस्मिंल्लोके परत्र च ८ भर
तश्चेत्प्रतीतः स्याद्राज्यं प्राप्येत तदव्ययम् पत्नेमद्यापि त्रिपर्वमामांत हतमागमत् ९ अ
परे राज्ञः समुद्वृत्तं समस्त्यानराधिपम् प्रवर्त्तते तदा देवी कौशल्या शोककर्षिता १० हत्वेव
बाह्नरं कामात्स्य ज्ञानिमिव पाणिना अपन्नत्प्रत धर्मात्मापृच्छतेचिंत्यतापसम् ११ रामामा

वासानंतरं कैकेयी संपादितराज्यस्यानेन भरतेन तुष्टेत्यमरत्वानिश्चित्याह भरत इति भरतः राज्यं प्राप्य प्रतीतः स्यान् संतुष्टः स्याच्चेत्ततो रामः० १७३
मे मरणानंतरं पि त्रिपर्वमेतद्राज्यं मामां अगमत् मा प्राप्नोतित्यर्थः ९ राज्ञः समध्वस्तं विलंठनादुज्जोव्यात्पर्वत्ततरा
जा सहेति श्लोकः १० बधापोतिना निस्य ज्ञास्वकर्त्ते कदोषरात पीडयानंतसो भवति तपापकृतमेतदुःखमित्यनुतापः ॥

निर्यतनिर्गच्छतस्तस्य रामस्य संबंधि रजः तेन रूपं यावद्दृश्यत तावद्दृशात्मचक्षुषी न संजहार न निवर्तितवान् २ देवराम रघोत्तम इति
क्रीडास्थानत्वप्रपन्नेवासीदित्यर्थः १ यावद्विप्रियं पुत्रं राजा पश्यति रघुधूलिदर्शनद्वारेति शेषः तावत्तत्र दर्शनेन निमित्तं धरण्यामपि
तोस्य देहो व्यवर्द्धते उत्थायास्थित एवाभूदित्यर्थः २ रजसोप्यदर्शनेन तच्छरीरं पतितमभूदित्याह न पश्यतीति रामस्य संबंधि

यावत्तु निर्यतस्तस्य रजोरूपमदृश्यते नैवेक्ष्वाकुवरस्तावत्संजहारात्मचक्षुषी १ यावद्राजा प्रियं पुत्रं पश्यत्यत्यन्तधार्मिकम् तावद्यावर्धते वास्य धरण्यां पुत्रदर्शने २ न पश्यति रजोप्यस्य यदा रामस्य भूमिपः तदार्तश्च विषण्णश्च पपात धरणीतले ३ तस्य दक्षिणमन्वागात्कौसल्या बाहुमङ्गना वामं चास्यान्वगात्पार्श्वं कैकेयी भरतप्रिया ४ तां नयेन च संपन्नो धर्मेण विनयेन च उवाच राजा कैकेयीं समीक्ष्य व्यथितेन्द्रियः ५ कैकेयि मामकाङ्गानि मा स्प्राक्षीः पापनिश्चये नहि त्वां द्रष्टुमिच्छामि न भार्या न च बान्धवी ६ श्रीरामाय नमः सीतारामाय

जः रामरघोः तेरजः स्पर्शः ३ कौसल्या पतितं तं तमुत्थाप्य तस्य दक्षिणं बाहुं धृत्वा अन्वागात् तस्य पुत्रं प्रतिसिद्धे वत्सासार कैकेयी
त्वस्य वामपार्श्वमेव तातोस्यां परमवैरस्यात् ४ तेदेवाह तामिति नयेन नीत्या विनयेन सदाचारेण ५ न च बान्धवीं धूनोसीह

४ टी० वाल्मी० रा० अ० सर्गः ४२ पत्र ३

पूर्वं तु केवाचित्तल्पस्तानोहर्षमासीत्तस्मितितु सर्वोप्यहृष्टः १६ १७ सत्ताः अनर्थिनोः नपुत्रिणोऽवमभवन मातापित्रोरिति शेषः तथास्त्रीणां भर्तारो नर्थिनो भ्रातरश्च भ्रातृणामनर्थिनो १ भवन २ प्रतः सर्वे सर्वे परित्यज्य रामं एव सर्वे बांनीवं

वाष्पपर्याकुलमुखो राजमार्गगतो जनः न हृष्टोऽलक्ष्यते कश्चित्सर्वः शोकपरायणः १६ न वाति पवनः शीतो न शशी सौम्यदर्शनः न सूर्यस्तपते लोकं सर्वं पर्याकुलं जगत् १७ अनर्थिनः सुतास्त्रीणां भर्तारो भ्रातरस्तथा सर्वे सर्वं परित्यज्य राममेवान्वचिंतयन् १८ ये तु रामस्य सुहृदः सर्वे ते मूढचेतसः शोकभारेण चाक्रांताः शयनं नैव भेजिरे १९ ततस्त्वयोध्यारहिता महात्मना पुरंदरेणेव मही सपर्वता चचाल घोरं भयशोकदीपिता सनागयोधाश्वगणा ननाद च॥ २०॥ इत्यार्षे रामायणे अयोध्याकांडे एकचत्वारिंशः सर्गः॥ ४१॥

धुः किमन्यैरिति ते मे वान्वचिंतयन्विस्य र्थः १८ १९ पुरंदरेणारहिता सपर्वता मही सया चलति तस्य त्रिलोकीपतित्वात् तथा रामेणारहिता अयोध्या च चाल रक्षका भावाद् दुःखादाक्रंदे चेत्यर्थः २० इत्येकोचत्वारिंशः सर्गः ४१

ग्रहस्थितिबुधादपि

त्रिशंकुर्देवलोकादिकस्थः लोहितांगो भौमः गुरुः बुधौ अन्ये सर्वे ग्रहाः शनिश्चरादयः सोममभ्येत्य वक्रगत्या सोमं समाक्रम्य दारुणाः
सर्वे व्यवस्थिताः १० गता चीर्णिस्मिके स्वाभाविके कोतीति ग्रहाः प्राग्यादयः वि प्रारवाः विमार्गस्थाः से धूमा अवनमंदि सि

त्रिशंकुर्लोहितांगश्च धूमाश्चनपिदारुणाः सोममभ्येत्य ग्रहाः सर्वे व्यवस्थिताः १० नक्षत्रा
णि गतार्चींषि ग्रहाश्च गततेजसः विप्राश्च सधूमा अवनभसि प्रचकाशिरे ११ का।
लिकानिलवेगेन महोदधिरिवोत्थितः तमेव वनं प्रव्रजितेन नागरं प्रचचाल तत् १२ दिशः पर्या
कुलाः सर्वास्तिमिरेणैव संवृताः न ग्रहो नापि नक्षत्रं प्रचकाशे न किंचनः १३ अकस्मा
न्नागरः सर्वो जनो दैन्यमुपागमत् आहारे वा विहारे वा न कश्चिदकरोन्मनः १४ शोक
पर्यायसंततः संततं दीर्घमुच्छ्वसन् अयोध्यायां जनः सर्वश्चुकोप जगतीपतिम् १५

शंपते ११ कालिकामेघपंक्तिः अनिलवेगेन आकाशे उत्थितः उदधिरिव दृश्यते नगरं प्रचचाल व्यसनातिशयात् कंपि
तमभूत् १२ ग्रहो न नक्षत्रमिति नाससेकवचनं किंचन सप्तर्षि ध्रुवमंडलादिकं च न प्रचकाशे स्पष्टः १३ अकस्मा स
दैन्ये हेतुकारणाभावेपि दैन्यादधिकं दैन्यं अप्राप्तवान् इत्यादिः १४ शोकपर्यायसंततः शोकपरंपरासंततः प्रतिज्ञापालनरूप
धर्मवत्यपि कोपयुक्तः १५
दैन्यं रामवियोग

४ वनं गन्तुमिति शेषः अस्य जनस्येत्युक्त्वा किं विशिष्य कथनेन सर्वस्य जगतः परित्रातेति भगवत्स्वरूपज्ञायाः कस्याश्चिदुक्तिः ५ अहो पनि श्चेतनो बुद्धिहीनो राजा यतो जीवलोकस्य प्राणिमात्रस्य संप्रियं आधारत्वेनाभिमतं रामं वनवासे वनवास

कैकेय्या याचमानस्ते जाया या मातरि वर्तते तथा यो वर्तते स्मासु महात्मा क्वनु गच्छति ४ कैकेय्या क्लिश्यमानेन राज्ञा संचोदितो वनम् परित्राता जनस्यास्य जगतः क्वनु गच्छति ५ अहो नि श्चेतनो राजा जीवलोकस्य संप्रियम् धर्म्यं सत्यव्रतं रामं वनवासे प्रवत्स्यति ६ इति सर्वा महि ष्यस्ता विवत्सा इव धेनवः रुरुदुश्चैव दुःखार्ताः सस्वरं च विचुक्रुशुः ७ स तमन्तःपुरे घोरे मार्त्तशब्दं महीपतिः पुत्रशोकाभिसंतप्तः श्रुत्वा चासीत्सुदुःखितः ८ नाग्निहोत्राण्यहू यन्त सूर्यश्चान्तरधीयत व्यसृजन्कवलान्नागा गावो वत्सान्न पाययन् पुत्रं प्रथमजं दृष्ट्वा जन नी नाभ्यनन्दत ९

निमित्तं प्रवत्स्यति प्रवासयति ६ ७ ८ नाहूयन्त अग्निहोत्राणि अभीष्टदुःखादिति शेषः अन्तरधीयत तमव्यसनात दृष्टुं प्रपततापादिव मन्त्रोषेसत्यपि अन्तर्हितोऽभूत अकालेदुर्दिनमभूदिति शेषः व्यसृजन्नत्यक्तवन्त नागा गजाः नपाययन् नापापयन् अत्र भावश्लोकः ९

भ्नः श्रोचति ननु नेमामिति प्राप्तं इहागतं सन्नाम्य मूर्ध्नि मिति शेषः ॥३०॥ परिमार्जति परिमार्ष्टि ॥३१॥ आख्याहि आगतमिति शेषः ॥३२॥
धर्मं जानतः आर्यस्य श्रेष्ठस्य विवेकिनः पुरुषस्येत्यर्थः ज्येष्ठो ज्येष्ठ भ्राता पिता भवति अतस्तस्य पादौ ग्रहीष्यामि यतः स इदा

ननु नेमां महाराजः प्राप्तं जानाति कीर्तिमान् ॥ उपजिघ्रेद्धि मां मूर्ध्नि तातः सन्नाम्य सत्वरम् ॥३०॥ कृ
तपाणेः सुखस्पर्शस्तातस्याक्लिष्टकर्मणः ॥ येन मां रजसा ध्वस्तमभीक्ष्णं परिमार्जति ॥३१॥ यो
मे भ्राता पिता बन्धुर्यस्य दासोस्मि धीमतः ॥ तस्य मां शीघ्रमाख्याहि रामस्याक्लिष्टकर्मणः ॥३२॥
पिता हि भवति ज्येष्ठो धर्ममार्यस्य जानतः ॥ तस्य पादौ ग्रहीष्यामि स हीदानीं गतिर्मम ॥३३॥ ध
र्मविद्धर्मनित्यश्च महाभागो दृढव्रतः ॥ आर्ये किमब्रवीद्राजा पिता मे सत्यविक्रमः ॥३४॥ पश्चि
मं साधु संदेष्टुमिच्छामि श्रोतुमात्मनः ॥ इति पृष्टा यथातत्त्वं कैकेयी वाक्यमब्रवीत् ॥३५॥
रामेति राजा विलपन्हा सीते लक्ष्मणेति च ॥ स महात्मा परं लोकं गतो गतिमतां वरः ॥३६॥३६॥

नीं गतिर्ममेति शेषः ॥३३॥३४॥ पश्चिमं संदेशं अन्त्यकालिकं ॥३५॥ विलपन्परलोके गतः न तु केचित्संदेशमवोचदित्यर्थः ॥३६॥

एतन्निमित्तं उक्तस्वप्नदर्शनहेतुना ।१९। भयस्थानं भयप्रकारतां उपधारये अवशतो बिभर्मि छायां कांतिं अपगतापूर्वरूपेस्य
क्षवती मलिनेत्यर्थः ।२०। आत्मानं जुगुप्सन्निवति छामित्तत्कारणं च न पश्यामीत्यर्थः ।२१। पुराचितर्कितां पूर्वमविचा
रितां अनेकरूपां दुःस्वप्नगतिं निशाम्याहि दुःस्वप्नंस्मृत्वाहि । अचिंत्यदर्शनम संभाव्यदर्शनं राजानं विचिंत्यमहन्मदयं मेह

एतन्निमित्तं दीनोहं न वचः प्रतिपूजये ॥ अव्यती वचसे कंठो न स्वस्थमिव मे मनः ॥१९॥ न पश्यामि भयस्थानं भयं चैवोपधारये ॥ भ्रष्टश्च स्वरयोगो मे छाया चोपहता मम ॥२०॥ जुगुप्सन्निव चात्मानं न च पश्यामि कारणम् ॥२१॥ इमां हि दुःस्वप्नगतिं निशाम्य तामनेकरूपामवितर्कितां पुरा ॥ भयं महत्तद्धृदयान्न याति मे विचिंत्य राजानमचिंत्यदर्शनम् ॥२२॥ इत्यार्षे रामायणे अयोध्याकांडे एकोनसप्ततितमः सर्गः ॥ ६९ ॥ भरते ब्रुवति स्वप्नं दूतास्ते क्लांतवाहनाः ॥ प्रविश्यासह्यपरिघं रम्यं राजगृहं पुरम् ॥१॥ समागम्य च राज्ञा ते राजपुत्रेण चार्चिताः ॥ राज्ञः पादौ गृहीत्वा च तमूचुर्भरतं वचः ॥२॥ पुरोहितस्त्वां कुशलं प्राह सर्वे च मंत्रिणः ॥ त्वरमाणश्च निर्याहि कृत्यमात्ययिकं त्वया ॥३॥

दयान्न यातीत्यर्थः ।२२। इत्येकोनसप्ततितमः सर्गः ।६९। असह्यो दुःसहः परिघः प्रदेशः वृत्तिप्राकारः य
त्र समूहो यस्य तत् ।१। राज्ञा केकयेन राजपुत्रेण युधाजिता समागम्य यथोचितव्यवहारं कृत्वा ताभ्यामर्चिताः राज्ञः स्वामिनो यस्य भरत
स्य पादौ गृहीत्वा नमस्कृत्य तं भरतं वच ऊचुः ।२। आ
त्ययिके कालात्तिक्रमासहे कृत्यमस्तीति शेषः ।३।

सर्वैर्गुणैरुपपन्नं शास्त्रसंमतं पुरागमनं बोधकं तेषाममात्यानां च योनि ग्रामस्य सभार्यो राजा तं सत्तमी दमाद्यो व्यवस्थितः तत्रैवा
वस्थितोऽभूत् ५९ इति चत्वारिंशः सर्गः ४० इदानीं परमानंदरूपस्य परमब्रह्मास्पदत्वात्तत्प्राप्तिनिमित्तः सर्वज्ञा श्लो
क ३ च्यते तस्मिन्निति भारतवेद्यि तपि ज्ञ देशेन कृतांजलौ तस्मिन्निष्क्रामति नगरान्निर्गच्छति सति श्रेतः पुरे स्त्रीणामाते

ते शोव चः सर्वैर्गुणोपपन्नं शस्त्रिवन्नागात्रः प्रविष्ट सा रूपः ॥ नि ग्राम्यराजा रूपराः सभार्यो व्यव ॥
स्थितस्तत्र तस्मीदमाद्यः ॥ ५९ ॥ इत्यार्षे रामायणे अयोध्याकांडे चत्वारिंशः सर्गः ॥ ४० ॥
तस्मिंस्तु पुरुषव्याघ्रे निष्क्रामति कृतांजलौ आर्तशब्दो हि संजज्ञे स्त्रीणामंतःपुरे महा
न् १ अनाथस्य जनस्यास्य दुर्बलस्य तपस्विनः यो गतिः शरणं चासीत् स नाथः क्व नु गच्छ
ति २ न क्रुध्यत्यभिशस्तोऽपि क्रोधनीयानि वर्जयन् क्रुद्धान्प्रसादयन् सर्वान् समदुःखः क्व
गच्छति: ३

शब्दो महान् जज्ञे १ तदेवाह अनाथस्येति तपस्विनः शोच्यस्य गतिः सकलसुखावाप्तिहेतुः शरणं सर्वापद्भ्यो रक्षिता: २
अभिशस्तः मिथ्याभिशंसनेन शापितोऽपि क्रोधनीयानि प्रजाक्रोधकराणि वर्जयन् क्रुद्धान् सर्वान् प्रसादयन् स्वयं न क्रुध्य
ति समदुःखः सर्वैः क्व नु गच्छतीत्यन्वयः ३

चक्रयोर्वृत्तसेनयोरंतरास्थितः उदासीनः पुरुष इव सुमंत्रस्यात्मा मनः दोलायितो बभूव ४६ राजवचनातिक्रमे महानपराधः स्यादित्यत आह नेति दुःखस्य इदानीम् अनुभूयमानदुःखस्य चिरं चिरकालावस्थानं पापिष्ठं अतिदुःसहमिति हेतोः राज्ञा उपालब्धो पिनाश्रौषमिति पश्चाद्वक्ष्यसि अतः शीघ्रं गच्छेति रामः सुमंत्रमब्रवीत् ४७ तं जनं स्वस्वव्रजतो जनं अनुज्ञाप्य रामेणानुज्ञातोशपथ

तिष्ठेति राजा चुक्रोश याहि याहीति राघवः सुमंत्रस्य बभूवात्मा चक्रयोरिव चांतरा ४६ नाश्रौषमिति चात्मानमुपालब्धोपि वक्ष्यसि चिरं दुःखस्य पापिष्ठमिति रामस्तमब्रवीत् ४७ रामस्य च वचः कुर्वन्ननुज्ञाप्य च तं जनम् व्रजतोपि हयान्शीघ्रं चोदयामास सारथिः ४८ संन्यवर्तत जनो राजा रामं कृत्वा प्रदक्षिणं मनसाप्यश्रुवेगैश्च न न्यवर्तत मानुषम् ४९ यमिच्छेत्पुनरायांतं नैनं दूरमनुव्रजेत् इत्यमात्या महाराजमूचुर्दशरथं वचः ५०

रामेणानुज्ञाता व्रजतोपि व्रजतो गच्छतोपि पुनः शीघ्रं शीघ्रगे सर्पिः ४८ रक्तोजनः राजसंबंधीजनः स्वकीयजनः उपजीविजन स्वरामं प्रदक्षिणं कृत्वा न्यवर्तत देहमात्रेणेति शेषः किंतु मनसाप्यश्रुवेगैश्च न न्यवर्तत मानुषं तत्पौरजनस्तु देहेन मनसाप्यश्रुवेगैश्च न स न्यवर्ततेति योजना ४९ उत्कटदिदृक्षावतो राज्ञस्तु रक्षिवचनान्निवृत्तिरित्याह यमिच्छेदिति ५०

पाशेन निबद्धः किशोरो बालो ऽश्वो मातरं यथा न पश्यति एवं धर्मपाशेन संयुक्तः प्रकाशं नाभ्युदैक्षत संकुचितदृष्टिर्न व्यापारो बभू
व वेत्यर्थः ४० दृष्ट्वा रामः पितरं वीक्षितेति शेषः ४१ दुःखजं दुःखेन जायते ऽस्मादिति तादृशं पितुर्मातुश्च दर्शनं सहितुं तीषस
हेति वेद दुःखितो पितरौ द्रष्टुं न शक्नुवन्नित्यर्थः तोत्रं अंकुशं तत्सदृशी उक्तिः द्विपो यथा स्वव्यथं स्वतुदर्शनाच्छक्नुवन् केकेयी

निवद्धस्य पाशेन किशोरो मातरं यथा धर्मपाशेन संक्लिष्टः प्रकाशं नाभ्युदैक्षत ४० पदाति
नौ च यानार्हावदुःखार्हौ सुखोचितौ दृष्ट्वा संचोदयामास शीघ्रं याहीति सारथिम् ४१ न
हि तत्पुरुषव्याघ्रो दुःखजं दर्शनं पितुः मातुश्च सहितुं शक्तस्तोत्रार्दित इव द्विपः ४२ प्र
त्यगारमिवायान्ती वत्सला वत्सकारणात् बद्धवत्सा यथा धेनू राममाताभ्यधावत ४३ त
था रुदन्तीं कौशल्यां रथं तमनुधावतीम् क्रोशन्तीं राम रामेति हा सीते लक्ष्मणेति च ४४
रामलक्ष्मणसीतार्थं स्रवन्तीं वारि नेत्रजम् असकृत्प्रैक्षत तदा नृत्यन्तीमिव मातरम् ४५

वाक्यमेवाङ्कुशः ४२ प्रत्यगारं प्रति वत्सकारणात् आयान्ती वत्सला बद्धवत्सा धेनुर्यथा धावति एवं राममाता अभ्यधा
वत राममभ्यगादिति शेषः ४३ ४४ रामलक्ष्मणसीतार्थं तद्वियोगजं शोकजं नेत्रजं वारि स्रवन्तीं नृत्यन्तीमिवेतस्त
तः परिभ्रमंतीं मातरं असकृत्प्रैक्षत राम इति शेषः ४५

अभ्यवहितं अवसिक्तम ३३ रुदिताश्रुपरिद्यूनं अश्रुत्साहवत् हाहाकृतं हाहाकारवत् अचेतनं मूढम् ३४ नयनैः नयनेभ्यः आयासंसंभवं दुःखजनितं चलितैः चलितेभ्यः तिर्य्यग्भूतेभ्यः पंकजेभ्यः सलिलमिव ३५ एकचित्तगतं दुःखेनैकचित्त

निर्गच्छति महाबाहौ रामे पौरजनाश्रुभिः पतितैरभ्यवहितं प्रशशाम महीरजः ३३ रुदिताश्रुपरिद्यूनं हाहाकृतमचेतनम् ॥ प्रयाणे राघवस्यासीत्पुरं परमपीडितम् ३४ सुस्राव नयनैः स्त्रीणामस्रमायाससंभवम् मीनसंक्षोभचलितैः सलिलं पंकजैरिव ३५ दृष्ट्वा तु नृपतिः श्रीमानेकचित्तगतं पुरम् निपपातेव दुःखेन कृत्तमूल इव द्रुमः ३६ ततो हलहलाशब्दो जज्ञे रामस्य पृष्ठतः नराणां प्रेक्ष्य राजानं सीदन्तं भृशदुःखितं ३७ हा रामेति जनाः केचिद्राममातेति चापरे अंतःपुरं समृद्धं च क्रोशंतं पर्यदेवयन् ३८ अन्वीक्षमाणो रामस्तु विषण्णं भ्रांतचेतसम् राजानं मातरं चैव ददर्शानुगतौ पथि ३९

तोपगतम् ३६ सीदंतं मूर्छितं ३७ अंतःपुरसमृद्धं अंतःपुरसहितं क्रोशंतं राजानं दृष्ट्वा केचिन्नरा हा रामेति केचिद्धा राममातरिति पर्यदेवयन् अप्रुरुचुः राममातेति संबोधिताः ३८ अन्वीक्षमाणः पश्चादीक्षमाणो रामः मातरं पितरं चानुगतौ ददर्शेति संबंधः ३९

मेरुमर्कप्रभा यथेति सूर्यस्य प्रादक्षिण्येन मेरुगमनमिति सर्वदा तस्यामेरुसंबंधोस्त्येव २८ यस्त्वं भ्रातरं परिचरिष्यसि सत्वं सिद्धा
र्थः कृतार्थः २५ तदेवाह महत्येषेत्यादि अभ्युदयः ऐहिकः २६ २७ २८ करेणूनां तत्पालक बद्धे करिणीनाम् २९

कृतकृत्या हि वैदेही छायेवानुगता पतिम् न जहाति रता धर्मे मेरुमर्कप्रभा यथा २४ अहो लक्ष्मण
सिद्धार्थः सततं प्रियवादिनम् भ्रातरं देवसंकाशं यस्त्वं परिचरिष्यसि २५ महत्येषा हि ते बुद्धिरेष
चाभ्युदयो महान् एष स्वर्गस्य मार्गश्च यदेनमनुगच्छसि २६ एवं वदंतस्ते सोढुं न शेकुर्बा
ष्पमागतम् नरास्तमनुगच्छंतः प्रियमिक्ष्वाकुनंदनम् २७ अथ राजा वृतः स्त्रीभिर्दीनाभिर्दी
नचेतनः निर्जगाम प्रियं पुत्रं द्रक्ष्यामीति ब्रुवन् गृहात् २८ शुश्रुवे चाग्रतः स्त्रीणां रुदंतीनां
महास्वनः यथा नादः करेणूनां बद्धे महति कुंजरे २९ पिता हि राजा काकुत्स्थः श्रीमान्सन्नस्तदा ब
भौ परिपूर्णः शशी काले ग्रहेणोपप्लुतो यथा ३० स च श्रीमानचिंत्यात्मा रामो दशरथात्मजः सू
तं संचोदयामास त्वरितं वाह्यतामिति ३१ रामो याहीति तं सूतं तिष्ठेति स जनस्तदा उभयं नाश
कत्सूतः कर्तुमध्वनि चोदितः ३२

सन्नः खिन्नः ग्रहेण राहुणा ३० अचिंत्यात्मा प्राकृतजनैरचिंत्यस्वरूपः ३१
सूतमिति याहीति प्रेषः उभयं नाशकत् एवं च नाति मंदं नाति वेगमवाहयदित्यर्थः ३२

१७ चिररात्रायेत्यस्यायं चिरकालावस्थित्यर्थमित्यर्थः नगरे विद्यमानस्य सर्वस्य तत्र च्छस्य बलस्य ग्र भ्वाजादेर्मूर्च्छा जनस्य तिर्यग्जंतु रूपस्य च मूर्च्छा च भूवेत्यर्थः १८ तद्देव प्रपेच पतितं तदिति तत्पुरं समाकुलं रतिकं तं भ्रान्तमूढं च ततः संभ्रान्तं रामानुगमनायत्वरा युक्तं मत्तं

सीतातृतीयानारूढान् दृष्ट्वा रथमचोदयत् सुमंत्रः संमतानश्वान्वायुवेगसमान्जवे १७ प्रयाते तु महारण्यं चिररात्राय राघवे बभूव नगरे मूर्छा बलमूर्छा जनस्य च १८ तत्समाकुलसंभ्रांतं मत्तसंकुपितद्विपम् हयसिंजितनिर्घोषं पुरमासीन्महास्वनम् १९ ततः सबालवृद्धा सा पुरी परमपीडिता राममेवाभिदुद्राव घर्मार्ता सलिलं यथा २० पार्श्वतः पृष्ठतश्चापि लंबमानास्तदुन्मुखाः बाष्पपूर्णमुखाः सर्वे तमूचुर्भृशनिस्वनाः २१ संयच्छ वाजिनां रश्मीन् सूत याहि शनैः शनैः मुखं द्रक्ष्याम रामस्य दुर्दर्शं नो भविष्यति २२ आयसं हृदयं नूनं राममातुरसंशयम् यद्देवगर्भप्रतिमं वनं याति न भिद्यते २३

रामवियोगेन संकुपिता द्विपा यस्मिन् हयानां परितापातिशयेन रक्तितं च द्वत्तं सिंजितेन भूषणशब्देन निर्घोषो ध्वनिर्यस्मिन् ग्र तत्पुरं महास्वनं आसीत् १९ २० लंबमानाः रथैकदेशमाश्रित्येति शेषः तेषु संभ्रम २१ २२ देवगर्भप्रतिमे देवकुमारसदृशे यो याति गच्छति इति २३

पत्र पुद्दू प्राप्राप्तो मां व द्यसे नियोजयसि तं दे शांक्षिप्रं प्राप्य प्यामि नेव रजन्यो वस्त्र व्यमिति शेषः ११ कृतलत्राह चतुर्दशेति यानि चतुर्दश वर्षाणि वने वस्तव्यानि तानि उपक्रमितव्यानि प्रारंभणीयानि यतो देव्या कैके यया प्रचोदि व वनं गच्छेति प्रेरितो सि १२ दृष्टेन चेतसेत्स्य नेनाति रामन उत्साह मित्य र्थो गम्यः प्राकृनोतनितः १३ ज्वलनसंकाशं प्रापुधपूर्णत्वादिति भावः १४

रथमारोहयन्देवीं राजपुत्र महायशाः दिव्यं यो प्राय प्रियां यामि सत्रं सा रामवक्षसे ११ चतुर्दश हि वर्षाणि वस्तव्यानि वने त्वया तान्युपक्रमितव्यानि दिव्या[illegible]सि चोदितः १२ तं रथं सूर्यसंकाशं सीता हृष्टेन चेतसा आरुरोह वरारोहा कृत्वालंकारमात्मनः १३ अथो ज्वलनसंकाशं चामीकरविभूषितम् तमारुरुहतुस्तूर्णं भ्रातरौ रामलक्ष्मणौ १४ वनवासं हि संख्याय वासांस्याभरणानि च भर्तारमनुगच्छन्त्यै सीतायै श्वशुरो ददौ १५ तथैवायुधजालानि भ्रातृभ्यां कवचानि च रथोपस्थे प्रविन्यस्य सचर्म कठिनं च तत् १६

यानि

वनवासमित्यादि श्लोकत्रयमेकं वाक्यं श्वशुरो दशरथः सीतायै यानि वासांस्याभरणानि ददौ तानि रथोपस्थे प्रविन्यस्य तथैव भ्रातृभ्यां राम लक्ष्मणाभ्यां आनीतान्यायुधजालानि कवचानि सचर्म यत् नद्धं पेटकं कठिनं खनित्रं च तत्सर्वं रथोपस्थे रथमध्ये प्रविन्यस्य निक्षिप्य रथमारूढा सीता रथोपरि तस्याः पश्चात् तौ आरुरुहतुरिति वा वदेदित्यन्वयः १५ १६ १६

इदं ज्येष्ठानुवर्तनरूपं धर्मान्तरमप्याह दानमिति ७ वनवासे पितृमातृपरिजनस्मरणेन मनःखेदं च त्वं मा भूदितीति तत्रैव पित्रादिभाव मुपदिशति राममिति राममितिरामं दशरथं पितरं विद्धि जनकात्मजां मां मातरं विद्धि अटवीं अयोध्यां विद्धि यद्वा रामं दशरथं दशातीति दशाः पक्षीरथो यस्य तं दशरथं विष्णुं विद्धि दशाः पक्षी विहंगमः इति हलायुधः जनकात्मजां मां लक्ष्मीं विद्धि अटवीं अयोध्यां अपराजिताख्यां वैकुंठनगरीं विद्धि देवानां पूरयोध्येति तैत्तिरीयक श्रुते यद्वा रामं दशरथं च विद्धि

इदंहिवृत्तमुचितंकुलस्यास्यसनातनम् दानंदीक्षाचयज्ञेषुतनुत्यागोमृधेषुहि ज्येष्ठस्यानुवृत्तिश्चराजवंशप्रसन्नतानाम् ७ रामंदशरथंविद्धिमांविद्धिजनकात्मजाम् अयोध्याम् अटवींविद्धिगच्छतातयथासुखम् ८ लक्ष्मणंत्वेवमुक्त्वासासंसिद्धंप्रियराघवम् सुमित्रा गच्छगच्छेतिपुनःपुनरुवाचतम् ९ ततःसुमन्त्रःकाकुत्स्थंप्राञ्जलिर्वाक्यमब्रवीत् विनीतोविनय
ज्ञश्चमातलिर्वासवंयथा १०

अयोध्यायां तत्संपर्केसहर्षेः मां च जनकात्मजां च विद्धि गुणान्तराविरोधाच्च यः मदपेक्षया सीतेति हितपरेसर्षेः अयोध्यां च विद्धि अटवीं च विद्धि एतन्नगरापेक्षया वनमेव रामकैकेयी कौसल्यानन्तपोत्कृष्टमिति भावः यद्वा दशरथं रामवत्परं तेति विद्धि मां जनकस्य पितुराज्ञां जां विद्धि कैकेयी विवासितस्यापि तुर्गृहवर्तिनीं विद्धि इति भावः अयोध्याम् अटवीं विद्धि निर्जनेयं भविष्यतीति भावः एवं ज्ञात्वा रामपादावनुचरन् यथासुखं गच्छेति भावः ८ प्रसोत्सुमित्राएवेत्थं पुत्रे लक्ष्मणात्कात्सासंसिद्धं वनंगन्तुं निश्चितमनस्कं प्रिय

उपसंगृह्य पादग्रहणपूर्वकं प्रणम्य दीनाः वृद्धयोर्मातापित्रोः शुश्रूषापालनं त्यक्त्वेति दीनाः १ समनुज्ञाप्य कृतानुमतिकं कृत्वा शोकसंमू
ढो मातृदुःखदर्शनात्सर्व २ अन्वक्षं अनुपदं रामेण कौसल्या वंदनानंतरं भ्रातुः जननीमिति शेषः कौसल्यामभ्यवादयत् पुनर्मा

अथ रामश्च सीता च लक्ष्मणश्च कृतांजलिः उपसंगृह्य राजानं चक्रुर्दीनाः प्रदक्षिणम् १ तं
चापि समनुज्ञाप्य धर्मज्ञः सह सीतया राघवः शोकसंमूढो जननीमभ्यवादयत् २ अन्व
क्षं लक्ष्मणो भ्रातुः कौसल्यामभ्यवादयत् अपि मातुः सुमित्राया जग्राह चरणौ पुनः ३
तं वंदमानं रुदती माता सौमित्रिमब्रवीत् हितकामा महाबाहुं मूर्ध्न्युपाघ्राय लक्ष्मणम् ४
सृष्टस्त्वं वनवासाय स्वनुरक्तः सुहृज्जने रामे प्रमादं मा कार्षीः पुत्र भ्रातरि गच्छति ५ व्यस
नी वा समृद्धो वा गतिरेष तवानघ एष लोके सतां धर्मो यज्ज्येष्ठवशगो भवेत् ६ ६ ६ ९

तुः सुमित्रायाः अपिनाऽन्यासां च ३ ४ अवसृष्टः सुहृज्जने स्वनुरक्तोऽपि त्वं मया वनवासाय सृष्टोऽनुमतः वनं गच्छति भ्रातरि रामे प्र
मादं मा कार्षीः रामसेवायामनवधानतां मा कुरु विसर्पः ५ कनिष्ठस्य ज्येष्ठानुवर्तनं परमधर्म इत्युपदिशन्त्याह व्यसनी
ति ६

रा०वा०अ०
१६६

अभिनीतार्थे निर्णीतार्थे त्रयः शतानि त्रीणि शतानि शतार्धं च संख्यया संता: त्रेस्त्रयस्त्रादेश आर्षः एवंभूताः मातरस्मादृशः अ वेद्ध्यविविच्य ददर्शेतिस्पष्टः तयामातरभ्यतं ददर्शेरिति विपरिणामः ३६ तथैव कौशल्या वदेवार्त्तीस्ताभ्योद्दुःप्रतिरदेजगाद ३७

एतावदभिनीतार्थमुक्त्वा स जननीं वचः त्रयः शतशतार्धा हि ददर्शावेक्ष्य मातरः ३६ ताश्चापि स तथैवार्ता मातॄर्दशरथात्मजः धर्मयुक्तमिदं वाक्यं स जगाद कृतांजलिः ३७ संवासात्परुषं

सर्गः

किंचिदज्ञानादपि यत्कृतम् तन्मे समनुजानीत सर्वा मामंत्रयामि वः ३८ वचनं राघवस्यैतत् धर्मयुक्तं समाहितम् शुश्रुवुस्ताः स्त्रियः शोकोपहतचेतसः ३९ जज्ञेथ तासां सन्नादः क्रौंचीनामिव निस्वनः मानवेंद्रस्य भार्याणामेवं वदति राघवे ४० मुरजपणवमेघघोषवद्दशरथवेश्माबभूव यत्पुरा विलपितपरिदेवनाकुलं व्यसनगतं तदभूत्सुदुःखितम् ॥ ४१ इत्यार्षे रामायणे वाल्मीकीये अयोध्याकांडे एकोनचत्वारिंशः सर्गः ॥ ३९ ॥

संवासात् एकत्र सहवासात् किंचिद्यत्परुष

[illegible] तेस्पष्टः ३८ समाहिते धीर ३९ अथ राम वचः श्रवणानंतरं सन्नादः शो
मुक्तं अज्ञानाद्वापि यत्कृतं तत्तन्मे समनुजानीत क्षांतमिति मनुजो कुत्तेस्पष्टः
कजः शब्दः ४० मुरजो मृदंगः पणवा वाद्यमेघश्च मेघो वा तद्वि शेषः मुरजपणावमेघघोषवत् विलपितानि रामगमने केकयी दुर्गुणाश्रुतिपा
दकवाक्यानि यस्मिन् तत्परिदेवनेरोदनेतेन व्याकुलं व्यसनगतं प्राते वियोगे ४१ इत्येकोनचत्वारिंशः सर्गः ३९ राम० १६६

औपवाह्यस्य राजवाहनस्य विषाणो दंतः ज्वलिता अग्नयो ऽकस्माच्छांता दृष्टा ॥१२॥ अवदीर्णां विदीर्णां ॥१३॥ कृष्णाश्च

औपवाह्यस्य नागस्य विषाणं शकलीकृतम् ॥ सहसा चापि संशांता ज्वलिता जातवेदसः ॥१२॥ अवदीर्णां च पृथिवीं शुष्कांश्च विविधान्द्रुमान् ॥ अहं पश्यामि विध्वस्तान्सधूमांश्चैव पर्वतान् ॥१३॥ पीठे कार्ष्णायसे चैनं निषण्णं कृष्णवाससम् ॥ प्रहसंति स्म राजानं प्रमदाः कृष्णपिंगलाः ॥१४॥ रथेन खरयुक्तेन प्रयातो दक्षिणामुखः ॥ त्वरमाणश्च धर्मात्मा रक्तमाल्यानुलेपनः ॥१५॥ प्रहसंतीव राजानं प्रमदा रक्तवासिनी ॥ प्रकर्षंती मया दृष्टा राक्षसी विकृतानना ॥१६॥ एवमेतन्मया दृष्टमिमां रात्रिं भयावहाम् ॥ अहं रामो ऽथवा राजा लक्ष्मणो वा मरिष्यति ॥१७॥ नरो यानेन यः स्वप्ने खरयुक्तेन याति हि ॥ अचिरात्तस्य धूमाग्रं चितायां संप्रदृश्यते ॥१८॥

६ पिंगलाश्च प्रमदाः ॥१४॥१५॥ रक्तवासिनी रक्तवस्त्रा प्रहसंतीव ॥१६॥ इमां रात्रिं अस्यां रात्रौ प्राप्य एवमेतद् दृष्टं अहं मरिष्यामीति विपरिणामः ॥१७॥ दुष्टदुःस्वप्नफलं निगमयति नर इत्यादि धूमाग्रं धूमशिखा ॥१८॥

स्वमसज्जनेनस्वसतीजनेनसमानं पितुंसमानांकर्तुं आर्यानार्हति नाहमत्वेनसमर्था २८ विद्यतेवाद्नसमर्थीऽस्तिगमनसमर्थास्ति च क्रोधः शान्ताप्नजेति वर्ष्मश्रीहि: शान्तपुत्रा २९ अमितस्येति कामाक्षिकसकलसुखस्य कर्मणो यष्ट्रो ३० एवंगता भर्तापरमपूज्यइति ज्ञानवती श्रेष्ठा श्रुतधर्मपरावराम्बिष्टाभ्यः पूज्याभ्यः स्वश्रूमातृप्रमुखाभ्यः श्रुतः परावरः सामान्यविशेषरूपोधर्मोयया साकिमन्व

नमामसज्जनेनार्यासमानपितुमर्हति धर्माद्विचलितुंनाहमलंचंद्रादिवप्रभा २८ नातंत्रीविद्यते वीणानाचक्रोविद्यतेरथः नापतिःसुखमेधेतयास्यादपिशतात्मजा २९ मितंददातिहिपितामि तंभ्रातामितंसुतः अमितस्यतुदातारंभर्तारंकानपूजयेत् ३० साहमेवंगताश्रेष्ठाश्रुतधर्मपराव रा आर्येकिमवमन्येयंस्त्रीणांभर्ताहिदैवतम् ३१ सीतायावचनंश्रुत्वाकौशल्याहृदयंगमम् शु द्धसत्वामुमोचाश्रुसहसादुःखहर्षजम् ३२ तांप्रांजलिरभिक्रम्यमातृमध्येतिसत्कृताम् रामःपरमध र्मात्मामातरंवाक्यमब्रवीत् अंबमादुःखिताभूत्वापश्यत्वंपितरंमम त्वयोपिवनवासस्यक्षिप्रमेवभविष्य ति ३४ सुप्तायास्तेगमिष्यन्तिनववर्षाणिपंचच समग्रमिहसंप्राप्तंमांद्रक्ष्यसिसुहृद्वृतम् ३५ ३५।

मन्येयंकस्मादवमंस्यामि ३१ शुद्धसत्वासत्वगुणाढ्या दुःखहर्षजंरामाद्यरण्यगमनप्रयुक्तं दुःखंसीतावाक्यश्रवणेनचहर्षः ३२ अभिक्र म्यप्रदक्षिणीकृत्य अतिसत्कृतांसर्वजनैरितिशेषः ३३ वनवासस्य वनवासकालस्य ३४ सुप्तायास्वचतुर्दशघटिकावद्गमिष्यन्तिसम

कुलंप्रशस्तकुले कृतंउपकारः विद्यासद्विद्या दत्तंभूषणादिदाने संग्रहःदुःखेपिदेशिस्वीकारः एतत्सर्वमपिस्त्रीणामसतीनांहृद
यंनगृह्णातिपापवृत्तेर्नप्रतिवभाति कुलाद्युचितंकृत्यंपश्चेकृत्वालोकगर्हितएवकृत्येमोहात्प्रवर्त्तन्तेकृत एवमतआहअ
नित्यहृदयाहिताः अव्यवस्थितचित्ताइत्यर्थः २३ साध्वीनांतुपतिव्रतानांतुशीलेसच्चरित्रेसत्येसत्यवचनेश्रुतेगुरुजनोपदे

नकुलंनकृतंविद्यांनदत्तंनापिसंग्रहः स्त्रीणांगृह्णन्तिहृदयमनित्यहृदयाहिताः २३ साध्वीनां
तुस्थितानांतुशीलेसत्येश्रुतेस्थिते स्त्रीणांपवित्रंपरमंपतिरेकोविशिष्यते २४ सत्वयानाव
मंतव्यःपुत्रःप्रव्राजितोमम तवदेवसमस्त्वेषनिर्धनःसधनोपिवा २५ विज्ञायवचनंसीतातस्या
धर्मार्थसंहितम् कृतांजलिरुवाचेदंश्वश्रूमभिमुखेस्थिताम् २६ करिष्येसर्वमेवाहमार्या
यदनुशास्तिमाम् अभिज्ञास्मियथाभर्तुर्वर्तितव्यंश्रुतंचमे २७

शेस्थितेस्वकुलोचितमर्यादावस्थिते एवंविधस्थि
तानांस्त्रीणांपरमंपवित्रंउत्तमपुण्यसाधनंपतिरेकएवअतःपतिरेवस्त्रीणांसर्वसाधनेभ्योविशिष्यते २४ ततःकिमतःआह
सइतिदेवसमःदेवतुल्यःएषःपतिः २५ धर्मार्थसंहितंधर्मरूपप्रयोजनसहितम् २६ यथाभर्तुःभर्तृविषयेवर्तितव्यंतथाअभिज्ञा
स्मिकिंचतथाश्रुतंस्वमातापितृभ्यामितिशेषः २७

उद्यतः उदयं प्राप्नुवतः काले प्रातःकाले अनेन लेप्रातोपि विवादरहितत्वं तस्याः सूचितम् १८ कृपणां अनाचरन्तीं सदाचाररहिताम् १९
सततं प्रियैः सत्कृता अपि विनिपातगतं दुःखगतं भर्तारं याः स्त्रियः ता नानुमन्यन्ते ताः सर्वलोके इह परत्र च असत्यः अप्रशस्ता खेन गणिताः
२० नारीणां प्रकृतत्वात् सतीनामेष स्वभावो पि पतिपुरा अनापद अवस्थायां सुखं भर्तृदत्तमनुभूय तस्य अल्पामप्यापदं दारिद्र्यरोगादिलक्ष

महाराज एवं तु वैदेही वेश्मतत्सुविभूषिता उद्यन्तीं श्रुमतः काले खे प्रभेव विवस्वतः १८ तां भुजाभ्यां परि
ष्वज्य श्वश्रूर्वचनमब्रवीत् अनाचरन्तीं कृपणां मूर्ध्न्युपाघ्राय मैथिलीम् १९ असत्यः सर्वलोकेऽ॥
स्मिन्सततं सत्कृताः प्रियैः भर्तारं नानुमन्यन्ते विनिपातगतं स्त्रियः २० एष स्वभावो नारीणामनुभूय पुरा
सुखम् अल्पामप्यापदं प्राप्य दुष्यन्ति प्रजहत्यपि २१ असत्यशीला विकृता दुर्गा अहृदयाः सदा यु
वत्यः पापसंकल्पाः क्षणमात्रविरागिणः २२

णां प्राप्य दृष्ट्वा भर्तारं दुष्यन्ति दूषयन्ति नाना दूषणप्रयुक्तत्वेन वदन्ति ने
ताव देव प्रजहत्यपि २१ असत्यशीलाः असत्यवचनशीलाः विकृताः विकारोपेता ईर्ष्यादिव्यापाराः क्षणमात्रविरागिणः क्षणमा
त्रेणासक्तानुरागाः अविश्वसनीयस्नेहा इति यावत् ऽभिभाव आर्षः विरागिणः इत्यर्थः ताः असत्य इति विशेषणम् २२ २२२२

रा० वा० अ०
१६४

यौपवाह्यं उपवाह्यत्वमार्हो यद्युक्तं प्रधानर्हमित्यर्थः १० साधुर्वीरो रामः पित्रा च वनं निर्वास्यत इति यत् एवमेव गुणवतां गुणानां फलमुच्यते शास्त्रेति मन्ये इति दुःखातिप्रायोक्तिः ११ १२ रथमाचचक्षे रथ उपस्थित इत्युक्तवान् १३ सर्वतः शु

यौपवाह्यं रथं योऽस्त्वमायाहि हयोत्तमैः प्रापयैनं महाभागमितो जनपदात्परम् १० एवं मन्ये गुणवतां गुणानां फलमुच्यते पित्रा मात्रा च यत्साधुर्वीरो निर्वास्यते वनम् ११ राज्ञो वचनमाज्ञाय सुमंत्रः शीघ्रविक्रमः योजयित्वाययौ तत्र रथमश्वैरलंकृतम् १२ तं रथं राजपुत्राय सूतः कनकभूषितम् आचचक्षेंजलिं कृत्वा युक्तं परमवाजिभिः १३ राजा सत्वरमाहूय व्यापृतं वित्तसंचये उवाच देशकालज्ञो निश्चितं सर्वतः शुचिम् १४ वासांसि च वरार्हाणि भूषणानि वराणि च वर्षाण्येतानि संख्याय वैदेह्याः क्षिप्रमानय १५ नरेंद्रेणैवमुक्तस्तु गत्वा कोशगृहं ततः प्रायच्छत्सर्वमाहृत्य सीतायै क्षिप्रमेव तत् १६ सा सुजाता सुजातानि वैदेही प्रस्थिता वनम् भूषयामास गात्राणि तैर्विचित्रैर्विभूषणैः १७

चिं इहामुत्रान्यत्रो वित्तसंचये कोशगृहे व्यापृतं धनाध्यक्षं निश्चितं यावदवस्थितं वस्तु तद्विषयज्ञानयुक्तम् १४ एतानि वर्षाणि चतुर्दश वर्षाणि १५ क्षिप्रमेव एकदैव १६ सुजाता श्रेष्ठयोनिजा सुजातानि सामुद्रिकोक्तलक्षणैर्वस्तुसंजातानि गात्राणि सन्त्ययः १७ रा०म० १६४

नत्र सचेत्य तद्दुःखं नाशक्नोत् २ ३ विवत्साः धेनवः इति शेषः ४ न विद्यते तत्प्राप्तिर्न ६ प्रपतेः प्रतः न त्वेवेति जाने ५ तापसाना
माच्छादः प्रावरणं छाद नेपथ्यं यस्य ता ६ प्रमात्मजे पश्यामि यत्तस्य मे मृत्युर्न विद्यते इत्यन्वयः ६ ७ मां निकृतिं वरलक्षणां प्राप्य संश्रि

कैनं दुःखेन संतप्तः प्रत्यवेक्षत राघवम् न चैनमभिसंप्रेक्ष्य प्रत्यभाषत दुर्मनाः २ स मुहूर्तमिवासंज्ञो दुः
खितश्च महीपतिः विललाप महाबाहू रामम् एवानुचिंतयन् ३ मन्ये खलु मया पूर्वं विवत्सा बहवः
कृताः प्राणिनो हिंसिता वापि तस्मादिदमुपस्थितम् ४ न त्वेवानागते काले देहाच्च्यवति जीवितम्
कैकेय्या क्लिश्यमानस्य मृत्युर्मम न विद्यते ५ योऽहं पावकसंकाशं पश्यामि पुरतः स्थितम् विहाय
वसने सूक्ष्मे तापसाच्छादमात्मजम् ६ एकस्याः खलु कैकेय्याः कृतेऽयं क्लिश्यते जनः स्वार्थे प्रय
तमानायाः संश्रित्य निकृतिं त्विमाम् ७ एवमुक्त्वा तु वचनं बाष्पेण पिहितेंद्रियः रामेति सकृदेवोक्त्वा
व्याहर्तुं न शशाक ह ८ संज्ञां तु प्रतिलभ्यैव मुहूर्तात्स महीपतिः नेत्राभ्याम् अश्रुपूर्णाभ्यां सुमंत्रमिदमब्र
वीत ९

संश्रित्य स्थितायाः स्वार्थे प्रयतमानायाः कैकेय्याः कृते कैकेयीनिमित्तं अयं जनः क्लिश्यते इत्यन्वयः ७ ८ नेत्राभ्यां उपलक्षितः ९

एवं ब्रुवति सीताय पाप्तवं गच्छेति ब्रुवति संप्रस्थितः गतेऽप्रवृत्तः १४ १५ प्रधानपत्नीत्वेन भूयः अभ्यधिकं संमन्तुं संमानकर्तुं १६ मां संत्यक्तेयं तीव्रपुत्रशोके प्रधानं कृत्वा न प्राप्नुयात् यथा जीवेत तथा संमन्तुमर्हसीति पूर्वेणान्वयः १७ हेमहेन्द्रोपम स्माज्जातगर्धि

एवं ब्रुवति पितरं रामः संप्रस्थितो वनम् अवाक्छिरसमासीनमिदं वचनमब्रवीत् १४ इयं धार्मिक कौशल्या मम माता यशस्विनी वृद्धा चाक्षुद्रशीला च न च त्वां देव गर्हते १५ मया विहीनां वरद प्रपन्नां शोकसागरम् अदृष्टपूर्वव्यसनां भूयः संमन्तुमर्हसि १६ पुत्रशोकं यथा न छेत् त्वया पूज्येन पूजिता मां हि संचिन्तयन्ती यमपि जीवेत् तपस्विनी ॥१७॥ इमां महेन्द्रोपम जातगर्धिनीं तथा विधातुं जननीं ममार्हसि ॥ यथा वनस्थे मयि शोककर्शिता न जीवितं न्यस्य यमक्षयं व्रजेत् ॥ इत्यार्षे रामायणे अयोध्याकाण्डेऽष्टत्रिंशः सर्गः ॥ ३८ ॥ रामस्य तु वचः श्रुत्वा मुनिवेषधरं च तम् समीक्ष्य सह भार्याभी राजा विगतचेतनः १

नीं संजातमहेन्द्रीनोत्कटाभिलाषवतीं मम जननीं तथापि धातुमनुग्रहीतुमर्हसि यथाव नस्थे मयि शोककर्शिता जीवितं न्यस्य त्यक्त्वा यमक्षयं यमगृहं न व्रजेदिति संबन्धः १८ इत्यष्टत्रिंशः सर्गः ३८ विगतचेतनम् अभूदिति शेषः १

कोपेतरामायराघमभ्युपेत्याहरामेरोति य प्रशोभनमपराधः वैदेह्यासीतयातेतवकः अपकारः दर्शितः संपादितः ८ ९ एवंची
रादिवैशिष्ट्योनरामवनगमनेतेसकलनरकानुभवायपर्याप्तं रुमिवपिछ्ठपरौरनिर्वाप्यदुःखप्रदैः सीताप्रव्राजनादिरूपैः त्वया
कृतैः किमनुभविष्यसीतिनजानेरतिशेषः १० अभिषेकाय्रमया कृतनिश्चयं पश्चात्तत्प्रतिषेधेसतिइहागतंरामंप्रतिजटाचीर

रामेरापदितेपापेकिंचित्कृतमशोभनम् अपकारःकरहतेवैदेह्यादर्शितोधमे ८ मगीवोसुकृत्वनय
नामदुष्टशीलामनस्विनी अपकारंकिमिवत्तेकरोतिजनकात्मजा ९ ननुपर्याप्तमेतत्तेपापेरामवि
वासनम् किमेभिःकृपरौर्भूयःपातकैरपितेकृतैः १० प्रतिज्ञातंमयातावत्त्वयोक्तंदेविपश्यतत्तारा
मंयदभिषेकायत्वमिहागतमब्रवीः ११ तत्वेतत्समतिक्रम्यनिरयंगन्तुमिच्छसि मैथिलीमपियाहि
त्वमीक्षसेचीरवासिनीम् १२ इतीवराजाविलपन्महात्माशोकस्यनांतंसददर्शकिंचित् भृशातुरत्वा
चपपातभूमौतेनैवपुत्रव्यसनेनमग्नः १३

धरोवनंगच्छेतियदाकामब्रवीः त्वयोक्तंतच्छ्रुत्वारावत्तामयाचत्तावदे
वरामममविवासनमाक्षमेवप्रतिज्ञातंनतुसीतामव्राजनमित्यर्थः ११ एतत्तस्योक्तंतदाप्रतिवासनमप्यतिक्रम्यअधिकप्रवासानिरयं
गंतुमिच्छसिकोसोमदतिक्रमइत्यत आह मैथिलीमिति यात्वंहिःयस्मात्मैथिलीमपिचीरवासिनीम इक्षसे वीक्षसितस्मान्नि

रा० टी० अयो० स० ३७ ४३

रो

तेन प्रणादेन जनाक्रोशेन स्वद्धामाद्यम २३ ४ कस्यापि किंचित्कै तिष्ठपितु नेत्यर्थः किंचिद्वाज्य प्रतिवेधादि विसंज्ञाप्रप
रिचिन्ता श्रम गौवमि इकींव श्रमु तेवमितिवेदचेति धातुः ५ अपास्यात त्यजेत मममयान दत्तपूर्वी नानुमत पूर्वी ६ प्रजा

तेन तत्र प्रणादेन दुःखितः स महीपतिः चिच्छेद जीविते श्रद्धां धर्मे यशसि चात्मनः २ स निश्वस्यो
ष्णमैक्ष्वाकस्तां भार्यामिदमब्रवीत् कैकेयि कुशचीरेण न सीता गन्तुमर्हति ३ सुकुमारी च बा
ला च सततं च सुखोचिता नेयं वनस्य योग्येति सत्यमाह गुरुर्मम ४ इयं हि कस्यापकरोति किंचित्तप
स्विनी राजवरस्य पुत्री या चीरमासाद्य जनस्य मध्ये स्थिता विसंज्ञा श्रमणीव काचित् ५ चीराण्य
पास्याज्जनकस्य कन्या नेयं प्रतिज्ञा मम दत्तपूर्वा यथासुखं गच्छतु राजपुत्री वनं समग्रा सह सर्वर
त्नैः ६ अजीवनार्हेण मया नृशंसा कृता प्रतिज्ञा नियमेन तावत् त्वया हि बाल्यात्प्रतिपन्नमेतत्तन्मां द
हेद्वेणुमिवात्मपुष्पम् ७

वनार्हेण मुमूर्षुणा मया नृशंसाप्रतिकूला प्रतिज्ञा त्वया प्रार्थितेन कृता नीतिति नियमेन शपथपूर्वकं प्रदर्शितेन्द्वेशः सूच्यते त्वया
हि बाल्यात अज्ञानात एतत सीता चीर नयनं प्रतिपन्नं मारप्यं एवात एव च तितत्व वैधव्यं प्राप्तं मेमां दहेन्नाशयेत् वेणुं आत्मपुष्पमिव ७

पादपांश्चेति किमुवक्तव्यं मनुष्यानिति शेषः ३३ एवं वसिष्ठोभाष्यमाणोनुत्का श्रुहतमनुष्यप्रमुपदिशातिश्यपेति शवि धीमतेतिरका
रस्लोपश्चार्षः दानेपुज्यतेइत्यर्थः ३४ दानप्रोप्यत्वमुप पादयतिएकसेति इति कर्मेश्चलंकारव्यापारः सनियोपस्याः तावस

दृष्ट्वास्य दैवकैके यि पश्यव्यालम्भा जाह्निजान॥ ततः सहरामेणा पादपाश्च्यतदन्मुखान॥३३॥ अथोत्त
मान्याभरणानि दे विदेहि स्नुषाव्य पनीयचीरम॥ न चीरमस्याः प्रविधीयतेतिन्यवारयत्त द्वसनं वसि
ष्ठः॥३४॥ एकस्य रामस्य वने निवासस्त्वया वृतः केकयराजपुत्रि॥ विभूषितेयं प्रतिकर्मनित्या वसत्वर
ण्ये सह राघवेण॥३५॥ यानैश्च मुख्यैः परिचारकैश्च सुसंवृता गच्छतु राजपुत्री॥ वस्त्रैश्च सर्वैः सहि
तैर्विधानैर्नेयं वृता ते वरसंप्रदाने॥३६॥ तस्मिंस्तथा जल्पति विप्रमुख्ये गुरौ नृपस्याप्रतिमप्रभावे॥
नैव स्म सीता विनिवृत्तभावा प्रियस्य भर्तुः प्रतिकारकामा॥३७॥ इत्यार्षे रामायणे सप्तत्रिंशः सर्गः॥३७॥
तस्याः चीरं वसानाया नाथवत्या मनाथवत् प्रचुक्रोश जनः सर्वो धिक् त्वां दशरथं त्विति १ राम॥

ष

तु स्वभर्तुः प्रख्यापार्थं ३५ विधानैः ३५ करणौः ३६ प्रतिकारमा भर्तुः तयोर्वेषादिभिरनुकारं कामयमानास्तीचीरपरिग्रहाद्वि
निवृत्तभावा नैव बभूव स्म ३७ इति सप्तत्रिंशः सर्गः ३७ तद्दृष्ट्वा नेतर्गता यामो दृश्यमानिषध्यव हारमनिवारयंस्तु स्मोतिषतीति

क्षेत्रपालाः २३ द्वांतरक्षकाः ३ उपजीव्यजीवनसाधनं तेन सहितं राष्ट्रं सपरिच्छदं दासीदासादिसहितं पुरं चप्राप्स्यति २६ भरतः
पूर्वजमनुवत्स्यतीति तस्य द्रष्टाव वैस्थ्ये वत्स्यास्यति २७ पादपैः सहत्यमनेनाटवीभूतामिति घोसते २८ २९ सर्वे ये वत्तव चभरतराज्य

क्षेत्रपालाश्च प्राप्स्यंति सदारो मत्रराघवः सहोपजीव्यं राष्ट्रं च पुरं च सपरिच्छदम् २६ भरतश्च सश
त्रुघ्नश्चीरवासा वनेचरः वने वसंतं काकुत्स्थमनुवत्स्यति पूर्वजम् २७ ततः शून्यां गतजनां वसु
धां पादपैः सह त्वमेका शाधि दुर्वृत्ता प्रजानामहिते रता २८ नहि तद्भविता राष्ट्रं यत्र रामो न भू
पतिः तद्वनं भविता राष्ट्रं यत्र रामो निवत्स्यति २९ न ह्यदत्तां महीं पित्रा भरतः शास्तुमर्हति त्वयि वा
पुत्रवद्वस्तुं यदि जातो महीपतेः ३० यद्यपि त्वं क्षितितलाद्गगनं चोत्पतिष्यति पितृवंशचरित्रज्ञः
सोऽन्यथा न करिष्यति ३१ तत्त्वया पुत्रगर्धिन्या पुत्रस्य कृतमप्रियम् लोके नहि स विद्येत यो न राममनुव्र
तः ३२

यथासौ व्यर्थस्ताह नहीति श्वदत्तां प्रीतिपूर्वकमदत्ताम् यदि त्वं सत्संदिग्धे सत्यद्यवचने यदि वेदाः प्रमाणामिति वत्त ३०
पितृवंशाचरितं ज्येष्ठे विद्यमाने कनिष्ठस्य राज्यानर्हत्वरूपतज्ज्ञः ३१ पुत्रगर्धिन्या पुत्रराज्याभिलाषवत्या ३२।

केचित्तुदूतिकुर्वन्तोवीणादिवादयंति अपरेतुलास्यंवदंतीतिमुख्यप्रयोगात्लासयंतिनर्तयंतिविशेषः अपरेहास्यानिहास्यरसप्रधानानि
विविधानिनाटकान्याहुः ।४। गोष्ठी हास्यानिगोष्ठीसभातदुचितानिहास्यानिनर्माणीति ।५। प्रियसखः अत्यंतप्रियः नानुमोद

वादयंतितदाशांतिंलासयंत्यपरेतथा ॥ नाटकान्यपरेप्राहुर्हास्यानिविविधान्यपि ॥४॥ सतैर्म
हात्माभरतःसखिभिःप्रियवादिभिः ॥ गोष्ठीहास्यानिकुर्वद्भिर्नप्राहृष्यतराघवः ॥५॥ तमब्र
वीत्प्रियसखोभरतंसखिभिर्वृतम् ॥ सुहृद्भिःपर्युपासीनःकिंसखेनानुमोदसे ॥६॥ एवंब्रुवाणं
सुहृदंभरतःप्रत्युवाचह ॥ शृणुत्वंयन्निमित्तंमेदैन्यमेतदुपागतम् ॥७॥ स्वप्नेपितरमद्राक्षं
मलिनंमुक्तमूर्धजम् ॥ पतंतमद्रिशिखरात्कलुषेगोमयेह्रदे ॥८॥ प्लवमानश्चमेदृष्टःसत
स्मिन्गोमयह्रदे पिबन्नंजलिनातैलंहसन्निवमुहुर्मुहुः ॥९॥ ततस्तिलोदनंभुक्त्वापुनःपुनरधः
शिराः ॥ तैलेनाभ्यक्तसर्वांगस्तैलमेवावगाहत ॥१०॥ स्वप्नेपिसागरंशुष्कंचंद्रंचपतितंभुवि
उपरुद्धांचजगतींतमसेवसमावृताम् ॥११॥

सेनानादोतिप्रोषः ।६।७।८।९। अभ्यवगाहततैलेततःप्रथमःस्वप्नः ।१०।
तमसासमावृतामिवउपरुद्धांतिरोहिताम् ।११।

१८ तिष्ठतु भवत्त्वेवेति शेषः हि यद्यपि धर्मनित्यस्त्वं इदानीं स्वयं स्थातुं नेच्छसि तथापीयं तिष्ठतु १९ तुल्यशीलया अनेनैव कृत
नगरस्थितिवासी तया प्रेरितः सन् चीरं बबंध इत्यन्वयः २० २१ अतिप्रवृत्ते अतीतमर्यादे न प्रमाणोऽवस्थितेव २२ रामस्य प्रकृत

वल्कलानि न सहाये न वनं गच्छस्व पुत्रक नेयमर्हति कल्याणी वस्तुं तापसवद्वने १८ कुरु नो याचनां
पुत्र सीता तिष्ठतु भामिनी धर्मनित्यः स्वयं स्थातुं न हीदानीं त्वमिच्छसि १९ तासामेवंविधा वाचः शृ
ण्वन् दशरथात्मजः बबंधैव तदा चीरं सीतया तुल्यशीलया २० चीरे गृहीते तु तया समीक्ष्य नृप
तेर्गुरुः निवार्य सीतां कैकेयीं वसिष्ठो वाक्यमब्रवीत् २१ अतिप्रवृत्ते दुर्मेधे कैकेयि कुलपां
सनि वंचयित्वा तु राजानं न प्रमाणेऽवतिष्ठसे २२ न गंतव्यं वनं देव्या सीतया शीलवर्जिते अनु
ष्ठास्यति रामस्य सीता प्रकृतमासनम् २३ आत्मा हि दाराः सर्वेषां दारसंग्रहवर्तिनाम् आत्मेयमिति रा
मस्य पालयिष्यति मेदिनीम् २४ अथ यास्यति वैदेही वनं रामेण संगता वयमत्रानुयास्यामः पुरं चेदं गमि
ष्यति २५

मासनं प्रस्तुतपदे राज्यमित्यर्थः अनुष्ठास्यति राज्यं करिष्यति यावद्रामागमनमित्यर्थः २३ कुतः स्त्रिया राज्यानुष्ठानमत आ
ह आत्मा हीति दाराः संग्रहवर्तिनां गृहस्थानां भर्तुर्दाराः आत्मैव आत्मनो पत्नीति श्रुतेः २४ अथ यद्यास्यति चेत्तर्हि वयं ध्या
दिति शेषः २५

रा०वा०अ०
१६०

अथात्मपरिधानार्थं सीतादत्तं चीरं सीता समीक्ष्य वागुरां समीक्ष्य पृषती मृगीव संत्रस्ता बभूव ९ व्यपत्रपमाणेव लज्जमानेव कैकेय्याः कुश
चीरे प्रगृह्य सुदुर्मनाश्च अश्रुपूर्णनेत्रा गन्धर्वराजप्रतिमं भर्तारमब्रवीत् १० ११ अकुशला चीरबन्धनेऽनिपुणा सा मुमोह १२

अथात्मपरिधानार्थं सीता कौशेयवासिनी समीक्ष्य चीरं संत्रस्ता पृषती वागुरामिव ९ सा व्यपत्रपमाणेव प्रगृह्य च सुदुर्मनाः कैकेय्याः कुशचीरे ते जानकी शुभलक्षणा १० अश्रुसंपूर्णनेत्रा च धर्मज्ञा धर्मदर्शिनी गन्धर्वराजप्रतिमं भर्तारमिदमब्रवीत् ११ कथं नु चीरं बध्नन्ति मुनयो वनवासिनः इति ह्यकुशला सीता सा मुमोह मुहुर्मुहुः १२ कृत्वा कण्ठे स्म सा चीरमेकमादाय पाणिना तस्थौ ह्यकुशला तत्र व्रीडिता जनकात्मजा १३ तस्यास्तत् क्षिप्रमागम्य रामो धर्मभृतां वरः चीरं बबन्ध सीतायाः कौशेयस्योपरि स्वयम् १४ रामं प्रेक्ष्य तु सीतायाः बध्नन्तं चीरमुत्तमम् अन्तःपुरचरा नार्यो मुमुचुर्वारि नेत्रजम् १५ ऊचुश्च परमायत्ता रामं ज्वलिततेजसम् वत्स नैवं नियुक्तेयं वनवासे मनस्विनी १६ पितुर्वाक्यानुरोधेन गतस्य विजनं वनम् तावद्दर्शनमस्या नः सफलं भवतु प्रभो १७

१३ १४ १५ परमायत्ताः परमखिन्नाः एवं वक्ष्यमाणरूपेण नियुक्ता न १६ विजनं वनं
गतस्य यावदागमनं तावदस्या दर्शनं नोऽस्माकं तेन च नो जीवनं सफलं भवतु १७

राम०१६०

वल्कल

हे राजन् सर्वतस्य क्रमं गमस्मे अनुपात्रेणासि येन किं कार्यमिति मन्वयः २ अश्रंगतं वेदं सर्वे न्यस्य गमनमिच्छामि योऽहीतिकल्याणज
मध्यावं धनरज्जुः ३ सर्वाणि वस्तूनि भरतायि वानुज्ञानमिमातुः प्रीतये ददामि अतः श्रीरापवं धत्तापवं अनयंतु

स क्रमोगमस्मे राजन् वने वन्ये न जीवतः किं कार्यमनुपात्रेणासक्रमेणागमसर्वतः २ योहि दत्वादि पश्चं
कल्याणो कुरुते मनः रज्जुस्नेहेन किंतस्य त्यजतः कुंजोत्तमम् ३ तथा मम सतो श्रेष्ठ किं ध्वजिन्याज
गमस्ते सर्वाण्येवानुज्ञानामि चीराण्येवानयंतु मे ४ रवनित्रपिटके चोभे स्मानयत गच्छत च
तुर्दशावनेवासे वर्षाणि वसतो मम ५ अथ चीराणि कैकेयी स्वयमानसराघवम् ३ वाचपरि
धत्स्वेति जनौघे निरपत्रपा ६ स चीरे पुरुषव्याघ्रः कैकेय्याः प्रतिगृह्य ते सूक्ष्मवस्त्रमवक्षिप्य
मुनिवस्त्राण्यवस्तह ७ लक्ष्मणाश्चापि तत्रैव विहाय वसने शुभे तापसाच्छादने चैव जग्राह पितु
रग्रतः ८

कैकेयी दासः ४ चतुर्दश वर्षाणि वने वसतो मम फलादानयन तावने ३ भरवनित्रपिटके मोकै केयी दासः समा
नयत गच्छत शीघ्रं तदानयनायति शेषः ५ ६ रामः कैकेय्याः सकाशात् चीरे संतरीयोत्तरीयरूपे प्रतिगृह्य सूक्ष्म
वस्त्रमवक्षिप्य परित्यज्य मुनिवस्त्राणि अवस्त धृतवान् ७ ८

३० त्वयाविहतयारामस्य [illegible] श्रियानकिंचित्फलमितिप्रोषः भरतस्यत्वदनुरूपमतित्वाभावात्तदलंवत्यायममेराज्ञिप्रसाद्गौकतःप्राप्तःपरिवादस्त्वतेरस्यःपरि [illegible] हार्योभवति एवंचलो

श्वदुष्टस्यहिसंत्यागःसत्पथेनिरतस्यच निर्दहेदपिशक्रस्यद्युतिंधर्मविरोधनात् ३० तदलंदेविरा मस्यश्रियाविहतयात्वया लोकतोपिहितेरस्यःपरिवादःशुभानने ३१ श्रुत्वातुसिद्धार्थवचोराजा श्रांततरस्वरः शोकोपहतयावाचाकैकेयीमिदमब्रवीत् ३२ एतद्वचोनेच्छसिपापरूपेहितेनजानासि ममात्मनोवा आस्थायमार्गंकृपणांकुचेष्टांचेष्टाहितेसाधुपथादपेता ३३ अनुव्रजिष्याम्यहम द्यरामंराज्यंपरित्यज्यसुखंधनंच सहैवराज्ञाभरतेनचत्वंयथासुखंभुंक्ष्वचिरायराज्यम् ३४ इत्या र्षेरामायणेऽयोध्याकांडेषट्त्रिंशःसर्गः॥ ३६॥ महामात्रवचःश्रुत्वारामोदशरथंतदा अन्वभाष त्वाक्यंतुविनयज्ञोविनीतवत् १

कापवादमात्रमस्यफलंनान्यत्किंचिदितिभावः ३१ ३२ एतद्वचःसिद्धार्थवचः हे पते कृपणांमार्गमास्थायपयाकुचेष्टैरूपाचेष्टासाधुपथादपेताहि ३३ ३४ इतिषट्त्रिंशःसर्गः॥ ३६ रामोधीरोदात्तत्वेनकैकेय्याःपरितोषायाह महामात्रेति महामात्रस्यसिद्धार्थस्यवचःश्रुत्वाविनयज्ञोरामःविनीतवत्विनीतःसन्तदादशरथंवाक्यमभाषत। कृतानेत्वयासेयंकुचेष्टा २

भाजे

उद्भ्रांतचेतसः व्याकुलमनसः २३ तेषु हृतीनामहितेषुक्तेषु अन्वयः २४ प्रोष्य पानमात्रेण वृक्षच्छायागमनेनविलेव करालमयात् सपरिच्छदं वनेयोग्यफालपिटकादिसहितं तानविवासनाधिकारिणः प्रत्वष्टानुरूवान् २५ यथापापकर्मकृतस्य योऽनुरूपापकर्मकृतःफा

कोऽयंतस्त्विषन्नः उन्मत्तवालानुद्भ्रांतचेतसः सर्पांश्छिन्नस्मोर्थ्यादत्तुलोपीतिमिष्नुते २३ सतासांव चनंश्रुत्वाप्रकृतीनांनराधिपः तेनसम्भाजाहितेषुक्तेनासांप्रियचिकीर्षया २४ तेपानंप्रीष्मारोप्यैभा र्यसपरिच्छदम् प्रावर्जीवैविवासयोग्यमितिस्यात्तन्वृपशात्पिता २५ सफालपिटकंगृह्य गिरिदुर्गा णपत्तोकप्रत दिशःसर्वास्त्वनुचरन्स्वयं पापापकर्मकृत् २६ इत्येनमसमंजद्राजासगरोवैसधार्मिकः रामःकिमकरोत्पापंयेनैवमुपरुध्यते २७ नहिकिंचनपश्यामोराघवस्यागुणांवयम् दुर्लभोह्यस्य निरयःशशांकस्येवकल्मषम् २८ अथवादेविदोषंत्वंकंचित्पश्यसिराघवे त्वमद्यब्रूहितत्त्वेनतदा रामोविवास्यते २९

त्वसहितंपिटकंगृहीत्वाकंदाद्यर्थंसर्वादिशः सर्वदिक्षुगिरिदुर्गाणि अनुचरन् भ्रममाणः कंदाद्यलोक यत् २६ प्रकृतेतदेशसंगस्याहरामःकिमितिउपरुध्यतेविवास्यते २७ अस्मद्गुणांदोषंव्यसनरूपंनिरयःपापंकल्मषंमालिन्यम् २८
२९ २

स

हे अहिते मा मां धुरि वरहेतुकभरताभिषेकरामविवासनरूपभारे नियुञ्जते च भावय हे तं मां किं तु दासिवद्यपवसि हे अनार्ये यदिदानी मारब्धं कृत्सं सर्वं त्वत्कृते कैकेयो पाल्वितितत्पूर्वमेव वनवासप्रार्थनकाले [illegible] एव किन्नोपारुधः किं न प्रार्थितवत्यसि ततएतन्निरोद्धेत वसामर्थ्यं नास्तीति भावः १४ द्विगुणं क्रुद्धा प्रकारान्तेरेणाभदमिमन्तं विघटयामीति वहुतरं क्रुद्धेत्सर्थः १५ यद्यपि

वं हृतं किं तु दासि मां नियज्ञ धुरिमाहिते । अनार्ये कृत्यमारब्धं किं न पूर्वमुपारुधः ॥ १५ ॥ तस्यैतत्क्रोधसंयुक्तमुक्तं श्रुत्वा वराङ्गना । कैकेयी द्विगुणं क्रुद्धा राजानमिदमब्रवीत् ॥ १६ ॥ तवैव वंशे सगरो ज्येष्ठपुत्रमुपारुधत् । असमञ्ज इति ख्यातं तथायं गन्तुमर्हति ॥ १७ ॥ एवमुक्ते धिगित्येव राजा दशरथोऽब्रवीत् । व्रीडितश्च जनः सर्वः सा च तन्नाववुध्यत ॥ १८ ॥ तत्र वृद्धो महामात्रः सिद्धार्थो नाम नामतः । शुचिर्बहुमतो राज्ञः कैकेयीमिदमब्रवीत् ॥ १९ ॥ असमञ्जो गृहीत्वा तु क्रीडितः पथि दारकान् । सरय्वां प्रक्षिपन्नप्सु रमते तेन दुर्मतिः ॥ २० ॥ तं दृष्ट्वा नागराः सर्वे क्रुद्धा राजानमब्रुवन् । असमञ्जं वृणीष्वैकमस्मान्वा राष्ट्रवर्द्धन ॥ २१ ॥ तानुवाच ततो राजा किं निमित्तमिदं भयम् । ताश्चापि राज्ञा संपृष्टा वाक्यं प्रकृ-

२

टि

यद्यपि पूर्वमिदं न वृत्तं तथापि वनगमनत्वादेवापि सिद्धमिति दृष्टान्तवलेनाह तवैवेति उपारुधत् राज्यभोगेभ्य इति शेषः १६ एवमुक्तः असमञ्जतुल्यतयाऽस्मिन्नुक्तः स्वश्रुतिश्रुतातिरिक्तप्रलापाद्राज्ञो धिगित्युक्तिः जनः कैकेयीतेव कृजनः सर्वः स्वामिन्या अत्रसेकेप्रलापातनावबुध्यत क्षोधवशादिति भावः १७ तत्र कुमनस्य नात्र प्रसंग इति महामात्र आह तत्रेति महामात्रः प्रधानः १८ सरय्वामप्सु क्षिपन्रमते

गच्छतीराज्ञोऽनतुमेति : सः जना इत्यापत्तिरितिभावः १९
यतो विच्छेपु अवनाते व्याप्य २० वृद्धैः पौरैः

२२

२

६ ७ ग्रामदक्षिणाः प्रयोदक्षिणाः ८ पालयिष्यतीति सोपालेभोक्तिः संस्थाप्यानो प्रस्थाप्यताम् ९ स्वराष्ट्र मरु

निघ्नन्मृगान्कुंजरांश्चपिबंश्चारण्यकंमधु नदीश्चविविधाः पश्यन्नराज्यं संस्मरिष्यति ६ धा
मकोशाश्वपः कश्चिद्वनको ऽग्राश्रमामकः तौ मम तनु छेत्तां वसंतं निर्जने वने ७ प्रजानपुरोपयुक्तो
भुविप्रजं श्चास्त्रदक्षिणाः ऋषिभिश्चाभिसंताप्य प्रवत्स्यति इदं वने ८ भरतश्च महाबाहुरयोध्यां
पालयिष्यति सर्वकर्मैः पुनः श्रीमान्रामः संस्थाप्यतामिति ९ इति ब्रुवति सा कुब्जा कैकेयी प्रमा
गता भरतं चाप्यागम क्रोधे स्वर्गं चापि व्यरुध्यत १० सा विवसना बसे स्त्री त्तामरते न परिरक्ष्यता
राजानमेवाभिमुखी कैकेयी वाक्यमब्रवीत् ११ राज्यं गतजनं साधो पीतमंडं सुरामिव निरास्वा
द्यतमं शून्यं भरतो नाभिपत्स्यते १२ कैकेय्या मुक्तलज्जायां वदंत्यामतिदारुणाम् राजा दशरथो
वाक्यमुवाचायतलोचनाम् १३

ध्यतहृष्ट्रोजातः १० ११ मंडः सुरांतर्गतसारांशः निरास्वाद्यतमं निर्गता
स्वाद्यतमं शून्यमवस्तुकम् १३ १३ १३

इति पंचत्रिंशः सर्गः ॥ ३५ ॥ एवं सुमंत्रेण राजवृत्तितापाभिध्यानत्वोक्त्वा वपि राजा तस्या वास्तवत्वज्ञानानंतरम
स्य वन एव सखवासो पाश्रमादि [illegible] प्राति ततस्तति ततः कैकेय्यनंगीकारानंतरं प्रवृत्तवरदानविषयेष्व

इत्यार्षे श्रीमद्रामायणे अयोध्याकांडे प

इत्यार्षे श्रीमद्रामायणे अयोध्याकांडे पंचत्रिंशः सर्गः ॥ ३५ ॥ ततः सुमंत्रमैक्ष्वाकः पी
डितोऽत्र प्रतिज्ञया सबाष्पमतिनिःश्वस्य जगादेदं पुनर्वचः १ सूत रत्नसुसंपूर्णा चतुर्विध
बला चमूः राघवस्यानुयात्रार्थं क्षिप्रं प्रतिविधीयताम २ रूपाजीवा वादिन्यो वणि
जश्च महाधनाः शोभयंतु कुमारस्य वाहिनीः सुप्रसारिताः ३ ये चैनमुपजीवंति रमते यै
श्च वीर्यतः तेषां बहुविधं दत्वा तानप्यत्र नियोजय ४ आयुधानि च मुख्यानि नागराः श
कटानि च अनुगच्छंतु काकुत्स्थं व्याधाश्चारण्यकोविदाः ५

ति त्वया कैकेयी मृदि पृष्टतयाऽदं वक्ष्यमाणो १ चतुर्विधबला रथादि चतुर्विधबलवती चमूः सेना राघवस्य अ
नुयात्रार्थं सेवार्थं प्रतिविधीयतां प्रस्थाप्यताम २ वादिन्यः स्वर चित्ताकर्षक वचन चतुराः रूपाजीवाः गणि
काः सुप्रसारिताः पताकया पदार्थप्रसारणं कुर्वंतः ३ यैर्मित्रैः वीर्यतः वीर्यं पराक्रमसारं रमते इत्यर्थः ४ ५ ४ ५

विपत्ते वाधकमाह परिवाद इति अपवादः चरिष्यति प्रचरिष्यति ३१ रामादन्यः पुरवरे वसेत् ते क्षमो नकृत्सो
नहि भवेत् भरतस्त्वत्प्रतिकूलत्वेन वसभविष्यतीतिभावः ३२ भर्तारमेहीति ०पूर्ववृत्तं स्मृत्वा कुकुलक्रमागतं व

परिवादो हि ते देवि महान् लोके चरिष्यति यदि रामो वनं याति विहाय पितरं मम ३१
स्वराज्यं राघवः पातु भवत्वं विगतज्वरा नहि ते राघवादन्यः क्षमः पुरवरे वसेत् ३२ रामे हि यौ
वराज्यस्थे राजा दशरथो वनम् प्रवेक्ष्यति महेष्वासः पूर्ववृत्तमनुस्मरन् ३३ इति सान्त्वैश्च
तीक्ष्णैश्च कैकेयीं राजसंसदि भूयः संक्षोभयामास सुमंत्रस्तु कृताञ्जलिः ३४ सा हि ... नैव
ते देवी न च समपरिदूयते न चास्या मुखवर्णस्य लक्ष्यते विक्रिया तदा ३५ रमायनमः

ते ३३ इति समनन्तरोक्तैः सान्त्वैः शिक्षागर्भैर्नैयायभयकारो दामित्यादिवाक्यैः तीक्ष्णैः पति घ्नीत्वामहंम
न्ये इत्यादिवाक्यैः अंजनसंसदि सुमंत्रः भूयः पुनरपि कैकेयीं संक्षोभयामास तस्याः क्षितो क्षोभं चकार ३४ प्र
यापि सा देवी सान्त्वैर्वाक्यैर्न क्षुभ्यते तीक्ष्णैर्न परिदूयते न व्यथते ३५

नेग्राने तुं योग्या विधेये । स्पर्धः सेवमिति पाठे मात्वन्नाभवेत्स्पर्धः य इक्ष्वाध्विपः ग्राहतद्व हाताभर्त्तुरिच्छां तद्विषये उपास्यतदनुवर्तिनीभूत्वा ऽस्य जनस्य ऽस्मदादेर्गतिः प्रारत्तोभव २७ प्रोत्साहिताप्रेरिताऽग्रस्य

नेमां भवान्स्थातो देवदाहवत्स्वधाधिपः भर्त्तुरिच्छामुपास्येह जनस्यास्य गतिर्भव २७
मा त्वं प्रोत्साहिता पापे देवराजसमप्रभम् भर्त्तारंलोककर्त्तारमसद्धर्ममुपादधाः २८
नहि मिथ्याप्रतिज्ञातं करिष्यति तवानघः श्रीमान्दशरथो राजा देवि राजीवलोचनः २९
ज्येष्ठो वदान्यः कर्मण्यः स्वधर्मस्यापि रक्षिता रक्षिता जीवलोकस्य देवि रामोऽभिषिच्यताम्
३०

मे कनिष्ठस्याभिषेकपूर्वं ज्येष्ठस्य विवासनरूपं उपादधाः स्वाहयः २८ त्वाक्रमतेगीकुर्वीत्तोऽप्रस्याह नहीति मिथ्याप्रतिज्ञातं लोकेवयेव केवलं मत्क्रमिस्पर्धः ऽप्रतो राजीवलोचनो राजा त्वदुक्तं न करिष्यति २९ ऽप्रतो ज्येष्ठत्वादिगुणको रामोऽभिषिच्यतां तदभिषेकेऽनुमतिः क्रियतां कर्मण्यः कर्मणि साधुः ३० ३० रामं० १५६

केचित्तद्गीतिकुर्वंतो वीणादि वादयंति अपरे तत्स्वरवेदशांतिमुद्दिश्य लालयंति नर्तयंति वेत्यर्थः अपरे हास्यानि हास्यरसप्रधानानि विविधानि नाटकान्याहुः॥४॥ गोष्ठी हास्यानि गोष्ठी सभा तदुचितानि हास्यानि नर्मोक्तीः॥५॥ प्रियसखः अप्र त्वंतप्रियः नानुमोद

वादयंतितदाशांतिंलालयंत्यपरेतथा॥नाटकान्यपरेप्राहुर्हास्यानिविविधान्यपि॥४॥सतैर्म
हात्माभरतःसखिभिःप्रियवादिभिः॥गोष्ठीहास्यानिकुर्वद्भिर्नप्राहृष्यतराघवः॥५॥तमब्र
वीत्प्रियसखोभरतंसखिभिर्वृतम्॥सुहृद्भिःपर्युपासीनःकिंसखेनानुमोदसे॥६॥एवंब्रुवाणां
सुहृदंभरतःप्रत्युवाचह॥शृणुत्वंयन्निमित्तंमेदैन्यमेतदुपागतम्॥७॥स्वप्नेपितरमद्राक्षं
मलिनंमुक्तमूर्धजम्॥पतंतमद्रिशिखरात्कलुषेगोमयेह्रदे॥८॥प्लवमानश्चमेदृष्टःसत
स्मिन्गोमयेह्रदे॥पिबन्नंजलिनातैलंहसन्निवमुहुर्मुहुः॥९॥ततस्तिलौदनंभुक्त्वापुनःपुनरधः
शिराः॥तैलेनाभ्यक्तसर्वांगस्तैलमेवावगाहतः॥१०॥स्वप्नेपिसागरंशुष्कंचंद्रंचपतितंभुवि
उपरुद्धांचजगतींतमसेवसमावृताम्॥११॥

सोगानादीतिश्लोकाः६।७।८।९। अभ्यवगाहतेस्तेतःप्रथमःस्वप्नः॥१०॥

तमसासमावृतामिव उपरुद्धांतिरोहिताम्॥११॥

तस्मै वरदाय पुत्रः प्रपेतत्र्यैकपनवि वैधिरूपेक्ष यापामासेत्यन्वयः २२ ततः साधुः सवरदः प्रस्समाषत ध्वेसत्तोवा
स्वपित्रादि समीपं गच्छतु गारान् हत्यः तस्मा व चरति प्रोषः २३ निरस्य निग्रह २४ तथामात् वत्तदुर्जनाच

घ

श्रिपयाचतयोक्तः सकेकयः पृथिवीपतिः तस्मै तेवरदायार्थकैयामास तत्वतः २२ ततः
सवरदः साधुर्ज्ञानेप्रस्समाषत त्रियताद्ध्वंसतां चेममाहृत्यात्वंमहीपते २३ सतेषु
त्वाव चलासप्रसन्नमनसोनृपः मातरंतेनिरस्याश्रु विजहारकुवेरवत् २४ तथात्वमः
पिराजानं दुर्जनाचरितेपथि प्रसज्जाहमिमंमोहात्कुरुषेपापदर्शिनी २५ २५
सत्यश्चात्रप्रवादोयं [illegible] लौकिकः प्रतिभातिमाम पितृन्समनुजायंते नरामातरमंगनाः २६

रितेपथिस्थितेतिप्रोषः इमंराजानं प्रसज्जाहं प्रसत्कार्यमाहकं कुरुषे २५ कस्यानांमातृतुल्यत्वेन्याय
प्राप्तमित्याहसत्यइतिमामांनराः पुत्ररूपाः समनुजायंते पितृस्वभावानुवर्तिनोजायते २६ २६ ३६ २६

तस्माद्दूरदातानात्सर्वभूतप्राव्दंतदर्थं च जानीतेस्म तिर्यग्जातानां पक्षिप्रभृत्यादीनाम् १७ ततोवरप्रभावात्
प्रायनेगमनकालेभूरिश्रवसं सुवर्णकांतेर्जंभस्य जंभाख्यापक्षिणोभावोऽभिप्रायःविरुतात्तदीयशब्दा

सर्वभूतरुतंतस्मात्संजज्ञेवसुधाधिपः तेनतिर्यग्गतानांचभूतानांविदितंवचः १७ ततो
जंभस्य प्रायनेविरुतान्भूरिवर्चसः पितुस्तेविदितोभावः सततत्रबहुधाहसत् १८ तत्रतेज
ननीक्रोधात्मसूपास्यमभिप्रपृच्छती हसंतेनृपतेसौम्यजिज्ञासामीतिचाब्रवीत् १९ नृप
श्वोवाचतांदेवीं देविप्रशंसामितेप्रादि ततोमेमरणंसद्योभविष्यतिनसंशयः २० माता
तेपितरं देवीततःकेकयमब्रवीत् शंसमेजीववामावानमामपह सिष्यसि २१ २१

२

द्विदितः खगस्यतेपितातम्भ्रावपरिज्ञानजंसंतोषेराबहुधाद्विरहसत् १८ तत्रप्रापनेशप्राप्तातेजन रा० म०
नीमामपहसतीतिक्रोधात्सीमसूरूपंपाप्राप्तिच्छंतीहेनृपतेतेहासहासकारणंज्ञातुमिच्छामीतितंपि १५५
तरमब्रवीत् १९ शंसामिहासकारणमितिशेषः २० जीववामावेसनेनकैकेयोमातुःपतिर्वृत्तमुक्तम्

र्थ यान्यापदेस्रोन ज्जानेनिदंति आश्रममिति कुठारेण आश्रमं छित्वा निर्वपेत् परिचरेत् आलवालादिकरणेन से-
चनेन पतनेनिर्वपतनशालिच्छेदनादि स्पैव निर्वसेनौ कुर्वतः शीतप्रसम धुरेणम भवेत् अतो च्यैवेदं केकेयान्व-
र्तनेन नरस्त्यागायः १४ एवं कोपवचनान्युक्त्वा मर्मवचनान्याह आभिजात्यमिति ते मातुलमभिजात्ये अश्रा

आश्रमं छित्त्वा कुठारेण निर्वपेत् परिचरेत्तु यः । स एनं पतमानं सिञ्चेन्नैवास्य मधुरो भवेत् १४
आभिजात्यं हि ते मन्ये यथा मातुस्तथैव ते । न हि निम्बात्स्रवेत्क्षौद्रं लोके निगदितं वचः १५
तव मातुरसद्ग्राहं विद्म पूर्वं यथा श्रुतम् । पितुस्ते वरदः कश्चिद्ददौ वरमनुत्तमम् १६

तपितुर्मातुर्जन्मोचित व्यवहारवत्स्वरूपं यथा तथैव ते तव आभिजात्यमपि हि मन्येऽस्मरति अप्योक्तिः कारणा-
नुसारेण कार्यं भवतीति भावः तदेव दर्शयति न हीति निम्बात्क्षौद्रं न स्रवेदिति च लोके कश्चिदुक्तिः लस्यपर्यायः
१५ ननु मे मातुः कथमाभिजात्यं ज्ञातमित्यत्राह तवेति असद्ग्राहं चोरपापकर्माभिनिवेशं पूर्वं यथा
यथावत्कारितामुन्नतं तथा सम्प्रति विद्मः स्मरामः तदेवाह पितुरिति कश्चिद्दृषि १६

रा० बा० ७१० १० विषये देशे नाहं राज्ञा ब्राह्मणानां वासो न हि खमर्यादं यतिक्रमितव्यो इत्यादिव्यवहारं करिष्यसीत्यनेनापापि
१५४ रामं निवर्तयेति सूचयति ११ यस्मात्ते ईदृशमति घोरं वृत्तमाचरन्त्याः सत्या मेदिनी सद्यो विवृता विदीर्णा न भ

राजा भवतु ते पुत्रो भरतः शास्तु मेदिनीम् वयं तत्र गमिष्यामो यत्र रामो गमिष्यति १०
५२ नहि ते विषये कश्चिद् ब्राह्मणो वस्तुमर्हति तादृशं त्वममर्यादम् अद्य कर्म करिष्यसि ११ क
आश्चर्यमिव पश्यामि यस्यास्ते वृत्तमीदृशम् आचरन्त्या न विवृता सद्यो भवति मेदिनी १२ महाब्रह्मर्षिसृष्टा वा ज्वलन्तो भीमदर्शनाः धिक्वाग्दण्डा वि[illegible] रामप्रव्राजने स्थिताम् १३

वतीति यत इदमाश्चर्यमिव पश्यामीति योजना १२ किंच महाब्रह्मर्षिभिः वसिष्ठादिभिः सृष्टाः प्रयुक्ताः ज्वलन्तः तेजसा
ऋषिनिबन्धनकरणात्समर्थाः भीमदर्शनाः भीमं फलं दर्शयन्ते ये ते तादृशाः धिग्वाग्दण्डाः रामप्रव्राजने
स्थितां त्वां न हिंसन्ति इदमप्याश्चर्यमिति संबन्धः १३ १३ १३ १३ १३ १३ १३

रामा० १५४

४ यस्यास्तवयस्यास्तव ५ यतोनहीतिहेदेवितवातिशयेनकर्तुमशक्येनकिंचिदिद्यतेऽहंसत्यंपतिघ्नींमंततःकु
लघ्नीमपित्वांमन्ये ६ अचलमिवदुष्प्रकंप्यंकर्मभिःक्रूरैःसंतापयसितज्जानामितिशेषः ७ भर्तुरिच्छाभर्तृच्छा

वाक्यवज्रैरनुपमैर्निर्भिदन्निवचाशुगैः कैकेय्याःसर्वमर्माणिसुमंत्रःप्रत्यभाषत ४ यस्या
स्तवपतिस्त्यक्तोराजादशरथःस्वयम् भर्त्तासर्वस्यजगतःस्थावरस्यचरस्यच ५ नह्यका
र्यतमंकिंचित्तवदेवीहविद्यते पतिघ्नींत्वामहंमन्येकुलघ्नीमपिचांततः ६ यन्महे
द्रमिवाजय्यंदुष्प्रकंप्यमिवाचलंमहोदधिमिवाक्षोभ्यंसंतापयसिकर्मभिः ७ मावमं
स्थादशरथंभर्तारंवरदंपतिम् भर्तुरिच्छाहिनारीणांपुत्रकोट्याविशिष्यते ८ य
थावयोहिराज्यानिप्राप्नुवंतिनृपक्षये इक्ष्वाकुकुलनाथेऽस्मिंस्तल्लोपयितुमिच्छसि ९

विषयानुसरणं ८ यथावयःवयःक्रममनतिक्रम्यनृपक्षयेराज्यानिप्राप्नुवंतिज्येष्ठक्रमेणेतियावत् तमिमम
नादिवृत्तमाचारंइक्ष्वाकुनाथेदशरथेजीवत्येवलोपयितुमिच्छसीतियोजना ९ यस्याः

समेताभिलिताः तो कैकेयीं हाहा इति शब्दः कृतोयेन तथाभूतं सर्वं परिचारिकादिजनजातम् ६१ इति चतुस्त्रिंशः सर्गः ॥ ३४॥ एवं सपरिकरस्य राजः परमशोके प्राप्ते सुमंत्रः कैकेयीं प्रत्याह ततइति शिरोनिर्धूननादि कोपविकारमितप्रकटकटाय्य कटकटा शब्दवतः कृत्वा १ कोपसंरक्तेः कृत्वेति शेषः वर्णा देहकांति पूर्वा

देव्याः समस्ता हृद्रुः समेतास्तां वर्जेयित्वा नरदेवपत्नीम् हृदन्सुमंत्रोपि जगाम मूर्च्छा हाहाकृतं तत्र बभूव सर्वम् ॥ ६१॥ इत्यार्षे रामायणे वाल्मीकीये अयोध्याकांडे चतुस्त्रिंशः सर्गः ॥ ३४
ततो निर्धूय सहसा शिरो निःश्वस्य चासकृत् पाणिं पाणौ विनिष्पिष्य दंतान्कटकटाय्य च १ लोचने कोपसंरक्ते वर्णां पूर्वोचितं जहत् कोपाभिभूतः सहसा संतापमशुभं गतः २ मनः समीक्षमाणश्च सूतो दशरथस्य सः कंपयन्निव कैकेय्या हृदयं वाक्शरैः शितैः ३

चित्तं पूर्वाभ्यस्तं स्वाभाविकमित्यर्थः जहनुत्सृजन् कोपसंरक्तांगस्य पः २ ससूतः सुमंत्रो दशरथस्य मनः समीक्ष्य रामं० माणः कैकेयीं विषसदृशैः हृदि ज्ञानत्वाशितैः तीक्ष्णैर्वाक्शरैः कैकेय्या हृदयं कंपयन्निवानुपमेरा प्रदुगेरिवृस्य तैर्वाक्यवज्रैः कैकेय्याः सर्वमर्माणि भंजयन्निव दो वात्रिभिन्दन्प्रकाशं स्पष्टमभाषत कैकेयीमब्रवीदित्यर्थः ३

यथा शिष्ठ संमतेतत्त्वति देशेमप्याम्नो दीयते तत्पाम हत्सु कामेषु काम्यमानेषु वस्तुषु मनो न दीयते न च नाप्यात्मनोंतःकर
णस्य प्रिये नृत्तो मात्कृते दुःखं व्यपैति ष्टितियोजना ५७ हे अनघ तत्तस्याद्धं हम घत्वा मन्न तेन योजयन्न राज्यादिकं न व

नहेत पापापिष्ठ दीयते मनो महत्सु कामेषु न चात्मनः प्रिये यथानि देशे तव शिष्ठ संम
ते यस्यैतद्दुःखं तत्त्वमतं कृतेन च ५७ तदर्थं नैवान घराज्यमन्नपानं सर्वकामान्वसिष्ठ धानं मे
षिलोम न जीवितं वा पान तेन योजयन्ब्रह्मसत्यं ब्रह्ममस्तु तेन या ५८ फलानिमू
लानि च भक्ष्य वने गिरिगह्वरप्रपन्नसरितः सरांसि चैव तेष्वविरूपेष्ववलिचित्रपादपेषु खेभिम
विष्यामि तत्र वा तु निर्वृतिः ५९ एवं सदा जानासि जानासि पन्नस्य येन दुःखं न च पी
ड्यमानः [illegible] तव सुज्ञो भूमिगतो नैव विनेद किंचित् ६० ६० ६०

रणीयं वरिष्ठामि तेन वर्तते यथा सत्यं भवति तथा स्थितः अन्वयः ५८ मम दुःखं भविष्यतीति त्वयानङ्के खव्यमित्याह फला
नीति निर्वृत्तिः सुखं ५९ तापः वाष्पलग्नहोत्पादकः दुःखं मे तत्त्व्यपोत्पादकम् ६० ६०

न केवलं त्वदाज्ञापरिपालनार्थमेव गच्छामि किं तु मत्प्रतिज्ञापरिपालनार्थमपीत्याह अर्थित इति ५० उक्तं वा मद्दर्शनादि विष
योक्तं अजनंदः खम ५१ दैवतानां दैवतमिति स्मृतं किमत तमनुष्ठातां अतो दैवतमित्येवापि तापरम दैवतमितिम

अर्थितो ह्यस्मि कैकेय्या वनं गच्छेति राघव मया चोक्तं व्रजामीति तत्सत्यमनुपालये ५०
मा चोक्तेऽहं कृष्णा देव वने रंस्यामहे वयं प्रशान्तहरिणाकीर्णे नानाशकुनिनादिते ५१
पिता हि दैवतं तात देवतानामपि स्मृतम् तस्माद्दैवतमित्येव करिष्यामि पितुर्वचः ५२
चतुर्दशसु वर्षेषु गतेषु नरसत्तम पुनर्द्रक्ष्यसि मां प्राप्तं संतापोऽयं विमुच्यताम् ५३ ये
न संस्तम्भनीयोऽयं सर्वैर्बाष्पकलो जनः स त्वं पुरुषशार्दूल किमर्थं विक्रियां गतः ५४
पुरं च राष्ट्रं च मही च केवला मया विसृष्टा भरताय दीयताम् अहं निदेशं भवतोऽनुपालयन्
वनं गमिष्यामि चिराय सेवितुम् ५५ मया विसृष्टां भरतो महीमिमां सशैलखण्डां सपुरोपका
ननाम् शिवां सुसीमामनुशास्तु केवलं त्वया यदुक्तं नृपते तथास्तु तत् ५६ ५६

त्वेसपः ५२ ५३ येन त्वया संस्तंभनीयः समाश्वासनीयः ५४ केवलां सकलां चिराय वनं सेवितुं गमिष्यामि ५५ त्व

कथमेवमत आह नहीति आत्मनि त्वमनसि सत्वे स्थीयानो नाशिये चोदिष्टपराज्येन कोदिते अपितु प्रयावत निदेशं न
वासो कर्तुमेवेत्यर्थः ४५ नहि तृप्यामि यी दोनत्व[illegible]जति ४६ हे पुरुषर्षभ अहं त्वां सत्येन सत्यप्रक्रम इच्छामि अन्व

नहि मे कांक्षितं राज्यं सत्वमात्मनि वाधितम् यथा निदेशं कर्तुं वै तवैव रघुनन्दन ४५
अपगच्छतु ते दुःखं मा भूर्बाष्पपरिप्लुतः नहि तृप्यामि दुर्धर्षः समुद्रः सरितां पतिः ४६
नैवाहं राज्यमिच्छामि न सुखेन च मैथिलीम् नैव सर्वानिमांल्लोकान्न स्वर्गं न च जीवितम् ४७
त्वामहं सत्यमिच्छामि नानृतं पुरुषर्षभ प्रत्यक्षं तव सत्येन सुकृतेन च ते शपे ४८
न च शक्यं मया तात स्थातुं त्वामपि प्रभो सशोकं धारयस्वेमं नहि मेस्ति विपर्ययः ४९

तं अनृतं प्रकृते नेच्छामि तव प्रत्यक्षं तव सन्निधौ सत्येन सुकृतेन ते त्वया च शपे प्रापथं करोमीत्यर्थः ४८
हे तात प्रभो मया रहस्येरेव त्वामपि स्थातुं नैव शक्यो सत्वं स्वंभव मनसंभवं शोकं धारयस्व सहस्व मे विपर्ययः
संकल्पित वनागमन विपरीतान्यथा नमिह स्थितिरूपं नहि अस्ति ४९

दीनः एषगच्छामीति कैकेयीप्रतिप्रतिज्ञानादेकाह दर्शनमात्रपित्रमनोरथपूरणपूर्णत्वप्राप्रश्नोकत्व ३९ तर्पितः
सर्वकामैरपि त्वय्युत्तरमाह प्राप्स्यामीति गुणान् अभिमतपदार्थान् अतः सर्वकामैः सर्वकामप्रतिनिधित्वे

अथ रामस्तदा श्रुत्वा पितुरार्तस्य भाषितम लक्ष्मणेन सह भ्रात्रा दीनो वचनमब्रवीत ३९
प्राप्स्यामि यानद्य गुणान् को मे श्वस्तान्प्रदास्यति अपक्रमणमेवातः सर्वकामैरहं वृणे ४०
इयं सराष्ट्रा सजना धनधान्यसमाकुला मया विसृष्टा वसुधा भरताय प्रदीयताम ४१ व
नवासकृता बुद्धिर्न च मेऽद्य चलिष्यति यस्तुष्टेन वरो दत्तः कैकेय्यै वरद त्वया ४२
दीयतां निखिलेनैव सत्यस्त्वं भव पार्थिव अहं निदेशं भवतो यथोक्तमनुपालयन ४३
चतुर्दश समा वत्स्ये वने वनचरैः सह मा विमर्शो वसुमती भरताय प्रदीयताम् ४४

नस्ततो गमनमेव वृणोऽस्मार्थः ४० ४१ अद्य वनवासकृतात्तदर्था बुद्धिर्न चलिष्यति अतो गमनानुज्ञामेव कुर्विति
भावः प्रतिदानपरस्य भवतोऽनुचितमप्येतद् दित्साह यस्तीति ४२ निखिलेन अद्वैवमत्वस्थापनात निदेशं शासनम ४३
वनचरैः तपस्विभिः विमर्शो विचारो मास्तु ४४

भर्तुर्दशरथस्य प्रियार्थं तैः प्रीतिप्राप्तिनिमित्तं भरतानयनेन दृष्टौ दैवे हि केन परलोकप्राप्तेः कुलस्य रक्षणार्थं पुंसन्तानाभावे कारणेन कुलजाता नां हि रक्षणार्थं भर्तुर्दशरथस्य वंशस्य परिग्रहार्थं परागततरां उत्तम्भन परिग्रहार्थं भरतेन स्वीकारार्थं अहेडमानाः हेड अनादरे इति धातोः अनादरमकुर्वाणाः सादरा इति यावत् अत एव त्वरया प्रकृष्टा दूता रात्र्यामेव तत्पुरं याताः ॥२२॥ इति ष

भर्तुः प्रियार्थं कुलरक्षणार्थं भर्तुश्च वंशस्य परिग्रहार्थं अहेडमानास्त्वरया स्म दूता रात्र्यां तु ते तत्पुरमेव याताः ॥२२॥ इत्यार्षे रामायणे वाल्मीकीये अयोध्याकांडे अष्टषष्टितमः सर्गः ॥६८॥ यामेव रात्रिं ते दूताः प्रविशन्ति स्म तां पुरीम् ॥ भरतेनापि तां रात्रिं स्वप्नो दृष्टोऽयमप्रियः ॥१॥ व्युष्टामेव तु तां रात्रिं दृष्ट्वा तं स्वप्नमप्रियम् ॥ पुत्रो राजाधिराजस्य सुभृशं पर्यतप्यत ॥२॥ तप्यमानं समाज्ञाय वयस्याः प्रियवादिनः ॥ आयासं विनयिष्यन्तः सभायां चक्रिरे कथाः ॥३॥ सीतारा

ष्टितमः सर्गः ॥६८॥ यामित्यादि श्लोकद्वये वर्तमाना द्वितीया तां रात्रिं शब्दाः सप्तम्यर्थप्रतिपादकाः तां तस्यां अस्वप्नेव दृष्टमात्राः ॥१॥ व्युष्टायां प्रभातायां सत्यां प्रभातस्वप्नः सद्यःफल इति द्योतयितुमिदमुक्तम् ॥२॥ आयासं मनःखेदं विनयिष्यन्तः अप

काल्ये प्रातः साधयिष्यसि गमिष्यसि ३४ मत्प्रियार्थं मम परलोकहितार्थं ३५ तदेव दर्शयति नचेत्यादि छन्नया गूढकूराभिप्रायया चलितोस्मि भ्रंशितोस्मि त्वदभिषेकमनोरथात् भस्माग्निकल्पया भस्मच्छन्नाग्नितुल्यया ३६ वंचना सामान्येन प्रतिश्रुतवरयोर्भरताभिषेकत्वद्विवासनरूपविशेषपर्यवसायित्वरूपा यां मम याल्लब्धा प्राप्ता तो नयाव्रत्तसादिन्या कु
व

मातरं मां च संपश्यन् वसेमाम द्यशर्वरीम तर्पितः सर्वकामैस्त्वं श्वः काल्ये साधयिष्यसि ३४
दुष्करं क्रियते पुत्र सर्वथा राघव त्वया मत्प्रियार्थं प्रियांस्त्यक्त्वा यासि विजने वनम
३५ न चैतन्मे प्रियं पुत्र शपे सत्येन राघव छन्नया चलितस्त्वस्मि स्त्रिया भस्माग्निक
ल्पया ३६ वंचना या तु लब्धा मे तां त्वं निस्तर्तुमिच्छसि अनया वृत्तसादिन्या कैके
य्याभिप्रचोदितः ३७ न चैतदाश्चर्यतमं यत्त्वं ज्येष्ठः सुतो मम अपानृतकथं पुत्र पितरं
कर्तुमिच्छसि ३७

लोचितचरित्रेनाशिन्या ग्रहमेवमभिप्रचोदितोस्मि तां मे वंचनां त्वं निस्तर्तुमिच्छसीति यत् ३७ एतदाश्चर्यतमं न हे पुत्र यस्त्वं पितरं अपानृतकथं अपगतानृतवचनं कर्तुमिच्छसि एतदपि नाश्चर्यं यतो गुरौर्वयसा च ज्येष्ठः सुतो
सि ३८

भवान्वर्षसहस्रायुः पृथिव्याः पतिर्भवतु अतः परमप्यनेककालं राज्यं भवेत्यर्थः मे मया त्वं पुनः ततः अनृतवृत्तेन कार्यं तव नरकपातप्रसंगादतोहमरण्ये वत्स्यामीति संबंधः २८ प्रतिज्ञान्ते प्रतिज्ञासमाप्तौ ते पादौ ग्रहीष्यामीत्यन्वयः २९ कैकेय्या अद्यैव रामं प्रेषयेति मिथो रहसि चोद्यमानः ३० श्रेयसे परलोकहिताय वृद्धये इहलोके अभ्युदयाय अरिष्टं

भवान्वर्षसहस्रायुःपृथिव्यान्नृपतेपतिः अहंत्वरण्येवत्स्यामिनमेकार्यंत्वयानृतः २८
नवपंचचवर्षाणिवनवासेविहृत्यते पुनःपादौग्रहीष्यामिप्रतिज्ञान्तेनराधिप २९
रुदन्नार्तःप्रियंपुत्रंसत्यपाशेनसंयुतः कैकेय्याचोद्यमानस्तुमिथोराजातमब्रवीत् ३०
श्रेयसेवृद्धयेतातपुनरागमनायच गच्छस्वारिष्टमव्यग्रःपन्थानमकुतोभयम् ३१
नहिसत्यात्मनस्तातधर्माभिमनसस्तव विनिवर्तयितुंबुद्धिःशक्यतेरघुनंदन ३२
अद्यत्विदानींरजनींपुत्रमागच्छसर्वथा एकाहंदर्शनेनापिसाधुतावच्चराम्यहम् ३३

स्वस्त्ययनं ते अस्तु अतः अव्यग्रः सन् अकुतोभयं पन्थानं गच्छ ३१ सत्यात्मनः सत्यप्रतिष्ठितस्वभावस्य धर्माभिमनसः धर्मसंपादनाभिनिविष्टमनसस्तव बुद्धिं विनिवर्तयितुं न शक्यते ३२ अद्य अस्मिन्दिवसे इदानीं प्राप्तां रजनीं प्राप्य सर्वथा मा गच्छ किमर्थं तत्राह चराम्यहं त्वया सह भोक्ष्यामि ३३

कुशलेन मां पप्रच्छ सौम्येन चक्षुषा मामनुगृह्णातोऽस्यर्थः २२ नचेच्छतः रहस्यानुमितिरित्यर्थः २३ त्वमनुजानीहि अनुज्ञां दे
हि प्रजापतिर्ब्रह्मा आत्मजान्सनकादीन् तपांसि चरितुमुपक्रान्यथानुज्ञां दत्तवान् तद्वदित्यर्थः २४ वनवासाय जननी

आपृच्छे त्वां महाराज सर्वेषामीश्वरोऽसि नः प्रस्थितं दण्डकारण्यं पश्य त्वं कुशलेन माम् २२
लक्ष्मणं चानुजानीहि सीता चान्वेति मां वनम् कारणैर्बहुभिस्तथ्यैर्वार्यमाणौ न चेच्छतः २३
अनुजानीहि सर्वान्नः शोकमुत्सृज्य मानद लक्ष्मणं मां च सीतां च प्रजापतिरिव प्रजाः २४
प्रतीक्षमाणमव्यग्रमनुज्ञां जगतीपतेः उवाच राजा सम्प्रेक्ष्य वनवासाय राघवम् २५ अ
हं राघव कैकेय्या वरदानेन मोहितः अयोध्यायास्त्वमेवाद्य भव राजा निगृह्य माम् २६
एवमुक्तो नृपतिना रामो धर्मभृतां वरः प्रत्युवाचाञ्जलिं कृत्वा पितरं वाक्यकोविदः २७

पतेः स्वस्यानुज्ञामनुमतिं प्रतीक्षमाणं प्रार्थयमाने अव्यग्रं क्लेशतोपि विषादरहितं राघवं प्रेक्ष्य राजा उवाचेति संबंधः २५
हे राघव वयतोहं कैकेय्या वरदानेन मोहितः निरुत्तरतया शोकपरवशो जातः अतो मां निगृह्य त्वमजवैभवेन प्रकृतेम

भिषेके समापयेत्यर्थः २६

उत्पपात स्त्रीलिङ्गनार्थे १६ तमालिलिङ्गिषितं तमसंप्राप्य मध्ये एव दुःखार्तो मूर्च्छितो भुवि पपात १७ अभ्यपतत् अभ्यागतवान् विसंज्ञमिव विसंज्ञमेव १८ भूषणध्वनि... मिश्रः १९ तौ रामलक्ष्मणौ सीतया सार्धं तं परिष्वज्य

स राजपुत्रमायान्तं दृष्ट्वा दूरात्कृताञ्जलिम् उत्पपात तदा नार्तो मार्तवी जनसंवृतः १६
सोऽभिदुद्राव वेगेन रामं दृष्ट्वा विशांपतिः तमसंप्राप्य दुःखार्तः पपात भुवि मूर्च्छितः १७ तं
रामोऽभ्यपतत्क्षिप्रं लक्ष्मणश्च महारथः विसंज्ञमिव दुःखेन सशोकं नृपतिं तदा १८
स्त्रीसहस्रनिनादश्च संजज्ञे राजवेश्मनि हा हा रामेति सहसा भूषणध्वनिमूर्च्छितः १९
तं परिष्वज्य बाहुभ्यां तावुभौ रामलक्ष्मणौ पर्यङ्के सीतया सार्धं रुदन्तः समवेशयन् २०
अथ रामो मुहूर्तेन लब्धसंज्ञं महीपतिम् उवाच प्राञ्जलिर्भूत्वा शोकार्णवपरिप्लुतम् २१

रुदन्तः पर्यङ्के समवेशयन्निति सम्बन्धः २० मुहूर्तेनेति मुहूर्तेन लब्धसंज्ञमित्यर्थः २१ २१ २१ २१

इह मे इह प्रमनि ये केचिन्माम का दाराः स्त्रियः संति तान् दारानिहानय ॥ १० सोंतः पुरमिति सः सुमंत्रः अंतःपुरमतीत्यैव
प्रतिवेशनेन प्राप्य आर्याः राज्ञा वो युष्मान् व्हांद इह्वयति आव्हयति आगम्यतामिति छेदः ११ प्रचक्रमुरि

सुमंत्रानयमे दारान्ये केचिदिह मामका दारैः परिवृतः सर्वैर्द्रष्टुमिच्छामि राघवम् १०
सोंतःपुरमतीत्यैव स्त्रियस्ता वाक्यमब्रवीत् आर्या ह्वयति वो राजा गम्यतां तत्र माचिरम् ११
एवमुक्ताः स्त्रियः सर्वाः सुमंत्रेण नृपाज्ञया प्रचक्रमुस्तद्भवनं भर्तुराज्ञाय शासनम् १२
अर्धसप्तशतास्तास्तु प्रमदास्ताम्रलोचनाः कौशल्यां परिवार्याथ शनैर्जग्मुर्धृतव्रताः
१३ आगतेषु च दारेषु समवेक्ष्य महीपतिः उवाच राजा तं सूतं सुमंत्रानय मे सुतम् १४
स सूतो राममादाय लक्ष्मणं मैथिलीं तथा जगामाभिमुखस्तूर्णं सकाशं जगतीपतेः
१५

क्रमुरिति स्म तद्भवनं तस्य राज्ञो भवनम् १३ अर्धसप्तशताः सप्तशतस्यार्धं संख्या यासां ताः ताम्रलोचनाः रामवियोगदुः
खात् १३ समवेक्ष्य दाराणिति शेषः १४ १५

रा०वा०अयो०
१४८

उपरक्तं राहुग्रस्तं विक्षोभणान्तरकथनार्थं पुनरपप्रपदित्युक्तम् ३ राममनुशोचन्तं ४ वर्द्धयित्वा पूज्यभ
यविक्लवया परमार्तिकथने भयेन कातरया श्लक्ष्णं वाक्श्लक्ष्णामम नोज्ञे यथा भवति तथा ५ उपजीविनां ब्रा

उपरक्तमिवादित्यं भस्मच्छन्नमिवानलम् । तटाकमिव निस्तोयमपश्यज्जगतीपतिम् ३
आलोक्य तं महाप्राज्ञः परमाकुलचेतसम् । राममेवानुशोचन्तं सूतः प्राञ्जलिरासदत् ४
तं वर्धयित्वा राजानं पूर्वं सूतो जयाशिषा । भयविक्लवया वाचा मन्दया श्लक्ष्णमब्रवीत्
५ अयं स पुरुषव्याघ्रो द्वारि तिष्ठति ते सुतः । ब्राह्मणेभ्यो धनं दत्त्वा सर्वं चैवोपजीविनाम्
६ स त्वां पश्यतु भद्रं ते रामः सत्यपराक्रमः । सर्वान्सुहृद आपृच्छ्य त्वामिदानीं दिदृक्षते ७
गमिष्यति महारण्यं तं पश्य जगतीपते । वृतं राजगुणैः सर्वैरादित्यमिव रश्मिभिः ८ स
सत्यवादी धर्मात्मा गाम्भीर्यात्सागरोपमः । आकाश इव निष्पङ्को नरेन्द्रः प्रत्युवाच तम् ९

०ह्मणेभ्यश्च स्वं वेधनं दत्त्वा स्वेनेन सर्वथा स्थितिश्चक्षोभा वो ध्वन्यते ६ ७ ८ सदृशा रश्मयः निष्पङ्को निर्मलः ९ राम०१४८

ख्यातैः खिन्नैरभिजनैर्देशं तत्क्षणजानि तियाम बल प्रतीक्षमाणः पुत्रप्तत्वपि निदेशमाज्ञां २९ तत्पूर्वं तः स्वाका
रणं गर्भागमनकालः पूर्वोपि स्वार्त्तरूपत्वव तत्त्वात् प्रोक्तदारभ्य ख्यातरूपं हमंत्रे प्रेष्य प्रतिहाररागार्थं त्वागमननिवेद

प्रतीक्षमाणोभिजनं तदार्तमनार्तरूपः प्रहसन्निवाथ जगाम रामः पितरं दिदृक्षुः पितुर्निदेशं
विधिवच्चिकीर्षुः २९ तत्पूर्वमैक्ष्वाकसुतो महात्मा रामो गमिष्यन्वनमार्त्तरूपम् व्यति
ष्ठत प्रेक्ष्य तदा सुमंत्रं पितुर्महात्मा प्रतिहारणार्थम् ३० पितुर्निदेशेन तु धर्मवत्सलो वन
प्रवेशे कृतबुद्धिनिश्चयः स राघवः प्रेक्ष्य सुमंत्रमब्रवीन्निवेदयस्वागमनं नृपाय मे ३१
इत्यार्षे रामायणे अयोध्याकांडे त्रयस्त्रिंशः सर्गः ॥३३॥ ततः कमलपत्राक्षः श्यामो निरुदरो
महान् उवाच रामस्तं सूतं पितुराख्याहि मामिति १ स रामप्रेषितः क्षिप्रं संतापकलुषेंद्रियः प्र
विश्य नृपतिं सूतो निःश्वसंतं ददर्श ह २

नार्थं व्यतिष्ठत द्वार्यवेति शेषः ३० तदेव सुमंत्रमाह पितुरिति ३१ ॥इति त्रयस्त्रिंशः सर्गः॥ ३३ पूर्वसर्गोक्तमर्थं विस्ता
मारामेण घट्टनार्थं स्तनहेरादर्शयति तत्र ततः इति निरुदरः तनुमध्यः १२

येन वनेन हेतुना २२ दंष्ट्रिणाः सर्पाः मृगाः पक्षिणोऽपि रिस्याः २३ दंष्ट्रादयः प्रसन्ने पुरं प्रपद्यन्तु अस्माभिः सेव्य
माने वनेत्यजंतु तत्तामांसफलानामादाने यस्मात्ते व्यालम्गाद्विजं गृहीगृहाद्यच तद्वत्ते देशे इंदके केऽपि

वनेनगरमेवास्तु येनागच्छति राघवः अस्माभिस्त्यक्तपुरे संप्रयातो वनम् २२ वि
लानि दंष्ट्रिणः सर्वे सानूनि मृगपक्षिणः त्यजंत्वस्मद्गृहाद्गीतागजाः सिंहा वनान्यपि २
३ अस्मत्यक्तं प्रपद्यंतु सेव्यमानेत्यजंतु च तृणमांसफलादानं देशं व्यालमृगद्विजम् २४
प्रपद्यतां हि कैकेयी सपुत्रा सह बांधवैः राघवेण वयं सर्वे वने वत्स्यामनिर्वृताः २५ इत्येव
विविधा वाचो नानाजनसमीरिताः शुश्राव राघवः श्रुत्वा न विचक्रे स मानसम् २६
स तु वेश्म पितुर्दूरात् कैलासशिखरप्रभम् अभिचक्राम धर्मात्मा मत्तमातंगविक्रमः २७
विनीतवीरपुरुषं प्रविश्य तु नृपालयम् ददर्शावस्थितं दीनं सुमंत्रमविदूरतः २८

प्रतिपद्यतामित्यन्वयः २४ २५ न विचक्रे न विकारं प्राप्तः २६ पितुर्वेश्म पितृधिष्ठितं वेश्म सर्वैः २७ २८

सपत्न्यः पत्नीसहिताः तेरामोपघातमसहंतो वयं येन मार्गेण गच्छति तेन मार्गेणेति शेषः १६ एकदुःखसुखाः समानदुःखसुखाः १७ समुद्धृतनिधानत्वादिधर्मकाणि गृहाणि कैकेयी प्रतिपद्यतामित्यन्वयः निधानानि निक्षेपाः

तेलक्ष्मणश्च विहिपेसपत्न्यः सहबांधवाः गच्छंतमनुगच्छामो येन गच्छति राघवः १६
उद्यानानि परित्यज्य क्षेत्राणि च गृहाणि च एकदुःखसुखा राममनुगच्छाम राघवम् १७
समुद्धृतनिधानानि परिध्वस्ताजिराणि च उपात्तधनधान्यानि हृतसाराणि सर्वशः १८
रजसाभ्यवकीर्णानि परित्यक्तानि दैवतैः मूषकैः परिधावद्भिरुद्बिलैरावृतानि च १९
अपेतोदकधूमानि हीनसंमार्जनानि च प्रणष्टबलिकर्मेज्यामंत्रहोमजपानि च २०॥
दुष्कालेनेव भग्नानि भिन्नभाजनवंति च अस्मत्त्यक्तानि वेश्मानि कैकेयी प्रतिपद्यताम् २१

अजिरमंगणं परिध्वस्तं मार्जनादेरहितं येषु धनं गवादि उपात्तं गृहीतं येभ्यो ऽत एव हृतसाराणि १८ उद्बिलैरुद्भिन्नबिलैः १९ अपेतोदकत्वादिना मनुष्यराहित्यं सूच्यते २० दुष्कालो राजिकदैविकक्षोभकालः भाजनं भांडादि

कुतः निर्गुणस्येति वृत्तेन सदाचरणेन ११ स तमेवाह आनृशंस्यमहिंसकत्वं अनुक्रोशो शोकदया श्रुतं अनुष्ठानपर्यवसायिशास्त्राध्ययनं शीलं सत्स्वभावः दमः इंद्रियनिग्रहः शमः चित्तप्रशांतिः १२ तस्मात्सर्वेत्तिमसकलसकल्याणगु

निर्गुणस्यापि पुत्रस्य कथं स्याद्विप्रवासनम्। किं पुनर्यस्य लोकोऽयं जितो वृत्तेन केवलम्॥ ११
आनृशंस्यमनुक्रोशः श्रुतं शीलं दमः शमः। राघवं शोभयंत्येते षड्गुणाः पुरुषर्षभम्॥ १२
तस्मात्तस्योपघातेन प्रजाः परमपीडिताः। औदकानीव सत्वानि ग्रीष्मे सलिलसंक्षयात्॥
१३ पीडया पीडितं सर्वं जगदस्य जगत्पतेः। मूलस्येवोपघातेन वृक्षः पुष्पफलोपगः॥ १४
मूलं ह्येष मनुष्याणां धर्मसारो महाद्युतिः। पुष्पं फलं च पत्रं च शाखाश्चास्येतरे जनाः॥ १५

णाभिरामो रामः तस्मात्तस्योपघातेन ईषद्धसनेन परमपीडिताः १३ जगत्पालकत्वात् पितुस्योपघातेन जगत्पीडितमित्याह पीडयेति पुष्पफलोपगः पुष्पफलसहितः १४ मनुष्याणामिति वस्तुमात्रोपलक्षणं धर्म एवांतः सारो यस्य सः १५ रा०प्र०१४६

निकूलवृक्षं प्राग्दक्षिणपश्चिमतीरवृक्षं दिव्यं विशिष्टदेवताधिष्ठितं सत्योपयाचनं तन्नामकं अन्वर्थनामकत्वादिष्टदातारं अ-
तएवाभिवाद्यं सर्वैर्नमस्कार्यं वृक्षमभिगम्य प्रदक्षिणीकृत्य कुलिंगाख्यां नगरीं प्राविशन् ॥१६॥ अभिकालं तत्तेजोभिभवनो-
न्नामो पितृपैतामहीं रघ्वादिकुलवृद्धैरनुभूतां इक्षुमतीं तेरुः ॥१७॥ अंजलिपानान् अंजलिमात्रा जलमात्राहारान् ब्रह्म-

निकूलवृक्षमासाद्य दिव्यं सत्योपयाचनम् ॥ अभिगम्याभिवाद्यं तं कुलिंगां प्राविशन्पुरीम्
॥१६॥ अभिकालं ततः प्राप्य तेजोभिभवनाच्च्युताः ॥ पितृपैतामहीं पुण्यां तेरुरिक्षुमतीं नदीम्
॥१७॥ अवेक्ष्यांजलिपानांश्च ब्राह्मणान्वेदपारगान् ॥ ययुर्मध्येन बाल्हीकान्सुदामानं च पर्व-
तम् ॥१८॥ विष्णोः पदं प्रेक्षमाणा विपाशां चापि शाल्मलीं नदीर्वापीस्तटाकानि सरांसि च ॥१९
॥ पश्यंतो विविधांश्चापि सिंहव्याघ्रमृगद्विपान् ॥ ययुः पथातिमहता शासनं भर्तुरीप्सवः
॥२०॥ ते श्रांतवाहना दूता विकृष्टेन पथा ततः ॥ गिरिव्रजं पुरवरं शीघ्रमासेदुरंजसा ॥२१॥

पल्वलानि

मतीतीरस्थान्बाल्हीकान्बाल्हीकदेशस्थजनपदान् ॥१८॥ विष्णोःपदं सुदामपर्वतस्थं विष्णुपदांकितस्थानविशेषं विपाशा-
शाल्मल्यौ नद्यौ पश्यंतो नुकर्षः ॥१९॥२०॥ विकृष्टेन अतिदूरेण मार्गेण निरुपद्रवेण गिरिव्रजं केकयराजगृहापरनामकं अंज-

तस्मादुष्णागमनस्याशक्यत्वात् प्रासादादारुह्य प्रासादो संह्यार्य ४ दीनत्वेहेतुमाह पदातिमिति ५ ६ रसज्ञः सुवक्तः
कामानां प्रार्थकोपि तेषां कामदः अभीष्टधनदः पितृवचनमन्यन्तु कर्तुं नेच्छति धर्मगौरवात् पितृविधेयत्वादि

नहि रथ्यासु शक्यन्ते गन्तुं बहुजनाकुलाः । आरुह्य तस्मात्प्रासादान् दीनाः पश्यन्ति राघवम् ४
पदातिं वर्जितच्छत्रं रामं दृष्ट्वा तदा जनाः । ऊचुर्बहुविधा वाचः शोकोपहतचेतसः ५
यं यान्तमनुयाति स्म चतुरङ्गबलं महत् । तमेकं सीतया सार्धमनुयाति स्म लक्ष्मणः ६
ऐश्वर्यस्य रसज्ञः सन् कामिनां चैव कामदः । नेच्छत्येवानृतं कर्तुं वचनं धर्मगौरवात् ७
या न शक्या पुरा द्रष्टुं भूतैराकाशगैरपि । तामद्य सीतां पश्यन्ति राजमार्गगता जनाः ८
अङ्गरागोचितां सीतां रक्तचन्दनसेविनीम् । वर्षमुष्णं च शीतं च नेष्यत्याशु विवर्णताम् ९
अद्य नूनं दशरथः सत्त्वमाविश्य भाषते । नहि राजा प्रियं पुत्रं विवासयितुमर्हति १०

धर्मविषयबहुमानात् ७ भूतैः प्राणिभिः अद्य वनप्रयाणानन्तरं राजमार्गगताः समये ८ ९ सत्त्वं पि
शाचं प्राविश्य प्राप्य न राजा स्वस्वभावे वर्तमानः हि प्रियं पुत्रं विवासयितुमर्हति १० १० १० १० १०

द्विजो ब्राह्मणाः द्विजत्वाभावेऽप्युत्तद्विजत्वस्य द्वत्वाभावेऽपि भृत्यजनः तथात्वाभावेऽपि दरिद्र इत्यासो भिक्षाचर
ताः स्युः तत्र तेषु मध्ये कश्चिदपि यथार्हं संमानन दानसंभ्रमैः न तर्पितो न बभूव सं भ्रम आदरः ४५ इति
द्वात्रिंशः सर्गः ॥ ३२ ॥ १ तदायुधेत्यस्यार्थः पुष्पे धन प्रीतिर्यावत् रवड्गादीनामप्युपलक्षणमेतत्तन्मा

द्विजः सुहृज्जनो वा भृत्यजनो वा तदा दरिद्रो भिक्षाचरणोऽप्यभवेत् न तत्र कश्चिन्न बभूव
तर्पितो यथार्हसंमानन दानसंभ्रमैः ॥ ४५ ॥ इत्यार्षे रामायणे श्रीयोध्याकांडे द्वात्रिंशः
सर्गः ॥ ३२ ॥ दत्त्वा तु सह वैदेह्या ब्राह्मणेभ्यो धनं बहु जग्मतुः पितरं द्रष्टुं सीतया सह राघ
वौ १ ततो गृहीते प्रेष्याभ्यामशोभेतां तदायुधे मालादामभिरासक्ते सीतया समलंकृते २ मा
ततः प्रासादहर्म्याणि विमानशिखराणि च अधिरुह्य जनः श्रीमानुदासीनो व्यलोक
यत ३

लादामभिः माल्यानिचयैः सीतया समलंकृते चंदनादिभिः २ प्रासादा देवानां भूभुजां च वासाः हर्म्याणि धनिनां मंदिरा
णि विमानशिखराणि सप्तभूमिकगृहाग्रभागाः ३ उदासीनः स्वरक्षित्वेन निरुत्सुकः व्यालोकयत् रामम् इति शेषः ३ ३ रा०१४५

इदं वचो नोपचारमात्रमित्याह ब्रवीमीति येत्रणाऽन्तोप्यधिकवरस्य वरो संकोचते नास्ति मात्तममप दाद्भुनेन द्विप्रका
रणात् विप्रप्रयोजनसंपादनार्थं कथं त्वयात्वमत्त ग्राह भवत्सु भवा दक्षो बहुसम्यक् प्रयात्रास्त्र प्रतिपादनेन दानेन तत्
फलरूपेणाहेतुना दानरूपफलायेम प्राजितधनेन मे प्रीतिकरं य प्राक्करं च भवेन्न तु भूमिनिक्षितेन ४२ मोदितः सं

ब्रवीमि सत्येन न तेऽस्ति यंत्रणा धनेहि यद्दानमम विप्रकारणात् भवत्सु सम्यक् प्रतिपादनेन म
पार्जितं प्रीतिकरं भवेत् ४२ ततः सभार्यः स द्विज दो महामुनिर्गोवामनीकं प्रतिगृह्य मो
दितः पुरोवल प्रीतिसुखोपबृंहणौस्तपाद्विषः प्रस्रवदन्महात्मनः ४३ स चापि रामः
परिपूर्णपौरुषो महाधने धर्मबलैरुपार्जितम् नियोजयामास सहृज्जनेश्चिराद्यथार्हसंमा
नवचःप्रचोदितः ४५

जातप्रमोदः प्रहृष्टः प्रभूतीनां उपबृंहणौ विवर्द्धनीः महात्मनो रामस्य तदा ग्राशिषः प्रस्रवदत् ४३ धर्म
बलैः धर्मयुक्तपराक्रमैरुपार्जितं महाधनं सुहृज्जनेनियोजयामास प्रतिपादयामास चिरात् यथार्हं कृतैः सं
मानवचोभिः सुहृज्जनीयैः प्रचोदितः प्रेरितः प्रारितदानव्यापारः स्वयं ४४

सदंडः तस्य करात्च्युतः सरयूपारं तीर्त्वा ऽतिक्रम्य उच्छ्रायं च यमाता तां हन्नि धिर्यत्र तादृग्रोगोव्रजे पपातः ३८ आत
सात्सरयूतटात् परपारस्थसरयूमभि व्याप्य याग्रावस्थितास्तां ग्रानयामास त्रिजटस्याश्रमं प्रति नाययामा

सतीर्त्वा सरयूपारं दंडस्तस्य करात्च्युतः गोव्रजे बहुसाहस्रे निपपात ताताश्च सन्निधौ ३८
तं परिष्वज्य धर्मात्मा आतत्स्मात्सरयूतटात आनयामास ता गाव त्रिजटस्याश्रमं प्रति ३
९ उवाच च तदा रामस्तं गार्ग्यमभिसांत्वयन् मन्युर्न खलु कर्त्तव्यः परिहासो ह्ययं मम ४०
इदं हि तेजस्तव यद्दुरत्ययं तदेव जिज्ञासितुमिच्छता मया इमं भवानर्थमभिप्रचोदितो
वृणीष्व किं चेदपरं व्यवस्यति ४१

सचेति शेषः ३९ अयं दंडपरिक्षेपवचनरूपः परिहासः एवेत्यर्थः ४० इदंदूरपरिक्षेपजनकं तेजः प्राप्तिस्तव त्रि
कर्तुमपि प्रत् तदेव जिज्ञासितं स्वार्थेसना र्थः ज्ञातुं इच्छता मया मम र्थे दंडप्रक्षेपरूपं भवानप्रचोदितोसि
अपरं गोभ्यः अन्यत् किमपि वीतुं व्यवस्यति अभिलषति चेद्वृणीष्व ४१ सीतारामाभ्यां नमः रामा ।।

दीप्त्या ब्रह्मवर्चसेन ३३ ३४ प्रत्यवेक्षस्व मामपि कृपां कुर्वित्यर्थः ३५ गवामसंख्यातानां मध्ये एकमपि सहस्रं मया न विश्राणि
तं न दत्तं अतो दंडेन यावत् परिक्षिपसि क्षिप्तो वा कीर्णो यावंतं देशं परिम हस्तमिता वत्तावदेशस्थं गोजातमवाप्स्यसे इत्यर्थः

गर्ग्यगोत्रः समं दीप्त्या त्रिजटं जनहंसदृक् आपंचमायाः कक्ष्याया नैनं कश्चिदवारयत् ३३
स राजपुत्रमासाद्य त्रिजटो वाक्यमब्रवीत् निर्धनो बहुपुत्रोऽस्मि राजपुत्र महायशः ३४
उंछवृत्तिर्वने नित्यं प्रत्यवेक्षस्व मामिति तमुवाच ततो रामः परिहाससमन्वितम् ३५ गवां
सहस्रमप्येकं न तु विश्राणितं मया परिक्षिपसि दंडेन यावत्तावदवाप्स्यसे ३६ स शाटीं त्व
रितः कट्यां संभ्रांतः परिवेष्ट्य ताम् आविध्य दंडं चिक्षेप सर्वप्राणेन वेगितः ३६ ६

ब्राह्मणस्य गोग्रहणचापल्यकौतुकं दर्शनार्थमेतद्रामवचनम् ३६ संभ्रांतः त्वरितः सर्वप्राणेन सर्वबलेन आवि
ध्य भ्रामयित्वा वेगितः वेगेन ३७

२७ कृपणेभ्योदीनेभ्यः २८ तत्रदेशेपिंगलःपिंगलवर्णःगार्ग्योगर्गगोत्रः क्षतवृत्तिःक्षतेनखननेनलब्धंकेदारमूलोदिनावृत्तिर्जीवनंयस्य फालेद्वैधीकरणसाधनंकुद्दालादि कुद्दालः खनित्रेत्यांगले हलाकारः कर्षणा

ततोस्यधनमाजह्रुः सर्वंगोपजीविनः सगणाःसुमहांस्तत्रदर्शनीयोयदृच्छया २७
ततःसपुरुषव्याघ्रस्तद्धनंसहलक्ष्मणः द्विजेभ्योबालवृद्धेभ्यः कृपणेभ्योह्यदापयत २८ तत्रासीत्पिंगलोगार्ग्यस्त्रिजटोनामवैद्विजः क्षतवृत्तिर्वनेनित्यंफालकुद्दाललांगली २९ तंवृद्धंतरुणीभार्याबालानादायदारकान अब्रवीद्ब्राह्मणंवाक्यंदारिद्र्येणाभिपीडिता ३० अपास्यफालंकुद्दालंकुरुष्ववचनंमम रामंदर्शयधर्मज्ञंयदिकिंचिदवाप्स्यसे ३१ भार्यायावचनंश्रुत्वाशाटीमाच्छाद्यदुश्छदाम
सप्रातिष्ठतपंथानंयत्ररामनिवेशनम ३२

साधनमूतो देहविशेषः तद्वान २९ दारकान्पुत्रान् ३० रामंदर्शयमांभार्यापुत्रमातामामिति शेषः यदाद्दर्शयिष्यसितदासर्वथाकिंचिदवाप्स्यसे ३१ दुःखेनछाद्यतेति दुश्छदा छादयितुमशक्यांपत्रयस्मिन्नपिदेशे ताम
निवेशनंप्राप्यतेतादृशंपंथानमास्थायप्रतिष्ठतप्रस्थितवान् ३२

मेखलीनां ब्रह्मचारिणां दीर्घेण्याधिः समुपस्थितः विवाहार्थमिति प्रोषः सहस्रंगा वो निष्कानां च २१ नोऽस्मा के ग्रैवा
कौसल्याया यथा मम दक्षिणां तदाश्रित ब्रह्मचारि वर्गस्य दापितो नंदेत्त थातानर्चयेत्य न्वयः २२ २३ वाष्पगला

मेखलीनाम हासंघः कौसल्योसमुपस्थितः तेषां सहस्रं सौमित्रिः प्रत्येकं संप्रदापय २१
ग्रैवाः पथानो नंदेत्त कौसल्याममदक्षिणाम् तथाह्निमातान्सर्वान्लक्ष्मणो चेप
सर्वशः २२ ततः पुरुषशार्दूलस्तद्वनेलक्ष्मणः स्वयम् ग्रथोक्तं ब्राह्मणेंद्राणाम ददाद्
नदोपमा २३ अथाब्रवीद्वाष्पगलोस्तिष्ठतश्चोपजीविनः संप्रदाप्य बहुद्रव्यमेकै
कस्योपजीवनम् २४ लक्ष्मणस्य च यद्वेश्म गृहं च यदिदं मम अशून्यं कार्यमेकैकं या
वदागमनं मम २५ इत्युक्त्वा दुःखितं सर्वं जनं तमुपजीविनम् उवाचेदं धनाध्यक्षं धनमा
नीयतामिति २६

न वाष्पगद्गदान् उपजीवने जीवनसाधने २४ एकैकं प्रत्येकं यावन्मम आगमनं अशून्यं कार्यं पयसो क्षाःस्थित्वा पूर्ववत्
दृष्टोणीयमिसर्पीः २५ २६

चित्ररथनामाप्तुमेत्रादन्यः सूतः सुचिरोषितः चिरकालवृद्धः १७ पशुकामिः ग्राम्यमार्थेकपशवः ग्रजामहिषाश्च
तिभिरित्यर्थः कठ कालापाः कठ कलापसेवधि ग्रावोध्यायिनः दंड मारणवाः दंडप्रधानामाणवा उपकुर्वाणा
ब्रह्मचारिणः १८ ग्रन्यतव्रतोपवासादि ग्रलसाः भिक्षादौ स्वादुकामाः सदन्नकामाः तेषांदानयोग्यं वस्तु ग्राहम

सूतश्चित्ररथाचार्यः सचिवः सचिरोषितः तोषयैनंमहार्हैस्त्वंरत्नैर्वस्त्रैर्धनैस्तथा १७
पशुकामिभिस्त्वसर्वाभिर्गवांदशशतेनच येचेमेकठकालापाबहवोदंडमाणवाः १८
नित्यस्वाध्यायशीलत्वान्नान्यत्कुर्वन्तिकिंचन ग्रलसाःस्वादुकामाश्चमहतांचापि
संमताः तेषामशीतियानानिरत्नपूर्णानिदापय १९ शालिवाहसहस्रंचद्वेभद्रकांस्तथा
दापय व्यंजनार्थंच सौमित्रेगोसहस्रमुपाकुरु २० २० २० २०

हस्तामितियानानिउष्ट्राः १९ शालीन्वहंतीतिताद्दृशा बलीवर्दानांसहस्रं भद्रकान् तदाख्यान्धान्यविशेषांश्च
एकसद्भावादिरूपान् व्यंजनार्हान्दापयव्यंजनार्थंदधिघृतार्थंगोसहस्रंउपाकुरुदेहि २० २० २० २०

प्रतिगृह्येत्यनेनन्यासभूतत्वं व्यावर्त्यते ११ ब्रह्मा त्रिदशेश्वरमिंद्रमिवेति नियोक्तृनियोज्ययोः परस्परप्रमुत्वे दृष्टांतः १२ अगस्त्यं अगस्त्यपुत्रं कौशिकं विश्वामित्रपुत्रं आहूयार्चय अनंतरं रत्नैस्तर्पय १३ तैत्तिरीयाणां तित्तिरिशाखाध्ये

एवमुक्तः स तु रामेण सुयज्ञः प्रतिगृह्य तत् रामलक्ष्मणसीतानां प्रयुयोजाशिषः शिवाः ११
अथ भ्रातरमव्यग्रं प्रियं रामः प्रियंवदः सौमित्रिं तमुवाचेदं ब्रह्मेव त्रिदशेश्वरम् १२ अगस्त्यं कौशिकं चैव तावुभौ ब्राह्मणोत्तमौ अर्चयाहूय सौमित्रे रत्नैः सस्यमिवाम्बुभिः १३
तर्पयस्व महाबाहो गोसहस्रैश्च मानद सुवर्णै रजतैश्चैव मणिभिश्च महाधनैः १४ कौशल्यां च य आशीर्भिर्भक्तः पर्युपतिष्ठति आचार्यस्तैत्तिरीयाणामभिरूपश्च वेदवित् १५
तस्य यानं च दासीश्च सौमित्रे संप्रदापय कौशेयानि च वस्त्राणि यावत्तुष्यति स द्विजः १६

तृणामाचार्यो द्विजः कौसल्यामाशीर्भिः पर्युपतिष्ठति सेवते अभिरूपः श्लाघ्यगुणः १५ यावत् यावता धनेन तुष्यति तावद्दापय कौशेयानि कृमिकोशोत्थानि १६

सीताप्रचोदितः सीतायाः स्वं जंपत्न्यै सखीत्याद्दिव्याभरणादानाय प्रचोदितः ६ हेमसूत्रं उरोभूषणाविशेषः हारसंबंधक हारायापय रत्नानां कांचींसामदनुगामिनी सखीति च भार्यायाः इति शेषः ७ तुभ्यं भार्यायै च ८

भार्यैश्च रत्नैर्बहुभिः काकुत्स्थः प्रत्यपूजयत् स प्रत्तेस तदोवाच रामः सीताप्रचोदितः ६ हारं च हेमसूत्रं च भार्यायै सौम्य हारय रशनां चाप्यसा सीता दातुमिच्छति ते सखी ७ पर्यंगदानि च चित्राणि केयूराणि शुभानि च प्रयच्छति सखे तुभ्यं भार्यायै गच्छती वनम् ८ पर्यंकमग्र्यास्तरणं नानारत्नविभूषितम् तमपीच्छति वैदेही प्रतिष्ठापयितुं त्वयि ९ नागः शत्रुंजयो नाम मम मातुलो यं ददौ मम तं ते निष्कसहस्रेण ददामि द्विजपुंगव १०

त्वयि प्रतिष्ठापयितुं तुभ्यं दातुमिच्छति धीः ९ शत्रुंजयो नाम तथा प्रसिद्धं यं गजं मातुलो मम [illegible] ददौ तं गजं ते ददामि निष्कसहस्रेण निष्कसहस्रं दक्षिणां मातुलो यद्ददौ विति दशरथ शत्रुंजय प्राप्तिरित्यर्थः १० १० १०

||रा० बा० ग्र० प्रास्थानिकं प्रस्थानप्रयोजकं कार्यं प्रो(?)षं विविशिष्टयात्रापेयादि संपादनलक्षणं कृत्वा अनंतरं ययुः ||११|| अपरताल स्पतदाख्य देशस्पृष्टं तेननि तरामंतोन्यं तत्तोनपश्चिमभागेन प्रलंबाख्य देशस्योत्तरं प्रति उत्तरभागमुदिश्य पतयोर्मध्येन मालिनीं नदीं निषेवमाणा जग्मुः प्रथममयोध्यायाः पश्चिमाभिमुखं निर्गच्छंतस्तेयोः पूर्वापरयोर्देशयोर्मध्येन मालिनीं निषेवमाणा उदङ्मु
||२५६||

ततः प्रास्थानिकं कृत्वा कार्यशेषमनंतरम् || वसिष्ठेनाभ्यनुज्ञाता दूताः संत्वरिता ययुः ||११||
संतेनापरतालस्य प्रलंबस्योत्तरं प्रति || निषेवमाणास्ते जग्मुर्नदीं मध्येन मालिनीम् ||१२||
ते हस्तिनपुरे गंगां तीर्त्वा प्रत्यङ्मुखा ययुः || पांचालदेशमासाद्य मध्येन कुरुजांगलम् ||१३||
सरांसि विपुलान्येव नदीश्च विमलोदकाः || निरीक्षमाणा जग्मुस्ते दूताः कार्यवशाद्द्रुतम् ||१४
ते प्रसन्नोदकां दिव्यां नानाविहगसेविताम् | उपातिजग्मुर्वेगेन शरदंडां जलाकुलाम् ||१५

खाः कियंतमध्वानं गत्वा ततः प्रलंबस्योत्तरभागेन पश्चिमाभिमुखा जग्मुरित्यर्थः ||१२ ततः प्रसादुदीचीं दिशं याता ततः पांचालदेशमासाद्य प्राग्मध्ये प्रीदिङ्मुखं वाहं गंगां हस्तिनापुरसमीपे तीर्त्वा प्रत्यङ्मुखाः संतो मध्येन कुरुजांगलं कुरुजांगलस्य मध्यमार्गमाश्रित्य ययुः |१३| शरदंडां तदाख्यां नदीं उपात्य अतिजग्मुः अतिचक्रमुः |१४| शरदंडां तदाख्यां नदीं उपात्य अतिजग्मुः अतिचक्रमुः ||१५|| ||रामं०२ ५६||

ततइतिप्रियकरं समस्तविश्वार्चनानुकूलं हितं तमाज्ञस्तनोऽनुगम्यनोगीकारफलकं भ्रातुः शासनमाज्ञायांगीकृत्य तत
तोगत्वाश्रमलक्ष्मणाः सयज्ञस्य निवेशनमाश्रमं प्रविवेशेति संबंधः १ दुष्कर कर्मकारिणः ब्राह्मणस्यागारं पूर्वं

वे

ततः शासनमाज्ञाय भ्रातुः प्रियकरं हितम् गत्वाश्रमं प्रविवेशाग्र्यं सुयज्ञस्य निवेशनम् १
ते विप्रमग्न्यागारस्थं वेदविद्वा लक्ष्मणोऽब्रवीत् सखेऽभ्यागच्छ पश्य त्वं वेश्म दुष्कर
कारिणः २ ततः संध्यामुपास्याग्र्यां गत्वा सौमित्रिणा सह जुष्टं तत्तापसैर्विप्रैः सुस्पार
स्परामनिवेशनम् ३ तमागतं वेदविदं प्रांजलिः सीतया सह प्रदक्षिणमभिचक्राम
राघवोऽग्निमिवार्चितम् ४ जातरूपमयैर्मुख्यैरंगदैः कुंडलैः शुभैः सहेमसूत्रैर्मणि
भिः केयूरैर्वलयैरपि ५

वनं जिगमिषो रामस्य वेश्मासपाण्मागच्छ कृत्स्नं च पश्येति प्रोषः २ संध्योपासने माध्यान्हिके ३ अभिचक्राम प्रदसु
स्यानादिकृतवान् अर्चितमग्निमिव होमकाल इति प्रोषः ४ अंगदं बाहुमूल धार्यभूषणं केयूरं तदधोभागे
धार्यवलयाकारं भूषणं हेमसूत्रैर्मणिभिः स्वर्णसूत्रैर्मुक्तादिरत्नमालाभिः ५

३५ इह मत्समीपे गुरुवृद्धजनोपेताः अनेन पूर्वोक्तविद्यातपसोर्दानपात्रत्वं सूचितम् तेषामपि मे उपजीविनामयि मृ
योतिशये न नित्यं देया दृष्टिः कृतया दातुमिच्छामि तान्नो नयेति शेषः ३६ वसिष्ठपुत्रेषु यज्ञमानयेति अनेन सर्व्व

अहं प्रदातुमिच्छामि यदिदं मामकं धनम्॥ ब्राह्मणेभ्यस्तपस्विभ्यस्त्वया सह परंतप॥३५॥
वसंतीह दृढं भक्त्या गुरुषु द्विजसत्तमाः॥ तेषामपि च मे भूयः सर्वेषां चोपजीविनाम्॥३६॥
वसिष्ठपुत्रं तु सुयज्ञमार्यं त्वमानयाशु प्रवरं द्विजानाम्॥ अभिप्रयास्यामि वनं समस्ता
नभ्यर्च्य शिष्टानपरान्द्विजातीन्॥३७॥ इत्यार्षे रामायणे वाल्मीकीये अयोध्याकांडे
एकत्रिंशः सर्गः॥३१॥

प्रमोदं प्रारभस्य वसिष्ठः पुरोहितः तत्पुत्रस्य तत्पुत्र इति न्यायेन सुयज्ञस्य विशिष्यानयननियोगः अस्यैवाग्र
हे श्रायुष्यस्थापनमिति बोध्यम् ३७ इति एकत्रिंशः सर्गः॥३१॥ रामारामारामारामारामाराम

जनकस्य महायज्ञे तु ब्रह्मोनरूपाराज्ञो धनुराविष्कंददौ तत्र जनकेनास्माकं पौतकत्वेन दत्तं तत्सर्वमाचार्यस्य ज्ञानिश्चा
चार्यसमक्षस्य निहितं तत्र ददाय दिशमाव्रज पाणिच्छं वालकांडेन तु के पृथ्वीप्रेमतां ततः संवादात्सिद्धः २९ ३० ३१ सल

ये चराज्ञो ददौ दिव्यमस्मानान्मानं रूपाणां त्रयम् जनकस्य महायज्ञे धनुर्वीरो दृदर्शिने २९
ग्रामे युकव चेदिव्ये ततो नाचार्य सायकौ प्रादिस्य विमलौ चोभौ रवेर्ज्ञोहमपरिष्कृतौ ३०
सत्कृत्य निहितं [illegible] तदा [illegible] यानि सर्वमायुधमादाय क्षिप्रमाव्रज राघव ३१
सरुद्ध ज्ञानमा [illegible] नवा [illegible] रथे [illegible] कुमारमामानज्ञ [illegible] हायुधमुत्तमम् ३२
तद्दि [illegible] रघुशार्दूल [illegible] तम् [illegible] सौमित्रिः सर्वमायुधम् ३३
तमुवाचात्मवान् रामः प्रीत्या लक्ष्मणमागतम् काले त्वमागतः सौम्य कांक्षिते मम लक्ष्मण ३४

लक्ष्मणः ३२ रघुशार्दूलः क्षत्रियश्रेष्ठः ३३ मम कांक्षिते काले मदभीष्टप्रयोजननिमित्तसंपादनकाले आगतः
३४

यस्मादेवमतो मामनुचरं कुरुष्वमत्सेवामन्तरेण मत्सेवानुमतौ वै धर्म्यं वैपरीत्य साधकेन विद्यते त्व
दनुग्रहेतोरन्यथासिद्धे दर्शितत्वात् तव चार्थः प्रकल्प्यते फलमूलाद्याहरणरूपप्रयोजनसिध्यति अ
हं चैतेन कृतार्थो भविष्यामि २४ तदेव प्रयोजनं दर्शयति धनुरादायेति भ्वापदादिभ्यो रक्षार्थं धनुर्ग्रहः

च

कुरुष्व मामनुचरं वैधर्म्यं नेह विद्यते कृतार्थोऽहं भविष्यामि तव चार्थः प्रकल्प्यते २४
धनुरादाय सगुणं खनित्रपिटकाधरः अग्रतस्ते गमिष्यामि पन्थानमनुदर्शयन् २५
आहरिष्यामि ते नित्यं मूलानि च फलानि च वन्यानि यानि चान्यानि स्वाहाराणि तपस्
स्विनाम् २६ भवांस्तु सह वैदेह्या गिरिसानुषु रंस्यते अहं सर्वं करिष्यामि जाग्रतः स्वप
तश्च ते २७ रामस्त्वनेन वाक्येन सुप्रीतः प्रत्युवाच तं व्रजाप्रच्छस्व सौमित्रे सर्वमेव सुहृज्ज
नम् २८

पिटकाः फलमूलाद्याहरणयोग्या वंशपेटी २५ स्वाहाराणि सुस्वाहाराणि २६ स्वपतः स्वप्नेन रात्रौ ल क्ष
णास्य निर्निद्रत्वं द्योत्यते २७ अनेन वाक्येन मद्वाक्यविरोधि वाक्येन व्रज यत्र व्रज आपृच्छस्व सुहृज्जना
नामाहारण २८

त

मातृपूजायां भरतस्य वात्सीत्याह तवैवतेजसा १९ प्रेमेयवत्वैभवरामजननस्य रक्षतो ममहानन्तर्योभवेदितिमत्वाभ
रतः सम्यक्पूजयिष्यति १९ तदेवकालोत्तरं भवं भयं दर्शयति यदीति दुःस्थः दुर्मार्गस्थः राज्यप्राप्येत्यन्वयः दुर्मन
साकैकेय्यनुरोधाद्दुष्टमनसा २० त्रैलोक्यमपि पित्तं वधिष्यामीत्यत्र कर्षः किन्तु सेत्युत्तरश्लोकान्वयिः २१

तवैव तेजसा वीर भरतः पूजयिष्यति कौसल्यां च सुमित्रां च प्रयतो नात्र संशयः १९
यदि दुष्टो न रक्षेत भरतो राज्यमुत्तमम् प्राप्य दुर्मनसा वीर गर्वेण च विशेषतः २०
तमहं दुर्मतिं क्रूरं वधिष्यामि न संशयः तत्पक्षानपि तान् सर्वान् त्रैलोक्यमपि किं नु सा
२१ कौसल्या बिभृयादार्या सहस्रमपि मद्विधानपि यस्याः सहस्रं ग्रामाणां संप्राप्तमुपजीवि
नाम् २२ तदात्मभरणे चैव मम मातुस्तथैव च पर्याप्ता मद्विधानां च भरणाय मनस्वि
नी २३

इदानीं स्वात्मभरणे कौसल्यायाः कस्याप्यपेक्षा नास्तीति दर्शयति कौसल्या सहस्रमद्विधानपि बिभृयात्सा
स्वात्मानं बिभृयादिति किमु वक्तव्यं कुतस्तस्याः सामर्थ्यं तत्राह यस्या इति यस्याः प्रसादादुपजीविनां सह
स्रग्रामाणां सहस्रं प्राप्तमभूत् २२ एदेवं तदिति २३

पुत्रत्वान्द्रतो भविष्यतीत्यत आह नस्मरिष्यतीति किं कैकेय्यां तन्नियोगे तत्परत्वेनेति तिरस्कारविषयके पर्यवस्थितः प्रतिष्ठितः
१४ तर्हि मयापि कथं रक्षितां कर्तुं शक्यमत आह तामिति राजानुग्रहणेन वा दशरथानुग्रहसंपादनेनैव वेत्यर्थः १५

नस्मरिष्यति कौसल्यां सुमित्रां वा सुदुःखिताम् भरतो राज्यमासाद्य कैकेय्यां पर्यवस्थितः
१४ तामार्यां स्वयमेवेह राजानुग्रहणेन वा सौमित्रे भर कौसल्यामुक्तमर्थमिमं चर १५
एवं मयि च ते भक्तिर्भविष्यति सुदर्शिता धर्मज्ञ गुरुपूजायां धर्मश्चाप्यतुलो महान् १६
एवं कुरुष्व सौमित्रे मत्कृते रघुनंदन अस्माभिर्विप्रहीनाया मातुर्नो न भवेत्सुखम् १७
एवमुक्तस्तु रामेण लक्ष्मणः श्लक्ष्णया गिरा प्रत्युवाच तदा रामं वाक्यज्ञो वाक्यकोविदम् १८

मयि भक्तिः मदाज्ञापालनात् गुरुः कौसल्यादिः १६ विप्रहीनायाः विप्रयुक्तायाः नः अस्माकं १७ वाक्यज्ञ इति वाक्यकोविदं रामममपि प्रतिवचनरचनाचातुर्येण तोषयितुं समर्थ इत्यर्थः । १८ १८

एतत्प्रतिषेधप्रयोजनं विज्ञातुमिच्छामि संशयः कं हेतुं मद्विषयपूर्वमननुमतिरिदानीं प्रतिषेध इति संदेहः ८ आगामिनं पुरोगामिनं तत्रानुमति याचमानम् स्निग्ध इत्यादि विप्रोषणानि कार्यकरणार्हतानुगुणानि १० प्रतिषेधहे

यदर्थं प्रतिषेधो मे क्रियते गन्तुमिच्छतः एतदिच्छामि विज्ञातुं संशयो हि ममानघ ८
ततो बुद्धी महातेजा रामो लक्ष्मणमग्रतः स्थितं प्राञ्जलिमित्याह याचमानं कृताञ्जलिम् ९ स्निग्धो धर्मरतो वीरः सततं सत्पथे स्थितः प्रियः प्राणसमो वश्यो भ्राता चापि सखा च मे १० मयाद्य सह सौमित्रे त्वयि गच्छति तद्वनम् को भरिष्यति कौसल्यां सुमित्रां वा यशस्विनीम् ११ अभिवर्षति कामैर्यः पर्जन्यः पृथिवीमिव स काममोहपर्यस्तो महातेजा महीपतिः १२ सा हि राज्यमिदं प्राप्य नृपस्याश्वपतेः सुता दुःखितानां सपत्नीनां न करिष्यति शोभनम् १३

तु माहमयेति कौसल्यादिभरणार्थमेव त्वं वारितोसि पूर्वमनुमननं तु मद्विप्रतिबंधरूपमिति भावः ११ राज्ञेः वभरिष्यतीत्यत्र आह अभिवर्षतीति काममव प्रान कैकेय्यनुरागेण पर्यस्तः बद्ध इत्यर्थः १३

रा०वा०अ०
१३७

रघुनंदनः भ्रातुः। अथ रसौ गाढं निपीड्य प्रणम्यातिप्रश्रितः प्राञ्जलिः ह कीर्तिमंतं सीतां च दृष्ट्वा दिभिः प्रार्थयन्महाव्रतं वि
लवचनादनवाप्तकृतनिश्चयो राघवं तु उवाच चस्त्वयैत्वाभिमतं प्राप्तो सीताशरणागतिरेवामो घोपाय इति १

सम्भ्रातुस्सरसौ गाढं निपीड्य रघुनंदनः सीतामुवाचातियशा राघवं च महाव्रतम् २
प्रदिगं तु कृत्वा वृद्धिर्वर्द्धनं नगरौघयुतम् अहं त्वानुगमिष्यामि वनमग्रे धनुर्धरः ३
मया समेतोरण्यानि रम्याणि विचरिष्यसि पक्षिभिर्मृगयूथैश्च संघुष्टानि समन्ततः ४
न देवलोकाक्रमणं नामरत्वमहं वृणे ऐश्वर्यं चापि लोकानां कामये न त्वया विना ५
एवं ब्रुवाणः सौमित्रिर्वनवासाय निश्चितः रामेण बहुभिः सान्त्वैर्निषिद्धः पुनरब्रवीत् ६
अनुज्ञातोस्मि भवता पूर्वमेव यदस्म्यहम् किमिदानीं पुनरपि क्रियते मे निवारणम् ७

त्वामस्याः प्रार्थनामपि पुरस्कारिणीत्वेन सफलीकुर्विति सीतां प्रार्थयत्रिसार्धः २ कैंकर्यप्रार्थनाप्रपदीति ततः सा
धनमाह धनुर्धर इति ३४ नन्विहैव भोगानुभवः स्यादत आह नेति आक्रमणं नामरत्वमहं ५ ६ अनुज्ञातः स

संक्षेपः तेतिस्विग्नमास्वाधिमानगरउ २४ ७

राम०१३७

क्रीडार्थाश्चाप्युपस्कराः स्वर्णमयपत्रिकाद्युपकरणानि ४४ प्रापनीयानि मम च चात्त्वस्य अन्यानि यानि च वस्
नीति शेषः ब्राह्मणानामनंतरे ब्राह्मणा दानोत्तरं स्वमस्य वर्गस्य देहीति योजना ४५ आत्मनः स्वस्य आगमने

के

भूषणानि महार्हाणि वरवस्त्राणि यानि च रमणीयाश्च ये चित्त क्रीडार्थाश्चाप्युपस्कराः ४४
प्रापनीयानि यानि नानि मम चान्यानि यानि च देहि स्वमस्य वर्गस्य ब्राह्मणानामनंतरम ४५
अनुकूलेतु सा भर्तुर्नीता वाग्मने मानसेनः क्षिप्रं प्रमुदिता देवी दातुमेवोपचक्रमे ४६ ततः
प्रहृष्टा प्रतिपूर्णकामा सा यत्राग्निः नीभर्तुरवेक्ष्य भाषितम् धनानि रत्नानि च दातुमंगना प्र
चक्रमे धर्मभृतां मनस्विनी ॥४७॥ इत्यार्षे रामायणे वाल्मीकीये अयोध्याकांडे त्रिंशः सर्गः ३०॥
एवं श्रुत्वा तु संवादं लक्ष्मणः पूर्वमागतः वाष्पपर्याकुलमुखः शोकं सोढुमशक्नुवन १

भर्तुः अनुकूलेनेत्यर्थः ४६ धर्मभृतां धर्मभृद्भ्यो दातुं प्रचक्रमे इत्यन्वयः ४७ ॥ इति त्रिंशः सर्गः ॥ ३० ॥ पूर्वमागतः
कौसल्यागृहाद्रामेणागतः सीतासंवादप्रवृत्तेः पूर्वमेवागतः शोकं अर्धशरीरभूतायाः सीताया अपि वनानुगमने

३७ ३८ हे सीते सा त्वं वने वासं स्थामीति मां अनुयातुं यतः सुनिश्चिता अतस्त्वं दंडकावने नेतुं मम मतिः सन्नापुत्रे त्यर्थः
३९ सा त्वं मया दिष्टा अनुज्ञाता वनाय वनं गंतुं मामनुगच्छस्व ४० अवसायं भर्त्रेनुसरणे निश्चयं अनुक्रांता प्रक

देवो गंधर्वगो लोकान्वमेत लोकांत स्थानसमान्नाप्नुवंति महात्मानो माता पितृ परायणाः ३
स मां पिता यथा शास्ति सत्य धर्म पथे स्थितः तथा वर्तितुमिच्छामि स हि धर्मः सनातनः ३८
मम सन्नामतिः सीते नेतुं त्वां दंडकावनम् वसिष्यामीति सा त्वं मामनुयातुं सुनिश्चिता ३९
सा हि दिष्टानवद्यांगि वनाय मदिरेक्षणे अनुगच्छस्व मां भीरु सह धर्मचरी भव ४०
सर्वथा सदृशं सीते मम स्वस्य कुलस्य च अवसायमनुक्रांता कांते त्वमति शोभनम् ४१
आरभस्व गुरु श्रोणि वनवास क्षमाः क्रियाः नेदानीं त्वदृते सीते स्वर्गोपि मम रोचते ४२
ब्राह्मणेभ्यश्च रत्नानि भिक्षुकेभ्यश्च भोजनम् देहि चाशंसमानेभ्यः संत्वरस्व च माचिरम् ४३

वसायं ब्राह्मणा ४१ क्रियाः दानादि क्रियाः इदानीमेवं दृढ निश्चये सतील्यर्थः ४२ ४३ ४२ ४३ ४२ ४३ ४२ ४३ राम०

ग

गच्छत त्वानेतुं दूता गच्छंतु वयं किं समीक्षामहे विचारयामहे राज्ञैव भरतराज्यस्य निश्चितत्वादिति भावः ॥३॥४॥ इति कर्त
व्यं अनुष्ठेयं कृत्यजातं ॥५॥ ६ सर्वं अवसत्वकालातिक्रमे तद्देवात्ययिकं विनयादित्वात् ठक् कृत्ताद्दृष्टो कृत्यमस्ति अतत्त्वर

तो शीघ्रं जवना दूता गच्छंतु त्वरितैर्हयैः ॥ आनेतुं भ्रातरौ वीरौ किं समीक्षामहे वयम् ॥३॥ ग
च्छंत्विति ततः सर्वे वसिष्ठं वाक्यमब्रुवन् ॥ तेषां तु वचनं श्रुत्वा वसिष्ठो वाक्यमब्रवीत् ॥४
एहि सिद्धार्थ विजय जयंताशोकनंदन ॥ श्रूयतामितिकर्तव्यं सर्वानेव ब्रवीमि वः ॥५॥ पुरं रा
जगृहं गत्वा शीघ्रं शीघ्रजवैर्हयैः ॥ त्यक्तशोकैरिदं वाच्यः शासनान्मम ॥६॥ पुरोहित।
स्त्वां कुशलं प्राह सर्वे चैव मंत्रिणः ॥ त्वरमाणश्च निर्याहि कृत्यमात्ययिकं त्वया ॥७॥ मा चास्मै प्रोषि
तं रामं मा चास्मै पितरं मृतम् ॥ भवंतः शंसिषुर्गत्वा राघवाणामिमं क्षयम् ॥८॥ कौशेयानि च
वस्त्राणि भूषणानि वराणि च ॥ क्षिप्रमादाय राज्ञश्च भरतस्य च गच्छत ॥९॥ दत्तपथ्याशना
दूता जग्मुः स्वं स्वं निवेशनम् ॥ केकयांस्ते गमिष्यंतो हयानारुह्य संमतान् ॥१०॥

१०

मा शोचनियोहि इति वाच्यमित्यन्वयः ॥७॥ क्षयं च पञ्चषां कौशेयानि पट्टवस्त्राणि राज्ञः केकयराजस्य ॥९॥ दत्तपथ्याशनसाधनं द

ननु यावत्तवनेच्छा तदा पितृवचनमुल्लंघ्यापि तिष्ठ नेत्यासूह एष धर्म इति ३२ मा भूत् पितृवचनपरिपालनेन दैवमाराध्यास्मा
भिरत्रैव स्थातव्यमित्यत्राह अस्वाधीनमिति अस्वाधीनमप्रत्यक्षत्वात् तादृशं दैवं प्रकारैरभीवनामात्रसाध्याराधनप्रकारैः स्वा
स्वाधीनं प्रत्यक्षं दृश्यमानत्वात् ३३ यत्र पित्राद्याराधने सति त्रयं धर्मार्थकामरूपं भवति त्रयो लोकाश्चाराधिता भवंति

एष धर्मश्च सुश्रोणि पितुर्मातुश्च वश्यता आज्ञां चाहं व्यतिक्रम्य नाहं जीवितुमुत्सहे ३२ अ
स्वाधीनं कथं दैवं प्रकारैरभिराध्यते स्वाधीनं समतिक्रम्य मातरं पितरं गुरुम् ३३ यत्र त्र
यं त्रयो लोकाः पवित्रं तत्समं भुवि नान्यदस्ति शुभापांगे तेनेदमभिराध्यते ३४ न सत्यं
दानमानौ वा यज्ञो वाप्याप्तदक्षिणाः तथा बलकराः सीते यथा सेवा पितुर्मता ३५ स्व
र्गो धनं वा धान्यं वा विद्याः पुत्राः सुखानि च गुरुवृत्त्यनुरोधेन न किंचिदपि दुर्लभम् ३६

२

अतस्तत्सममन्यत्पावनजनकं भुवि नास्ति तेन कारणेन इदं मातृपितृगुरुरूपं त्रयमभिराध्यत इत्यर्थः ३४ बलकराः पर
लोकसाधकाः ३५ गुरुवृत्त्यनुरोधेन गुरुचित्तवृत्त्यनुवर्तनेन ॥ ३६ ३६ ६ ६ ६ ३ ३६ ६ ६६६ ६६६

१आत्मवता

रा०वा०अ०
१३५

सर्वसमग्रमोतरमभिप्रायमविज्ञाय नत्तएवहेतोस्तववनवासेनरोचये नोगीकृतवानित्यिः प्राप्तीति शेषः २८ पुत्रस्य
श्वासित्रवर्ती त्वामिमयामाईवनवासायात्तुमिति शेषः १प्रतत्त्वंमया विहातुंनप्राज्या १प्रीमरेनयथाप्री
तिर्दशाहातुमशक्या २९ सर्वथा तवमयासह यानेधर्मश्चेत्याह धर्मस्त्विति धर्मोवानप्रस्थधर्मः सद्भिः

तवसर्वमभिप्रायमविज्ञाय प्रभाषते वासेनरोचयेरण्ये प्राज्ञिमानपिराघवो २८
पुत्रस्य श्वासिमयासाईवनवासायमैथिलि नविहातुंमयाप्राज्या प्रीतिरामवतायथा २९
धर्मस्तुगजनासोरु सद्भिराचरितःपुरा तंचाहमनुवर्तिष्येयथा सूर्यंसुवर्चला ३०
नखल्वहंतुगच्छेयंवनेजनकनंदिनि वचनंतंनयतिमापितुः सत्योपबृंहितम ३१

सपत्नीकैराजर्षिभिराचरितः तंपूर्वाचरितधर्ममहमनुवर्तिष्येत्वंचयथा सूर्यंसुवर्चला १अनुवर्तेतेतथामा
मनुवर्तस्व ३० हेजनकनंदिनि १अहंतुवनेनगच्छेयंनयासामात्र्वचनादितिशेषः १अथापितन्मातृवाक्यातोप्यधि रा०म०१३५
कंसत्योपबृंहितंपितुर्वचनंमांनयति ३१

समाश्वासयन्

श्रायस्ताः प्राप्य तं प्राप्य सस्वरं सप्रश्लम २२ दिग्धैः विषलिप्तैर्बाणैः चिरसन्निपतं बहुकालं संसक्तं हृदयम् २३ सितापो रीमा तत्संबंधी [illegible] २५ परिषिस्वासयन् उज्जीवयन्निति प्रा

इति सा शोकसंतप्ता विलप्य करुणं बहु चुक्रोश प्राप्य तिमायस्ताम्प्रामालिंग्य सस्वरम् २२
ता विद्धा बहुभिर्बाणैर्दिग्धैरिव गजांगना चिरसंनिपतं बाष्पमुमोचाग्निमिवारणिः २३
तस्याः स्फटिकसंकाशं वारि सितापद्मभवम् नेत्राभ्यां परिसुस्राव पंकजाभ्यामिवोदकम् २४
तस्मिन्ता [illegible] लोचने जम् पर्यष्वजत बाष्पेण जलोद्धृतमिवाम्बुजम् २५
तां परिष्वज्य बाहुभ्यां विसंज्ञामिव दुःखिताम् उवाच वचनं रामः परिविश्वासयन्सदा २६
न देवि तव दुःखेन स्वर्गमप्यभिरोचये नहि मेऽस्ति भयं किंचित्स्वयंभोरिव सर्वतः २७

वत् २६ तव दुःखेन त्वद्वियोगदुःखेन स्वर्गं ब्रह्ममयीलिप्तोषः स्वयंभोर्ब्रह्मणः स्वव्यतिरिक्तवस्त्वंतराभावेन पूर्णत्वेन च यथा भयाभावस्तद्वदेव ममापि सर्वतो भयाभावः २७

ततः उक्तहेतोः तत्र वने मत्कृते मन्निमित्तं किंचिद्विप्रियं दुःखं द्रष्टुं नार्हसि ते शोकश्च न भवेत् अतो दुर्भरा दुःखेन भर्तव्या न भविष्यामि १७ किं बहुनोक्तेन निश्चितमेकं संक्षेपतः शृणु त्वया सह यो वासः स स्वर्गः त्वया

न च तत्र ततः किंचित् द्रष्टुमर्हसि विप्रियम् मत्कृते न च ते शोको न भविष्यामि दुर्भरा १७
यस्त्वया सह स स्वर्गो निरयो यस्त्वया विना इति जानन् परां प्रीतिं गच्छ राम मया सह १८
अथ मामेवमव्यग्रां वने नैव नयिष्यसि विषमद्यैव पास्यामि मा विशं द्विषतां वशम् १९
पश्चादपि हि दुःखेन मम नैवास्ति जीवितम् उज्झितायास्त्वया नाथ तदैव मरणं वरम् २०
इमं हि सहितुं शोकं मुहूर्तमपि नोत्सहे किं पुनर्दश वर्षाणि त्रीणि चैकं च दुःखिता २१ ॥

विना यो वासः स निरयो नरकोपमः इत्येवं विश्लेषासहां प्रीतिं जानन् मया सह गच्छ॥ १८ अव्यग्रां वनवासेदो
षान्नगराये ती द्विषतां भरतादीनां वशं मा विशं न प्राप्नुयाम् १९ पश्चादुज्झितमनोत्तरकाले तदैव त्वद्वियोगका राम॰
लघ्वः २० २१ १३५

त्वयासह गच्छंत्याममतूलाजिनसमस्पर्शाः तूलैरजिनैः प्रियकादिमृगाजिनैश्च समः स्पर्शो येषां तादृशा भविष्यंतीति
शेषः १२ यदवकरिष्यति व्याप्स्यति परार्ध्यं श्रेष्ठमुत्तमं १३ वनांतः वनमध्ये शाद्वलेषु हरिततृणेषु यदाशिष्ये त्वयासह

कुशकाशशरेषीकाये च कंटकिनो द्रुमाः तूलाजिनसमस्पर्शा मार्गे मम सह त्वया १२
महावातसमुद्भूतं यन्मामवकरिष्यति रजो रमण तन्मन्ये परार्ध्यमिव चंदनम् १३ शा
द्वलेषु यदाशिष्ये वनांते वनगोचरा कुथास्तरणतल्पेषु किं स्यात्सुखतरं ततः १४ प
त्रं मूलं फलं यत्त्वमल्पं वा यदि वा बहु दास्यसे स्वयमाहृत्य तन्मेऽमृतरसोपमम् १५
न मातुर्न पितुस्तत्र स्मरिष्यामि न वेश्मनः आर्तवान्युपभुंजाना पुष्पाणि च फलानि
च १६

सहेति शेषः कुथाश्चित्रकंबलास्तदास्तरणयुक्तेषु तल्पेषु शय्यासु मम ततः शाद्वलशयनात्किं सुखतरं स्यात्
न किमपीत्यर्थः १४ १५ न मातुरित्यादि कर्मणि षष्ठी आर्तवानि तत्तदृतौ भवानि १६

रा० वा० अ० यथान्याकुलपांसनी अन्यं पत्युः पतिरेव महं मनसाप्यन्यं न द्रक्ष्यामि अतस्त्वदृते त्वां विना ऽत्र न स्थास्ये ऽतो हे राघव
१३३ त्वया सह गच्छेयमित्यन्वयः ७ इह स्थातिश्च स दर्शनेपि वनगमनासंमतिं ज्ञात्वा कुप्यति कौमारीं कुमारावस्था
यामेव परिणीतां शैलूषस्त्व जायाजीवस्त्व परेभ्यः स्वयमेव दातुमिच्छसि ८ तदेव दर्शयति यस्येति यस्य भर

न त्वहं मनसा त्वन्यं द्रष्टास्मि त्वदृतेनघ त्वया राघव गच्छेयं यथान्याकुलपांसिनी ७
स्वयं तु भार्यां कौमारीं चिरमध्युषितां सतीम् शैलूष इव मां राम परेभ्यो दातुमिच्छसि ८
यस्य पथ्यं चरामात्य यस्य चार्थे विरुध्यसे त्वं तस्य भव वश्यश्च विधेयश्च सदानघ ९
स मामनादाय वनेन त्वं प्रस्थातुमर्हसि तपो वा यदि वारण्यं स्वर्गो वा स्यात्वया सह १०
न च मे भविता तत्र कश्चित्पथि परिश्रमः पृष्ठतस्तव गच्छन्त्या विहारशयनेष्विव ११

तस्य पथ्यं हितं ऽमात्य यस्य चार्थे त्वं विरुध्यसे निरुद्धाभिषेकोसि तस्य त्वमेव वश्यः इच्छानुवर्ती विधेयो नियोज्यश्च नी
व मं नाहं तदिच्छानुवर्तिनी तद्विधेया वेहावतामीसर्थः ९ १० विहारशयने शुद्धशय्यास्वारण्ये त्वानुगच्छन्त्या न मे परिश्र
मो भविष्यतीति योजना ११

उत्तमसंविग्ना अतिभीतेतियावत् प्रणयात् स्नेहात् अभिमानात् कोपात् परिचिक्षेप आक्षेपवचनमुक्तवती २ त
दैवाह किं त्वेति हे राम त्वां त्वां पुरुषविग्रहं आकारमात्रेण पुरुषं स्त्रियमेव सन्तं जामातरं प्राप्य मे पिता किं मन्यतेत
वतत्त्वेन ज्ञातवानित्यर्थः यदि ज्ञानी आत्मां तुभ्यं न प्रयच्छेदित्याक्षेप आशयः ३ अज्ञानादाक्षेपं कृतवत्यस्मी

सा तु मुक्तत्मसंविग्ना सीता विप्रलवन्नमम प्रणया च्चाभिमानाच्च परिचिक्षेप राघवम् २
किं त्वामन्यत वैदेहः पिता मे मिथिलाधिपः रामं जामातरं प्राप्य स्त्रियं पुरुषविग्रहम् ३
अनृतं बत लोकोयमज्ञानाद्यदि वक्ष्यति तेजो नास्ति परं रामे तपतीव दिवाकरे ४ किं
हि कृत्वा विषण्णस्त्वं कुतो वा भयमस्ति ते यत्परित्यक्तुकामस्त्वं मामनन्यपरायणाम् ५
द्युमत्सेनसुतं वीर सत्यवंतमनुव्रताम् सावित्रीमिव मां विद्धि त्वमात्मवशवर्तिनीम् ६

ति भीत्या लोक एवं वदिष्यतीति स्वापवादं परिहरति अनृतमिति यदि मां विहाय भवान्वनं गमिष्यतीति तदा अ
यं लोकः तपति दिवाकरे इव रामे परं तेजो नास्तीत्यज्ञानादनृतं वक्ष्यति वत इति खेदे एतदहं न सहे इति आशयः ४
किं हि कृत्वेति किं मनसि विचार्य ५ द्युमत्सेनसुतं सत्यवंतमनुव्रतां तत्पत्नीं सावित्रीमिव मां विद्धि ६ ६ ६

सुखदुःखयोः समां प्रसेपिवविचरतां समान सुखदुःखिनीं नेतुं कन मिति शेषः २० न चेच्छसि नैवेच्छसीत्यर्थः प्राणस्त्याज्ये स्वीकरिष्ये २१ याचतेऽयाचत अननुमतौ हेतुर्विजनत्वं २२ एवमुक्ता अननुमति बोधकवाक्यमुक्ता २३ अस्तो

भक्तां पतिव्रतां दीनां मां समां सुखदुःखयोः नेतुमर्हसि काकुत्स्थ समान सुखदुःखिनीम् २०
यदि मां दुःखितामेवं वनं नेतुं न चेच्छसि विषमग्निं जलं वाहमास्थास्ये मृत्युकारणात् २१
एवं बहुविधं तं सा याचते गमनं प्रति नानुमेने महाबाहुस्तां नेतुं विजनं वनम् २२ एव
मुक्ता तु सा चिन्तां मैथिली समुपागता स्नापयन्ती कुचावुष्णैरश्रुभिर्नयनच्युतैः २३ चिं
तयन्तीं तदा तां तु निवर्तयितुमात्मवान् क्रोधाविष्टां तु वैदेहीं काकुत्स्थो बहु सान्त्वयत् २४
इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे एकोनत्रिंशः सर्गः ॥२९॥ सान्त्व्यमाना तु रामे
ण मैथिली जनकात्मजा वनवासनिमित्ताय भर्तारमिदमब्रवीत् १

त्वयत्सान्त्ववाक्यानु
चेत्यर्थः २४ इति एकोनत्रिंशः सर्गः ॥२९॥ वनवासनिमित्ताय वनवासनिमित्तानुमतिसिध्यर्थः १ ॥ ॥ ॥ ॥ रामा०१३२

नं

हे राघव अस्मिन् गृहे पूर्वमेव त्वं मे मया बहुविधं बहुवारं वनवासस्य वनगमनं प्रति प्रसादितः। यासह वनगमनं मे कांक्षितं हि निश्चयेन इति जानीहीति १४ हे राघव अहं गमनं प्रति कृतक्षणा प्रतीक्षितकाला अस्मि वने वासो यस्य तादृशस्य शूरस्य तव चर्या शुश्रूषा मम रोचते हि १५ हे शुद्धात्मन् प्रेमभावात् भर्तारमनुगच्छन्ती अहं विकल्मषा भविष्यामि कुतः भर्ता हि मम दैवतं

प्रसादितश्च वै पूर्वं त्वं वै बहुविधं प्रभो गमनं वनवासस्य कांक्षितं हि सह त्वया १४ कृतक्षणा
हं भद्रं ते गमनं प्रति राघव वनवासस्य शूरस्य मम चर्या हि रोचते १५ शुद्धात्मन्प्रेमभावाद्धि भ
विष्यामि विकल्मषा भर्तारमनुगच्छन्ती भर्ता हि मम दैवतम् १६ प्रेत्यभावे हि कल्याणः सं
गमो मे सह त्वया श्रुतिर्हि श्रूयते पुण्या ब्राह्मणानां यशस्विनी १७ इह लोके च पितृभिर्या
स्त्री यस्य महामते अद्भिर्दत्ता स्वधर्मेण प्रेत्यभावेऽपि तस्य सा १८ एवमस्मात्स्वकां नारीं सुवृ
त्तां हि पतिव्रताम् नाभिरोचयसे नेतुं त्वं मां केनेह हेतुना १९

१६ प्रेत्यभावेऽपि परलोकेऽपि क
ल्याणः शोभनः। अत्र प्रमाणमाह श्रुतिर्हीति १७ तां पठति इहेति स्वधर्मेण पतिव्रता धर्मेण वर्तमाना प्रेत्यभावेऽपि परलोके
ऽपि १८ एवं श्रुतिमानतो नित्यसंबंधे सति अस्मान्नगरात् स्वकां स्वीयां सुवृत्तां पतिव्रतामिति १९

तदेवाह कृतादेशा कृतवाक्ये सति तानि योगा भविष्यामि अन्यथा प्रतिज्ञानाचरणाभावे दोषो ममापि तवेव स्यादिति भावः अथ त्वया सह गमिष्यामि काले प्राप्ते समुत्पन्नः संप्राप्तः पूर्वकल्पित वनवासस्येति शेषः ११ तात्विकमर्थमुक्त्वा पुनस्तौ कान्तारेणाह वनेत्यादि हि हे वार्ये वनवासे वहुधा दुःखानि सतीति निश्चितं जानामि एवं तत्प्राप्यतानि अकृतात्मभिः।

कृतादेशा भवि ष्यामि गमिष्यामि सह त्वया कालस्त्वायं समुत्पन्नः सत्यवाक्भवतु द्विजः ११
वनवासे हि जानामि दुःखानि वहुधा किल प्राप्यंते नियतं वीर पुरुषैरकृतात्मभिः १२
कन्यया च पितुर्गेहे वनवासः श्रुतो मया भिक्षिण्याः साधुवृत्तायाः मम मातुरिहाग्रतः १३

जितेंद्रियैः पुरुषैः प्राप्यंते न त्वादृशमादृशजनैरित्यर्थः १२ ननु त्वद्वा ज्ञानां भ्रमो भवेत्त त्राह कन्ययाचेति भिक्षिण्याः तपस्याः सकाशात् कन्यया मया वनवासः श्रुतः तपोयुक्तत्वेन तस्या भ्रमो न संभवतीति भावः अत्र सर्वमिहेत्युत्तरश्लोकान्वयि
१३

साध्वसाधुनी विभजन् व्यवस्थापयन् राजा लोकेन मवेक्षेत इदं जगत् किंचन किंचिदपि न प्रज्ञायेत किंतु सूर्याभावे तम इवस्यात् ३६ हे द्विजवर्य महाराजे जीवत्यपि तद्वचनं वयं नातिक्रमाम प्राप्त इदानीमपि त्वमेव नातिरितिवसिष्ठं प्रति सर्वेषामुक्तिः ३७ हे द्विजवर्य सर्वेनोऽस्माकं च्छतां क्षेसं नृपंविनाप्रमृष्यमिति प्रोषः ताद्दृशावीक्ष्यराष्ट्रंचे दं

अप्रहोतमः इवेदस्यान्न प्रज्ञायेत किंचन राजा चेन्न भवेल्लोके विभजन्साध्वसाधुनी ३६
जीवत्यपि महाराजे तवैव वचनं वयम् नातिक्रमामहे सर्वे वेलां प्राप्येव सागरः ३७
स नः समीक्ष्य द्विजवर्य वृत्तं नृपं विना राष्ट्रमरण्यभूतम् कुमारमिक्ष्वाकुसुतं तथा
न्यं त्वमेव राजानमिहाभिषिंचय ३८ ॥ इत्यार्षे रामायणे वाल्मीकीये अयोध्याकांडे सप्त
षष्टितमः सर्गः ॥ ६७ तेषां तद्वचनं श्रुत्वा वसिष्ठः प्रत्युवाच ह मित्रामात्यजनान्सर्वान् ब्रा
ह्मणांस्तानिदं वचः १ यदसौ मातुलकुले पुरे राजगृहे सुखी भरतो वसति भ्रात्रा शत्रुघ्ने
न समन्वितः २

तं विनाऽरण्यभूतं समीक्ष्य इक्ष्वाकुसुतं भरतं तथान्यं वा कं द्राजानमभिषेचय ३८ इति सप्तषष्टितमः सर्गः ६७ मित्रामात्यजनाः सुमंत्रादयः ब्राह्मणां मार्कंडेयादयः १ यत् यस्मात् राज्ञो केकेयी वचनाद्दत्तराज्यो भरतो मातुलकुले भ्रात्रा समन्वितो वसति २ २ २ रा० म० २५५

एवंविधं पतिहीनाया जीवनमशक्यमित्येवंरूपं त्वया दर्शितं भर्तानुकूलतया अत्र वासस्थित्युपदेशेन यत्तोहं त्वया सह यास्यामि च इ-
पदिष्टमर्थमनुकूल्येन स्यात् अशक्यत्वादिति भावः ७ अथापि वनेनास्य दोषत्वे पि वने त्वया वस्तव्यं किलेति ब्राह्मणानां सत्ये
वचने पूर्वं पितृगेहे निवसन्त्या मया श्रुतमतो भयं भावित्वान्मम वनवासस्य न दोषः शास्त्रेनेति भावः ८ तदेव प्रपञ्चयति ला-

पतिहीना तु या नारी सा न शक्ष्यति जीवितुम् कामम् एवं विधं राम त्वया मम विदर्शितम् ७ अथा-
पि च महाप्राज्ञ ब्राह्मणानां मया श्रुतम् पुरा पितृगृहे सत्यं वस्तव्यं किल मे वने ८ लाक्ष-
णिभ्यो द्विजातिभ्यः श्रुत्वाहं वचनं गृहे वनवासकृतोत्साहा नित्यमेव महाबल ९ आदेशो
वनवासस्य प्राप्तव्यः स मया किल सा त्वया सह तत्राहं यास्यामि प्रिय नान्यथा १० १० १०

क्षणिभ्य इति लाक्षणिभ्यः सामुद्रिकलक्षणज्ञेभ्योपि ९ स ब्राह्मणोक्तो वनवासस्य आदेशः ब्राह्मणादिष्टवनवासस्वरूपः ।
मया प्राप्तव्यः किल ललाटलिखितस्यापरिहार्यत्वादिति भावः सा एवमादिष्टाहं त्वया यास्यामि नान्यथा केवलं स्वच्छ-
न्दया यास्यामीत्यर्थः १०

१ वने वस्तव्यतां वासं प्रति त्वया ये दोषाः कीर्तितास्तान्सांप्रति न वस्नेहेन पुरस्कृतान्स्नेहान् गुणानेव विद्धि प्रेम्णा त्वया सह
वर्तमानाया मम कोकिलालापचंदनमलयसमीरा तव सुखकरान् जानीहीत्यर्थः २ प्रसमर्थ्यपरि तनैसर्गौ कुप्राकारौ रित्यादि श्लो

एतत्तु वचनं श्रुत्वा सीता राममसद्दुःखिता । प्रसक्ताश्रुमुखी मंदमिदं वचनमब्रवीत् १ ये
त्वया कीर्तिता दोषा वने वस्तव्यतां प्रति । गुणानित्येव तान्विद्धि तव स्नेहपुरस्कृतान् २ मृ
गाः सिंहा गजाश्चैव शार्दूलाः शरभास्तथा । चमराः सृमराश्चैव ये चान्ये वनचारिणः
३ अदृष्टपूर्वरूपत्वात्सर्वे ते तव राघव । रूपं दृष्ट्वापसर्पेयुस्तव सर्वे हि बिभ्यति ४
त्वया च सह गंतव्यं मया गुरुजनाज्ञया । त्वद्वियोगेन मे राम त्यक्तव्यमिह जीवितम् ५
न हि मां त्वत्समीपस्थामपि शक्रोऽपि राघव । सुराणामीश्वरः शक्तः प्रधर्षयितुमोजसा ६

कैर्विवरिष्यति २ ... स्वकरास्तुन के पीत्याह मृगा इत्यादि शरभाः अष्टपदमृगाः सृमरा गवयाः ३ अदृष्टपूर्वं तावकं रूपं ये
षां तत्त्वात् तव सर्वे हि बिभ्यतीत्यनेन भीषास्माद्वातः पवते भीषोदेति सूर्य इत्यादि श्रुत्यर्थः ४ गुरुजनाज्ञया इयं सीता
मम सता छायेवानुगता सदेत्येवं रूपया ५ शक्तोऽपि नो कोऽपि ६

२१ व्याकुलत्वशाखाग्रत्वं यस्मात्तस्माद्योगाद्रुमेषु कुशकाशायोश्चबोध्यम् २२ २३ भेतव्ये भयहेतौ सत्यपि न भेतव्यं भयं न कार्यं २४ स्थलं गत्वा न गन्तव्यमित्यर्थः विमृशन् दोषान्विचारयन् दोषानिह स्थितोऽपि पश्यामीव अग्रतो बहुदोषकरं वनमिति ब्रवीमीति शेषः

पतंगावृश्चिकाः कीटादंशाश्चमशकैःसह बाधंतेनित्यमबलेसर्वंदुःखमतोवनम्॥३१॥ द्रुमाःकंटकिनश्चैवकुशाःकाशाश्चभामिनि वनेव्याकुलशाखाग्रास्तेनदुःखंतोवनम्॥३२॥ कायक्लेशाश्चबहवोभयानिविविधानिच अरण्यवासेवसतोदुःखमेवसदावनम्॥३३॥ क्रोधलोभौविमोक्तव्यौकर्तव्यातपसेमतिः नभेतव्यंचभेतव्येदुःखंनित्यमतोवनम्॥२४॥ तदलंतेवनंगत्वाक्षमंनहिवनंतव विमृशन्निहपश्यामिबहुदोषकरंवनम्॥२५॥ वनंतुनेतुंनकृतामतिस्तदाबभूवरामेणयदामहात्मना नतस्यसीतावचनंचकारसाततोब्रवीद्राममिदंसुदुःखिता॥२६॥ इत्यार्षेश्रीमद्रामायणेवाल्मीकियेअयोध्याकांडेअष्टाविंशः

२५ रामेणवनेनेतुंमतिर्यदानकृताबभूवतदासीतातस्यवचनेनचकारततोहेतोरिदमब्रवीत॥२६ अष्टाविंशःसर्गः॥२८॥

रा॰वा॰रा॰
१२८

हि यतो वने बहवो दोषाः सन्ति अतस्तान् मम वदतो मत्तो बुध्यस्व ४ कान्तारं गहनत्वाद् दुःप्रवेशं वनं बहुदोषमित्यभिधीयते इति योजना ५ हितबुद्ध्या एतदभिधीयते न तु त्वद्वञ्चनादिप्रयासोपाधिना तमर्थः सदा सर्वकाले सुखं सुखदं वनं न भवति किंतु दुःखं दुःखदमेवेत्यर्थः

सीते यथा त्वां वक्ष्यामि तथा कार्यं त्वयाबले वने दोषा हि बहवो वदतस्तान्निबोध मे ४
सीते विमुच्यतामेषा वनवासकृता मतिः बहुदोषं हि कान्तारं वनमित्यभिधीयते ५ ५
हितबुद्ध्या खलु वचो मयैतदभिधीयते सदा सुखं न जानामि दुःखमेव सदा वनम् ६
गिरिनिर्झरसंभूता गिरिनिर्दरिवासिनाम् सिंहानां निनदा दुःखाः श्रोतुं दुःखमतो वनम् ७
क्रीडमानाश्च विस्रब्धा मत्ताः शून्ये तथा मृगाः दृष्ट्वा समभिवर्तन्ते सीते दुःखमतो वनम् ८

न जानामि निश्चिनोमि ६ गिरिनिर्झराः गिरिनिर्झरजलनिनदैः संभूताः प्रसूताः गिरिनिर्दरिवासिनां गिरिदरिवासिनां सिंहानां निनदाः श्रोतुं दुःखाः कष्टाः यतः अतो वने दुःखं दुःखप्रदम् ७ विस्रब्धाः निःशङ्काः शून्ये निर्मनुष्ये देशे अस्मान् दृष्ट्वा समभिवर्तन्ते हन्तुमागच्छन्ति ८

तथान्यायमुक्तं बुवाराणामपि सीतां न वरोन निनीषति स्मनेतुं नैच्छत् । एवं तत एव वासा निवर्तनेन निवर्तनरूपप्रयोजननिमित्तं वने वासस्य दुःखितां दुःखजनकत्वं प्रतिसत् संभवात् बहु हेतु जातम् वाचेत्यर्थः २५ इति सप्तविंशः सर्गः ॥२७॥ ननेतुं कुरुते

तथा तु वा [illegible] पि धर्मवत्सलो न च समसीतां न वरो निनीषति ३ वाचं चैनां बहु सान्त्वितां नेव नेनिवासस्य च दुःखितां प्रति २५ ॥ इत्यार्षे रामायणे वाल्मीकीये अयोध्याकाण्डे सप्तविंशः सर्गः २७ ॥ स एवं ब्रुवतीं सीतां धर्मज्ञो धर्मवत्सलः ननेतुं कुरुते बुद्धिं वने दुःखानि चिंतयन् १ सांत्वयित्वा [illegible] वाच [illegible] धर्मात्मा [illegible] वाच ह २ सीते महाकुलीनासि धर्मे च [illegible] रता सदा इहाचर स्वधर्मं त्वं मा यथा मनसः सुखम् ३

बुद्धिं ननेतुं कुरुते स्म १२ महाकुलीनेत्यादि युक्तिः स्ववाक्यांगीकारप्रयोजनाय इहैव स्थित्वा स्वधर्मं चर मनसः सुखं मन सो यथा सुखं भवेत्तथा मा चरेत्यर्थः यथा मे मनसः सुखमिति पाठे यथा मे मनसः सुखं भवति तथा मदागमनमुद्दिश्य स्वध र्मं चरेत्यर्थः ३

अभिषेकं स्नानं तासु पद्मिनीषु इति शेषः १९ व्यतिक्रमं व्यतिक्रांतं वर्षसहस्राणां शतं यावन्न वेत्स्यामि न ज्ञास्यामि वने व्यामिश्रितचतुर्दशवर्षाणीति भावः स्वर्गोपि हि न मे मतः त्वया विनेति शेषः २० तदेव विवृणोति स्वर्गेपि चेति २१ मृगायुते

अभिषेकं करिष्यामि तासु नित्यमनुव्रता सह त्वया विशालाक्ष रंस्ये परमनंदिनी १९ एवं वर्षसहस्राणां शतं वापि त्वया सह व्यतिक्रमं न वेत्स्यामि स्वर्गोपि हि न मे मतः २० स्वर्गेपि च विना वासो भविता यदि राघव त्वया मम [illegible] नाहं तदपि रोचये २१ अहं गमिष्यामि वनं सुदुर्गमं मृगायुतं वानरवारणैश्च [illegible] वने निवत्स्यामि यथा पितुर्गृहे तवैव पादावुपगृह्य संमता २२ अनन्यभावामनुरक्तचेतसं त्वया वियुक्तां मरणाय निश्चिताम् ॥ नयस्व मां साधु कुरुष्व याचनां नातो मया ते गुरुता भविष्यति २३ ३३३

मृगो रामं तावद्युक्तं संमतात्तवेति शेषः तवाज्ञानुवर्तिनीति यावत् २२ त्वद्वियोगेन मरणाविषये निश्चितमतिं या चनां वना नुगमनयाचनां साधु कुरुष्व चरितार्थां संपादय अतो मदनुगमनात् गुरुता भारो न भविष्यति २३ २३ २३ २३ राम०१२७

व्रह्मचारि तातेति पञ्चरणात् शीलानियतात्वदुपदिष्टनियमयुक्ता मधुगंधिषु मकरंदसहरामि वनेषु हे वीर त्वया सह रंस्ये अपूर्वदर्शनेन संतुष्टा भविष्यामीत्यर्थः १३ अन्यस्यापि जनस्य जीवसमूहस्य १४ निवर्त्तयितुं न शक्या न्यायप्राप्तं अनुगमनत्वादित्याशयः

शुश्रूषमाणा ते नित्यं नियता ब्रह्मचारिणी सह रंस्ये त्वया वीर वनेषु मधुगंधिषु १३ त्वं हि कर्तुं वने शक्तो राम संपरिपालनम् अन्यस्यापि जनस्येह किं पुनर्मम मानद १४ साहं त्वया गमिष्यामि वनमद्य न संशयः नाहं शक्या महाभाग निवर्त्तयितुमुद्यता १५ फलमूलाशना नित्यं भविष्यामि न संशयः न ते दुःखं करिष्यामि निवसंती त्वया सह अग्रतस्ते गमिष्यामि भोक्ष्ये भुक्तवति त्वयि १६ इच्छामि सरितः शैलान् पल्वलानि सरांसि च द्रष्टुं सर्वत्र निर्भीता त्वया नाथेन धीमता १७ हंसकारंडवाकीर्णाः पद्मिनीः साधुपुष्पिताः इच्छेयं सुखिनी द्रष्टुं त्वया

उद्यता वनं गंतुमिति शेषः १५ न ते दुःखं करिष्यामि अन्नपानविशेषसंपादनायेति शेषः १६ सरांसि चेत्यस्य द्रष्टुमित्यनेनान्वयः १७
कारंडवाः जलकुक्कुटाः १८

म

अतोपि मे वनगमनमेवोचितमित्याह प्रासादाग्रैरिति प्रासादाग्रोपलक्षित भूलोकसुखापेक्षया विमानोपलक्षित स्वर्गसुखा
पेक्षया वैहायसगमनोपलक्षिताणिमाद्यष्टसिद्धिसुखापेक्षया सर्वावस्थागतेति त्रिलोकस्थश्रीके सुखदुःखमोहादिविवि
धावस्थाप्राप्तानां स्त्रीणामिति शेषः भर्त्तुः पादच्छायापादपरिचरणसुखं विशिष्यते अधिकं भवतीत्यर्थः इति पूर्णे

मी प्रासादाग्रैर्विमानैर्वा वैहायसगतेन वा सर्वावस्थागता भर्तुः पादच्छाया विशिष्यते ९ अनु
शिष्टास्मि मात्रा च पित्रा च विविधाश्रयम् नास्मि सम्प्रति वक्तव्या वर्तितव्यं यथा मया १०
अहं दुर्गं गमिष्यामि वनं पुरुषवर्जितम् नानामृगगणाकीर्णं शार्दूलगणसेवितम् ११
सुखं वने निवत्स्यामि यथैव भवने पितुः अचिन्तयन्ती त्रीन् लोकान् चिन्तयन्ती पतिव्रतम् १२

नान्वयः ९ मद्गुरुजनोपदेशोप्येवमेवेत्याह अनुशिष्टेत्यादि विविधाश्रयं विविधप्रमाणपरिपूर्णमनुशासनमनुशिष्टा
स्मि उपदिष्टास्मि अतो भर्त्तुरिमम्या यथोपदिष्टं तत्पातिव्रत्यं संप्रति नो वक्तव्यास्मि नोपदेष्टव्यास्मि १० यदेवमतोहमिति
गमिष्यामि तद्गमनमन्विति शेषः ११ त्रीन्लोकानचिन्तयन्ती त्रैलोक्यैश्वर्यमप्यगणयन्ती पतिव्रतं पत्या सह वासरूपं व्रतं चिन्तयन्ती अ रा०अ०१२६
वेक्षमाणा १२

धा.वृत्तिबंर

भर्तुर्ह्यर्धशरीरभूता भार्या तु कर्मफलभोगे प्रवृत्ता भर्त्रनुष्ठितकर्मणैवोपजीवतीति तत्र तयोः सहाधिकारादित्यर्थः अतः कारणादेवा
हमपि वने वस्तव्यमित्यादिष्टैव तव वनगमनादेव अर्द्धो वा एष आत्मनो यत्पत्नीति श्रुतेः ५ यदेवमतः नपितेत्यादि ६ अतोऽय
दित्वमितिमदंतीमद्द्यंती ७ स्त्री सती कथं वनं गमिष्यामीति ब्रुते इत्यत आह तिरीर्घ्यामध्वचनमुद्धेष्यवक्रीति रोषः तौ वहिष्कृत्य

भर्तुर्भाग्यं तु नार्येका प्राप्नोति पुरुषर्षभ अतश्चैवाहमादिष्टा वने वस्तव्यमित्यपि ५ न पि
ता नात्मजो नात्मा न माता न सखीजनः इह प्रेत्य च नारीणां पतिरेको गतिः सदा ६ यदि त्वं
प्रस्थितो दुर्गं वनमद्यैव राघव अग्रतस्ते गमिष्यामि मृद्नंती कुशकंटकान् ७ ईर्ष्यारोषौ
वहिष्कृत्य पीतशेषमिवोदकम् नय मां वीर विस्रब्धः पापं मयि न विद्यते ८

सत्का विस्रब्धो निःशंको मां नय तत्र हेतुगर्भं विशेषणं वीरेति त्यागप्रयोजकं पापं मयि न विद्यते ननु भर्तृभोगशाल्यया वने
किं प्रयोजनमत आह पीतशेषमुदकमिव दुःप्रापपानीयकान्तारस्थायिना पीतशेषं यथोदकमवश्यं नेयमास्माभिः कार्यविवेके
वक्तेत इदेवेत्यर्थः ८

एवं रामेणागच्छ्वात्तेति युक्त्वा वनवासएवममच धर्मतोन्यायप्राप्तइतिसीताप्राह एवमिति प्रणयादेवलेह यत्यादेवसं कु-
द्धा कथंममममचक्लिष्ट्यतिमादिशनीत्समर्थवती १ स एवामर्षः प्रदर्श्यते किमिदमिति लघुतयामपि तुद्धत्वा वचनेन इदं किंभा-
षसे हे नरवरोत्तम त्वया यदुक्तं तच्छ्रुत्वा मे अपहास्यं परिहासास्पदं जायते २ यत्त्वयेरितं तद्वीराणामनर्हमयशस्यं चातो

एवमुक्तातुवैदेही प्रियार्हा प्रियवादिनी प्रणयादेवसंक्रुद्धा भर्तारमिदमब्रवीत् १ किमि-
दंभाषसेरामवाक्यंलघुतयाध्रुवम् त्वयायदपहास्यंमेश्रुत्वानरवरोत्तम २ वीरा-
णांराजपुत्राणांशस्त्रास्त्रविदुषांनृप अनर्हमयशस्यंचनश्रोतव्यंत्वयेरितम् ३
आर्यपुत्रपितामाताभ्राताpुत्रस्तथास्नुषा स्वानिपुण्यानिभुंजानाःस्वंस्वंभाग्यमुपासते
४

न श्रोतव्यं श्रोतुमयोग्यम् ३ कुत एवं तत्राह आर्यपुत्रेति पित्रादयः स्वानि पुण्यानि स्वकर्मफलानि भुंजानाः भोक्तुं प्र-
वृत्ताः स्वं स्वं भाग्यं स्वानुष्ठितं कर्मैव उपासते उपजीवंति न पुत्राद्यनुष्ठितं तत्र तेषां सहाधिकाराभावात् ४ ४ ४ ४

एवमराजके दोषानभिधाय सराजके गुणानाह येत्विति संभिन्नमर्यादाः उल्लंघितस्वजातिवृत्ती आश्रममर्यादाः कृत्याकृत्यविचारशून्या नास्तिकाः तेऽपि राजदंडनिपीडिताः भावाय सा धुत्वाय कल्पंते योग्या भवंति न पततीति यावत् ३२ दृष्टिः चक्षुः यथा शरीरस्य हितसाधने ऽहितनिवारणे च नित्यमेव प्रवर्तते तथा नरेंद्रः राष्ट्रस्य तस्य धर्मयोः प्रभवः प्रवर्तकः तस्य जानीहि

येतु संभिन्नमर्यादा नास्तिकाः छिन्नसंशयाः तेऽपि भावाय कल्पंते राजदंडनिपीडिताः ३२
यथा दृष्टिः शरीरस्य नित्यमेव प्रवर्तते तथा नरेंद्रो राष्ट्रस्य प्रभवः सत्यधर्मयोः ३३ राजा सत्यं च धर्मश्च राजा कुलवतां कुलम् राजा माता पिता चैव राजा हितकरो नृणाम् ३४ यमो वैश्रवणः शक्रो वरुणश्च महाबलः विशिष्यंते नरेंद्रेण सद्वृत्तेन महात्मना ३५

तत्साधने ऽहितनिवारणे च नित्यमेव वर्तते ३३ राजा सत्यं च धर्मश्च तयोः प्रवर्तक इत्यर्थः कुलं कुलाचारप्रवर्तकः ३४ नरेंद्रेण सद्वृत्तेन सर्वे [illegible] रूपचारित्रेण यमादयो विशिष्यंते [illegible] एते यमस्य दंडमात्रं कुबेरस्य धनप्रदत्वमेव इंद्रस्य पालनमेव वरुणस्य सदाचारे नियमनमेव एतत्सर्वं तु [illegible] त्वान्नरेंद्रेण यमादयो व्यावर्तंते इत्यर्थः ३५

भ्रातृपुत्रसमौ भ्रातृपुत्रौ च समौ प्राणैः प्राणेभ्यः प्रियतरौ ३३ ३४ विप्रियं प्रतीत्यादि विपर्यये ३५ नरान्प्रगृह्णान संबंध लेशहीनानिति यावत् ३७ सत्यव्रतं समोघव्रतम् ३८ कस्यचित् व्यलीकं अप्रियं यथा न कुरुषे न करिष्यसि तथा त्वया कार्य

भ्रातृपुत्रसमौ चापि द्रष्टव्यौ च विशेषतः उभौ भरतशत्रुघ्नौ प्राणैः प्रियतरौ मम ३३
विप्रियं च न कर्तव्यं भरतस्य कदाचन स हि राजा च वैदेहि देशस्य च कुलस्य च ३४
आराधिता हि शीलेन प्रयत्नैश्चोपसेविताः राजानः संप्रसीदंति प्रकुप्यंति विपर्यये ३५
स्वपुत्रानिव राजा हि त्यजिघांत्निव भुजंगमः समर्थान्निवसन्दोहि तिमान् मन्निव दर्शनः ३६
औरसानपि पुत्रान्हि त्यजंत्यहितकारिणः समर्थान्संप्रगृह्णंति नरानपि नराधिपाः ३७
सा त्वं वसेह कल्याणि राज्ञः समनुवर्तिनी भरतस्य रता धर्मे सत्यव्रतपरायणा ३८
अहं गमिष्यामि महावनं प्रिये त्वया हि वस्तव्यमिहैव भामिनि यथा व्यलीकं कुरुषे न कस्य चित्तथा त्वया कार्यमिदं वचो मम ३९ ॥ इत्यार्षे रामायणे अयोध्याकांडे षड्विंशः सर्गः ॥ २६ ॥

यं आचरितव्यं इदं तु मम वचः आज्ञा एतत् सर्वदा हृदि स्थाप्यमिति भावः ३९ इति षड्विंशः सर्गः २६

तैरनुकूलाचरणं किमर्थमित्यत्राह तस्मादिति सत्वमात्रविशेषतः प्रसाद्यः चोदितैः पूर्वेतान् पतिः २७ स्थिरीभवन्ति स्थिरानुरागा भवन्ति मनस्विनी दृढमनस्का सर्वदा २८ प्रातिरति २९ कल्ये उषसि ३० मातरि चेति वंदितव्येति शेषः पतिवत् गुरुजनवद्

तस्मै दत्तेन प्रतिना सोवाच्यं सम्मानात्मम सर्वस्मात् प्रसन्नासीतेन पतिरिष्टविशेषः २७ ग्रहं चापि प्रतिसंतोनां गुरोः सम्यक् प्रालयन् ननम दैवप्रास्यामि स्थिरीभवमनस्विनी २८ प्रातेसमवि कल्याणि वनंम निविष्टवितम् वृत्तोपवासपरा भाविनतं स्वप्नान्य ये २९ कल्ये उत्थाय देवानां कृत्वा पूजां नमः पाविशि संचंदितव्योदश्वारथः पितामम जनेश्वरः ३० माता च मम कौसल्या वृद्धा संतापकर्शिता धर्ममेवाग्रतः कृत्वा त्वत्तः सन्मानमर्हति ३१ वंदितव्या स्तवपातिसपत्नाः शेषा मम मातरः स्नेहप्रणयसंभोगैः समाहि मम मातरः ३२ ५५५५५

नं कुलवधूनां धर्म एवेति पुरस्कृत्य त्वत्तः सन्मानमर्हतीति संबंधः ३१ स्नेहः प्रीतिः प्रणयः सौहृदं भोगाः पालनं मयि तु स्नेहादित्रयसमविशेषात् कुर्वंति तस्मात्तास्तया वंद्या इति भावः ३२

नि

२१ नृपेणोद्यते प्रस्ताविते मम अभिषेके सज्जे सति तया अद्य समयः प्राचीनो वरसंकेतः प्रचोदितः प्रवर्तितः तेन तु कारणेन राजा धर्ममार्गेण प्रतिनिर्जितः स्ववशीकृत २२ अत्र तु कृते किमायातं तत्राह चतुर्दशेत्यादि २३ अथ सीतायाः गृहे वसस्थितो विजन

राज्ञा सत्यप्रतिज्ञेन पित्रा दशरथेन वै कैकेय्यै मम मात्रे तु पुरा दत्तौ महावरौ २१ तयाद्य मम सज्जेऽस्मिन्नभिषेके नृपोद्यते प्रचोदितः ससमयो धर्मेण प्रतिनिर्जितः २२ चतुर्दश हि वर्षाणि वस्तव्यं दण्डके मया पित्रा मे भरतश्चापि यौवराज्ये नियोजितः २३ सोऽहं त्वामागतो द्रष्टुं प्रस्थितो विजनं वनम् भरतस्य समीपे ते नाहं कथ्यः कदाचन २४ ऋद्धियुक्ता हि पुरुषा न सहन्ते परस्तवम् तस्मान्न ते गुणाः कथ्या भरतस्याग्रतो मम २५ नापि त्वं तेन भर्तव्या विशेषेण कदाचन अनुकूलतया शक्यं समीपे तस्य वर्तितुम् २६

न कवृद्धिरुपदिश्यते भरतस्येत्यादिना न कथ्यो न श्लाघनीयः त्वत्प्रशंसा मार्यामाम मन्दभाग्यामिति शेषः २४ ते प्रसिद्धाः मम गुणाः २५ तेन भरतेन त्वं विशेषेण नैव भर्तव्या किंतु वेधसा साधारणेन भरणीया अतः अनुकूलतया स्वजनसाधारणतया तस्य समीपे वर्तितुं शक्यम् २६

प्रकृतयः

अमात्याः श्रेणीमुख्याः परिषन्मुख्याः सर्वत्र तत्कुत इति शेषः १४ पुष्यरथः उत्सवाय कल्पितो रथः सहि राज्ञामसतो नीय ते के वले संभ्रमाय १५ हस्ती कृष्णमेघप्रभो गिरिप्रभश्च १६ भद्रासनं पुरस्कृत्य यान्तं ते पुरःसरं सेवकं न पश्यामि १७ य

नत्वां प्रकृतयः सर्वाः श्रेणीमुख्याश्च भूषिताः अनुव्रजितुमिच्छन्ति पौरजानपदास्तथा १४ चतुर्भिर्वेगसंपन्नैर्हयैः काञ्चनभूषणैः मुख्यः पुष्यरथो युक्तः किं न गच्छति तेग्रतः १५ न हस्ती चाग्रतः श्रीमान्सर्वलक्षणपूजितः प्रयाणे लक्ष्यते वीर कृष्णमेघगिरिप्रभः १६ न च काञ्चनचित्रं ते पश्यामि प्रियदर्शनम् भद्रासनं पुरस्कृत्य यान्तं वीर पुरःसरम् १७ अभिषेको यदा सज्जः किमिदानीमिदं तव अपूर्वो मुखवर्णश्च न प्रहर्षश्च लक्ष्यते १८ इतीव विलपन्तीं तां प्रोवाच रघुनन्दनः सीते तत्रभवांस्तातः प्रव्राजयति मां वनम् १९ कुले महति संभूते धर्मज्ञे धर्मचारिणि शृणु जानकि येनेदं क्रमेणाभ्यागतं मम २०

दा अभिषेकः सज्जः प्रकृतः इदानीमिदं किं १८ विलपन्तीं दुःखेन भाषमाणाम् तत्रभवान्पूज्यः १९ महतोः क्षत्रियवंशस्य प्रवरो असि तापामोहोमाभूदिति विविधमुक्ता सेकीर्तनेन संबोधयति कुलइति येन क्रमेणाप्येन हेतुना इदं प्रव्राजनमागतं तच्छृणु २०

वार्हस्पतः बृहस्पतिदेवताकः युक्तः चंद्रेति शेषः पुष्यतेन युक्तेनाभिषेककरति ब्राह्मणैः प्रोच्यते तज्जन्मसंतोषं विहाय
दुर्मनाः केनासि ९ प्रांते प्रालंकारभिन्नछत्रेतेन छत्रेणावृतं सन्नविराजते वल्गु सुंदरम् १० व्यजनाभ्यां वालव्यजना

अद्य वार्हस्पतः श्रीमान् युक्तः पुष्येण राघव प्रोच्यते ब्राह्मणैः प्राज्ञैः केन त्वमसि दुर्मनाः ९ नते
प्रांतप्रालंकेन जलफेननिभेन च आवृतं वदनं वल्गु छत्रेणाभिविराजते १० व्यजनाभ्यां
च मुख्याभ्यां शातपत्रनिभेक्षण चंद्रहंसप्रकाशाभ्यां वीज्यते न तवाननम् ११ वाग्मिनो
वंदिनश्चापि प्रहृष्टास्त्वां नरर्षभ स्तुवंतो नाद्य दृश्यंते मंगलैः सूतमागधाः १२ नते
क्षौद्रं च दधि च ब्राह्मणा वेदपारगाः मूर्ध्नि मूर्धाभिषिक्तस्य ददति स्म विधानतः १३

भ्यां शातपत्रं पद्मं तत्सदृशे ईक्षणे यस्य तत्संबोधनं ११ वंदिनः स्तुतिपाठकाः मेमत्तैर्मंगलवचनैः सूताः कृतकथाप्रशंसिनः मागधा वंशप्रशं
साकाः १२ क्षौद्रं च दधि च तीर्थोदकमिश्रितमिति शेषः मूर्धाभिषिक्तस्य शिरःस्नातस्य ते मूर्ध्नि न ददति स्म तत्कुत
इति शेषः १३

देवकार्यं देवपूजां कृतसा अभिषिक्तभर्तृविषये परमहितैषीभिर्गौर्यादिपूज्यादिना कृतपादार्चनादिसमाचारेत्यर्थः ४ ह्रियासीतायैकथमीदृशमप्रियं कथयामीति लज्जया अवनतमुख इत्यर्थः ५ समुत्पत्य आसनात्समुत्थाय वेपमाना भर्तुर्विगतहर्षत्वा वाङ्मुखत्वादिदर्शनात्कंपमानेत्यर्थः ६ स हि धर्मात्मा हृदयार्दवितोमनोगतं तं शोकं दशरथदुःखदुःखं

देवकार्यंसमाहृत्वा कृतज्ञा हृष्टचेतना अभिज्ञाराजधर्माणां राजपुत्रंप्रतीक्षते ४ प्रविवेशाथ रामस्तु स्ववेश्म सुविभूषितम् प्रहृष्टजनसंपूर्णं ह्रियाकिंचिदवाङ्मुखः ५ अथ सीता समुत्पत्य वेपमाना च तं पतिम् अपश्यच्छोकसंतप्तं चिन्ताव्याकुलितेन्द्रियम् ६ तां दृष्ट्वा स हि धर्मात्मा न शशाक मनोगतम् तं शोकं राघवः सोढुं ततो विवृततां गतः ७ विवर्णवदनं दृष्ट्वा तं प्रस्विन्नममर्षणम् आह दुःखाभिसंतप्ता किमिदानीमिदं प्रभो ८

प्रेयसीं दृष्ट्वा सोढुं गूढं कर्तुं न शशाक ततो विवृततां विवृताभिप्रायतां गतः विशुद्धचिदानंदस्वभावोपि चिकीर्षितलीलासहायजनकनंदिन्याः सान्निध्याद्दुःखविक्षेपप्राकृतिरिवजात इत्यर्थः ७ अमर्षिणं शोकधारणाक्षममिव इदानीं हर्षकाले इदं दौस्थ्यम् ८ ८ ८ ८ टास०

मातात्रापदद्दिणाकरणं रतार्थी ४६ निपीड्य ऋषिवाक्यं सर्वः तयास्व तःसिद्धया ४७ इति पंचविंशः सर्गः २५ वनसंप्रस्थितः वने
गंतुंप्रकृत धर्मिष्ठे ऋतिप्रायेन धर्मवति १ श्रामममंपेव तोभयतिस्मतत्रेह तु गृहे सावन्ता २ तासर्वैन गमनव तोंतंतपस्विनी ऋभिषेका

ऋतीव जाप्यक्षति पूर्णत्वो चनास्माप्य चखल्वपयनेंयया विधिप्रदक्षिणं चापि चकार सुघवे
पुनःपुनश्चापि निरीक्ष्य सल्लजे ४६ तथाहि दैव्याच कृतप्रदक्षिणो निपीड्य मातुश्चरणौ पु
नःपुनः जगाम सीतासहितः सुमहायशाः सराघवः प्रज्वलितस्तथाग्निना ४७ इत्यार्षे रामायणे
श्रयोध्याकांडे पंचविंशः सर्गः ॥२५॥ ऋषिवाक्यतु कौसल्यां रामः संप्रस्थितो वनम् कृतस्व
स्त्ययनो मात्रा धर्मिष्ठे वर्त्मनि स्थितः १ विराजयन् राजसुतो राजमार्गं नरैर्वृतम् हृदयान्या
ममंथेव जनस्य गुणवत्तया २ वैदेही चापि तत्सर्वं न शुश्राव तपस्विनी तदेव हृदि तस्याश्च
यौवराज्याभिषेचनम् ३

हृद्वृतवर्ती तस्याश्च तस्यास्तु हृदि तदेव यौवराज्याभिषेचनं वर्त्तते इति शेषः ३ ३ ३ ३ ३ ३ ३ ३ ३ ३ ३ ३

केन प्रकारेणो वा चेत्यत्राह आनम्येति आनमय्येत्यर्थः पुत्र सिद्धार्थः सिद्धप्रयोजनो यथासुखं गच्छेत्यवदन् ४०
सर्वसिद्धार्थं सिद्धसर्वप्रयोजनं पश्यामि द्रक्ष्यामि ४१ प्रनष्टः दुःखसंकल्पः वने रामस्य किं भविष्यतीत्येवं

आनम्य मूर्ध्नि चाघ्राय परिष्वज्य यशस्विनी अवदत्पुत्र सिद्धार्थो गच्छ राम यथासुखं
४० अरोगं सर्वसिद्धार्थमयोध्यां पुनरागतम् पश्यामि त्वां सुखं वत्स संस्थितं राजवर्त्मसु ४१ प्रनष्टदुःखसंकल्पा हर्षविद्योतितानना द्रक्ष्यामि त्वां वनात्प्राप्तं पूर्णचन्द्रमिवोदितम् ४२ भद्रासनगतं राम वनवासादिहागतम् द्रक्ष्यामि त्वामहं पुत्र तीर्णवन्तं पितुर्वचः ४३ मङ्गलैरुपसंपन्नो वनवासादिहागतः वध्वा मम नित्यं त्वं कामान्संवर्द्धयाहि भोः ४४ मयार्चिता देवगणाः शिवादयो महर्षयो भूतगणाः सुरोरगाः अभिप्रयातस्य वनं चिराय ते हितानि कांक्षन्तु दिशश्च राघव
४५

रूपो यस्याः सा ४२ ४३ वनवासादिह अयोध्यायामागतो मंगलैरुपसंपन्नो चित्रवस्त्राभरणैरुपपन्नो भूषितस्त्वं मम वध्वाः सीतायाः काम्यमान वस्त्राभरणादीनि संवर्द्धय याहि गच्छ भोः इति निपात आमंत्रणे ४४
४५

त्रिविक्रमान्त्रीन्पादविक्षेपान् ३५ प्रभुं मंगलेभ्यो मंगलानामपि मंगलं ३६ इति उक्ते तिशेषः पुत्रस्य रामस्य शिरसि शिरो
घ्रात्वा तां तां कृत्वा गंधैश्च समालभ्य चंदनैर्विलिप्य ३७ सिद्धार्थां दृष्टवीर्यां ओषधिं मूलिकां विशल्यकर
णीं च अंतर्गत शल्यनिर्गमनकरणीं मूलिकां गुडूचीं कृत्य प्रभोः रक्षां चकार रक्षाहेतुत्वेन हस्ते ववंधेत्यर्थः तां

त्रिविक्रमान्प्रक्रमतो विष्णोरतुलतेजसः यदासीन्मंगलं राम तत्ते भवतु मंगलम् ३५ ऋतवः
सागरा द्वीपा वेदा लोका दिशश्च ते मंगलानि महाबाहो दिशंतु शुभमंगलम् ३६ इति
पुत्रस्य शेषांश्च कृत्वा शिरसि भामिनी गंधैश्चापि समालभ्य राममायतलोचना ३७
ओषधिं च सुसिद्धार्थां विशल्यकरणीं तथा चकार रक्षां कौशल्या मंत्रैरभिजजाप
च ३८ उवाचापि प्रहृष्टेव सा दुःखवशवर्तिनी वाङ्मात्रेण न भावेन वाचा संसज्जमा
नया ३९

मंत्रैरिति प्राप्तितो कर्तुं जजाप मंत्रानिति शेषः ३८ उवाचापीमं त्रानिति शेषः जपोत्तरस्य अनपि मंत्रानुच्चा
रयामासेत्यर्थः एतच्चेतन्मे त्राणानुसंधानेन रामस्य प्रसादार्थं इव न हर्षपारम्यार्थं द्योत्यते तदेवाह वा
ङ्मात्रेणेति संसज्जमानया अंतःखेदाद्रुदया ३९

 उपसंपादयामासहोमायेति शेषः २८ अनामयं शान्त्यमुद्दिश्येति शेषः हुतानां हव्यानां शेषशेषेणवाद्येहो
मपश्वानां बलिभिर्वा लोकपालादिबलिं २९ स्वस्तिवाच्यं स्वस्तिवाचनमुद्दिश्य द्विजान् मध्वादिभिरुपलक्षि

घृतं श्वेतानि माल्यानि समिधः श्वेतसर्षपान् उपसंपादयामास कौसल्या परमांगना २८
उपाध्यायः सविधिना हुत्वा शान्तिमनामयम् हुतहव्यावशेषेण वाह्यं बलिमकल्पय
त २९ मधुदध्यक्षतघृतैः स्वस्ति वाच्य द्विजांस्ततः वाचयामास रामस्य वने स्वस्त्य
यनक्रियाम् ३० ततस्तस्मै द्विजेन्द्राय राममाता यशस्विनी दक्षिणां प्रददौ काम्यां राघ
वं चेदमब्रवीत् ३१ यन्मंगलं सहस्राक्षे सर्वदेवनमस्कृते वृत्रनाशे समभवत्तत्ते भवतु मं
गलम् ३२ यन्मंगलं सुपर्णस्य विनताकल्पयत्पुरा अमृतं प्रार्थयानस्य तत्ते भवतु मंग
लम् ३३ अमृतोत्पादने दैत्यान् घ्नतो वज्रधरस्य यत् अदितिर्मंगलं प्रादात्तत्ते भवतु
मंगलम् ३४

तान् हुत्वा रामस्य वने स्वस्तिसिवे रूपां वने स्वस्त्ययनक्रियां वाचयामासेत्यन्वयः ३० काम्यां इच्छाविषयां ३१ वृत्रनाशो
त इपनिमित्ते ३२ प्रार्थयानस्य प्रार्थ प्रमानस्य ३३ ३४

उत्थापयित्वा मातेति शेषः॥२३॥ सदसि संमताः सभ्याः॥२४॥ शीले सद्वृत्ते श्रुतिः श्रुतं तपश्चोद्दापगादिः तदनुगा बुद्धिः स्यद्वसायात्मि
का अर्कस्य मंदिरे अर्कमंडले तद्वहितमस्तं हे। अर्कस्य मंदिरे इति पाठे अर्कस्य प्रभा मंदिरे एव अस्तं प्राप्तं तमंदरपर्वते अर्कप्रभा

मत्तमातंगसंकाशं चेन्द्रार्कसदृशप्रभम् वः॥ उत्थापयित्वा शोकार्त्तं वचनं चेदमब्रवीत्॥२३॥
उत्तिष्ठोत्तिष्ठ किं शेषे राजपुत्र महायशः॥ त्वद्विधा न हि शोचंति संतः सदसि संमताः॥२४॥ दा
नयज्ञाधिकारा हि शीलश्रुतितपोनुगा॥ बुद्धिस्ते बुद्धिसंपन्न प्रभेवार्कस्य मंदिरे॥२५॥ स
रुदित्वा चिरं कालं भूमौ विपरिवृत्य च॥ जननीं प्रत्युवाचेदं शोकैर्बहुभिरावृतः॥२६॥ अ
भिषेक्ष्यति रामं तु राजा यज्ञं नु यक्ष्यते॥ इत्यहं कृतसंकल्पो हृष्टो यात्रामयासिषम्॥२७॥ त
दिदं ह्यन्यथाभूतं व्यवदीर्णं मनो मम॥ पितरं यो न पश्यामि नित्यं प्रियहिते रतम्॥२८॥ अं
ब केनात्ययाद्राजा व्याधिनामप्यनागते॥ धन्या रामादयः सर्वे यैः पिता संस्कृतः स्वयम्॥२९

याः पर्वतांतरापेक्षया चिरकालास्थानादेवमुक्तिः॥२५॥२६॥ यक्ष्यते करिष्यति या त्रामयासिषं यात्रामकार्षं॥२७॥ अन्यथा
भूतं चिंतितविपरीतं जातं॥२८॥ रामेणोर्ध्वदेहिकं कृतमिति मन्वान आह धन्या इत्यादि॥२९॥

२४ प्रतिमंडिताः भूषिता २५ संवदंतः व्याकुर्वंतः तेधिष्ठंते वनेषु मुनीनामाश्रमभूतवनेषु २६ कल्प्यंते संपाद्यंते २७ २८ त

नाराजके जनपदे योगक्षेमं प्रवर्त्तते नचाप्यराजके सेना शत्रून्विषहते युधि २४ नाराज
के जनपदे हृष्टैः परमवाजिभिः नराः संयांति सहसा रथैश्च प्रतिमंडिताः २५ नाराजके
जनपदे नराः शास्त्रविशारदाः संवदंतोपतिष्ठंते वने षूपवनेषु च २६ नाराजके
जनपदे माल्यमोदकदक्षिणाः देवताभ्यर्च्चनार्थाय कल्प्यंते नियतैर्जनैः २७ नारा
जके जनपदे चंदनागरुभूषिताः राजपुत्रा विराजंते वसंते इव शाखिनः २८ यथाह्य
नुदका नद्यो यथा वाप्यतृणं वनम् अगोपाला यथा गावस्तथा राष्ट्रमराजकम् २९ ।
ध्वजो रथस्य प्रज्ञानं धूमो ज्ञानं विभावसोः तेषां यो नो ध्वजो राजा स देवत्वमितो गतः ३०
नाराजके जनपदे स्वकं भवति कस्यचित् मत्स्या इव जना नित्यं भक्षयंति परस्परम् ३१

मितो गतः ३० स्वकं जीवितम् ३१

थाराष्ट्रमिति न शोभत इति शेषः २९ प्रज्ञानं ज्ञापके ध्वजः प्रकाशकः स इतो देवत्वं गतः एवं चास्मानितः परं के पि जनानमं

रा म २५४

सर्वजातयः क्रूरजंतव २० आगमाः आगमनयोग्यामार्गाः इत्यर्थः सर्वसंपतयः इति वनवासापेक्षिताः फलमूला

न मांसभोजने नारी द्वापे चान्ये सर्वजातयः मा च त्वां हिंसियुः पुत्रमया संपूजितास्त्विह २०
आगमास्ते शिवाः संतु सिध्यंतु च पराक्रमाः सर्वसंपत्तयो राम स्वस्तिमान् गच्छ पुत्रक २१
स्वस्ति तेस्त्वांतरिक्षेभ्यः पार्थिवेभ्यः पुनः पुनः सर्वेभ्यश्चैव देवेभ्यो ये च ते परिपंथिनः २२
शुक्रः सोमश्च सूर्यश्च धनदोथ यमस्तथा पांतु त्वामर्चिता राम दंडकारण्यवासिनम् २३
अग्निर्वायुस्तथा धूमो मंत्राश्चर्षिमुखाच्च्युताः उपस्पर्शनकाले तु पांतु त्वां रघुनंदन २४
सर्वलोकप्रभुर्ब्रह्मा भूतकर्तॄन् तथर्षयः ये च शेषाः सुरास्ते तु रक्षंतु वनवासिनम् २५
इति माल्यैः सुरगणान् गंधैश्चापि यशस्विनी स्तुतिभिश्चानुरूपाभिरानर्चायतलोचना
२६ ज्वलनं समुपादाय ब्राह्मणेन महात्मना हावयामास विधिना राममंगलकारणात् २७

दयः संत्विति शेषः २१ पार्थिवेभ्यः पृथिवीभवसत्वेभ्यः देवेभ्यः ये च ते परिपंथिनस्तेभ्यश्च ते स्वस्त्यस्तु २२ २३ ऋषिमुखा
च्युता निर्गता स्त्वया गृहीताश्चेति शेषः २४ भूतकर्त्तीनाराप्रताः २५ २६ २७

रा॰ ११७ सर्वतःसिद्धाः प्रसिद्धाः १३ शैलाः कुलपर्वताः राजा कुबेरः १४ अस्मिन्प्रकरणे पुनरुक्तयः प्रेमपारवश्यात्

ते चापि सर्वतः सिद्धा दिशश्च सदिगीश्वराः स्तुता मया वने तस्मिन्पान्तु त्वां पुत्र नित्यशः १३ शैलाः सर्वे समुद्राश्च राजा वरुण एव च द्यौरन्तरिक्षं पृथिवी वायुश्च सचराचरः १४ अहोरात्रे तथा संध्ये पान्तु त्वां वनमाश्रितम् कला श्च काष्ठा श्च तथा तव शर्म दिशन्तु ते १५ महावने विचरतो मुनिवेषस्य धीमतः तथादित्याश्च दैत्याश्च भवन्तु सुखदाः सदा १६ राक्षसानां पिशाचानां रौद्राणां क्रूरकर्मणाम् क्रव्यादानां च सर्वेषां मा भूत्पुत्रक ते भयम् १७ प्लवगा वृश्चिका दंशा मशकाश्चैव कानने सरीसृपाश्च कीटाश्च मा भूवन्गहने तव १८ महाद्विपाश्च सिंहाश्च व्याघ्रा ऋक्षाश्च दंष्ट्रिणः महिषाः शृङ्गिणो रौद्रा न ते द्रुह्यन्तु पुत्रक १९

१५ आदित्या देवाः १६ सर्वक्रव्यादसंबन्धि भयं पुत्रक ते माभूदित्यन्वयः १७ प्लवगाः वानराः दंशा वनमक्षिकाः गहने वने तव मा भूवन् मा सन्तु १८ ऋक्षा राम॰ ११९ भल्लूकाः १९

समिदादिपदेन तदधिष्ठात्र्यो देवता उपलक्ष्यंते पवित्राणि दर्भमयाः क्षुपाः ह्रस्ववृक्षाः त्वां रक्षंत्विति मिणानन्वयः ७
स्वस्तिरस्त्वस्य कुर्वंत्विति निमेणा संबंधः ८ धाता हिरण्यगर्भः विधाता सृष्टिविधायकः ९ १० नक्षत्राणि रेवत्या

समित्कुशपवित्राणि वेद्यश्चायतनानि च स्थंडिलानि च विप्राणां शैलावृक्षाः क्षुपा ह्रदा
पः ७ पतंगाः पन्नगाः सिंहास्त्वां रक्षंतु नरोत्तम स्वस्ति साध्याश्च विश्वे च मरुतश्च म
हर्षिभिः ८ स्वस्ति धाता विधाता च स्वस्ति पूषा भगोर्यमा लोकपालाश्च ते सर्वे वास
वप्रमुखास्तथा ९ ऋतवश्चैव पक्षाश्च मासाः संवत्सराः क्षपाः दिनानि च मुहूर्ताश्च
स्वस्ति कुर्वंतु ते सदा १० नक्षत्राणि च सर्वाणि ग्रहाश्च सह दैवतैः स्मृतिर्धृतिः
श्च धर्मश्च पांतु त्वां पुत्र सर्वतः ११ स्कंदश्च भगवान्देवः सोमश्च सबृहस्पतिः स
प्तर्षयो नारदश्च ते त्वां रक्षंतु सर्वतः १२

दिनक्षत्राधिष्ठात्र्यो देवताः महार व्यादयः सह दै
वतैरंतर्यामिसहिताः धर्मः श्रुतिस्मृत्युदितः ऐपालयः सोऽस्य पितृवाक्यपरिपालनजन्यो ऊ रति न पुनरुक्तिः
११ १२

१४११८ इतिचतुर्विंशः सर्गः तान्येवस्वस्त्ययनानिदर्शयतिसाविनीयेति आयासंखेदंशुचिविनीयपस्वल्काजलमुपस्पृश्याचम्य मंगलवचनानिचकार १ सतांक्रमेसतांमार्गे २ पालयसिप्रप्रच्युतमनुतिष्ठसि ॥३॥ चैत्येषुचतुष्पथेषु ४

इत्यार्षेरामायणेवाल्मीकीयेअयोध्याकांडेचतुर्विंशः सर्गः ॥ २४ ॥ साविनीयतमा

यासमुपस्पृश्यजलंशुचि चकारमातारामस्यमंगलानिमनस्विनी १ नशक्यसे।

वारयितुंगच्छेदानींरघूत्तमशीघ्रंचविनिवर्तस्ववर्तस्वचसतांक्रमे २ यंपालय

सिधर्मंत्वंधृत्याचनियमेनच सवैराघवशार्दूलधर्मस्त्वामभिरक्षतु ३ येभ्यः

प्रणमसेपुत्रचैत्येष्वायतनेषुच तेचत्वामभिरक्षंतुवनेसहमहर्षिभिः ४ यानिदत्तानि

तेस्त्राणिविश्वामित्रेणधीमता तानित्वामभिरक्षंतुगुणैः समुदितंसदा ५ पितृ

शुश्रूषयापुत्रमातृशुश्रूषयातथा सत्येनचमहाबाहोचिरंजीवाभिरक्षितः ६ बाहो

यतनेषुदेवतागृहेषु तेदेवाः चादयः ४ गुणैःसमुदितंसद्गुणयुक्तम् ५ ६ राम०११८

तेच ३

३४ आत्मपतामानगच्छात्र्थ्य ... २५ मेवचआश्लिष्य घनिराकृत्यात्वांसंचोदयतीतियत्त्वनायेतिशेषः पुत्रोदुर्विभाव्या
३६ सम्भ्रान्तोऽलववचनेन अत्यन्तोनन्निर्मितेन चेतसा ३७ तन्मामपि अदर्शनात्हि अस्त्वात्मत्यागमन कालस्यदानीम्

गच्छपुत्रत्वमेकाग्रोभद्रंतेस्तुसदाविभो पुनस्त्वयिनिवृत्तेतुभविष्यामिगतक्लमा ३४
प्रत्यागतेमहाभागेकृतार्थेचरितव्रते पितुरानृण्यतांप्राप्तेत्वयिलप्स्येपरंसुखम् ३५
कृतान्तस्यगतिःपुत्रदुर्विभाव्यासदाभुवि यस्त्वांसंचोदयतिमेवचआच्छिद्यराघव ३६
गच्छेदानींमहाबाहोक्षेमेणपुनरागतः नन्दयिष्यसिमांपुत्रसाम्नाश्लक्ष्णेनचेतसा ३७
अपीदानींसकालःस्याद्वनात्प्रत्यागतंपुनः यत्त्वांपुत्रकपश्येयंजटावल्कलधारिणम् ३८
तथाहिरामंवनवासनिश्चितंसमीक्ष्यदेवीपरमेणचेतसा उवाचरामंशुभलक्षणंवचो
बभूवचस्वस्त्ययनाभिकाङ्क्षिणी ३९

पितृरूमवेदितिप्रार्थयते अपीदानीमिति येनयस्मिन्कालेवनात्प्रत्यागतंत्वांपुनःपश्येयंसकालइदानीमेवापिस्यात्शी
घ्रमागच्छत्विति भावः ३८ परमेणाआदरवताह्यपरेणमनसाअभिकाङ्क्षितुंशीलमस्याःसा ३९

रा०११७ उपसंहरति शुश्रूषामिति भर्तृसेवारूपो धर्मः स्त्रियः नित्य इति पुरा दृष्टः पुरातनाचारसिद्धः वेदे श्रुतः लोके स्मृ
तः २८ तर्हि किं कर्मेति तत्र सर्वथात्याज्यमित्याह अग्नीत्यादि भर्तृसंमतेषु अग्निकार्येषु च २९ एवं भर्तृसेवा

शुश्रूषामेव कुर्वीत भर्तुः प्रियहिते रता एष धर्मः पुरा दृष्टो वेदे लोके श्रुतः स्मृतः २८
अग्निकार्येषु च सदा सुमनोभिश्च देवताः पूज्यास्ते मत्कृते देवि ब्राह्मणाश्च सुव्रताः २९ एवं कालं प्रतीक्षस्व ममागमनकाङ्क्षिणी नियता नियताहारा भर्तृशुश्रूषणे रता ३० प्राप्स्यसे परमं काममस्मिन् प्रत्यागते सति यदि धर्मभृतां श्रेष्ठो धारयिष्यति जीवितम् ३१ एवमुक्ता तु रामेण बाष्पपूर्णेक्षणा तदा कौसल्या पुत्रशोकार्ता राममेवचनमब्रवीत ३२ गमने सुकृतां बुद्धिं न ते शक्नोमि पुत्रक विनिवर्तयितुं वीर नूनं कालो दुरत्ययः ३३

तत्परया कालं ममागमनकाङ्क्षिणी प्रत्याग्मनादिनियमयुक्ता ३० परमं कामं निरतिशयसुखं भर्तृजीवनपुत्रागमनयोः सतोरेव हि परमकामप्राप्तिः संभवति इति भावः ३१ ३२ रा०११७

एवमुक्तः स कौसल्यां अभिवाद्य पुनः पुनः
[illegible] ३३

भवतिदं राद्वोसमर्थोभवति २१ धीमतेतिमता याइतिशेषः २२ अन्यस्यपत्नीभ्यावासो दुष्करइतिप्रदु
त्तं तत्रपरिहारमाहभरतइतिभवतीमितिग्वतः कैकेयीकोप् किंचित्करइतिभावः २३ यथामयिनिष्क्रां

जीवंत्याहिस्त्रियाभर्तादैवतंप्रभुरेवच मध्यस्यामममचैवाचराजाप्रभवतिप्रभुः २१
नच्छ्रिता याववपरज्ञातोनेकनाथेनधीमता २२ भरतश्चापिधर्मात्मासर्वभूतप्रियंव
दः भवतीमनुवर्तेतसहिधर्मरतःसदा २३ यथामयितुनिष्क्रांतेपुत्रशोकेनपार्थि
वः श्रमंनावाप्नुयात्किंचिदप्रमत्तातथाकुरु २४ दारुणाश्चाप्ययंशोकोयथैनंन
विनाशयेत् राज्ञोवृद्धस्यसततंहितंचरसमाहिता २५ व्रतोपवासनिरतायानारी
परमोत्तमा भर्तारंनानुवर्तेतसाचपापगतिर्भवेत् २६ भर्तुःशुश्रूषयानारीलभ
तेगतिमुत्तमां अपियानिर्नमस्कारानिवृत्तादेवपूजनात् २७ [illegible]

ते श्रमंनाप्नुयात्तथाकुरु २४ हितंचरततथेतिशेषः २५ पतिशुश्रूषणमेवपत्न्यापरोधर्मइत्यन्वयव्यतिरेकाभ्यां
श्लोकद्वयेनदर्शयतिव्रतेत्यादिनापापस्यागतिःफलमेवफलंयस्याः तथाभवेत् २६ निर्नमस्कारार्भर्तव्यति

१४ एवं भर्तृशुश्रूषांगीकारवचनमुक्तः स्थापितोरामः १५ अत्राक्षिप्तोदोषः स्वयमध्याहारउभयोस्तद्
चनावश्यकर्तव्यत्वेहेतुर्भर्त्ता गुरुरितिचयथायोगं १६ पितृवाक्यकरणानंतरं त्वच्छुश्रूषाम

एवमुक्तातुरामेणकौशल्याशुभदर्शना तमुवाचमहाप्रीतारामम्अक्लिष्टकारिणम् १४
एवमुक्तस्तुवचनंरामोधर्मभृतांवरः भूयस्तामब्रवीद्वाक्यंमातरंभृशदुःखिताम् १५
मयाचैवभवत्याचकर्तव्यंवचनंपितुः राजाभर्तागुरुःश्रेष्ठःसर्वेषामीश्वरःप्रभुः १६
इमानितुमहारण्येविहृत्यनववर्षाणिपंचच वर्तमानापरमप्रीत्यास्थास्यामिवचनेतव १७
एवमुक्ताप्रियंपुत्रंबाष्पपूर्णाननातदा उवाचपरमार्त्तातुकौशल्यासुतवत्सला १८
आसांराममपत्नीनांमध्येवस्तुंनमेक्षमम् नयमामपिकाकुत्स्थवनंवन्यांमृगीमिव १९
यदितेगमनेबुद्धिःकृतापितुरपेक्षया तांतथारुदतींरामोरुदन्वचनमब्रवीत् २०

पिकरिष्यामीत्याह इमानीति विहृत्येत्यनेनचनवारोपितिवर्तिनः वचनेस्थास्यामिवचनमनुष्ठास्या
मि १७ एवमुक्तापुत्रेत्यतिश्लोक १८ अंगीकृतमर्त्तसेवापित्वधी दुःखसमरणासु नारामातुगमनममिलष

मि ... त्यांसामित्विन्योवनेभवाम १९ प्रदितेरस्य
दैवपूर्वान्वयिपितुरपेक्षापितुरिच्छया २०

१८ कथमिति यथेप्सर्थः नानुगच्छतीति काकुः उत्तरश्लोकेतथैवव्याहारः ९ यथानिगदिते येनप्रकारेणाभि
गदिते तद्वाक्यंश्रुत्वा रामात्मानुगमनं श्रुत्वेति यावत् १० वंचितः वंचनयामद्धियोजनाद्दुःखंप्रापितः न

चिंता वाष्पमहाधूमस्तवादर्शनचित्तजः कर्शयिष्यत्यभ्रष्टं मां पुत्रनिःश्वासायाससंभवः ७
त्वयाविहीनामिहमांशोकाग्निरतुलोमहान् प्रधक्ष्यति यथाकक्षंचित्रभानुर्हिमात्यये ८
कथंहि धेनुःस्वंवत्सं गच्छंतमनुगाच्छति अहंत्वानुगमिष्यामि यत्रवत्सगमिष्यति ९
यथानिगदितंमात्रा तद्वाक्यंपुरुषर्षभः श्रुत्वारामोब्रवीद्वाक्यं मातरंभृशदुःखिताम् १०
कैकेय्यावंचितोराजा मयि चारण्यमाश्रिते भवत्याचपरित्यक्तो ननूनंवर्तयिष्यति ११
भर्तुःकिलपरित्यागोनृशंसःकेवलंस्त्रियः सभवत्यानकर्तव्योमनसापिविगर्हितः १२
यावज्जीवतिकाकुत्स्थः पितामेजगतीपतिः शुश्रूषाक्रियतांतावत्स हि धर्मःसनातनः १३

वर्तयिष्यति नजीविष्यति ११ केवलंनृशंसः अत्यंतपापहेतुः सभवत्यामनसापिनकर्तव्यः न
चिंतनीयः यतोविगर्हितोनिंदितः १२ अतःयावदिति १३

१८ कथमिति प्रश्नोस्वर्थः नानुगच्छतीति काकुः उक्तार्थो दौत्येस्य व्याहारः ९ यथा निगदितं येन प्रकारेण गदितं तद्वाक्यं श्रुत्वा आत्मानुगमने श्रुत्वेति यावत् १० वंचितः वंचनया मद्वियोजनाद्दुःखं प्रापितः न

चिंता बाष्पमहाधूमस्त्वादर्शनचित्तजः कर्शयिष्यति मां भृशं पुत्र निश्वासायाससंभवः ७
त्वया विहीनामिह मां शोकाग्निरतुलो महान् प्रधक्ष्यति यथा कक्षं चित्रभानुर्हिमात्यये ८
कथं हि धेनुः स्वं वत्सं गच्छंतमनुगच्छति अहं त्वानुगमिष्यामि यत्र वत्स गमिष्यसि ९
यथा निगदितं मात्रा तद्वाक्यं पुरुषर्षभः श्रुत्वा रामोऽब्रवीद्वाक्यं मातरं भृशदुःखिताम् १०
कैकेय्या वंचितो राजा मयि चारण्यमाश्रिते भवत्या च परित्यक्तो न नूनं वर्तयिष्यति ११
भर्तुः किल परित्यागो नृशंसः केवलं स्त्रियः स भवत्या न कर्तव्यो मनसापि विगर्हितः १२
यावज्जीवति काकुत्स्थः पिता मे जगतीपतिः शुश्रूषा क्रियतां तावत्स हि धर्मः सनातनः १३

वर्तयिष्यति न जीविष्यति ११ केवलं नृशंसः अत्यंतपापहेतुः स भवत्या मनसापि न कर्तव्यः न चिंतनीयः यतो विगर्हितो निंदितः १२ अतः यावदिति १३

कामिनो न निर्यांति परिभवशंकयेति भावः १८ विवृतद्वाराः न शेरते किंतु बद्धकपाटा एव १९ विषाणिनः प्रशस्तदंताः २० इष्वस्त्राणां क्षिप्यतां उपासने अभ्यासे तलनिर्घोषः ज्याकरतलजनिर्घोषः २१ बहुपण्यसमाचिताः बहुक्रय्यार्हवस्तुसमृद्धाः २२ एकोऽसहा

नाराजके जनपदे वाहनैः शीघ्रगामिभिः नरा निर्यांत्यरण्यानि नारीभिः सह कामिनः १८
नाराजके जनपदे धनवंतः सुरक्षिताः शेरते विवृतद्वाराः कृषिगोरक्षजीविनः १९ ना
राजके जनपदे बद्धघंटा विषाणिनः अटंति राजमार्गेषु कुंजराः षष्टिहायनाः २० ना
राजके जनपदे शरान्संततमस्यतां श्रूयते तलनिर्घोष इष्वस्त्राणामुपासने २१ ना
राजके जनपदे वणिजो दूरगामिनः गच्छंति क्षेममध्वानं बहुपण्यसमाचिताः २२
नाराजके जनपदे चरत्येकचरो वशी भावयन्नात्मनात्मानं यत्र सायंगृहो मुनिः २३

य एव चरतीत्येकचरो यतिः वशी अजितेंद्रियः आत्मना विशुद्धांतःकरणेन आत्मानं परमात्मानं नेन वर समभिलिंतं केवलंवा
ध्यानभावयन् यत्र यस्मिन्प्रदेशे सायंकालो भवति तत्र गृहं निवासो यस्य सोप्यराजके न तिष्ठति किमुतान्यः दपालुत्वादिति भावः
२३

एवंविधोऽपचवो विवास्यते इति पूतरएतच्छ्रुत्वा काः श्रादधेत तस्यमन्वीत मत्वा चकस्यवानमवेद्रुयं त्वयि त्रादिष्टइतिशेषः ४ सर्वमादिशान् सर्वदुखं प्रपन्नेन कृतोतो देवेन त्वानितिनूनमहंमन्ये पुत्र प्रस्मात् हेराम श्रभिनितमस्त्वंलोके कर्मलोके स्थितो वनंगमिष्यसि ५ हेपुत्र अयंतु अतु लोमहान् शोकाग्निः त्वयाविहीनां मां श्रधिकंकर्षिष्यति वाकृपांकृत्वा मां धक्ष्यतितिहि मास्यपेग्नौ ममेकशेत तांचित्रभानुः सूर्यइवेतित तोयेनान्वयः की

कएतच्छ्रुद्धे चक्रवाकस्य वानमवेद्रुयम् सुराबान्दपितोराज्ञोऽपघवोपद्दिवाष्य

नूनंतु

ते ४ वलवान्लोके कृतोतः सर्वमादिशान् लोकेरमामितमस्त्वंवनेप्रत्रगमिष्य सि ५ अयंतुमामात्मनंवक्तवाद्रीनमारुतः विलापदःखसमिधोरुदिताश्रुहुताहु तिः ६

दृशः शोकाग्निः श्रात्मभवः स्वमनः सः संभूतः तवादर्शनमेव वर्द्धकत्वान्मारुतो यस्य सः विलापदुःखैः समिधः समिंधनं यस्य सः घजर्थेकः रुदिताश्रूण्येवहुतयो श्राहुतयो प्रस्मिन् सः चिंताहेतु कवाष्यमेव महाधूमो यस्य सः तवादर्शनचिंतजः अदर्शनजातचिंतयाजनितः चिंताजइति पाठे वाष्ठ्यत्यकादुखः तवागमनचिं तजइति पाठो युक्तः अदर्शनस्यमारुतत्वेन निरूपणात् तवया श्रागमनचिंतयाः जनित इत्यर्थस्य युक्तं शक्य त्वात् निश्वासानामायासः श्रावर्त्तनेतेनसंभवो वह्नियस्य सः ६

स्त्रीव वृषपितृवचनं कर्तव्यमित्युक्तवंतं लक्ष्मणं प्रति सर्वथा पितृवचनमननुष्ठेयं घनीयमित्युत्तरमाह विमृश्येति वा
क्यं लक्ष्मणो तानयननंजे विमृश्य परिमृज्य लक्ष्मणो रामसकृत्परिसांत्व्य च स राघव वेशावर्द्धनः रघोः संबंधी राघवः
राघववंश्यास्तेषां वेशावृत्तस्य वर्द्धनो रामः उवाच हे सौम्य पित्रोर्वचने व्यवस्थितं प्रतिष्ठितं मां निबोध एष हि स

विमृश्य वाष्पं परिसांत्व्य चासकृत् स लक्ष्मणं राघववंशवर्द्धनः उवाच पित्रोर्वचने व्यवस्थितं निबोध मामेष हि सौम्य सत्पथः ॥४२॥ इत्यार्षे रामायणे वाल्मीकीये अयोध्याकांडे त्रयोविंशः सर्गः ॥२३॥ पंचमेह्नि कथा समाप्ता ॥ तं समीक्ष्य त्ववहितं पितुर्निर्देशपालने कौसल्या वाष्पसंरुद्धा वचो धर्मिष्ठमब्रवीत् १ अदृष्टदुःखो धर्मात्मा सर्वभूतप्रियंवदः म[illegible] जातो दशरथात्कथमुंछेन वर्तयेत् २ यस्य भृत्याश्च दासाश्च मृष्टान्यन्नानि भुंजते कथं स भोक्ष्यते रामो वने मूलफलान्ययम् ३

स पथः समीचीनः पंथाः जीवतो वा
क्यकरणात् सत्यं दे भूरि भोजनमत् गयायां पिंडदानात् त्रिभिः पुत्रस्य पुत्रतेति न्यायादित्याशयः ४२ इति
त्रयोविंशः सर्गः २३ निर्देशे निदेशे प्राप्ताज्ञा अवहितं सावधानं संगत्य मां राभीत्यासंरुद्धवाष्पा धर्मिष्ठं रामं १
उंछेनेत्यत्र पतितव्रीह्यादिकणाः ग्रामस्ततो न वर्तयेत न वानिति शेषः २ भृत्या भर्तु योग्याः मंत्रिमुख्याः ३

अद्यास्त्वत्प्रभावस्य अस्त्वत्सामर्थ्यस्य प्रभावः प्रतापः प्रभविष्यति उज्जृंभितो भविष्यति ३८ चेदनसारस्य चदनो नमान्तलेपनस्य केयूरमोक्षणस्य अंगदधारणस्य वसूनां मोक्षणस्य दानस्य सुहृज्जनपालनस्य अनुरूपो

अद्यमे त्वत्प्रभावस्य प्रभावः प्रभविष्यति एतस्त्याप्रभृतीकर्तुं प्रभुत्वं च तव प्रभो ३८
अद्य चेदनसारस्य केयूरमोक्षणस्य च वसूनां च विमोक्षस्य सुहृदां पालनस्य च ३९
अनुरूपाविमौ बाहू राम कर्म करिष्यतः अभिषेचनविघ्नस्य कर्तॄणां ते निवारणे ४०
ब्रवीहि कोद्यैव मया वियुज्यतां तवासुहृत्प्राणयशःसुहृज्जनैः यथा तवेयं वसुधा वशा
भवेत्तथैव मां शाधि तवास्मि किंकरः ४१

अहो इमौ पीनप्रलंबौ बाहू ते अभिषेकस्य विघ्नकर्तॄणां निवारणविषये हे राम कर्मस्वानुरूपं कर्म करिष्यतः
३९ ४० ब्रवीहीत्यादि द्रष्टव्यूहीत्यर्थः वियुज्यतां वियोज्यताम् ४१

विद्युदिवचलिते चंचले वर्चसि यस्य तेन तीक्ष्णधारेण गृहीतेनासिना वज्रिणां वा महेंद्रमपि शत्रुं न कल्पये स्वप्रति
भटं न मन्ये सोहं कमन्यं शत्रुं संभावयामीत्यर्थः ३३ मे खड्गकृताघातेन खंडितैः हस्त्यादीनां हस्तादिभिः मही गहना
काननमिव निरंतरा भविष्यतीत्यर्थः ३४ मम खड्गधारयाहताः विच्छिन्नाः रक्तधारया प्रदु

असिनातीक्ष्णधारेण विद्युच्चलितवर्चसा प्रगृहीतेन वै शत्रुं वज्रिणं वा न कल्पये ३३ खड्ग
निष्पेषनिष्पिष्टैर्गहना दुश्चरा च मे हस्त्यश्वरथहस्तोरुशिरोभिर्भविता मही ३४ खड्गधारा
हता मे द्य दीप्यमाना इवाद्रयः पतिष्यन्ति द्विपा भूमौ मेघा इव सविद्युतः ३५ बद्धगोधा
ङ्गुलित्राणो प्रगृहीतशरासने कः पुरुषमानी स्यात्पुरुषाणामपि स्थिते ३६ बहुभिश्चै
कमत्यस्यन्नेकेन च बहून् जनान् विनियोक्ष्याम्यहं वाणान्नरवाजिगजमर्मसु ३७ ।।।

प्रद्रव दीप्यमानाः पर्वता इव सविद्युतो मेघा इव द्विपा भूमौ पतिष्यति ३५ गोधास्याघातवारणं गोधा ऊपो
ङ्गुलिरक्षकं वत्र धनुर्धरे मयि स्थिते पुरुषाणां मध्ये कश्चिदपि पुरुषमानी पुरुषाभिमानी कः स्यादित्यर्थः ३६
अहं बहुभिर्वीरैरेकेत्यस्यन्यात पन्ने केन वाणेन बहून्शत्रुन्नस्यन्नेकेन प्रकारेण नरवाजिगजानां मर्म

रुमर्मस्थलेषु वाणान्विनियोक्ष्यामि शत्रूतः
कश्चनेकोवहून्नहनिष्यतीतिन चिंतनीयमिति
भावः ३७

२९ तस्मात्त्वं मंगलैरभिषेकसाधनैरात्मानमभिषिंचस्व वशिष्ठादिभिरिति शेषः तत्र अभिषेककर्मणि व्यापृतो भव व्यग्रचित्तो भव तत्प्रतिबंधकान्वारयितुं निवारयितुमहमलं पर्याप्तः ३० त्वदिष्टाचरणप्रयोजनायैव मम बाहू वीर्यादिकमित्याह न शोभार्थाविति सार्द्धश्लोकमेकं वाक्यं असिः आबंधनार्थाय काष्ठानां प

प्रतिजाने च ते वीर मा भूवं वीरलोकभाक् राज्यं च तव रक्षेयमहं वेलेव सागरम् २९ मंगलै रभिषिंचस्व तत्र त्वं व्यापृतो भव अहमेको महीपालानलं वारयितुं बलात् ३० न शोभार्थाविमौ बाहू न धनुर्भूषणाय मे नासिराबंधनार्थाय न शराः स्तंभहेतवः अमित्रदमनार्थं मे सर्वमेतच्चतुष्टयम् ३१ न चाहं कामयेऽत्यर्थं यः स्याच्छत्रुर्मतो मम ३२

रस्परं बंधहेतुछिद्रादिकरणास्तेभ्यः कस्यचित्काष्ठादेर्बंधः एतेन प्रतिबंधः ३१ योऽत्यर्थं मम शत्रुरिति मतः स मतः स्यात् योस्यतीति शेषः तं केचित्स्वप्रतिभटत्वेन नाहं कामये नेच्छामि न मन्ये इति यावत् ३२

मद्बलेन विरुद्धाय विरुद्ध स्वजनस्य उग्रं मम पौरुषं प्रयाद् दुःखाय प्रभविष्यतीति यद्दैवबलेनास्य नस्यात् तदा दुःखाय
न प्रभविष्यतीत्यर्थः २५ अथ वनवासोचितकाले स्वयमेवाह ऊर्द्ध्वमिति इत द्विवरषावर्षसहस्रान्ते इति तस्मिन्नतीते
त्वयि वनं गते अनंतरं आर्यस्य तव पुत्राः प्रजा पाल्य प्रजापालनरूपं राज्यं करिष्यंति तदानीमप्यनयोर्नाकारशङ्क व
ति भावः २६ २८ मे वयुक्तमित्याह पूर्वेति हि यतः पुत्रवत्परिपालननिमित्तं प्रजाः पुत्रेषु निक्षिप्य पश्चाद्वनवा

मद्बलेन विरुद्धाय न स्याद्दैवबलं तथा प्रभविष्यति दुःखाय यथोग्रं पौरुषं मम २५ ऊर्ध्वं व
र्षसहस्रान्ते प्रजा पाल्यमनंतरम् आर्यपुत्राः करिष्यंति वनवासं गते त्वयि २६ पूर्वराजर्षि
वृत्त्या हि वनवासो विधीयते प्रजा निक्षिप्य पुत्रेषु पुत्रवत्परिपालने २७ स चेद्राजन्यनेका
ग्रे राजविभ्रमशंकया नैवमिच्छसि धर्मात्मन् राज्यं राम त्वमात्मनि २८

सः पूर्वराजर्षिवृत्त्या तदा चारत्वविधीयते २७ स चेदिति श्लोकद्वयमेकं वाक्यं राजन्निदं प्रारम्भे ख्यनेकाग्रे काम वशाद्
केवान धर्मान प्यानैकाग्रतारात्रिहि त्वेन चलचित्ताया प्रतिकूले सति राज्यविभ्रमशंकया तेद्द्वेषिविरोधेन राज्यनाहरो
सकलेलोकक्षोभे राज्यस्मिन् राज्यस्यास्थैर्यशंकया स वनवासधर्मत्वया चेदंगीक्रियते इति शेषः किं च हे राम एवं धर्मतः
प्राप्तं राज्यं तथैव शोकया समात्मनि नेच्छसि तदा तां शंकां त्यजेति शेषः ग्रहेतवराज्ये रक्षेयं प्रत्यया वीरलोकभाक माभ

ननु दैववाधनसामर्थ्यं न कस्यापीति चेत्तत्राह प्रदृश्यंतीति पौरुषं बलं दृश्यंते लोका इति शेषः व्यक्तिः प्रबलदुर्बल
त्वविवेकव्यक्तास्पुटा भविष्यति १८ ते अभिषेचनदैवात् यस्माद्दैवाद्दाहतं विघ्नितं तेन राज्याभिषेचनं द्रक्ष्यंतु
दैवं मत्पौरुषं हतं जना द्रक्ष्यंति २० अत्यंकुशं अतिक्रांतो अंकुशव्यापारं उद्दामं उत्सृष्टदामं निःसंबलमित्यर्थः

दृक्ष्यंति लघु दैवस्य पौरषं पुरुषस्य च दैवमानुषयोरद्य व्यक्ता व्यक्तिर्भविष्यति १९
अद्य मत्पौरुषहृतं दैवं द्रक्ष्यंति वै जनाः यद्दैवादाहतं तेद्य दृष्टं राज्याभिषेचनम् २०
अत्यंकुशमिवोद्दामं गजं मदजलोद्धतम् प्र- धावितमहं दैवं पौरुषेण निवर्तये २१
लोकपालाः समस्तास्ते नाद्य रामाभिषेचनम् न च कृत्स्नास्त्रयो लोका विहन्युः किं पुनः
पिता २२ यैर्विवासस्तवारण्ये मिथो राजन्समर्थितः अरण्ये ते विवत्स्यंति चतुर्दश समा
स्तथा २३ अहं तदाशां धक्ष्यामि पितुस्तस्याश्च यातव अभिषेकविघातेन पुत्रराज्याय
वर्तते २४

प्रधावितं अभिमुखं धावितं दैवं पौरुषेण शास्त्रगतबलेन निवर्तये २१ दैवनिवर्तनेन स्वबलस्य स्पष्टत्वकरमित्याह
लोकेत्यादि २२ मिथः परस्परं कथाकथतया स्वपौरुषेण राजन् त्वं सिद्धवत्कृत्य आह राजन्निति २३ तदाशां तामा
शां तां कांक्षां यातन वाभिषेकविघातेन पुत्रराज्याय पुत्रराज्यप्रापणाय प्रवर्तते तामित्यर्थः २४

तदेवाह

तदेवाह तवेत्यादि एवं विधर्मीचरणात् लोकविरुद्धमित्यर्थः त्वां त्वां विना अन्यत्तयोः कामवृत्तयोः रहितयोर्निःस्पृहयोः नाम कं प्राप्तयोः कामं मनोरथं मनसापि कथं कुर्वीत अनुष्ठानं तु दूरत इति भावः १५ वरस्यावात्तवं दैवकृतत्वमभ्युपेत्याप्याह यद्यपीति तयोः पित्रोः प्रतिः अप्रमिषेकविघ्नतत्त्वविषया बुद्धिः दैवेनेति यद्यपि ते मतं तथापि

तवाप्यधर्मसंयोगो लोकस्याप्यविगर्हितः मनसापि कथं कामं कुर्यां त्वां कामवृत्तयोः
तयोस्त्वहितयोर्नित्यं प्राप्नोः पित्रभिधानयोः १५ यद्यपि प्रतिपत्तिस्ते दैवी चापि तयोर्मतम्
तथाप्युपेक्षणीयं ते न मे तदपि रोचते १६ विक्लवो वीर्यहीनो यः स दैवमनुवर्तते
वीराः संभावितात्मानो न दैवं पर्युपासते १७ दैवं पुरुषकारेण यः समर्थः
प्रबाधितुं न दैवेन विपन्नार्थः पुरुषः सोऽवसीदति १८

ते त्वयात्वमतमप्येतदुपेक्षणीयं य

तत्तदपि ईदृशं विरुद्धकारि दैवमपि मे न रोचते १६ किंच त्वादृशस्य दैवालंबनं चादोषपुरुष इत्याह विक्लव
इति विक्लवो व्योकाप्रसिद्धः संभावितात्मनः सर्वलोकश्लाघनीयप्रशौर्यवीर्यादिमंतः १७ यः पुरुषकारेण
पौरुषेण दैवं प्रबाधितुं समर्थः स्यात् पुरुषः स दैवेन विपन्नार्थः हतप्रयोजनो नावसीदति न नश्यति १८

प्र० २९। श्रुतिवचनमेवाहयेनेति पितृवचनं पालनरूपेण धर्मेणत्तत्त्वबुद्धिरेवं द्वै धर्मागमाः पूर्वं राज्यमहण
विषयत्वमधुनातत्त्यागविषयत्वरूपं प्रकारद्वयं प्राप्तोऽस्यप्रसंगात् प्रसक्तावान्मुह्यसि शंकरणोऽप्रत्यवायः स्यादि
ति मोहं प्राप्नोसि स धर्मोऽस्मद्वेष्यः धर्माभासत्वादिति भावः १२ तस्य धर्माभासत्वमेवाह कथमिति कर्मणाश्रुचि

येनैवमागता द्वैधं तत्त्वबुद्धिर्महामते सोपि धर्मो मम द्वेष्यो यत्प्रसंगाद्विमुह्यसि १२
कथं त्वं कर्मणाशक्तः कैकेयीवशवर्तिनः करिष्यसि पितुर्वाक्यमधर्मिष्ठं विगर्हित
म् १३ यद्ययं किल्बिषाद्भेदः कृतोप्येवं न गृह्यते जायते तत्र मे दुःखं धर्मसंगश्च गर्हितः
१४

एवैभवत्वंकियाशक्त्या कर्तुमकर्तुमन्यथाकर्तुं च शक्तस्त्वं कैकेयीवशवर्तिनस्तोजितस्य अत एव गर्हिते
लोकनिंद्ये अधर्मिष्ठे च वचः कथं करिष्यसि १३ एवं सत्यपि धर्मेति वाधर्मबुद्धिर्न जायत इति मे दुःखमित्याह
यदीति अयं भेदः अभिषेकविघटनरूपः किल्बिषात् कपटात् कृतोपि अत एतत्त्वया एवं कपटकृत इति न
गृह्यते तो मे तत्र तद्विषये दुःखं जायते कपटकृतमप्ययं धर्मसाधुतया गृह्यतेति यथा जायते रसपर्यः किंचएवं

विधे धर्मे संज्ञः स्वबुद्धिरा धर्मगर्हितः सु

२८

तयोर्धर्मपथ्यन्वेदशीप्रतितत्प्रोरिति स्वार्थं स्वकार्यमित्यर्थः सुचरितं त्वां श्रुत्वा ख्यातम स्वाङ्कृत धर्मव्यवहारात्परि
जिहीर्षितोस्य कृमिच्छोतोत्तयोः कुत्रचित्किं न वध्यासे रत्यन्त कर्क्क व्ययसमर्थमर्यावित्यासा भयतिमदोति यदि तु यो
रेवं श्रोतव्यं न त्वदर्थं प्रश्याव देवं व्यवसितं अभिप्रेतं तेन स्यात्तदाभिषेकारम्भं कृत्वा तद्धि धर्मकरणं न स्यादिति शे
षः ९ चेतुर्थीचरणाउत्तरान्वयोहे राघव हि यस्मात्प्रागेव पूर्वकाल एव तयोः दातृप्रतिग्रहीतृभावेन संब

तयोः सुचरितं स्वार्थं श्रुत्वा त्यपरिजिहीर्षितोः यदि नैवं व्यवसितं स्याद्धि प्रागेव राघव ९ तयोः
प्रागेव दत्तश्च स्याद्दारः प्रकृतश्च सः लोकविद्विष्टमारब्धं त्वदन्यस्याभिषेचनम् १० नोत्स
हे सहितुं वीर तत्र मे दातुमर्हसि ११

दः सवरः प्रकृतः प्रत्युत्पन्नं गतस्त्वया स्यात्तदा प्रागेवाभिषेकारम्भात्पू
र्वमेव दत्तः स्यात्तस्माद्वरप्रदानं कृत्वा मित्थ्यैवेति भावः ईदृशवरदानस्य लोकविद्विष्टत्वेनानौचित्यादनुचित
कर्तृत्वेन राजत्याज्यत्वेत्याह लोकेति ज्येष्ठे श्रेष्ठगुणो जागरति कनिष्ठविषयकत्वात्तदभिषेचनस्य लोकविद्विष्ट
त्वं प्रसक्तव्यवहारविरोधाच्छास्त्रविरोधाच्चेति भावः १० तस्मात्त हे वीर त्वदन्यस्याभिषेचनं सहितुं सोढुमहं नो
त्सहे तत्र तद्विषये मे प्रतिवचनदानरूपमपराधमिति शेषः दातुमर्हसि ११

सत्त्रयत्रसर्वेऋत्विजः सर्वेचयजमानाः नान्वासतेनानुतिष्ठंतिविघ्नभयात् १३ वसुसंपूर्णाः बहुधनाः आप्तदक्षिणाः प्राप्तत्रि णा यथाप्राप्तदक्षिणाः यज्वनो ऋत्विजः प्रतिनविसृजंति राष्ट्राद्यस्त्वच्छंजनदंड भयादिति भावः १४ प्रहृष्टानटनर्तकाःयत्र ता दृशादेवाद्युत्सवाः समाजः सभ्यसमूहास्तेउभयेपिदृष्टा दृष्टप्राप्तिद्वारा राष्ट्रवर्द्धनाभवंतितेनवर्धंते १५ व्यवहारिणः

नाराजके जनपदे यज्ञशीला द्विजातयः सत्राण्युपासते दांता ब्राह्मणाः संशितव्रताः १३
नाराजके जनपदे महायज्ञेषु यज्वनः ब्राह्मणा वसुसंपूर्णा विसृजंत्याप्तदक्षिणाः १४
नाराजके जनपदे प्रहृष्टनटनर्त्तकाः उत्सवाश्च समाजाश्च वर्धंते राष्ट्रवर्धनाः १५
नाराजके जनपदे सिद्धार्था व्यवहारिणः कथाभिरभिरज्यंते कथाशीलाः कथाप्रियैः १६
नाराजके जनपदे उद्यानानि समागताः सायान्हे क्रीडितुं यांति कुमार्यो हेमभूषिताः १७

क्रमध्यपर्युदि स्तापान्योन्यं विवदमानाः सिद्धार्थाः निर्णीतार्थाः नभवंति कथाशीलाःपुराणादिश्रवणशीलाः कथाप्रियैःपौराणि केरुक्ताभिः कथाभिर्नरज्यंते वक्तृश्रोतॄणांस्वास्थ्याभावात् १६ समागताः मिलिताः कुमार्यः सायान्हे क्रीडितुं उद्यानानि नयांति चोरभयादितिभावः १७

न्योतिमूलत्वमेवाहकथंहीति अशौंडीरं असमर्थं अकिंचित्करमेव दैवेप्रबलमितिपथात्वंवदसिएवंशौंडीरं दैवमपिनिराकर्तुंसमर्थः कश्चित्त्वद्विधः क्षत्रियर्षभोपद्यसंभ्रांतः स्यात्तदासौकथमेतद्वक्तुमर्हतिनकथमपि ६ अतः कृपणां दीनेस्वापेक्षार्थकारीपुरुषोत्तरं प्राप्यप्रमानमित्यर्थः असक्तेस्वयंपुरतः स्थित्वायत्किंचि

शौंडीरं

कथंह्येतदसंभ्रांतस्त्वद्विधो वक्तुमर्हति यथाह्येवमशौंडीरः क्षत्रियर्षभः ६ किंनामकृपणांदैवमशक्तमभिशंससि ७ पापयोस्तेकथंनामतयोः शंकानविद्यतेसंतिधर्मोपधाः सक्ता धर्मात्मन्‌ किंनबुध्यसे ८

कर्तुमसमर्थं दैवयदापिशाहतवात्किंनामाभिशंससि अभिज्ञोसि ७ एवंदैवात्वंवनंप्रतिनिष्पयअमिदोषशंकांपरिहरति पापयोरिति पापात्मनोस्तयोः कैकेयीदशरथयोर्विषये तेकथंनामशंकापापात्मत्वशंकानविद्यतेनजायतेननुधर्मव्यवहारवत्तोः कथमेषाशंकातत्राहसंतीति हेधर्मात्मन्‌ धर्मैकस्वभावधर्मउपधाछलंतत्रासक्तिःलोकप्रतारणामयेषांतादृशाः ह्या‌त्मानःवहिधर्मपरा अंतःपापासक्ताः संतितान्‌ किंकथंनबुध्यसे ८

दृष्ट्वा तिष्ठंतं संमुखं तथा दृष्ट्वा मत्कोसिंहमुखस्य दृष्टुं दुर्दर्शत्वेन ३ अथ महत्तेहत्ताग्रे तिर्यग्गत्यादिक्रोधाति
प्रायेण विविधं शिरो धूननेनकृत्वा अथ तातद्वाताकदाक्षेरात तिर्यग्वीतमाराणो भ्रातरं अब्रवीत् ४ धर्मदोषप्रसंगो
न धर्मः पितृवचनपरिपालनेनतद्दोषस्तस्याकरणात्तत्प्रसंगेनतत् प्रात्प्या धर्महानिप्रसक्तिहेतुनेत्यर्थः पितृव

तस्य दृष्ट्वा तिष्ठंतं तत्र कुटो सहितं तदा बभौ क्रुद्धस्य सिंहस्य मुखस्य सदृशं मुखम् ३ अग्र
हस्तं विधुन्वंस्तु हस्तीहस्तमिवात्मनः तिर्यगूर्ध्वं शरीरे च पातयित्वा शिरोधराम् अग्राक्षाणावी
क्षमाणस्तु तिर्यग्भ्रातरमब्रवीत् ४ अस्थाने संभ्रमो यस्य जातो वै सुमहानयम् धर्मदोषप्रसंगेन
लोकस्यानतिशंकया ५

चनमकुर्वन् कथमस्मान्धर्मेराज्याल्लयिष्यतीति लोकस्यातिशंकात्तदभावसंपादनहेतुनामयापितृवचनस्योऽक
रणोऽन्योपि पितृवचोन करिष्यतीति लोकनाशशंकाहेतुना च यस्य ते सुमहानयं वनगमने प्रति संभ्रमो जातः सो
ऽस्थानेऽयुक्तोभ्रांतिमूल एव ५

 दुपदिष्टं परमप्रयोजनं निगमयति न लक्ष्मणेति हे लक्ष्मण अस्मिन्मम राज्यविघ्ने यवीयसी माता न विशंकनीया यतो देवाभिपन्नाः दैवग्रस्ताः प्रतिषिद्धं वदंति त्वं च दैवं तथाप्रभावं अप्रतिहतप्रभावं जानासि अतो नातिशंकनीयेत्यर्थः ३० इति द्वाविंशः सर्गः २२ रामेरतिब्रुवतिमति लक्ष्मणः स्वान्मनुपगम्य सूचनायाधः शि

न लक्ष्मणास्मिन्मम राज्यविघ्ने माता यवीयसी शंकितव्या देवाभिपन्ना हि वदंत्यनिष्टं जानासि दैवं हि तथाप्रभावम् ॥३०॥ इत्यार्षे रामायणे वाल्मीकीये अयोध्याकांडे द्वाविंशः सर्गः २२ इति ब्रुवति रामे तु लक्ष्मणोऽधः शिरा स्तदा श्रुत्वा मध्यं जगामेव मनसा दुःखहर्षयोः १ तदा तु बद्ध्वा भ्रुकुटीं भ्रुवोर्मध्ये नरर्षभः निशश्वास महासर्पो बिलस्थ इव रोषितः २

राम न श्रुत्वा दुःखहर्षयोर्मध्यं जगाम राममस्य धर्मे धैर्यं दृष्ट्वा हर्षः राज्यभ्रंशाद् दुःखमित्येवाम ध्यागतिः मनसा ज्ञा मनते वाचा प्रतिपादितवान् इव शब्देनास्थिरत्वमुच्यते उत्तरत्रलोमाध्यस्थ्यागस्योच्यमानत्वात् १ तु शब्देन पूर्वावस्थातो विलक्षणावस्थोच्यते भ्रुवोर्मध्ये ललाटे भ्रुकुटीं कृत्वा रोषितः बिलस्थो महासर्प इव निशश्वास २

अभिषेचनसंभृतैः अभिषेचनार्थसंपादितैः एभिरेव घटैः घटस्थजलैः तापस्येतापसस्योपि कर्मणिव्रतस्नानेव्रत
से[illegible]कल्याप्येदितेस्नानं भविष्यति २७ तापसस्यव्रतस्नानेक्रियमाणेतोपिराज्याभिषमाणस्नाने कृतवानितिकैकेय्याः
शोकामाभूदितितन्निषेधति अथवेति एतेनद्रव्यमयेनराज्याभिषेकसाधनेनगतद्रव्यप्रचुरेणास्वयंमह

एभिरेव घटैः सर्वैरभिषेचनसंभृतैः मम त्व[illegible]प्समा तापस्येव्रतस्नानं भविष्यति २७
अथवा किं ममैतेन राज्यद्रव्यमयेन तु उद्धृतं मे स्वयं तोयं व्रतादेशं करिष्यति २८
मा च त्वं मातस्संतापं कार्षील क्ष्म्या विपर्यये [illegible] राज्यं वा वनवासो वा वनवासो
महोदयः २९

स्वानोद्धृतं तोयं व्रतादेशं व्रतस्ये कल्याधिकारं करिष्यति १८ राज्यं वाथवा यथावस्थापालनेन धर्मसाधनमस्तु
[illegible] वनवासो वास्तु तपःप्रवृत्तिसाधनत्वात् उभावपि तुल्यौ विचार्यमाणौ तु वनवास एव महोदयः म
हाफलकः [illegible] प्रजानां कृत्योकृत्यचिन्ताविदोषप्राप्तिः सेन तपःसाधनत्वेनापि [illegible] रवाकापरिपालनन्

ग्र० १०८ दैवप्राबल्यमेव द्रढयति अयथ इति २३ इदानीं प्रारब्धस्य लक्षणमाह असंकल्पितमिति ग्र० असिन् लो
के आरब्धमारंभमुपक्रांतं कार्यं निर्वर्त्य असंकल्पितमेव अचिंतितमेव यत्कार्यं अकस्मात् दृष्टहेतुं विना
प्रवर्तितं तत् दैवस्य कार्यं ननु २४ उपदिष्टबुद्धियोगं सफलमुपसंहरति एतयेति तत्त्वयायया पार्थ पाबुद्ध्या

अयथोप्यसत्तपसो दैवेनाभिप्रपीडिताः उत्सृजंति यमं तीव्रा नम्रप्रपंते कामम
न्युभिः २३ असंकल्पितमेवेह यदकस्मात्प्रवर्तते निवर्त्यारंभमारब्धं तद्वै दैवस्य
कर्म तत् २४ एतया तत्त्वया बुध्या सेत्तम्यात्मानमात्मना व्याहतेप्यभिषेके मे
परितापो न विद्यते २५ तस्मादपरितापः सन् त्वमप्यनुविधाय माम् प्रतिसंहर
रामभिषेकं मामभिषेचनिकीं क्रियाम् २६
बुद्धियोगेन आत्मना अंतःकरणात्स्थेन आत्मानमतः करणं सेत्तम्यस्वैनेव तिपमं प्रददितिष्ठसि रति शेषः
तदा मे अभिषेके व्याहते पितवपरितापो न विद्यते न भवति २५ उक्तान् वादपूर्वं कं तत्कार्यकर्तव्यं नियुंक्ते तस्मा
दिति उपदिष्टबुद्धियोगवत्वादि वत्स यः अपरितापः परितापहीनः सन् त्वमपि मामनुविधाय अनुसृत्य मामि

[illegible] २६

ग्र० १०८

ननु दैवकृतानि किं दृष्टचेष्टत इत्याह यदिति देशकालवस्तुतितयायदचिंत्यं ईदृग्विधमिति चिंतयितुमशक्यं तद्दैवपदभू
तेषु भूताधिष्ठातृष्वात्मादिष्वपि न हन्यते न प्रतिहतं भवति हि यत्तत्कृतमेव व्यक्तं स्फुटं समर्पितं तेषां च विपर्ययः
पतितः प्राप्तः मयि विपर्ययः हस्तागतराज्यभ्रंशरूपः तस्यां पूर्वस्थितत्वात्सत्याप्तराज्यरूपश्च पतितः २० ननु शौर्यादि

यदचिंत्यं तद्दैवं भूतेष्वपि न हन्यते व्यक्तं तावत्तदस्मां च पतितो हि विपर्ययः २०
क इव दैवेन शौर्येण त्वेयोद्धुं सहते पुमान् यस्य न ग्रहणं किंचित्कर्मणोऽन्यत्र दृश्यते २१
सुखदुःखे भयक्रोधौ लाभालाभौ भवाभवौ यस्य किंचित्तथाभूतं ननु दैवस्य कर्म तत्
२२

दैवं हनिष्यामीति चेत्तत्राह क इवेति यस्य दैवस्य ग्रहणं ज्ञानजनकं कर्मणः फलादन्यत्र दृश्यते एवं च नि
त्यं कार्यानुमेयत्वाद्याप्राप्तत्वात्तत्वा योद्धुमशक्यं जाते तु फले विफले पुंफलेन तस्य नाशस्त्वेति भावः २१
सर्वतो दैवमेव प्रबलं पौरुषं तु काकतालीयमित्याह सुखेत्यादि भवाभवौ बंधमोक्षौ एषां मध्ये यच्च किंचित्त
थाभूतं ग्रचिंत्यकारणकं कार्यमस्ति तत्सर्वं निरन्तरनिश्चयेन दैवस्य कर्मफलमित्यर्थः २२

देवकारणकमेव कैकेय्या भाववैपरीत्यमत्र तस्याः सहजभावं स्मारयति जानासीति हि सौम्य मातृषु मम अंतरं
वैषम्यं यथा न भूतपूर्वं तथा जानासि अस्मा अपि कैकेय्यामपि वा न विशेषो भूतपूर्वस्तथा जानासि
हि तस्माद्दैवकृतमेव वैषम्यमिति भावः १७ तस्मादिति सोऽहं दुर्वचैः सामान्यैर्नापि वक्तुमशक्यैर्हृ

जानासि हि यथा सौम्य न मातृषु ममान्तरम् भूतपूर्वं विशेषो वा तस्या मयि सुतेऽपि
वा १७ सोऽभिषेकनिवृत्त्यर्थैः प्रवासार्थैश्च दुर्वचैः उग्रैर्वाक्यैरहं तस्या नान्यं दैवा
त्समर्थये १८ कथं प्रकृतिसंपन्ना राजपुत्री तथागुणा ब्रूयात्सा प्राकृतेव स्त्री मत्पीडां
भर्तृसंनिधौ १९

[illegible] राज्ञः कैकेय्याः प्रेरणे दैवादन्यत्र किंचिदपि समर्थये कारणान्तरत्वेन निश्चिनोमि १८ तदेव द्रढयति
कथमिति प्रकृतिसंपन्ना सत्त्वप्रकृतिपुत्रा तथागुणा प्रागनुभूततादृक्गुणा तथागुणा मत्पीडाजनकं वा
क्यं कथं ब्रूयात् यदि न दैवप्रेरिता इति भावः १८ १९

कैकेय्यां श्रत्रनापराधस्तस्याह बुद्धिरिति येनविधात्रा इयं बुद्धिः कैकेय्याः प्रणीता मे यत्प्रसादात्ता मनश्च तत् बुद्धिविष
ये चेमं समाहितं स्थिरीकृ. तं तं संक्लेष्टुमदिष्टमन्यथा जातमितिक्लेशं प्रापयितुं नार्हामि तस्य मदधिकारित्वादिति गूढा
शयः मत्संकल्पकृतमेवैतदिति गूढंयं श्रुतो वनं प्रव्रजिष्यामि चिरं विलंबो मास्त्विदस्य यः १४ एवं प्रवासं नि

बुद्धिः प्रणीता येनेयं मनश्च सुसमाहितम् तं तु नार्हामि संक्लेष्टुं प्रव्रजिष्यामि मा [चि]रम १४
कृतान्तस्त्वेव सौमित्रे द्रष्टव्यो मत्प्रवासने राज्यस्य च वितीर्णस्य पुनरेव निवर्तने १५
कैकेय्याः प्रतिपत्तिर्हि कथं स्यान्मम पीडने यदि तस्या न भावोऽयं कृतान्तविहितो भवेत् १६

ष्वित्यत्र दैवमेव निमित्तं न कैकेय्युत्साह कृतान्त इति कृतान्तः दैवमेव इंद्रादीनां दुःखनिवर्तकादृष्टमेव चतिगूढं
मत्प्रवासे द्रष्टव्यः कारणत्वेनेति शेषः वितीर्णस्य प्रदत्तस्य १५ कृतान्तस्त्वेवेत्यवधारणे प्रमाणमाह कैकेय्याः इति प्रति
पत्तिरध्यवसायो मम पीडने कथं स्यात् यदि कृतान्तविहितस्तत्प्रेरितोऽयं भावोऽभिप्रायो न भवेत् १६ ॥

मं

 तस्यापि तु दशरथस्यापि अस्मिन् कैकेयिम् अभिषेक विषयेकमितो अभ्यमतिसंहृते अनिवर्त्तितेसति अस्मद्ध
चनं सत्यं भविष्यतीत्यानवेतिमनस्तापोभवेत् तस्यचमनस्तापोमामपितपेत् पीडयेत् पितुर्हितुमकु

तस्यापिहिभवेदस्मिन्कर्मैत्यप्रवृत्तिसंहृते सत्यंनेतिमनस्तापस्ततस्तापस्तपेच्चमाम् १०
अभिषेकविधानेतु तस्मात्संहृत्यत्वम्मम अन्वगेवाहमिच्छामिवनंगन्तुमितःपुरः ११
ममपुत्राजनादघ्पूतत्क्ष्त्यान्नपात्मजा सतेभरतमव्यग्रमभिषेचयतांततः १२ मयि
चीराजिनधरेजटामंडलधारिणि गतेरण्यंचकेकेय्याभविष्यतिमनःसुखम् १३

र्वतोममजन्मव्यर्थमितिपीडयेत् १० यतएवमतोभिषेकेति संहृत्यत्वंअन्वगेवशीघ्रमेवर
तःपुरः अस्मात्पुरादहंगन्तुमिच्छामि ११ नृपात्मजाकैकेयीअव्यग्रंअव्याकुलम् १२ गतेहातेर
व १३

किंच यस्याः कैकेय्याः मदभिषेकार्थे मदभिषेकप्रयोजनविषये मानसं परितप्यते सा नो माता सविशङ्का शङ्कायुक्ता वनेन
गमिष्यतीति शङ्कावती यथा न स्यात् तथा कुरु ६ कुत एवं तत्राह तस्या इति तस्या मनसि प्रतिसंजातं शोकाभवं दुः
खं मुहूर्तमपि उदीक्षितुं द्रष्टुमहं नोत्सहे न समर्थोऽस्मि ७ तदेवोपपादयति न बुद्धीति मातॄणां पितुर्वा विषये कदा

यस्या मदभिषेकार्थे मानसं परितप्यते माता नः सा यथा न स्यात् सविशङ्का तथा कुरु ६
तस्याः शोकाभवं दुःखं मुहूर्तमपि नोत्सहे मनसि प्रतिसंजातं सौमित्रेऽहमुदीक्षितुम् ७
न बुद्धिपूर्वं नाबुद्धं स्मरामीह कदाचन मातॄणां वा पितुर्वाहं कृतमल्पं च विप्रियम् ८
सत्यः सत्याभिसंधश्च नित्यं सत्यपराक्रमः परलोकभयाद्भीतो निर्भयोऽस्तु पिता मम ९

चन कृतं बुद्धिपूर्वकं अबुद्धं अज्ञानपूर्वं वा अल्पं च अल्पमपि विप्रियं विप्रियकरं कदाचन कदाचिदपि कृतं न
स्मरामीत्यन्वयः ८ सत्यः सत्यवचनस्वभावः सत्याभिसंधः सत्यप्रतिज्ञः परलोकभयात् परलोकभयहेतो
रस्माद्भीतः पिता निर्भयोऽस्तु मया तत्कृतसत्यपरिपालनात् ९ श्रीरामसीताराम्यां नमः श्रीरामाराम

इक्ष्वाकूणां मध्ये विपक्षे वा धर्ममाह अराजके हीति हि यतो ऽराजके नो राष्ट्रं विनाशं समवाप्नुयात् अतः कश्चिद्राजा विधीयताम् ८ ९ बीजमुष्टिः
न प्रकीर्यते बीजावापो न क्रियते फलं काले लब्धव्यं कर्षकेण यतः पुत्रो भार्या वा वशे न वर्तते प्रति क्रमदेऽपित्रभावात् १० धनादि नास्ति परिपा
लकाभावात् इदमुक्तरूपमत्याहितं महद्भयमराजके अत्याहितं महद्भीतिरित्यमरः अतस्तत्र पिता पुत्र पति भार्यारूपश्च धा

इक्ष्वाकूणामिहाद्यैव कश्चिद्राजा विधीयताम् अराजकं हि नो राष्ट्रं नो विनाशं समवाप्नु
यात् ८ नाराजके जनपदे बीजमुष्टिः प्रकीर्यते नाराजके पितुः पुत्रो भार्या वा वर्तते वशे
१० अराजके धनं नास्ति नास्ति भार्याप्यराजके इदमत्याहितं चान्यत् कुतः सत्यमराजके ११
नाराजके जनपदे कारयन्ति सभां नराः उद्यानानि च रम्याणि हृष्टाः पुण्यगृहाणि च १२

५ विद्युन्माली महास्वनः अभिवर्षति पर्जन्यो महीं दिव्येन वारिणा ९

न तस्मादन्यत् क्रयविक्रयादिलक्षणं कुतः अराजके सन्मार्गवर्तिनां न कुत्रापि सत्यं राजके इति भावः ११ सभां न कारयन्ति न्यायविचारा
येति शेषः स्वास्थ्याभावात् उद्यानानीत्यादौ न कारयन्तीति शेषः छेदनादिभयात् १२

५ । नाराजके जनपदे विद्युन्माली महास्वनः अभिवर्षति पर्जन्यो महीं दिव्येन वारिणा ९

अ० १०५ २ किमुवाचेत्यत्राह निगृह्येत्यादि श्लोकद्वयमेकं वाक्यं रोषं पित्रादिविषयं शोकं मद्विषयं निगृह्य तयोर्नि
ग्रहहेतुं केवलं स्थिरं धैर्यमाश्रित्य अवमानं वनप्रवासनरूपं पितृहेतुकं शत्रुकृतत्वाभावान्निरस्य उत्तमं हर्षं सत्यपा
लनेन पितुः पुत्रस्य लोकसिद्धिं जनहर्षं गृहीत्वा तादृशहर्षसिद्ध्यर्थमेव यदेतन्मे अभिषेकार्थमुपक्लृप्तं संपादितं उत्त

आश्वास्य रामः सौमित्रिं सुहृदं भ्रातरं प्रियम् उवाचेदं स धैर्येण धारयन्सत्त्वमात्मवान्
निगृह्य रोषं शोकं च धैर्यमाश्रित्य केवलम् अवमानं निरस्येमं गृहीत्वा हर्षमुत्तमम् ३
उपक्लृप्तं यदेतन्मे अभिषेकार्थमुत्तमम् सर्वं निवर्तय क्षिप्रं कुरु कार्यं निरत्ययम् ४
सौमित्रे योऽभिषेकार्थे मम संभारसंभ्रमः अभिषेकनिवृत्त्यर्थे सोऽस्तु संभारसंभ्रमः ५

ममत्वे कार्यादिकं तत्सर्वं क्षिप्रं निवर्त्य प्रविश जयं पहेत्यत्रमाणनिरत्ययं निर्विघ्नं कार्यं वनवासोपयुक्तवल्कलाद्या
नयनरूपं कुर्विति स उवाचेति पूर्वेणास्य संबन्धः ३ ४ तदेवाह सौमित्रिरिति संभारसंभ्रमः संपादनायोत्साहः अभि
षेकनिवृत्त्यर्थे अभिषेकनिवृत्तिपूर्वकवचनवासार्थं सोऽस्तु वनवासोचितसाधनसंपादनविषयो भव।
त्वित्यर्थः ५

केवलराज्यकारणात् धर्मविहिताद्राज्यहेतोः महोदयं महाफलं यशः प्राज्ञमपि राज्यं त्यक्त्वापि त्वया परिपालनं कृतवानित्येवं रूपेण यशसा तिरस्कर्तुं नाशक्नोमि जीविते मनुष्यजीवने दीर्घकाले स्वल्पकाले तयानिश्चितेन इति श्रवणं तु वच्मि महीश धर्मतो न च लोकत इति सर्वे बन्धः ६३ पराक्रमोद्धृतं गुरुजं दर्शनेन स्वसम्मते धर्मरहस्यमनु

प्रज्ञो ह्यहं केवलराज्यकारणान्न चैव ततः कर्तुमलं महोदयम् न दीर्घकालेन तु देवजीविते च लोकवाच्यं महीम धर्मतः ६३ प्रसादयन्नग्रजमेवमेः समातरं पराक्रमाज्जितामिवरेवदेइकान् स्वयानुजेभ्यः शमनुशास्य दर्शनेन चकार तोष्टं दिजननीं प्रददिताम् ६४ ॥इत्यार्षे रामायणे श्र्योध्याकांडे एकविंशः सर्गः ॥२१॥ अथ पतं व्यथयादीनं सवित्रीसममर्षितं भ्रष्टं तमिव नागेन्द्रं रोषवि

स्फारितेक्षणम् १

शास्त्रउपदिश्यतो जननीं प्रदक्षिणीकृत्वा प्रदक्षिणं चकार गोतम् मनस्वकारेत्यर्थः ६४ इति एकविंशः सर्गः ॥२१॥

अथ लक्ष्मणः सौमित्रेः केकेयाविषयं रोषं रामपतीत्याह अथेति श्लोकद्वयमेकं वाक्यं अथ पतेत् ... रत्यहानिजन्यया व्यथयादीनं सवित्रीं रोषं एमेव जनोत्तरपे दशरातिशापे अमर्षिते प्राज्ञमहनं रोषविस्फारितनयनं सौमित्रिमाराघ श्रीमिमखी कृत्वरामो धैर्यशालीहेतुनासत्वे विक्रिताविकृतिं धारयन्नुवाच १

रं

अ॰ २०४ यदेवमतो गुरुश्चेत्यादि गुरुः धनुर्वेदाद्युपदिष्टा स यत्कार्यं व्यादिशेत् तद्धर्ममवेक्ष्य पितृवचनकरणं धर्म इति ज्ञात्वा कोऽनृशंसवृत्तिर्न कुर्यादक्रूरश्चेत् ५८ सोऽहं पितुरिमां सकलां पूर्णां प्रतिज्ञां यथावत् न कर्तुं न शक्नोमि हि तात स हि गुरुर्महाराजः आवयोर्नियोगे प्रभुरिति शेषः मातुः स्वेन सहागमननिषेधायाह देव्याश्चेति भर्तेह पोषकः

गुरुश्च राजा च पिता च वृद्धः क्रोधात्प्रहर्षाद्यदि वापि कामात् यद्व्यादिशेत्कार्यमवेक्ष्य धर्मं कस्तं न कुर्यादनृशंसवृत्तिः ५९ स वै न शक्नोमि पितुः प्रतिज्ञामिमामकर्तुं सकलां यथावत् स ह्यावयोस्तात गुरुर्नियोगे देव्याश्च भर्ता स गतिः स धर्मः ६० तस्मिन्पुनर्जीवति धर्मराजे विशेषतः स्वे पथि वर्तमाने देवी मया सार्धमितोऽनुगच्छेत्कथंस्विदन्या विधवेव नारी ६१ सा मानुमन्यस्व वनं व्रजन्तं कुरुष्व नः स्वस्त्ययनानि देवि यथा समाप्ते पुनराव्रजेयं यथा हि सत्येन पुनर्ययातिः ६२

गतिः परलोककल्याणप्रदः धर्मः तत्साधनं धर्मसहायश्चेत एव नान्यः सर्वथा ६० तदेवाह तस्मिन्निति स्वे पथि इत्यस्य पुत्रे परित्यज्यापि सत्यसंरक्षणरूपे स्वे मार्गे अन्ये सत्य विवरणं विधवेति ६१ सा मामित्यर्थः पुनर्ययातिः स्व

 यदेवमतो गुरुश्चेत्यादि गुरुः धर्मवेदाद्युपदेष्टा यद्व्यात्कार्यं व्यादिशेत्तद्धर्ममवेक्ष्य पितृवचनकरणं धर्म इति ज्ञात्वा कोऽनृशंसवृत्तिः कुर्यादक्रूरश्चेत् ५७ सोऽहं पितुरिमां सकलां पूर्णां प्रतिज्ञां यथावत् न कर्तुं न शक्नोमि हि तात स हि गुरुर्महाराजः आवयोर्नियोगे प्रभुरिति शेषः मातुः स्वेन सहागमननिषेधायाह देव्याश्चेति भर्तेह पोषकः

गुरुश्च राजा च पिता च वृद्धः क्रोधात्प्रहर्षाद्यदि वापि कामात् यद्व्यादिशेत्कार्यमवेक्ष्य धर्मं कस्तं न कुर्यादनृशंसवृत्तिः ५८ स वै न शक्नोमि पितुः प्रतिज्ञामिमामकर्तुं सकलां यथावत् स ह्यावयोस्तात गुरुर्नियोगे देव्याश्च भर्ता स गतिः स धर्मः ६० तस्मिन्पुनर्जीवति धर्मराजे विशेषतः स्वे पथि वर्तमाने देवी मया सार्धमितोऽनुगच्छेत्कथंस्विदन्या विधवेव नारी ६१ सा मानुमन्यस्व वनं व्रजन्तं कुरुष्व नः स्वस्त्ययनानि देवि यथा समाप्ते पुनराव्रजेयं यथा हि सत्येन पुनर्ययातिः ६२

गतिः परलोकसहायः धर्मः तत्साधनं धर्मसहायश्च स एव नान्य इत्यर्थः ६० तदेवाह तस्मिन्निति स्वे पथि स्वधर्मे परित्यज्यापि स्वसरक्षणतोऽपमिमां वृद्धरूपेत्समार्गेऽन्ये सत्य विवराणां विधवेवेति ६१ सा मामित्यर्थः पुनर्ययातिः स्व

धर्मस्य सर्वपुरुषार्थमूलत्वादेकस्यैव धर्मस्यानुष्ठानेन धर्मार्थकामाः फलत्वेन भवन्तीत्यभिसंधायाह धर्मेति धर्मफलोदयेषु धर्मस्य फलभूतानां सौख्यानामुदयेषु धर्मार्थकामाः समीक्षिताः खलु कारणत्वेन सम्यग्दृष्टाः मन्वादिभिरिति शेषः तेषु सर्वे धर्मार्थकामाः तत्र तस्मिन्नेव धर्मे असंशयं प्रस्युः त्रयोऽप्यनुष्ठिता भवेयुरिति मे मतिः ननु तत्र मे कश्चित्संदेहः एकत्रानेककार्यलाभे दृष्टान्तः एकैव भार्या पूर्वकृतपुण्येन वश्या भर्तुर्वशगा अनुकूला धर्मं जनयति अभिमता

धर्मार्थकामाः खलु तात लोके समीक्षिता धर्मफलोदयेषु ये तत्र सर्वे स्युरसंशयं मे भार्येव वश्याभिमता सपुत्रा ५७ यस्मिंस्तु सर्वे स्युरसंनिविष्टा धर्मो यतः स्यात्तदुपक्रमेत द्वेष्यो भवत्यर्थपरो हि लोके कामात्मता खल्वपि न प्रशस्ता ५८

ता प्रिया कामं जनयति सपुत्रा सती अर्थं संपादयतीति तस्माद्धर्म एव मया त्याज्यः स एव रक्ष्य इति भावः ५७ अथ मम ते वार्थे भ्रंशं तत्रेदमाह यस्मिन्निति यस्मिन् कर्मणि ते सर्वे धर्मादयो ऽसन्निविष्टा अप्रसक्तास्तत्र यतो धर्मः स्यात्तदुपक्रमेत तेनारभेत वेति शेषः एकैकफलकानेककर्मसंभवेऽपि यतो धर्मः स्यात्तदुपक्रमेत तेनापरं कुतस्तत्राह द्वेष्यो भवतीति अर्थपरः धर्मविरुद्धकेवलार्थपरः कामात्मता केवलकामपरता न प्रशस्ता गर्हिता

२४ अयोटीका

अ०१०३ एवमालकारुण्येपितृधर्मएवाख्यितोभूदित्यत्राहनैरेरितिएत्रौनैरैः उल्काभिः प्रसातैः प्रपोह्यमानः उल्कायेमाणः गजः
ध्वांतमभिप्रविष्टोभूत्वाप्रजज्वालतत्क्षणोः भूतएवं स्वजनन्याविलापेनिप्रायभूयः अभ्यधिकेप्रजज्वाल ५४

नैरैरिवोल्काभिरपोह्यमानोमहागजोध्वांतमभिप्रविष्टः भूयःप्रजज्वालविलापमेतन्निशम्य
रामः करुणोजनन्याः ५४ समाततरं चैवविसंज्ञकल्पामार्तां च तोमित्रिमभिप्रतप्तम् धर्मेस्थि
तो धर्म्यमिदं वाचवाक्यंयथास एवार्हतितत्रवक्तुम् ५५ अहंहितेलक्ष्मणनित्यमेवजानामि
भक्तिंचपराक्रमंच ममत्वभिप्रायमसंनिरीक्ष्यमात्रासहाभ्यर्दसिमासदुःखम् ५६

तत्रतयाविषघोरदशापन्नोरामः यथा उवाचतथाव्यक्तुंरामएवार्हतिनान्यइतिव्यक्तिलोऽतिसमाततरमिति तत्रतया॥
टी विषघोरदशायाम् ५५ ममाभिप्रायंधर्मेकनिष्ठस्वरूपं अभ्यर्दसित्व पयसि एवं सुतरांदुःखेमामानकुरु ५६

रा०१०३

संभारान् अभिषेकसंभारान् निगृह्य निवार्य अनुवत्सितो त्वयानुमन्यतामित्यर्थः ५० सुधर्म्यं धर्मयुक्तं अव्यग्रं धैर्ययु
क्तम् अविक्लवं अकातरं मृतेव मूर्छितेव ५१ स्वधर्मेणापालनादिरूपमात्रधर्मेणास्तृदृत्तयाप्रापितुरिवलेहवतया ५२
ननु उक्तो राजनियोगस्त्वयाप्यनुवर्तनीय इत्यत्राह किं जीवितेनेति त्वया बिना इह लोके किं जीवितेन प्राणधारणेन

अभिषेकस्य संभारान् दुःखं दृष्टिनिगृह्य च वनवासकृता बुद्धिर्मम धर्म्यानुवर्त्सिताम् ५० एत
द्वचस्तस्य निशम्य माता सुधर्म्यमव्यग्रमविक्लवं च मृतेव संज्ञां प्रतिलभ्य देवी समीक्ष्य रामं पुन
रित्युवाच ५१ यथैव ते पुत्र पिता तथाहं गुरुः स्वधर्मेण सुहृत्तया च न त्वानुजानामि न मां विहा
य सुदुःखितामर्हसि गन्तुमेवम् ५२ किं जीवितेनेह विना त्वया मे लोकेन वा किं स्वधयामृतेन श्रेयो
मुहूर्तं तव सन्निधानं ममेह कृत्स्नादपि जीवलोकात् ५३

लोकेन इतरबंधुजनेन च किं स्वधया अपितृलो
कप्राप्तिलिप्सया इदं देवभोग्यवस्तूनामप्युपलक्षणं अमृतेन अपुनर्भवेन च किं प्रयोजनं कृत्स्नाज्जीवलोकादपि
सर्वलोकस्थितजीवलोकसांनिध्यादपि मुहूर्तमपि तव सन्निधानं श्रेय इत्यर्थः ५३

अ०१०२ अनार्यामसत्यभोपितरमपि हत्वा राज्यं करिष्यामीत्येवं रूपां तत्र धर्माश्रितां रौद्रामार्याश्रितां मतिं विसृज किं तु धर्ममाश्रयमातैक्ष्ण्यं क्रौर्यं मद्बुद्धिः पितृवाक्यकारी कपराऽऽन्यामपत्तो अनुवर्त्यतां ४४ ४५ प्रापितासि प्राम

तदेतां विसृजानार्यां तत्र धर्माश्रितां मतिम् धर्ममाश्रय मा तैक्ष्ण्यं मद्बुद्धिरनुगम्यताम् ४४
तमेवमुक्त्वा सौहार्दाद्भ्रातरं लक्ष्मणाग्रजः उवाच भूयः कौशल्यां प्राञ्जलिः शिरसानतः ४५
अनुमन्यस्व मां देवि गमिष्यन्तमितो वनम् प्रापितासि मम प्राणैः कुरु स्वस्त्ययनानि मे ४६ तीर्णप्रतिज्ञश्च वनात्पुनरेष्याम्यहं पुरीम् ययातिरिव राजर्षिः पुरा हित्वा पुनर्दिवम् ४७ शोकः संधार्यतां मातर्हृदये साधु मा शुचः वनवासादिहैष्यामि पुनः कृत्वा पितुर्वचः ४८ त्वया मया च वैदेह्या लक्ष्मणेन सुमित्रया पितुर्नियोगे स्थातव्यमेष धर्मः सनातनः ४९

यथा प्रापितासि मामननिरोधं मा कुर्विति प्रोषः ४६ दिवं हित्वा भूमौ पतितः पुनर्दिवं प्रयाता तत्त पेस्य पि: ४७ पु रा०म०१०२
नेष्यामीत्यन्वयः ४८ पितुर्दशरथस्य ४९

हे प्रभवत्त्वत्तोऽयं मममातुर्महद्दुःखमतुलं जातमिति तत्सत्यस्य च रामस्य च अभिप्रायं सत्यरामविषयकं तदभिप्रायमज्ञात्वे
ता न्यथैवतज्ज्ञस्य तवेदृशं वाक्यमनुचितमितिभावः ४० तदेवाह धर्मः परमः सर्वपुरुषार्थेषु उत्तमः धर्मे सत्यं प्रतिष्ठितम् प्रश

मममातुर्महद्दुःखमतुलं वै भवेत्त्वया अभिप्रायमविज्ञाय सत्यस्य च रामस्य च ४० धर्मो हि परमो
लोके धर्मे सत्यं प्रतिष्ठितम् धर्मसंश्रितमप्येतत् पितुर्वचनमुत्तमम् ४१ संश्रुत्य च पितुर्वाक्यं
मातुर्वा ब्राह्मणस्य वा न कर्तव्यं वृथा वीर धर्ममाश्रित्य तिष्ठता ४२ सोऽहं न शक्ष्यामि पुनर्नियोग
मतिवर्तितुम् पितुर्हि वचनाद्वीर कैकेय्याहं प्रचोदितः ४५ सीतारामाभ्यां नमः सीतारामाभ्यां

स्तकारणं धर्मसंश्रितमप्येतत् पितुर्वचनं नेनत्तपस्विजनरक्षणोनोत्तमं यथा तथा करिष्ये ४१ किंच संश्रुत्येति धर्ममा
श्रित्य तिष्ठता धर्मरूपकत्वमिच्छता पितुर्मातुर्ब्राह्मणस्य च वाक्यं संश्रुत्य प्रतिज्ञाय वृथा मोघं न कर्तव्यमित्यर्थः ४२
इदं सपत्न्याः कैकेय्या वचनं न पितुस्तत्राह सोऽहमित्यादि ४३ ४३

अङ्गीकं कान्तर्यहितं अतः पितुर्हितं करिष्यामि ३४ ३५ तेप्रतिकूलम पूर्वं पूर्वैनाचरितं धर्मं नाहं प्रवर्त्तिये अभिप्रेतः अ
गोहृतः ३६ तनस्मात्सुविकार्यं कर्त्तव्यत्वेन प्राप्तमेवएतत्पितृवाक्यकरणं क्रियते नान्यथा अकृत्यं न क्रियत इत्यर्थः नाम

एतैरन्यैश्च बहुभिर्देवि दैवसमैः कृतम् पितुर्वचनमक्लीवं करिष्यामि पितुर्हितम् ३४ न खल्वेतन्मयैकेन क्रियते पितृशासनम् एतैरपि कृतं देवि ये मया परिकीर्त्तिताः ३५ नाहं धर्ममपूर्वं ते प्रतिकूलं प्रवर्त्तये पूर्वैरयमभिप्रेतो गतो मार्गोनुगम्यते ३६ तदेतत्तु मया कार्यं क्रियते भुवि नान्यथा पितुर्हि वचनं कुर्वन्न कश्चिन्नाम हीयते ३७ तामेवमुक्त्वा जननीं लक्ष्मणं पुनरब्रवीत् वाक्यं वाक्यविदां श्रेष्ठः श्रेष्ठः सर्वधनुष्मताम् ३८ तव लक्ष्मण जानामि मयि स्नेहमनुत्तमम् विक्रमं चैव सत्वं च तेजश्चैव दुरासदम् ३९

प्रसिद्धं न हीयते धर्मतो निति शेषः ३७ पुनः अनंतरं ३८
३९

इति श्रीमद्रामायणे अयोध्याकाण्डे टीकायां षट्षष्टितमः सर्गः ६६ आक्रन्दितेन रोदनेन निरानन्दा सास्रकण्ठजनैः आकुला
अवध्या शर्वरी अयोध्यायां अवतता दुःखवशात् दीर्घीभूता व्यतीयाय व्यतीता १ राजकर्तारः राजाभिषेककर्तारो द्विजातयः २

इत्यार्षे रामायणे अयोध्याकाण्डे षट्षष्टितमः सर्गः ॥ ६६ ॥ आक्रन्दितनिरानन्दा सास्रकण्ठज-
नाकुला अयोध्यायामवतता सा व्यतीयाय शर्वरी १ व्यतीतायां तु शर्वर्यामादित्य-
स्योदये ततः समेत्य राजकर्त्तारः सभामीयुर्द्विजातयः २ मार्कण्डेयोऽथ मौद्गल्यो वामदेव-
श्च काश्यपः कात्यायनो गौतमश्च जाबालिश्च महायशाः ३ एते द्विजाः सहामात्यैः पृथग्वाचमु-
दीरयन् वसिष्ठमेवाभिमुखाः श्रेष्ठं राजपुरोहितम् ४ अतीता शर्वरी दुःखं या नो वर्षशतोप-
मा अस्मिन्पञ्चत्वमापन्ने पुत्रशोकेन पार्थिवे ५ स्वर्गस्थश्च महाराजो रामश्चारण्यमाश्रितः
लक्ष्मणश्चापि तेजस्वी रामेणैव गतः सह ६ उभौ भरतशत्रुघ्नौ केकयेषु परंतपौ पुरे राजगृहे र-
म्ये मातामहनिवेशने ७

पृथक् पृथक् वाचो वचनं तत्पातनिकाप्रसिद्धे योगादिति एते वाभिमुखा वचनं ऊचुः ४ पुत्रशोकेनास्मिन्पार्थिवे पं-
चत्वमापन्ने सति या शर्वरी नोऽस्माकं वर्षशतोपमा सीत् सा शर्वरी दुःखं यथा तथा अतीतेति संबंधः ५६ केकयेषु तदाख्यदेशेषु राजगृहाख्ये राजनग-

नाभिमुख वसिष्ठे इति शेषः ७

२८ त्वद्वचनस्य कर्तव्यत्वेपि गुरुपदस्तु स्थानीयस्य वाम पितृवचसः प्रथमप्रोक्तत्वेन प्राबल्यात् तदतिक्रमो मया कर्त्तुं नार्हतीति ३० अपि च पितृवाक्यगौरवेणगोवधमातृवधादिकमपि पूर्वैर्महात्मभिः कृतं अत्र तु पितृवाक्यकरणे तो दुःखमात्रं मातुरित्याह ऋषि

विसर्पतीं तथा दीनां कोशल्यो जननीं ततः उवाच रामो धर्मात्मा वचनं धर्मसंहितम् २८ नास्ति शक्तिः पितुर्वाक्यं समतिक्रमितुं मम प्रसादये त्वां शिरसा गन्तुमिच्छाम्यहं वनम् ३० ऋषिणा च पितुर्वाक्यं कुर्वता व्रतचारिणा गौर्हता जानता धर्मं कण्डुनाच विपश्चिता ३१ अस्माकं तु कुले पूर्वं सगरस्याज्ञया पितुः खनद्भिः सागरैर्भूमिं अवाप्तः सुमहान्वधः ३२ जामदग्न्येन रामेण रेणुका जननी स्वयम् कृत्ता परशुनारण्ये पितुर्वचनकारिणा ३३ सीता रामाभ्यां नमः राम सीता रामा सा

तोति अधर्मं जानतापि ऋषिणापि मंत्र दृष्ट्यापि पितृवाक्यात्तो गौर्हता तस्मात्पितृवाक्याकरणे महानधर्म इति सूचितं ३१ महान्वधः ब्राह्मणस्य कापिलादतिनिंद्यो वधः अनेन प्राणत्यागेनापि पितृवाक्यं पालनीयमिति सूचितं ३२ परशुना स्वयं स्वहस्तेन छिन्ना एवं च पित्राज्ञया मातृवधोपि धर्मो न तदा दुःखमात्रं न तत्रेति किं वक्तव्यम् ३३

 तथाहि ततोपि गौरवेणाहं पूज्येत्यर्थः पितुर्दशगुणं माता गौरवेणातिरिच्यत इति स्मृतेः अहं त्वां नानुजानामि वनं गंतुमनुज्ञां न करोमि अतस्त्वया वनं न गंतव्यमित्यन्वयः २५ अथ वनगमनपर्यंते तदशक्तत्वा दत्र सर्वथा स्थातुमशक्यमिति चेत्तत्राप्याह त्वद्वियोगादिति त्वद्वियोगात्परं जीवितादिना मेन किंचित्कार्यमतस्त्वया सह प्रस्थास्यामीत्यादि एवं च मामपि सह नय

यथैव राजा पूज्यस्ते गौरवेण तथा ह्यहम् त्वां नाहमनुजानामि न गंतव्यमितो वनम् २५ त्वद्वियोगान्न मे कार्यं जीवितेन सुखेन वा त्वया सह मम श्रेयस्तृणानामपि भक्षणम् २६ यदि त्वं यास्यसि वनं त्यक्त्वा मां शोकलालसाम् अहं प्रायमिहासिष्ये न च शक्ष्यामि जीवितुं २७ ततस्त्वं प्राप्स्यसे पुत्र निरयं लोकविश्रुतम् ब्रह्महत्यामिवाधर्मात्समुद्रः सरितां पतिः २८

तिभावः २६ प्रायं अनशनव्रतं दीक्षा चोह इतो यतो जीवितुं न शक्ष्यामि २७ ततस्त्वमिति अत्र निरयपदं ब्रह्महत्याशब्दाभ्यां दुःखं लक्ष्यते ततः मातुर्मरणात् दुःखदानाल्लोके विश्रुतं निरयं दुःखं प्राप्स्यसे अधर्मात्समुद्रो ब्रह्महत्यामिव समुद्रो हि कस्मिंश्चित्कल्पे मातुर्दुःखजननरूपाधर्मात्पिप्पलादब्रह्मर्षिकृतां प्राप्य महदुःखं प्राप्तवानिति कश्चित्पुराणे प्रसिद्धम् २८ ८ २९

२० अनंतरंयुक्तंकार्यंतत्त्वंकुरुष्वयदिरोचतेइत्यनेनलक्ष्मणवाक्यस्यत्वानभिमतत्वंसूचितम् २१ गुरुवचनंकथंनकार्य
मित्याशंक्याहनैतद्गुरुवचनंकिंतुसपत्न्याःस्त्रियाः नचेति अधर्म्यमिति भरतराज्यरूपम् २२ अथयदिसापत्नमातृवा

एतत्तुवचनंश्रुत्वालक्ष्मणस्यमहात्मनः उवाचरामंकौसल्यारुदतीशोकलालसा २० भ्रा
तुस्तेवदतःपुत्रलक्ष्मणस्यश्रुतंत्वया यदत्रानंतरंतत्त्वंकुरुष्वयदिरोचते २१ नचाध
र्म्यंवचःश्रुत्वासपत्न्याममभाषितम् विहायशोकसंतप्तांगंतुमर्हसिमामितः २२ धर्मज्ञयदि
धर्मिष्ठोधर्मंचरितुमिच्छसि शुश्रूषमामिहस्थस्त्वंचरधर्ममनुत्तमम् २३ शुश्रूषुर्जननींपु

न त्रःस्वगृहेयतोवसन् परेणतपसायुक्तः काश्यपस्त्रिदिवंगतः २४ सीतारामाभ्यांनमः।

वाक्योक्तेवचनेधर्मस्तर्हिराज्यंपरित्यज्येहैवतिष्ठेत्याह धर्मज्ञेति २३ शुश्रूषुः शुश्रूषांकुर्वन् त्रिदिवंगतः
मातृसेवयाप्रजापत्यपदंप्राप्तइतिभावः २४ ॥

२१०८९ स्वाकार्ये धर्मशास्त्रं प्रमाणयति गुरोरिति अवलिप्तस्य कामाद्यभिभूतस्य शासनं दण्डनं १३ उपस्थितं ज्येष्ठत्वेनप्राप्तं
तत्रैव प्राप्ते रद्दं राज्यम् १४ बलाभावमेवाह त्वयेत्यादि १५ मातरमवलोक्य स्वनिश्चयमाह अनुरक्त इति भावः प्रीत

गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः उत्पथं प्रतिपन्नस्य कार्यं भवति शासनं १३ ब
लमेष किमाश्रित्य हेतुं वा पुरुषोत्तम दातुमिच्छति कैकेय्यै राज्यमेतदुपस्थितम् १४
त्वया चैव मया चैव कृत्वा वैरमनुत्तमम् कास्य शक्तिः श्रियं दातुं भरतायारि शासन १५
अनुरक्तोस्मि भावेन भ्रातरं देवि तत्वतः सत्येन धनुषा चैव दत्तेनेष्टेन ते शपे १६ दीप्तमग्निमर
ण्यं वा यदि रामः प्रवेक्ष्यते प्रविष्टं तत्र मां देवि त्वं पूर्वमवधारय १७ हरामि वीर्याद्दुःखं ते तमः सूर्य
इवोदितः देवी पश्यतु मे वीर्यं राघवश्चैव पश्यतु १८ हनिष्ये पितरं वृद्धं कैकेय्यासक्तमानसम् कृ
पणं च स्थितं बाल्ये वृद्धभावेन गर्हितम् १९

देभिप्रायः १६ १७ १८ कैकेय्यासक्तमानसमत एव कृपणं वृद्धभावेन वृद्धत्वेन गर्हितं [illegible] यथा भवति तथा बाल्ये कामुकत्वे स्थितं १९ ८९

रामं प्रत्याह यावदिति इममर्थं प्रमत्तत्वा वा सन्‌रूपमर्थं कश्चिदपि न जानाति तावत्ततः पूर्वमेव शास्यतइति शासनं राज्यं आत्मस्थं
आत्माधीनं कुरु ८ कथमेवं शाक्यमित्यत्राह मयेति अधिके त्वदाज्ञोल्लंघनपूर्वकमभिषेकविघ्नम् ९ विप्रियेत
व विप्रभावे १० पथ्यो मातुलादिः यो वान्यः कश्चिदस्य हितमिच्छति मृदुर्हीति यतो मार्दवेन युक्तमस्मिन्काले रक्षस्य ॥

यावदेव न जानाति कश्चिदर्थमिमं नरः तावदेव मया सार्धमात्मस्थं कुरु शासनम् ८ मया पा
र्श्वे सधनुषा तव गुप्तस्य राघव कः समर्थोऽधिकं कर्तुं कृतान्तस्येव तिष्ठतः ९ निर्मनुष्यामि
मां सर्वामयोध्यां मनुजर्षभ करिष्यामि शरैस्तीक्ष्णैर्यदि स्थास्यति विप्रिये १० भरतस्याथ पथ्यो
वा यो वास्य हितमिच्छति सर्वांस्तांश्च वधिष्यामि मृदुर्हि परिभूयते ११ प्रोत्साहितोऽयं कैके
य्या संतुष्टो यदि नः पिता अमित्रभूतो निःसंगं वध्यतां वध्यतामपि १२

ननु तस्य राज्यस्य भरताय प्रदीयमानत्वादपरिहार्योऽयमर्थ इत्यत्राह प्रोत्साहितेति कैकेय्या प्रोत्साहितस्तस्यां संतुष्टो पिता नोऽस्मा
कं अमित्रभूतो जायते तदा सो निःसंगो निर्विचारं वध्यतां बंधनं प्राप्यतां अथवा स वध एव क्रियताम् १२ १२ १२१

विपरीतः विपरीतचेताः कः प्रधर्षितः प्राकृतः चोद्यमानः ह्रियेति शेषः किमिव न ब्रूयात् प्रयुक्तं शतमपि ब्रूयादेव प्रत
स्ताद्वचोन शुद्धे रामिति भावः ३ ननु रामदोषप्रयुक्तं विवासनं स्यात्तन्नाह नास्येति रामस्येत्यर्थः ४ स्वमित्रोपि शत्रुरपि प्रत्युर

विपरीतश्च वृद्धश्च विषयैश्च प्रधर्षितः नृपः किमिव न ब्रूयाच्चोद्यमानः समन्मथः ३
नास्यापराधं पश्यामि नापि दोषं तथाविधम् येन निर्वासयेत्राष्ट्राद्वनवासाय राघवः ४
न तं पश्याम्यहं लोके परोक्षमपि यो नरः स्वमित्रोपि निरस्तोपि योस्य दोषमुदाहरेत् ५ दे
वकल्पमृजुं दान्तं रिपूणामपि वत्सलम् अवेक्षमाणः को धर्मं सृजेत्पुत्रमकारणात् ६
तदिदं वचनं राज्ञः पुनर्बाल्यमुपेयुषः पुत्रः को हृदये कुर्याद्राजवृत्तमनुस्मरन् ७

पिनिरस्तोपि केनचिदपराधेन तिरस्कृतोपि परोक्षमपि अस्य दोषं यो वदेत्तं न पश्यामि ५ यदेवमतो देवकल्पं देववत्तुल्यं दा
न्तं दुरूभिः शिक्षितं वत्सलं स्निग्धं एवमृजुगुणं पुत्रं धर्ममवेक्षमाणः धार्मिकः कस्त्यजेत् ६ बाल्यं बालभावं कामपा
रवश्यमित्यर्थः उपेयुषः प्राप्तस्य राजवृत्तं पूर्वराजाचरितम् ७

अथापि रे छिन्नकमरणाभावेपि त्वया विना त्वत्सन्निधिं विना किं जीविते जीवने व्यर्थमतस्त्वयैव अनुव्रजिष्यामि। प्रमिकां दयया
वात्सल्येन ५५ सा राममाता महद्व्यसनं दुःखं रामवियोगजं सपत्न्यादिकृतं चोपनिप्राम्य पर्यालोच्य सुतं राघवं सत्यवाश्

अथापि किं जीवितमद्य मे वृथा त्वया विना चन्द्रनिभाननप्रभ अनुव्रजिष्यामि वनं त्वयैव गौः सुदुर्बलं
समित्यरा घवम् व्यसनमुपनिशाम्य सा महत्सुतमिव बद्धमवेक्ष्य किन्नरी ५५ बभूव सत्य
वैत्यायत्समित्या मिकोदया ५६ प्राणसुतं समममर्षिता यदा बहु विललाप ॥ ५७ ॥ **इत्यार्षे रा**
मायणे वाल्मीकीये अयोध्याकांडे विंशः सर्गः ॥ २० ॥ तदा तु विलपंतीं तां कौसल्यां राम
मातरम् उवाच लक्ष्मणो दीनस्तत्कालसदृशं वचः १ न रोचते ममाप्येतदार्ये यद्राघवो
वनम् त्यक्त्वा राज्यश्रियं गच्छेत्स्त्रिया वाक्यवशंगतः २

बद्धमित्युपमा शामसुखं दुःखममर्षिता असहमाना यदा तदा किन्नरीव बहु विललापेतिसंबन्धः ५७ **इति विं शः सर्गः २०**
तत्कालसदृशं रामविप्रयोगहेतुककौसल्यादुःखप्रवृत्तिकालोचितम् १ गच्छेदिति मत्तः ममाप्येतन्न रोचते २ ॥

Margin note:

त्वा वत्समि
वाभिकांक्षया
५४ व्यसनमसु
खममर्षिता य
दा बहुविल
त्वा पेतमीत्य
न्वयम् नास
नमुपनिशाम्य
सा महत्सुतमि
व बद्धं

अनेन दुःखेनार्पितं व्याप्तं मम हृदयं येन मियते इति यत् अतः स्थिरं हि नाश हि नाशरहितमेव देहं च अनुविपतित्वान्नावदीर्यतइति यत् प्रतःश्रायसं अश्मसारनिर्मितं नूनं तथाहि अकालेऽविहितकाले मरणं न विद्यते ध्रुवं देहः प्राब्दोर्ह्यीचादिः ५१ इदं वक्ष्यमाणं दुःखं तु पूर्वदुःखेभ्यो विलक्षणं तदेवाह यदिति यद्धुतादीन्यन्यत्कानि तदिदं महद्दुःखं ऊषरे उप्तमतएव निष्फलं बीजमिव ५२

स्थिरं हि नूनं हृदयं ममायसं तेन मियते यद् विनावदीर्यते अनेन दुःखेन च देहमर्पितं ध्रुवं ह्यकाले मरणं न विद्यते ५१ इदं तु दुःखं यदनर्थकानि मे व्रतानि दानानि च संयमाश्च तपश्च तप्तं यदपत्यकाम्यया सुनिष्फलं बीजमिवोप्तमूषरे ५२ यदि ह्यकाले मरणं यदृच्छया लभेत कश्चिद् गुरुदुःखकर्षितः गताहमद्यैव परेतसंसदं विना त्वया धेनुरिवात्मजेन वै ५३

गुरुदुःखेन कर्षितः पीडितः कश्चिदपि यदृच्छया स्वेच्छया अकालेपि यदि मरणं लभेत तदानुयात्तदा धेनुरिव वत्सवत्सला हं अात्मजेन त्वया विना द्यैव परेतसंसदं यमसभां गता स्यां तत्तु न लभ्यत इति शेषः ५३

दुःखंत्वद्वियोगजं स्वद्रूपंतवराज्यनाशात्क्लेशसंभावनारहितं अपिच एवं जीराणि सपत्नीनां विप्रकारं अपकाररूपं दुःखंसहि
तुं सोढुं नोत्सहे ४६ कृपणजीविकां क्लेशोत्थजीवनं ४७ दुर्गतया भाग्यहीनया मया बहुपरिश्रम जनके रूपवासैर्यो

तदत्वयेमहदुःखंनोत्सहेसहितुंचिरम् विप्रकारंसपत्नीनामेवंजीराणिराघव ४६ अपश्यं
तीतवमुखंपरिपूर्णशशिप्रभम् कृपणावर्तयिष्यामिकथंकृपणजीविकाम् ४७ उपवासैश्च
योगैश्चबहुभिश्चपरिश्रमैः दुःखसंवर्द्धितोमोघंत्वंहिदुर्गतयामया ४८ स्थिरंतुहृदयंमन्येम
मेदंयन्नदीर्यते प्रावृषीवमहानद्याःस्पृष्टंकूलंनवांभसा ४९ ममैवनूनंमरणंनविद्यतेन
चावकाशोस्तियमक्षयेमम यदंतकोद्यवनमांजिहीर्षतिप्रसह्यसिंहोरुदतींमृगीमिव ५०

गैः देवताराधनैः दुःखेनप्रयत्नेनमोघंव्यर्थंसंवर्द्धितोसियदिप्रवत्स्यसीति शेषः त्वद्वर्धनफलालाभादितिभावः ४८ नदीर्य
ते त्वद्वियोगश्रवणेपीतिशेषः ४९ मरणंनविद्यतेरावणाजिहीर्षितेस्येवेत्यन्वयः अवकाशःप्रवासितस्यास्थलम् ५०

दशसप्तचवर्षाणीति ननु ऊनषोडशवर्षो मे इति विश्वामित्रं प्रति दशरथेनोक्तत्वात् विवाहानन्तरं उषित्वा द्वादश स
माः स्नुषा परिसीतया अनसूयां प्रति वक्ष्यमाणत्वाच्च रामस्याष्टाविंशति वर्षाणि वर्तन्ते तत्कथं सप्तदशवर्षाणीत्युच्यते इति
चेन्न अत्र जातस्येत्युक्तिर्गर्भैकादशे राजन्यमित्युक्तोपनयनप्राप्तद्वितीयजन्मविवक्षया द्वितीयजन्मत्वे च याज्ञव
ल्क्येनोक्तं मातुर्यदग्रे जायन्ते द्वितीयं मौञ्जिबन्धनात् अत्रास्य माता सावित्री पिता त्वाचार्य उच्यते ब्राह्मणक्षत्रियविशस्तस्मा
देते द्विजातय इति उपनयने तु गर्भैकादशे राजन्यमिति सूत्रव्याख्याने गर्भैकादशे द्वितीय इति वचनेन गर्भनवमगर्भदशा

दशसप्तचवर्षाणि जातस्य तव राघव अतीतानि प्रकांक्षंत्या मया दुःखपरिक्षयम ८५

मगर्भैकादशानि वर्षाणि गृहीतानि राजन्यस्य च नाथस्य तु गर्भनवमे गृहीत्वा नवमे वर्षे उपनयनं तत्र सप्तदशवर्षाणि जातानि अ
त्र विवाहात्पूर्वं द्वादश विवाहानन्तरं द्वादश पञ्चविंशवनप्रवेश इति विवेकः तथा हि विश्वामित्रं प्रति ऊनषोडशवर्षो मे
इत्युक्तत्वात् षोडशवर्षत्वं तत्र दशवर्षे पर्यवसाने बालो द्वादशवर्षोयं मम कन्यात्मजा च इत्येतदनुरूपेणैव
प्रतिमारीचो क्तेः सीतयापि उषित्वा द्वादश समा इक्ष्वाकूणां निवेशने इत्युक्तत्वाद्वनवासारम्भसमये मम भर्ता महा
तेजा वयसा पञ्चविंशकः इत्युक्तत्वाच्च रामस्य वनप्रवेशः पञ्चविंश इति सिद्धं एवमुपनयनोत्तरं सप्तदश वर्षाण्यतीतानि जातः
स्य तव अतः परं यौवराज्येन दुःखपरिक्षयं कांक्षे सामर्थ्याद्विघातितस्याव देक पदं द्र
ति

श्रीरामजी

शून्यचत्वरवेश्मोनां संमार्जनानुलेपनवत्यादि शून्यचत्वरघण्टता यथापूर्वं यथापूर्वम् २५ रात्रिश्रोकात् पुत्रश्रोकात् त्रिदिवं स्वर्गं गतेन नृपेणाना सुचशोकादेव महीतस्यासुमहीतलेलुंठता सुनिवृत्ता चारः निवृत्तकिरणा सैचारः गतः प्रस्तमिति शेषः प्रवृत्तोचारात् प्रवृत्ततमः प्रचारा २६ सुहृदो वसिष्ठाद्याः पुत्रा इति पुत्रैर्विनामहीपतेर्दहनेनरोचयंते इतीव गता हेतोस्त

वाष्पपर्याकुलजनाहाहाभूतकुलोगाना शून्यचत्वरवेश्मोतानवभ्राजयथापुरा २५ गा

तेतु प्रोकात्रिदिवंनरा धीपेमहीतलेस्यासनृपोगनाहच निवृत्ता चारः सह सागतोरविः प्रवृ

त चारा रजनीह्युपस्थिता २६ ऋ तेतुपुत्राद्दहनंमहीपतेर्नरोचयंतेस्म हृदः समागताः इतीवत

स्मिन्शयनेन्यवेशयन्विचिंत्यराजानमचिंत्यदर्शनम् २७ गतप्रभा द्यौरिवभास्करं विना

व्यपेतनक्षत्रगणेवशर्वरी पुरीवभातेरहितामहात्मनानचास्रकंठाकुलमार्गचत्वरा २८

नराश्चनार्यश्चसमेत्यसंघशोविगर्हमाणाभरतस्यमातरम् तदानगर्यांनरदेवसंक्षयेवभू

वुरार्त्ता न च शर्मलेभिरे २९

स्मिन्शयनेतैलद्रोणपापर्युषितदाहनिषेधवचनानितुविप्रविषयाणीतिनविरोधः २७ गृ

हे रुपलक्षिताः कंठायेषांते राकुलामार्गाश्चत्वराश्च यस्यां २८ नरदेवसंक्षयेनगर्यांतदानरानार्यश्चतेसंघशः समेत्यभरतस्यमा

तरं विगर्हमाणाः आर्त्ताविभूवुः न च शर्मलेभिरे

इति सप्तषष्टितमः सर्गः(?) इति सं वे ष्टः २९

उक्तं दुःखं निर्दिष्टं प्राप्तित्वयीति वत्सवति त्वयि सन्निहितेपि एवं मद्वदनभूतेन प्रकारेण निराकृता त्वयि प्रोषिते किं पुनः मत्तो मरणं
ध्रुवमिति योजना ४१ भर्तृकृतनिग्रहप्रकारमाह परिवारेणेति कैकेय्या दासीजनेन समा अथवा अवरा ततोपिनि
कृष्टा कृतास्मि ४२ सर्वोपीष्टो जनः कदाचिदागतं कैकेय्याः पुत्रमवलोक्य मानो नाभिभाषते इदानीमप्येवमवस्थितं

त्वयि सन्निहितेप्येवमहमासं निराकृता किं पुनः प्रोषिते तात ध्रुवं मरणमेव मे ४१ अत्यन्तं नि
गृहीतास्मि भर्तुर्नित्यमसंमता परिवारेण कैकेय्याः समा वाप्यथवावरा ४२ यो हि मां सेवते क
श्चिदथवाप्यनुवर्तते कैकेय्याः पुत्रमन्वीक्ष्य स जनो नाभिभाषते ४३ नित्यक्रोधतया तस्याः
कथं नु खरवादिनम् कैकेय्या वदनं द्रष्टुं पुत्र शक्ष्यामि दुर्गता ४४

प्रोषिते तु किं वक्तव्यमिति भावः ४३ मद्विषये तस्याः नित्यक्रोधतया खरवादिनं परुषवदनशीलं तस्याः प्रार्थिः
तस्या वदनं कथं द्रष्टुं शक्ष्यामि दुर्गता त्वद्वियोगेन दुर्दशामापन्ना ४४

अयो० १२५ वंध्यात्वदुःखमित्तः सुमहन्मिस्याहृ एक एवेति ३७ स्वस्मादादुःखित्वमिति शोचति नेति पत्युः पौरुषे अन्तरागा तोरं जनं तस्मिन्सतिमस्याप्यकल्याणं प्राप्तं वस्त्राभरणादिजन्यसौभाग्याधिक्यं सुखं वान्तरं चतन्मयान दृष्टं पूर्वं अथापि पुत्रे चोत्पन्ने तद्दुःखं पुत्र दर्शनजं च सुखं पश्येयमित्याशया आस्थितं जीवने स्थापितम् ३८

एक एव हि वंध्यायाः शोको भवति मानसः अप्रजास्मीति संतापो न ह्यन्यः पुत्रवि द्यते ३७
न दृष्टपूर्वं कल्याणं सुखं वा पतिपौरुषे अपि पुत्रेऽपि पश्येयमिति रामास्थितं मया ३८ सा
बहून्यमनोज्ञानि वाक्यानि हृदयच्छिदाम् अहं श्रोष्ये सपत्नीनामवराणां परा सती ३९
अतो दुःखतरं किं नु प्रमदानां भविष्यति मम शोको विलापश्च यादृशोऽयमनंतकः ४०

साहं वराज्येष्ठा सती अवराणां कनिष्ठानां हृदयच्छिदां हृदयविदारिकाणां सपत्नीनाममनोज्ञानि वाक्यानि श्रोष्ये ३९ अतः सपत्नीदर्वाक्यश्रवणात्परं दुःखं स्त्रीणां नास्ति मया यः अनंतकोऽपारः शोको यादृशास्तादृशो वाचापि व रामे० १२५
क्तुमशक्यं इति शेषः ४०

वन्यान्निवल्कलान्यानि दधानः वर्तयन् जीवन् ३१ सा प्रोक्तं स्तुतवती प्रासस्य वक्षस्य यष्टिः प्राग्वापरं प्रुने तिहवा च्छेदनत्तायनाय
नगरे तथा छेदनाभावाद्धनदस्युत्तमम् ३२ गात चेत संमूर्च्छिता ३३ वाहिता पूर्वं भारं स्थापितो तत उपावृत्य श्रमनिवृत्य सर्पं

स षड् चैव वर्षाणि वत्स्यामि विजने वने आसेवमानो वन्यानि फलमूलैश्च वर्त्तयन् ३१ सा निकृ
त्तेव मालस्य यष्टिः परशुना वने पपात सहसा देवी देवतेव दिवश्च्युता ३२ ताम दुःखोचितां दृष्ट्वा
पतितां कदलीमिव रामस्तूत्थापयामास मातरं गतचेतसम् ३३ उपावृत्योत्थितां दीनां वडवा
मिव वाहिताम् पांशुगुण्ठितसर्वांगीं विममर्श च पाणिना ३४ सा राघवमुपासीनमसुखार्त्ता सु
खोचिता उवाच पुरुषव्याघ्रमुप शृण्वति लक्ष्मणे ३५ यदि पुत्र न जायेथा मम शोकाय राघव
न स्म दुःखमतो भूयः पश्येयमहमप्रजा ३६

भुवि लुठने कृत्वो स्थितां वडवामिव ३४ असुखेन दुःखेना शोकार्त्ता उपासीनं समीपे स्थितम् ३५ यदि मम शोकाय
न जायेथाः तर्हि अप्रजा अप्यहं भूयो बहुतरं एवंविधं दुःखं न पश्येयं ३६

स च स्वभावविनीतो मातृगौरवाच्चानतः दंडकारण्यं प्रस्थितो गंतुमुपक्रांतो ऽहं आप्रष्टुं गमनमनुज्ञापयितुमुपचक्रमे ऽ घोरमकार्षमिति व्रीडया किंचिदंजलिं प्रसार्य बाष्पदुःखसमन्वितमातरमब्रवीदिति श्लोकद्वयमेकं वाक्यम् २५ २६ अब्रवी

त्स्वभावविनीतश्च गौरवाच्च तदानतः प्रस्थितो दंडकारण्यमाप्रष्टुमुपचक्रमे २६ देवि नूनं न जानीषे महद्भयमुपस्थितम् इदं तव च दुःखाय वैदेह्या लक्ष्मणस्य च २७ गमिष्ये दंडकारण्यं किमनेनासनेन मे विष्टरासनयोग्यो हि कालोऽयं मामुपस्थितः २८ चतुर्दश हि वर्षाणि वत्स्यामि विजने वने मधुमूलफलैर्जीवन्हित्वा मुनिवदामिषम् २९ भरताय महाराजो यौवराज्यं प्रयच्छति मां पुनर्दंडकारण्यं विवासयति तापसम् ३० सीतारामसीतारामसीताराम

दित्युक्तमाह देवीति भयं तवेति द्योषः इदं वक्ष्यमाणं वचनं प्रस्थापितवैदेह्या लक्ष्मणस्य च दुःखाय तत्प्रापिवक्ष्यत इत्यर्थः २७ इदं शब्दार्थमाह गमिष्य इति अनेन रत्नमयेन विष्टरासनेनासनेन मम प्रच्छिन्नान् पंचविंशति दर्भनिर्मितासनविशेषः पंचाशद्भिर्भवेद्ब्रह्मा तदर्धेन तु विष्टरस्तु कः २८ आमिष शब्देन सूदैः संस्कारसंस्कृतं मांसमुच्यते तेनेदं मे ध्यमि देत्वादुति अक्षमिदमन्निनेति वक्ष्यमाणेन न विरोधः तस्य शुद्धमांस परत्वात् मुनिवदित्य नया प्राणिहिंसामांसपरत्वाच्च २९ ३०

कृसरं तिलमुद्गतंडुलौदनं १८ व्रतयोगेन पुत्राभ्युदयकामनया तत्तद्देवोपवासव्रतयोगेनेत्यर्थः देवतां तर्पयंती वरवर्णि
नीं तां ददर्शेत्यन्वयः १९ अभिचक्राम अभिमुखं जगाम अकिंचिदेतस्य बालकः २० उपसंगृह्य अभिवाद्य स्थितं तत्सपापरि

लाजान्माल्यानि शुक्लानि पायसं कृसरं तथा समिधः पूर्णकुंभांश्च ददर्श रघुनंदनः १८ तां शु
क्लक्षौमसंवीतां व्रतयोगेन कर्षिताम् तर्पयंतीं ददर्शाद्भिर्देवतां वरवर्णिनीम् १९ सा चिर
स्यात्मजं दृष्ट्वा मातृनंदनमागतम् अभिचक्राम संहृष्टा किशोरं वडवा यथा २० समातरम
भिक्रांतामुपसंगृह्य राघवः परिष्वक्तश्च बाहुभ्यामवघ्रातश्च मूर्द्धनि २१ तमुवाच दुराधर्षं रा
घवं सुतमात्मनः कौशल्या पुत्रवात्सल्यादिदं प्रियहितं वचः २२ वृद्धानां धर्मशीलानां राजर्षीणां
महात्मनाम् प्राप्नुह्यायुश्च कीर्तिं च धर्मं चाप्युचितं कुले २३ सत्यप्रतिज्ञं पितरं राजानं पश्य राघ
व अद्यैव त्वां स धर्मात्मा यौवराज्येऽभिषेक्ष्यति २४ दत्तमासनमालभ्य भोजनेन निमंत्रितः [illegible]
मातरं राघवः किंचित्प्रसार्यांजलिमब्रवीत् २५

ल्या

घ्रातश्चेत्यन्वयः २१ २२ कुले उचितं कुलस्योचितमिति यावत् २३ रा
जानं पश्य पश्यालोचय कौशल्या प्राराज्ञाप्नुह्या पापपरिज्ञानादेवमुक्तिः २४ राघवः भोजनेन निमंत्रितः सन्दत्तमासनमालभ्य

रा०म०९३ गृहं द्वाराग्रभागे ९ जयेत्याशिषा वर्द्धयंतीति १० ११ १२ वर्धयित्वा जयशब्देनेति शेषः प्रियं रामागमनम् १३ समाहि

सोथ प्रयातु गृहं तेन तत्र वृद्धं परमपूजितम् उपविष्टं गृहद्वारि तिष्ठतं ब्राह्मणान्बहून् ९ दृष्ट्वैव तु तदा रामं तेन सर्वे समुपस्थिताः जयति जयतां श्रेष्ठ वर्धयंतिस्म राघवम् १० प्रविश्य प्रथमां कक्ष्यां द्वितीयायां ददर्श सः ब्राह्मणान्वेदसंपन्नान्वृद्धान्राज्ञाभिसत्कृतान् ११ प्रणम्य रामस्तान्वृद्धान्तृतीयायां ददर्श सः स्त्रियो बालाश्च वृद्धाश्च द्वाररक्षणतत्पराः १२ वर्धयित्वा प्रहृष्टास्ताः प्रविश्य च गृहे स्त्रियः न्यवेदयंत त्वरिता राममातुः प्रियं तदा १३ कौसल्यापि तदा देवी रात्रिं स्थित्वा समाहिता प्रभाते त्वकरोत्पूजां विष्णोः पुत्रहितैषिणी १४ सा क्षौमवसना हृष्टा नित्यं व्रतपरायणा अग्निं जुहोति स्म तदा मंत्रवत्कृतमंगला १५ प्रविश्य तु तदा रामो मातुरंतःपुरं शुभम् ददर्श मातरं तत्र हावयंतीं हुताशनम् १६ देवकार्यनिमित्तं च तत्रापश्यत्समुद्यतम् दध्यक्षतघृतं चैव मोदकान्हविषस्तथा १७

तानियमयुक्ता १४ अग्निं अग्निहोत्रं मंत्रवत् जुहोति स्म ऋत्विजेति शेषः १५ तदा हावयंतीमिति १६ हविषः व्रीहि १७ रा०म०९३

युक्तः सेवातत्परः ३ अभिशप्तोपि अन्यकृतवाक्पारुष्योपि न क्रुध्यति क्रोधनीयानि निग्रहनयस्य क्रोधोत्पादकानि
कर्माणि अन्तकं यथा वर्जयन् ४ जीवलोकं सर्वे चरति भक्तपतिनाशयति ५ महिष्यः पतिमाचुक्रुशुः निनिंदुः सर्व

कैकेय्यां योस्य यथा पुत्रो जनन्यां वर्तते सदा तथैव वर्तते स्मासु जन्मप्रभृति राघवः ३ न क्रुध्य
त्यभिशप्तोपि क्रोधनीयानि वर्जयन् क्रुद्धान्प्रसादयन्सर्वान्स इतोद्य प्रवत्स्यति ४ अबु
द्धिर्वत नो राजा जीवलोकं चरत्ययम् यो गतिः सर्वभूतानां परित्यजति राघवम् ५ इति सर्वा म
हिष्यस्ता विवत्सा इव धेनवः पतिमाचुक्रुशुश्चापि सस्वनं चापि चुक्रुशुः ६ स हि चांतःपुरे घो
रमार्तशब्दं महीपतिः पुत्रशोकाभितप्तश्च श्रुत्वा व्यालीयतासने ७ रामस्तु भृशमायस्तो नि
श्वसन्निव कुंजरः जगाम सहितो भ्रात्रा मातुरंतःपुरं वशी ८ सीतारामाभ्यां नमः रामरारा॥॥

स्वं चापि चुक्रुशुः रुरुदुः ६ आसन एव व्यालीयत दुःखभरेण विलीनोभूत् ७ आयस्तः खिन्नः दुःखितः प्राप्तखे
दः कुंजर इव निश्वसन्

 गुरोः सुखदुःखादिभिः समतां प्राप्तः समानसुखदुःखः इत्यर्थः ३९ आगतामर्थविपत्तिं अभिषेकविघातं वीक्ष्यापि रामो विक्रियां न जगाम किंतु सदृक्जनस्य दर्शयामादेः रामेनां प्राणानां विपत्ति शोकमाविंतां जगामेति पूर्वः ४० इत्येकोनविंशः सर्गः

तं गुरोः समतां प्राप्तो भ्राता विपुलविक्रमः सौमित्रिरनुवव्राज धारयन् दुःखमात्मजम् ३९
प्रविश्य वेश्मातिभृशं मुदा युक्तं समीक्ष्य तां चार्थविपत्तिमागताम् न चैव रामोऽत्र जगाम विक्रियां सुहृज्जनस्यात्मविपत्तिशोकजाम् ४०
इत्यार्षे रामायणे अयोध्याकाण्डे एकोनविंशः सर्गः १९
तस्मिंस्तु पुरुषव्याघ्रे निष्क्रामति कृताञ्जलौ आर्तशब्दो महाञ्जज्ञे स्त्रीणामन्तःपुरे तदा १
कृत्येष्वचोदितः पित्रा सर्वस्यान्तःपुरस्य च गतिर्यः शरणं चासीत्स रामोऽद्य प्रवत्स्यति २

१९ आर्तानां शब्दः आर्तशब्दः आर्तस्वर इत्यर्थः १ यः पित्रा अचोदित एव सर्वस्य जनस्यान्तःपुरस्य च कृत्येषु वर्तते यो गतिः प्राप्यवस्तु नः प्राप्तिमार्गः शरणं रक्षिता चासीत्सो ऽद्य प्रवत्स्यति वनं गमिष्यति २ सीता

मनसा दुःखं स्वजनशोकस्मरणजनितं धारयन् प्रद्वाग्य दुःखं वनगमनजं दुःखं मनसा धारयन् इंद्रियाणि निगृह्य स्वाभिषे
जकचेष्टारहितानि कृत्वा आत्मवान् साक्षात्कृतनित्यनिर्दुःखात्मतत्त्वः अप्रियम् अभिधातुकामः मातुर्गृहं प्रविवेश ३५ स

धारयन्मनसा दुःखमिंद्रियाणि निगृह्य च प्रविवेशात्मवान्वेश्म मातुरप्रियशंसिवान् ३५ स
र्वो ह्यभिजनः श्रीमान् श्रीमतः सत्यवादिनः नालक्षयत रामस्य कंचिदाकारमानने ३६ उचि
तं च महाबाहुर्न जहौ हर्षमात्मवान् शारदः समुदीर्णांशुश्चन्द्रस्तेज इवात्मजम् ३७ वाचाम
धुरया रामः सर्वं सम्मानयज्जनम् मातुः समीपं धर्मात्मा प्रविवेश महायशाः ३८ रामस्या

भिजनः परिमितो वर्त्तमानो जनः श्रीमान् रामस्य महोत्सवप्रसंगेन कृतैरलंकरणैः शोभमानः आकारं विकृता
कारं नालक्षयत् अत्र सत्वादेवेत्यर्थः ३६ उचितं स्वाभाविकं वनगमनलाभोचितं च आत्मजहर्षं हर्षचिन्हं आत्मवा
महाबाहुर्न जहौ समुदीर्णाः प्रवितत रश्मिः शारदश्चन्द्रः स्वं तेज इव ३७ ३८

अ० १९ २९ ३० आभिषेचनिकं अभिषेकप्रयोजनं भांडमुपकरणजातं सागलत्तयोः प्रदक्षिणं कृत्वा सापेक्षः वनं प्रतीति शेषः तत्र
भांडे दृष्टिमविचालयन् अप्रवर्त्तन् शनैर्जगाम ३१ धीरोदात्तत्वाच्च न तद्विघातेन कृदुःखमित्याह न चेति लोककांत।

स रामः पितरं कृत्वा कैकेयीं च प्रदक्षिणम् निष्क्रम्यांतःपुरात्तस्मात्स्वं ददर्श सुहृज्जनम् २९ तं बा
ष्पपरिपूर्णाक्षः पृष्ठतोनुजगाम ह लक्ष्मणः परमक्रुद्धः सुमित्रानंदवर्धनः ३० आभिषेच।
निकं भांडं कृत्वा रामः प्रदक्षिणम् शनैर्जगाम सापेक्षो दृष्टिं तत्राविचालयन् ३१ न चास्य।
महतीं लक्ष्मीं राज्यनाशोपकर्षति लोककांतस्य कांतत्वाच्छीतरश्मेरिव क्षपा ३२ न वनं गंतु
कामस्य त्यजतश्च वसुंधराम् सर्वलोकातिगस्येव लक्ष्यते चित्तविक्रिया ३३ प्रतिषिध्य शुभं
छत्रं व्यजने च स्वलंकृते विसर्जयित्वा स्वजनं रथं पौरांस्तथा जनान् ३४ रामायणमः सीता

स सर्वलोकैकसभाग्यास्य महतीं लक्ष्मीं सहजां शोभां कांतत्वात् स्वविनाशिकांति युक्तत्वात् राज्यनाशो नापकर्षति शी
तरश्मेश्चंद्रस्य क्षयोपचयालक्ष्मीं नापकर्षति तद्वत् ३२ सर्वलोकातिगस्येव तुल्यप्रियाप्रियस्य योगिन इव ३३ व्यजने चा रा० अ० १९
मरे ३४ ॥

रा० वा० प्र० नेत्राणां प्रस्रवणाम् अश्रुप्रवाहो येषु मुखेषु तैः १७ १८ १९ तव प्रभुः तव जीवनस्य प्रभुः २० विदूषिताः तस्याः गर्वोक्तिः तिरस्कृताः २१
२५१

वाहनुच्छ्रित्य

वाहनुच्छ्रित्य रूपणा नेत्रप्रस्रवणैर्मुखैः रुदत्यः शोकसंतप्ताः कृपणाः पर्यदेवयन् १७ हाम
हाराजरामेणासततं प्रियवादिना विहीनाः सत्यसंधेन किमर्थं विजहासि नः १८ कैकेय्या
दुष्टभावाया राघवेण विवर्जिताः कथं सपत्न्या वत्स्यामः समीपे विधवा वयम् १९ सहि
नाथः स चास्माकं तव च प्रभुरात्मवान् वने रामो गतः श्रीमान्विहाय नृपतिं प्रियम् २० त्व
यातेन च वीरेण विना व्यसनमोहिताः कथं वयं वत्स्यामः कैकेय्या च विदूषिताः २१ यया
तु राजा रामश्च लक्ष्मणश्च महाबलः सीतया सह संत्यक्ताः सा कमन्यं न हास्यति २२ ता बा
ष्पेण च संवीताः शोकेन विपुलेन च व्यचेष्टंत निरानंदा राघवस्य वरस्त्रियः २३ निष्प्रान
ष्टचंद्रहीनेव स्त्रीव भर्त्रा विवर्जिता पुरी नाराजतायोध्या हीना राज्ञा महात्मना २४ रामा

नि

२२ राघवस्य दशरथस्य २३ नाराजतेति छेदः २४

तथानिश्चयेहेतुमाहनहीतिहिर्हेतौ शुश्रूषापादसंवाहनादिरूपा वचनक्रियावचनकरणम् २२ अनुक्तभवतापूज्येनपित्रा २३ कंचित्कमपिगुणंनाशंससेनजानासि २४ यावदितिपूर्वार्द्धेतावद्गमनंकुर्विति शेषः ततस्तदनंतरंदंडका

नह्यतोधर्माचरणंकिंचिदस्तिमहत्तरम् यथापितरिशुश्रूषातस्यवावचनक्रिया २२ अनुक्तो
प्यत्रभवताभवत्यावचनादहम् वनेवत्स्यामिविजनेवर्षाणीहचतुर्द्दश २३ ननूनंमयिकै
केयिकिंचिदाशंससेगुणम् यद्राजानमवोचस्त्वंममेश्वरतरासती २४ यावन्मातरमापृच्छे
सीतांचानुनयाम्यहं ततोद्यैवगमिष्यामि दंडकानांमहद्वनम् २५ भरतःपालयेद्राज्यंशुश्रू
षेच्चपितुर्यथा तथाभवत्याकर्त्तव्यंसहिधर्मःसनातनः २६ सरामस्यवचःश्रुत्वाभृशंदुः
खगतःपिता शोकादशक्नुवन्वाष्पंप्ररुरोदमहास्वनम् २७ वंदित्वाचरणौरामोविसंज्ञस्य
पितुस्तदाकैकेय्याश्चाप्यनार्यायानिष्पपातमहाद्युतिः २८

नांतन्नामकश्चित्क्षत्रियस्तस्यराज्येतन्नामकजनपदरूपेशुक्रशापेनवनत्वंप्राप्तम् २५ सहिपितुःशुश्रूषारूपः २६ वाष्पं
रोद्धुमशक्नुवन् २७ अनार्यायाःपापायाःअपिसंज्ञांतद्दृष्टमाणाप्राप्नोतिति शेषः निष्पपातनिश्चक्राम २८

प्र० १० इतस्त्वनमज्ञोविलेवरत्याहयावदिति १६ १७ कृतत्वरः धर्मवेतिशेषः १८ दारुणोदयेदारुणमार्थकेप्रश्नोत्तरम् १९
अर्हधनपरः सनलोकमावस्तुंलोकेवस्तुंनोत्सहेकिंतुकेवलंधर्ममेवाश्रितंविद्धि २० तत्रभवतः पूज्यस्यपितुः

यावत्त्वंनवनंयातःपुरादस्मादतित्वरन् पितातावन्नतेरामस्नास्यतेभोक्ष्यतेपिवा १६ धिक्कष्ट
मितिनिःश्वस्यराजाशोकपरिप्लुतः मूर्छितोन्यपतत्तस्मिन्पर्यंकेहेमभूषिते १७ रामोप्युत्
थाप्यराजानंकैकेय्याभिप्रचोदितः कशयेवहतोवाजीवनंगंतुंकृतत्वरः १८ तदप्रिय
मनार्यायावचनंदारुणोदयम् श्रुत्वागतव्यथोरामःकैकेयींवाक्यमब्रवीत् १९ नाह
मर्थपरोदेविलोकमावस्तुमुत्सहे विद्धिमामृषिभिस्तुल्यंकेवलंधर्ममास्थितम् २० यत्रभ
वतःकिंचिच्छक्यंकर्तुंप्रियंमया प्राणानपिपरित्यज्यसर्वथाकृतमेवतत् २१

वनेगमनंकिंयत्यत्किंचित्शक्तोधिकमपिप्रियंकर्तुंशक्तोतत्कृतमेवविद्धीतिशेषः २१ एम० १०

ऽनिर्दिष्टे त्वेककार्यके कस्मान्मा स्वासयामीत्यत्राह गच्छन्त्विति १० अविचार्य युक्तायुक्तविचारमकृत्वैव ११ प्रस्थानेव
नाम न श्रद्दधाना अपि वनगमनं प्रस्थानं करिष्यतीति निश्चयवती १२ १३ उत्सुकस्य गमनोत्सुकस्य तव विलम्बनं

गच्छन्तु चैवानयितुं दूताः शीघ्रजवैर्हयैः भरतं मातुलकुलादद्यैव नृपशासनात् १० दण्डका
रण्यमेषोऽहि निर्गतो गच्छामि सत्वरः अविचार्य पितुर्वाक्यं समावस्तुं चतुर्दश ११ सा दृष्ट्वा तस्य
तद्वाक्यं श्रुत्वा रामस्य कैकेयी प्रस्थाने श्रद्दधाना हि त्वरयामास राघवम् १२ एवं भवतु यास्य
न्ति दूताः शीघ्रजवैर्हयैः भरतं मातुलकुलादुपावर्तयितुं नराः १३ तव त्वहं क्षमं मन्ये नोत्सु
कस्य विलम्बनम् राम तस्मादितः शीघ्रं वनं त्वं गन्तुमर्हसि १४ व्रीडान्वितः स्वयं यच्च नृपस्त्वां
नाभिभाषते नैतत्किंचिन्नरश्रेष्ठ मन्युरेषोऽपनीयताम् १५

पुङ्गम १४ नृपो व्रीडान्वितः सन् स्वयं नाभिभाषत इति यत् एतदनभिभाषणं तन्न किंचित् नान्यकारणकं त्वद्विवा
सनाभाव एवास्य कारणम् अत एष मन्युः एतद्दैन्यं त्वद्विवासनेन अपनीयतां त्वयेति शेषः १५

अ० ८९ कृतज्ञेन त्वत्कृतस्वीयत्रातास्तेन विश्रब्धः निर्विशंकः ४ इदमेकं आर्य लोकं दुःखं मानसं मनसि वर्त्तमानं यत्सत्यं मे हृदयं दहतीव किं
तत्राह स्वयमित्यादि ६ अयं मर्षितव दुःखावहत्वाद्विज्ञातव साक्षाद्रक्ष्म प्रज्ञय इति चेत्त्राह अहं हीति प्रचोदितः

हितेन गुरुणा पित्रा कृतज्ञेन नृपेण च नियुज्यमानो विश्रब्धः किं न कुर्यामहं प्रियम् ४ आर्यलो
कं मानसं त्वेकं हृदयं दहतीव मे स्वयं पृच्छाह मां राजा भरतस्याभिषेचनं ६ अहं हि सीतां
राज्यं च प्राणानिष्टान्धनानि च हृष्टो भ्रात्रे स्वयं दद्यां भरताय प्रचोदितः ७ किं पुन
र्मनुजेन्द्रेण स्वयं पित्रा प्रचोदितः तव च प्रियकामार्थं प्रतिज्ञामनुपालयन् ८ तदाश्वा
सय हीमं त्वं किं त्विदं यन्महीपतिः वसुधासक्तनयनो मन्दमश्रूणि मुञ्चति ९

भरतस्नेहेन त्वयैवेति शेषः ७ तत्र किं वक्तव्यं त्वत्प्रियार्थं राज्ञा प्रेरितः स्वप्रतिज्ञामनुपालयन्निति हितौ प्रात
प्रत्ययः स्वकृतप्रतिज्ञापालनार्हो राज्यं दद्यामित्यर्थः ८ मद्विषयकनियोगसंकोचेन हीमं तं महीराजमाश्वासय
यदिदं किं किं हेतुकं तदेवाह यदित्यादि ९ रा० ८९

इति शोकं तत्सूचकं सर्वं वैवर्ण्यादिक्या ह्यविकारं न श विवेश न प्राप्तः प्रविश्य पेचनमानस्य या पाचन प्राप्तवान्
राजा तु भावित क्रियो गाढ्यसनेन प्रभितज्ञो बभूवेति शेषः ५१ इत्यष्टादशः सर्गः ॥ १८ अप्यभिषेक वनं वासयोः

३ तीवत्सोप प्रहर्षवद्दंष्ट्यो न चैव रामः प्रविवेश शोकम् प्रविव्यथे चापि महानुभावो राजा च पुत्र
व्यसनाभितप्तः ॥ ५१ ॥ इत्यार्षे रामायणे वाल्मीकीये अयोध्याकाण्डे अष्टादशः
सर्गः ॥ १८ ॥ तदप्रियममित्रघ्नो वचनं मरणोपमम् श्रुत्वा न विव्यथे रामः कैकेयीं चेदम
ब्रवीत १ एवमस्तु गमिष्यामि वनं वस्तुमहं त्वितः जटाचीरधरो राज्ञः प्रतिज्ञामनुपालय
न् २ इदं तु ज्ञातुमिच्छामि किमर्थं मां महीपतिः नाभिनंदति दुर्धर्षो यथापुरमरिंदमः ३ म
न्युर्न च त्वया कार्यो देवि ब्रूमि तवाग्रतः यास्यामि भव सुप्रीता वने चीरजटाधरः ४ राम० ०

समचित्ततया धीरोदात्तमहापुरुषत्वं रामस्याह तदिति मरणोपमं शोकद ष्यौ एव मस्तु भरताभिषेकोऽस्तु इतोऽस्मान्नगरात् २ यद्य
प्यनेन का ह्रापे न स्माद्भुतः स्यनभि नंदने हेतु रुक्तस्तथापि मत्स्वभावं जानन्किम नाभिनंदति यथापुरं सयापूर्वं ३ मन्युर्दैन्यम
न्युर्दैन्यक्रतौ क्रुधी त्यमरः ब्रूमि ब्रवीमि एतावतता त्वा सर्वथा यास्याम्येव न त्वन्यथा शंकितव्यमिति भावः ४ ।।।। ।।।।।
र्थ २

तत्र द्वयोर्वरयोर्मध्ये एकेन भरतस्याभिषेचनं अन्येन तत्र दण्डकारण्यगमनं अद्यैव एतादृशा एव ३३ यदीति एताभ्यां त्वया चमत्कृतेः सत्याय पं प्रतिज्ञातत्वादिति भावः ३४ सन्निदेशे प्रतिज्ञासंपादने ३५ अभिषेचनं अभिषेकोपकारणम् ३६

तत्र मे याचितो राजा भरतस्याभिषेचनम् गमनं दण्डकारण्ये तव चैवाद्य राघव ३३ यदि सत्यप्रतिज्ञं त्वं पितरं कर्तुमिच्छसि आत्मानं च नरश्रेष्ठ मम वाक्यमिदं शृणु ३४ सन्निदेशे पितुस्तिष्ठ यथा तेन प्रतिश्रुतं त्वयारण्यं प्रवेष्टव्यं नव वर्षाणि पञ्च च ३५ भरतस्त्वाभिषिच्येत यदेतदभिषेचनम् त्वदर्थे विहितं राज्ञा तेन सर्वेण राघव ३६ सप्त सप्त च वर्षाणि दण्डकारण्यमाश्रितः अभिषेकमिदं त्यक्त्वा जटाचीरधरो भव ३७ भरतः कोसलपुरे प्रशास्तु वसुधामिमाम् नानारत्नसमाकीर्णां सवाजिरथकुञ्जराम् ३८ एतेन त्वां नरेन्द्रोऽयं कारुण्येन समाप्लुतः शोकैः संक्लिष्टवदनो न शक्नोति निरीक्षितुम् ३९ एतत्कुरु नरेन्द्रस्य वचनं रघुनन्दन सत्येन महता राम तारयस्व नरेश्वरम् ४०

३७ ३८ ॥ एतेन वरद्वयप्रदाननिमित्तेन ३९ सत्येन सत्यपरिपालनेन ४

राज्ञायदभिहितंतत्त्वयिनविपत्स्यतेव्यर्थंनभविष्यतियदितत्तर्हिराज्ञोविवक्षितमहमेवाभिधास्यामीत्यर्थः राजैववदतुतत्रा
हनहीति त्वदप्रियत्वात्त्वन्मुखमवलोकोतिशेषः २६ व्यथितःखिन्नःप्रागुक्तवचनोक्तेर्घनमपिशंकितमितिसंतप्तः २७
ईदृशंयदिकरिष्यसीत्यकारणशंकावचनमित्यर्थः २८ गुरुणाहितमुपदेष्ट्राहितोपदेष्ट्रा २९ प्रतिजानेचप्रतिज्ञांकरोमिसै

यदितत्वभिहितंराज्ञात्वयितन्नविपत्स्यते ततोहमभिधास्यामिनह्येषत्वयिवक्ष्यति २६ एत
त्तुवचनंश्रुत्वाकैकेय्यासमुदाहृतम् उवाचव्यथितोरामस्तांदेवींनृपसन्निधौ २७ अहोधि
ङ्नार्हसेदेविवक्तुंमामीदृशंवचः अहंहिवचनाद्राज्ञःपतेयमपिपावके २८ भक्षयेयंविषंती
क्ष्णंमज्जेयमपिचार्णवे नियुक्तोगुरुणापित्रानृपेणचविशेषतः २९ तद्ब्रूहिवचनंदेविराज्ञो
यदभिकांक्षितम् करिष्येप्रतिजानेचरामोद्विर्नाभिभाषते ३० तमार्जवसमायुक्तमनार्यासत्यवा
दिनम् उवाचरामंकैकेयीवचनंभृशदारुणम् ३१ पुरादेवासुरेयुद्धेपित्रातेममराघव रक्षिते
नवरौदत्तौसशल्येनमहारणे ३२

वस्यिरामाज्ञिःपत्तेरामस्तिप्रथमंयद्वाक्यंवदतितत्परिहारवचनंनकथयतीत्यर्थः ३० ३१ पूर्वंसशल्येनपश्चाच्छल्यापाकरणात्पू

तदेवाह प्रियमिति श्रुतं प्रतिज्ञातं तत्तदप्रियमपि त्वयावश्यं कार्यं यदि पितृभक्तिमानसीति शेषः २१ किं तत्तत्राह एष इति २२ अति
सृज्य प्रतिज्ञाय गतजलेन यथा दौ दानस्य पूर्वमेव वृत्तत्वात्तद्विषयव्यवहारपरिहारचिंता व्यर्थेत्यर्थः २३ इदं सत्यं धर्मस्य मूल

प्रियं त्वामप्रियं वक्तुं वाणी नास्योपवर्त्तते तदवश्यं त्वया कार्यं यदनेन श्रुतं मम २१ एष मह्यं वरं
दत्त्वा पुरा मामभिपूज्य च स पश्चात्तप्यते राजा यथान्यः प्राकृतस्तथा २२ अतिसृज्य ददानीति व
रं मम विशांपतिः स निरर्थं गतजले सेतुं बंधितुमिच्छति २३ धर्ममूलमिदं राम विदितं च सता
मपि तत्सत्यं न त्यजेद्राजा कुपितस्त्वत्कृते न च २४ यदि तद्वक्ष्यते राजा शुभं वा यदि वाशुभम्
करिष्यसि ततः सर्वमाख्यास्यामि पुनस्त्वहम् २५

मिति सतामपि विदितम् अतः त्वत्कृते त्वन्निमित्तं त्वत्प्रयोजनं तत एव शास्त्रमपि कुपितो राजा कोपदोषेण यथा तत्सत्यं न त्यजेत्तथा कुर्वि
ति शेषः २४ दशरथामिवरममपि नियमयति यदीति राजा यद्वक्ष्यते तत् यदि करिष्यसि ततोऽहं सर्वं भिन्नविशेष्याख्यास्यामि २५ रा०म०
८१

भरते शत्रुघ्ने वा मातॄणां मम मातृषु वा किंचिदशुभं भवतीति नृपः पश्यति कच्चित् १४ नृपे कुपिते अतोषयन् अवचनाकारणाद्वा १५ य
तोमूलं यन्मूलमित्यर्थः प्रादुर्भावमेतत् प्रादुर्भावं जन्म यत्कारणकं पश्येत् जानीयात् तस्मिन्प्रत्यक्षे दैवते सति तस्मिन्कथमानुकूल्ये

कच्चिन्न किंचिद्भरते कुमारे प्रियदर्शने शत्रुघ्ने वा महासत्वे मातॄणां वा ममाशुभम् १४ अतोष
यन्महाराजमकुर्वन्वा पितुर्वचः मुहूर्तमपि नेच्छेयं जीवितुं कुपिते नृपे १५ यतोमूलं नरः पश्येत्प्रा
दुर्भावमिहात्मनः कथं तस्मिन्न वर्तेत प्रत्यक्षे सति दैवते १६ कच्चित्ते परुषं किंचिदभिमानात्पि।
ता मम उक्तो भवत्या कोपेन यत्रास्य लुलितं मनः १७ एतदाचक्ष्व मे देवि तत्त्वेन परिपृच्छतः
किंनिमित्तमपूर्वोऽयं विकारो मनुजाधिपे १८ एवमुक्ता तु कैकेयी राघवेण महात्मना उवा।
चेदं सुनिर्लज्जा धृष्टमात्महितं वचः १९ न राजा कुपितो राम व्यसनं नास्य किंचन किंचिन्मनो
गतं त्वस्य त्वद्भयान्नानुभाषते २० ॥

न वर्तेतेत्यर्थः १६ ते तव संबन्धसामान्ये षष्ठी त्वया अभिमानात् गर्वात् मम पिता परुषमुक्तो वा भवत्या कोपेन किंचिन्निमित्तको
पेन परुषमुक्तो येनास्य मनो लुलितं कलुषितं १७ सुनिर्लज्जा धृष्टा करणे लज्जारहिता धृष्टं प्रत्युत्तरदानेन

वंशे १२८ मतीगतेऽल्परश्चिपकरमितिकोषः २०

रा० ८६ किंस्वितकिंतु ८ अद्यैवेत्येवकारव्यवच्छेद्यमुच्यते अन्यदेति तस्यमदृशीनेऽतिप्रीतिमनः आयासःखेदः ७
दीनइवविषण्णवदनद्युतिरिवमत्प्रेक्षः शोकार्त्तइववचनमब्रवीदितिसंबंधः १० नापराद्धंकाकुः अज्ञा

चिंतयामासचततोरामः पितृहितेरतः किंस्विदद्यैवनृपतिर्नमांप्रत्यभिनंदति ८ अन्य
दामांपितादृष्ट्वाकुपितोपिप्रसीदति तस्यमामद्यसंप्रेक्ष्यकिमायासःप्रवर्तते ९ सदी
नइवशोकार्त्तोविषण्णवदनद्युतिः कैकेयीमभिवाद्यैवरामोवचनमब्रवीत् १० क
च्चिन्मयानापराद्धमज्ञानाद्येनमेपिता कुपितस्तन्ममाचक्ष्वत्वंचैवैनंप्रसादय ११ अ
प्रसन्नमनाः किंनुसदामांप्रतिवत्सलः विषण्णवदनोदीनोनहिमांप्रतिभाषते १२ शारीरो
मानसोवापिकच्चिदेनंनबाधते संतापोवाभितापोवादुर्लभंहिसदासुखम् १३

नात्प्रमादात्प्रसादयमत्कृतापराधशांत्यैइतिशेषः ११ सदामांप्रतिवत्सलोपि अद्यकिमप्रसन्नम
नाः हियतोमांनभाषते १२ शारीरः शरीरव्याधिजःसंतापः मानसोमनोतिप्रमाधिजोभितापः एनंनबाधतेकच्चित्हिप्रसमात्सदासु खेदुर्लभंमनुष्यशरीरस्यपापपुरापाराद्ध्ववदिति भावः १३ रा० ८६

१० अल्पपुत्रः कन्यामात्रपुत्रः सोपि जनकोपि ११ दिष्टांतं मरणम् १२ व्यावहारिकाः व्यवहारे वा स्थांतरसकलगृहकृत्ये इति यु
क्ता श्च मात्या व्यपनिन्युः गृहांतः प्रापय्य ते स्त्री द्वारा भर्त्तालिंगनादिमो व्यान्यतो निन्युरित्यर्थः १३ तैलद्रोण्यां तैलकटाहे स्था

नर्दतां भीमघोषाणां निशामनुगापश्चिमाम् निपूज्यमानादेसंत्रस्ता राघवं सत्रपिध्यति १०
वृद्धश्चैवाल्पपुत्रश्च वैदेहीमनुचिंतयन् सोपि शोकसमाविष्टो नूनंत्यक्ष्यति जीवितम् ११
साहमद्यैव दिष्टांतंगमिष्यामि पतिव्रता इदं शरीरमालिंग्य प्रवेक्ष्यामि हुताशनम् १२
तां ततः संपरिष्वज्य विलपंतीं तपस्विनीम् व्यपनिन्युः सुदुःखार्त्तां कौशल्यां व्यावहारिकाः
१३ तैलद्रोण्यां तदामात्याः संवेश्य जगतीपतिम् राज्ञः सर्वाण्यथादिष्टाश्चक्रुः कर्माण्यनं
तरम् १४ नतु संकालनं राज्ञो विनापुत्रेण मंत्रिणः सर्वज्ञाः कर्तुमीषुस्ते ततो रक्षंति भूमिप
म् १५ तैलद्रोण्यां तु सचिवैः शायितं तं नराधिपम् हा मृतोयमिति ज्ञात्वा स्त्रियस्ताः पर्यदेवय
न् १६

दिष्टाः आज्ञप्ताः वसिष्ठादिभिरिति शेषः कर्माणि पौरकार्याणि चक्रुः १४ पुत्रेण विना संकालनं प्रेतनिर्हारं न कर्तुमीषुः य
तः सर्वज्ञाः ततो हेतोस्तैलद्रोण्यां भूपं रक्षंति १५ शायितं ज्ञात्वा हा मृतोयमिति पर्यदेवयन् १६

रामोपीत्यपिशब्देन दुःखसहत्वमुद्भाव्यते क्षमितोऽपि मोदं प्रार्य विषादस्य स्वहेतुत्वमाशंक्य भयमापन्नः इत्यवगं
तव्यम् ४ इंद्रियैरित्यादि श्लोकद्वयेन दृष्टान्तमयमापन्नस्यैतद्दनुकंप्यत्वं संबध्यते अप्रहृष्टैः खिन्नैः उपलक्षितं
खिन्नं व्याकुलं संभ्रांतं चेतो यस्य तम् ५ ऊर्मिमालिनमक्षोभ्यमपि क्षुभ्यन्तं सागरमिव स्थितं उपप्लुतं राहुग्र

तदपूर्वं नरपतेर्दृष्ट्वा रूपं भयावहम् रामोपि भयमापन्नः पदा स्पृष्ट्वेव पन्नगम् ४ इंद्रियै
रप्रहृष्टैस्तं शोकसंतापकर्शितम् निश्वसन्तं महाराजं व्यथिताकुलचेतसम् ५ ऊर्मिमालि
नमक्षोभ्यं क्षुभ्यन्तमिव सागरम् उपप्लुतमिवादित्यमुक्तानृतमृषिं यथा ६ अचिन्त्यकल्पं हि
पितुस्तं शोकमुपधारयन् बभूव संरब्धतरः समुद्र इव पर्वणि ७

स्तं उक्तमनृतं येन तद्वन्निस्तेजस्कम् ६ अचिन्त्यकल्पमतर्क्यतमसंभावितं उपधारयन् किंहेतुकोयं शोक इति चिं
तयन् संरब्धतरोऽत्यन्तं क्षुभितः यद्यपि पर्वणि राहुमुद्रस्य चंद्रोदयात् क्षोभस्तथापि क्षोभमात्रे दृष्टान्तः ७

अ०८५ सर्वाउत्क्रम्य पंचकक्ष्या २१ अंतिकं समीपदेशम् २२ इति सप्तदशः सर्गः १७ शुभे आसने पर्यंके परिशु

स सर्वाः समतिक्रम्य कक्ष्या नरवरात्मजः संनिवर्त्य जनं सर्वं शुद्धांतःपुरमभ्यगात् २१ तस्मि
न्प्रविष्टे पितुरंतिकं तदा जनः स सर्वो मुदितो नृपात्मजे प्रतीक्षते तस्य पुनः स्म निर्गमं यथोद
यं चंद्रमसः सरित्पतिः २२ इत्यार्षे रामायणे वाल्मीकीये अयोध्याकांडे सप्तदशः सर्गः ॥
१७ स ददर्शासने रामो निषण्णं पितरं शुभे कैकेयीसहितं दीनं मुखेन परिशुष्यता १
स पितुश्चरणौ पूर्वमभिवाद्य विनीतवत् ततो ववंदे चरणौ कैकेय्याः सुसमाहितः २ रामे
त्युवाच वचनं बाष्पपर्याकुलेक्षणः शशाक नृपतिर्दीनो नेक्षितुं नाभिभाषितुम् ३ ॥।

ष्यता शुष्केनोपलक्षितम् १ विनीतवत् विनीतः सन् सुसमाहितः प्रसन्नचित्तः तस्या अप्रतिस्विष्टकरत्वा ज्ञा
पितकरत्वाच्चेति भावः २ नाभिभाषितुं रामेत्यदर इद्राधिकमिति शेषः ३ रा०म०८५

चतुष्पथान् शृंगाटकान् देवपथान् देवालयान् चैत्यान् चैत्यवृक्षान् आयतनानि सभादीनि च प्रदक्षिणां
परिहरन् चतुष्पथाद्ये चैत्यास्पद क्षिताभागागमनं वर्जयन् १६ राजकुलं राजगृहं मासाद्य प्रासाद

प

चतुष्पथान्देवपथांश्चैत्यांश्चायतनानि च प्रदक्षिणं परिहरन् जगाम नृपतेः सुतः १६ स रा
जकुलमासाद्य मेघसंघोपमैः शुभैः प्रासादशृंगैर्विविधैः कैलासशिखरोपमैः १७ आवा
रैर्गगनं विमानैः रविपांडुरैः वर्धमानगृहैश्चापि रत्नजालपरिष्कृतैः १८ तान्पिव्यां
गृहवरं महेंद्रसदनोपमम् राजपुत्रः पितुर्वेश्म प्रविश श्रिया ज्वलन् १९ स कक्ष्या धन्विभि वे
ङ्गुप्तास्तिस्रोतिक्रम्य वाजिभिः पदातिरपरे कक्ष्ये द्वे जगाम नरोत्तमः २०

शृंगैः प्रासादस्य शिखरैः १७ आवारपङ्क्तिः आक्रमद्भिः वर्धमानगृहैः क्रीडागृहैः रत्नसमूहालंकृतैः रैतैः परिवृतं
१८ तत्पितुर्वेश्म पश्चिमां सविगृहे बुद्धेषु श्रिया ज्वलन् राजपुत्रः प्रविवेशेत्यन्वयः १९ वाजिभिरश्वयुक्तैः २०

 इहामुत्र च लोके सर्वैर्निंदितो वसेत् न केवलं लोका एवैनं विगर्हंते अपितु स्वात्मापि स्वयमपि एनं राम सान्निध्या
सान्निध्यप्रोग्र स्तुमेनोभ्याम पप्रपंतं विगर्हते धिग्माभाव स्नानाद्योग्यमितिनिंदति अत स्त्रिदाने दैककं
देभागवति राम कथंचिद्द्वृति विषयतामापन्ने सर्वैष्यनुरंज्यंत इति भावः १४ किंच हि यस्मात्स धर्मात्मा च

सर्वेषां स हि धर्मात्मा वर्णानां कुरुते दयाम् चतुर्णां हि वयस्थानां तेन ते तम नुव्रताः
१५

तुर्णामपि वर्णानां सर्वेष्वप्याश्रमेषु वस्थानां वयोऽनुरूपं स्थाने यस्यास्तां वयोनुरूपां दयां मुक्तिपर्यंतानुग्र
हं कुरुते करोति तेन कारणेन ते सर्वे लोका स्तं रामं कायवाङ्मनोभिरनुव्रता अनुरक्ता इत्यर्थः अनेन भावदि
षयकज्ञानवानेव धन्य इति वस्तुव्यज्यते १५

ष्वतिक्रांतेपि दृष्टिपथमतीतेपि सकलजनमनोनयनसंमोहनाकारानुभवजनितेन वासनाबलेन पुनः परिदृश्यमानद्रु
व स्थितात्तस्मात्कश्चिदपि नरः मनश्चक्षुषी अपाक्रष्टुं निवर्तयितुं नहि शक्नोति किमुत नारीजन इति भावः १३ एवं
लोकानन्तलोकविहर्तुं दर्शयति यश्चेति यश्च रामः मेरमणीयविग्रहं पुंडरीकदलायतकरुणाक्षं सकिरीटकुंडलकेयूरक
टकादिभूषितमपारसौशील्यसौंदर्यमाधुर्यगांभीर्यौदार्यवात्सल्यजलनिधिमनालोकितविशेषाशेषशरण्यं

नहि तस्मान्मनः कश्चिच्चक्षुषी वा नरोत्तमात् नरः शक्नोत्यपाक्रष्टुमतिक्रांतेपि राघवे १३
पुरुषस्तं न पश्येत्तु यं च रामो न पश्यति निंदितः सर्वलोकेषु स्वात्माप्येनं विगर्हते १४

रघुराजकुमारं न पश्येत् यं च सर्वदेशस्थं देवादयोपि न पश्यति पुरुषस्तं स्वं प्राकाशादिहिरण्यगर्भांतेषु सर्वभूतेषु नि
यंतृत्वेन वर्तमानं स्वांतर्यामित्वेन न पश्येत् यं च रामोंतर्याम्यपि न पश्यति स्वीयत्वेन नानुगृह्णाति पुरुषस्तं सर्वप्राणि
भिः समाधावनुभूयमानं नित्यानंदं चेतनमात्रं स्वात्मतादात्म्येन न पश्येत् वोपेक्ष्य वेत्यात्मा स्वात्मकुर्यात् यं चानधिकारि
णामेव स्व न पश्यति यन्निषक्तानविषयतां न प्राप्नोति ज्ञानविषयत्वप्राप्ति रत्र दर्शनं सर्वोपि रामानुभवाद्दृष्टहीन

२७०८३ सकृतैः स्वर्गादिनाशकृनिर्मितैरोहामग्गेर्ज्जैरकीर्त्तिर्व्याप्तम् कोकरु वीरहास्ये गोव करितिकोग्राः भक्तिमिर्वर्धकी
यमेराजनिसतितिसर्वैर्वयंतत्तेपूर्वस्मात्सुखतरं यथाभवतितथावत्स्यामः ९ रामंराज्येप्रतिष्ठितमभिषिक्तंराजमार्गेनि
र्यांतं १ यथापश्यामयथासत्यात्कुर्मोयदितर्हिनोस्माकंभक्तेनहि किभोगजसुखेनतथापरमार्थैः स्वर्गादिसुखैश्चसर्वे

यथास्मलालिताःपित्रायथापूर्वैःपितामहैः ततःसुखतरंसर्वेरामेवत्स्यामराजनि ९ अलमद्यहिभुक्तेन
परमार्थैरलंचनः यथापश्यामनिर्यांतंरामंराज्येप्रतिष्ठितम् १० ततोहिनःप्रियतरंनान्यत्किंचिद्भवि
ष्यति यथाभिषेकोरामस्यराज्येनामिततेजसः ११ एताश्चान्याश्चसुहृदामुदासीनःशुभाःकथाः॥
आत्मसंपूजनीःशृण्वन्ययौरामोमहापथम् १२

सुखमेवतेनैववत्स्यामभवात् १० तदेवाहततइति अमिततेजसोरामस्यराज्येनराज्यफलकोभिषेकोयथानान्यत्किंचि
त्प्रियतरं प्रेमास्पदंभविष्यतिसर्वसुखस्यसद्यःजमूलकत्वादितिभावः ११ उदासीनःस्तुतिजहर्षविकाररहितःश्री।
आत्मसंपूजनीःमनोः हर्षजननीःमहापथंराजमार्गम् १२ रा०८३

अविद्धाभिः अकृतच्छिद्राभिः असंबाधं विस्तीर्णं अत्रत्यराजपथमिस स्पदद्दर्शेत्यनेनान्वयः द्वितीयस्य वक्ष्यमाणेन यथा
वित्यनेन संबंधः ४ संवृतं व्याप्तम् ५ अभ्यर्चितचत्वरं प्रतिपूजिताङ्गणं अङ्गणं चत्वराजिरे इत्यमरः ६ यथार्हं दर्शी

अविद्धाभिरकृताभिरुत्तमैः स्फाटिकैरपि शोभमानमसंबाधं तं राजपथमुत्तमम् ४ संवृतं वि
विधैः पण्यैर्भक्ष्यैरुच्चावचैरपि ददर्श तं राजपथं दिवि देवपथं यथा ५ दध्यक्षतहविर्लाजै
र्धूपैरगरुचंदनैः नानामाल्योपगंधैश्च सदाभ्यर्चितचत्वरम् ६ आशीर्वादान्बहून् शृण्वन् सु
हृद्भिः समुदीरितान् यथार्हं चापि संपूज्य सर्वानेव नरान्ययौ ७ पितामहैराचरितं तथैव प्रपिता
महैः अद्योपादाय तं मार्गमभिषिक्तोऽनुपालय ८

नमाचरांजलिभिर्यथोचितं सर्वानेव संपूज्य राजपथं ययौ ७ अद्याभिषिक्तस्त्वं पितामहाद्यैराचरितमनु
ष्ठितं तं प्रसिद्धं मार्गं मर्यादामनुपालयेत्यादि वृद्धानां वादः ८

स्वस्तिकाः जयजयेति वादिनो वंदिनस्तत्स्वर्थः सूताः स्तुतिपाठकाः मागधा वंशप्रशंसकाः एतैर्वादिकैः स्तुतश्चक्रु वक्षयो ऋभिः पूज्यमानः ४६ ४७ इति षोडशः सर्गः ॥ १६ ॥ पताकाभिः नामांकिताभिः ध्वजैर्गोहरादिचिन्हितैरु

स घोषवद्भिश्च हयैः सनागैः पुरःसरैः स्वस्तिकसूतमागधैः महीयमानः प्रवरैश्च वादिकैरभिष्टुतो वैश्रवणो यथा ययौ ४६ करेणुमातंगरथाश्वसंकुलं महाजनौघप्रतिपूर्णचत्वरम् प्रभूतरत्नंव हुपण्यसंचयं ददर्श रामो विमलं महापथम् ४७ ॥ इत्यार्षे रामायणे वाल्मीकीये अयोध्याकांडे षोडशः सर्गः १६ स रामो रथमास्थाय संप्रहृष्टसुहृज्जनैः पताकाध्वजसंपन्नं महार्हागरुधूपितम् १ अपश्यन्नगरं श्रीमान्नानाजनसमाकुलम् स गृहैरभ्रसंकाशैः पांडुरैरुपशोभितम् राजमार्गं ययौ रामो मध्येनागरुधूपितम् २ चंदनानां च मुख्यानामगरूणां च संचयैः उत्तमानां च गंधानां क्षौमकौशांबरस्य च ३

क्तम् १ मध्येन उभयपार्श्वगोमध्येन २ उत्तमानां गंधवद्द्रव्याणां संचयैः क्षौमकौशांबरस्य च संचयैरित्यन्वयः क्षौमं दुकूलं कौशं पट्टवस्त्रम् ३

पतत्येवमसत्यं तान् शतशत्येत्यादितदुच्चरिता वाचः शुश्राव इत्यन्वयः ४१ ४२ आत्माधिकाराः आत्मानमधिकृत्य प्रवृत्ताः ४३ एष राघवो राजप्रसादाद्विपुलां श्रियं गमिष्यन् विपुलश्रीप्राप्त्यर्थं गच्छतीति पितरं हृमितिशेषः सर्व

तयास्तु चरिते देव्या पुरा नूनं महत्तपः रोहिणीव शशाङ्केन रामसंयोगमागता ४१ इति प्रासादशृङ्गेषु प्रमदाभिर्नरोत्तमः शुश्राव राजमार्गस्थः प्रिया वाच उदाहृताः ४२ स राघवस्तत्र कथाप्रलापाञ्छुश्राव लोकस्य समागतस्य आत्माधिकारा विविधाश्च वाचः प्रहृष्टरूपस्य पुरे जनस्य ४३ एष श्रियं गच्छति राघवो द्य राजप्रसादाद्विपुलां गमिष्यन् एते वयं सर्वसमृद्धकामा येषामयं नो भविता प्रशास्ता ४४ लाभो जनस्यास्य यदेष सर्वं प्रपत्स्यते राष्ट्रमिदं चिराय न ह्यप्रियं किंचन जातु कश्चित्पश्येन्न दुःखं मनुजाधिपेऽस्मिन् ४५ ४५ ४५

समृद्धकामाः सम्यक् समृद्धकामा इत्यर्थः प्रशास्ता राजा ४४ एष सर्वराष्ट्रं प्रपत्स्यते इति यत् अयमेव लाभः अस्मिन् मनुजाधिपे सति कश्चिदपि किंचन स्वल्पमपि अप्रियं अप्रियाभावं दुःखमनिष्टप्राप्तिं जातु कदाचिदपि न प

श्री० ८२ ३४ हर्षिताः क्षिप्राः श्वाश्रंसवः रामश्रेय श्वाश्रं समानाः ३५ ततस्तत्र तदागमनकाले ३६ हर्म्यवातायनस्थाभिः
प्रासादगवाक्षस्थाभिः ३७ रामपि प्रीव रामप्रीताने वकु याववंदिरे तु षु वुः ३८ स्तुतिप्रकारमाह नूनमिति

ततो हयवरमुख्या नागाश्च गिरिसन्निभाः अनुजग्मुस्तदा रामं शतशोऽथ सहस्रशः ३४ अग्रत
श्चासन्नराश्चंदनागरुभूषिताः खड्गचापधराः शूरा जग्मू रामं सबोजनाः ३५ ततो वादि
त्रशब्दाश्च स्तुतिशब्दाश्च वंदिनां सिंहनादाश्च शूराणां तत्र शुश्रुविरे पथि ३६ हर्म्यवाताय
नस्थाभिर्भूषिताभिः समंततः कीर्यमाणाः सुपुष्पौघैर्ययौ स्त्रीभिररिंदमः ३७ रामं सर्वानवद्यां
ग्यो रामपि प्रीयया ततः वचोभिरग्र्यैर्हर्म्यस्थाः क्षितिस्थाश्च ववंदिरे ३८ नूनं नंदति ते माता कौशल्या
मातृनंदनं पश्यंती सिद्धयात्रं त्वां पित्र्यं राज्यमुपस्थितम् ३९ सर्वसीमंतिनीभ्यश्च सीतां सीमंतिनीं वराम्
अमन्यंत हि ता नार्यो रामस्य हृदयप्रियाम् ४०

सिद्धयात्रं सफलगमने उपस्थितं प्राप्तवंतम् ३९ एवं प्रशंसंत्यस्ता नार्यो रामस्य हृदयप्रियां तां सीतां सीमंतिनीं सर्वसीमंति
नीभ्यो वरां श्रेष्ठां अमन्यंत हि निश्चयेन ४०

एकाम्बापुत्रराज्याग्रचिता ३ विपष्ठे कांतारे सहा सम्भूत पथिकसंघरहिता ४ सकृ धर्मिताः सत्कृधर्मीया ५ एवं सहस कैः रागोहेतुमाह ने
ति किंपाकं कुत्सितपाकं यथ भक्ष्यामितिया वत् भक्षयन् जनः क्षेयं न जानातित्ति दृत् यत्कैकेय्याराधवाराम कुर्लेहतंतत्र कुज्वानि

सकामाभवकैकेयिमुंख्वराज्यमकंटकम् सत्काराजानमेकाग्रानस्फंसेदुष्टचारिणि ३
विहायामागते रामे भर्ता च स्वर्गतो मम विपष्ठे सार्थहीनेव नाहं जीवितुमुत्सहे ४ भर्तारं च
परित्यज्य का स्त्री दैवतमात्मन इच्छेज्जीवितुमन्यत्र कैकेय्यास्त्यक्तधर्मिणाः ५ न लुब्धो
बुध्यते दोषान् किंपाकमिव भक्षयन् कुब्जानिमित्तं कैकेय्या राघवाणां कुलं हतम् ६
अनियोगे नियुक्तेन राज्ञा रामं विवासितम् सभार्यं जनकः श्रुत्वा परितप्स्यत्यहं यथा ७ स
मामधनाथो विधवां नाद्य जानाति धार्मिकः रामः कमलपत्राक्षो जीवनाशमितो गतः ८
विदेहराजस्य सुता तथा दीना तपस्विनी दुःखस्यानुचिता दुःखं वने पर्युद्विजिष्यति ९ ९

मितं प्रेरकतयेत्यर्थः ६ अनियोगे अनुचितनियोगे वरव्याजात्कैकेय्या नियुक्तेन राज्ञा सभार्यं रामं विवासितं श्रुत्वा जनकोऽ
हमिव परितप्स्यति ७ जीवनाशमितो गतः राज्ञो जीवनाशोपायभवतीति यावत् इत्यर्थः ८ दुःखं यथास्यात्तथा पर्युद्विजि

ष्यतीति संक्षेपः

करेणुशिप्रकल्पैः करभनिभैः स्वनेन दृढपुष्टबलसूचितं इंद्रः परमैश्वर्यवान्सहस्राक्ष इव नानाविधरत्नखचितमर
णास्थरत्नसमूहैरामस्वसहस्राद्वा लं ध्वनितम् ३० ज्वलितः दीपितः गंभीरघोषस्वनवान् नादवान् पर्जन्यो मेघ इव

करेणुशिप्रकल्पैश्च युक्तं परमवाजिभिः हरियुक्तं सहस्राक्षो रथमिंद्र इवारुहत् ३० प्रययौ
तूर्णमास्थाय राघवो ज्वलितः श्रिया सपर्जन्य इवाकाशे स्वनवानभिनादयन् ३१ निकेतान्
निर्ययौ श्रीमान्महाभ्रादिव चंद्रमाः चित्रचामरपाणिस्तु लक्ष्मणो राघवानुजः जुगोप भ्रा
तरं भ्राता रथमास्थाय पृष्ठतः ३२ ततो हलहलाशब्दस्तुमुलः समजायत तस्य निष्क्रममा
णस्य जनौघस्य समंततः ३३

घस्वनेन दिशो नादयन् प्रययावित्यन्वयः ३१ चित्रचामरेति चित्रदंडयुतचामरेत्यर्थः ३२ हलहलेत्यनुकरणं
तस्य निष्क्रममाणस्य पुरात्तस्येति शेषः तस्मिन्निष्क्रममाणे इति यावत् जनौघस्य ह[illegible]लहलाशब्दो महान्सम
जायतेत्यन्वयः ३३

अ॰ ८० भजामिभजिष्ये २३ २४ ॥कृतकौतुकमंगलः अनुष्ठितामिषेकोत्सवार्थमंगलः २५ प्रह्वांजलिपुटं प्रह्वत्वसूचका

दीक्षितेव्रतसंपन्नेवराजिनधरे शुचिम् कुरंगशृंगपाणिंचपश्यंतीत्वांभजाम्यहम् २३ पूर्वां
दिशंवज्रधरोदक्षिणांपातुतेयमः वरुणःपश्चिमामाशांधनेशस्तूत्तरांदिशम् २४ अथ
सीतामनुज्ञाप्यकृतकौतुकमंगलः निश्चक्रामसुमंत्रेणसहरामोनिवेशनात् २५ पर्व
तादिवनिष्क्रम्यसिंहोगिरिगुहाशयः लक्ष्मणंद्वारिसोपश्यत्प्रह्वांजलिपुटंस्थितम् २६
अथमध्यमकक्ष्यायांसमागच्छन्सुहृज्जनैः ससर्वानर्थिनोदृष्ट्वासमेत्यप्रतिनंद्यच २७
ततःपावकसंकाशमारुरोहरथोत्तमंवैयाघ्रंपुरुषव्याघ्रोराजतंराजनंदन २८ मेघ
नादमसंबाधंमणिहेमविभूषितम् मुष्णंतमिवचक्षूंषिप्रभयासूर्यवर्चसम् २९ ॥॥

जलिपुटंवेते २६ प्रार्थिनःस्वदर्शनःस्वाभिषेकार्थिनः २७ वैयाघ्रंव्याघ्रचर्मपरिवृतंराजतंरजतविकारम् २८
मेघस्येवनादोयस्यतंअसंबाधंसंबाधरहितंउचितंविस्तारमित्यर्थः २९ एमायनमःसीतायनमःप्यनमममममम ८०

१७ कुत एवं त्वायते तत्त्वाद् दृष्ट्वेति मम कामविषयमर्थं करोति तिता दृष्ट्वांस्समेत्रं प्रतीतो दूतप्राहितो दत एव ज्ञायत इति भावः १८
तदेव विवृणोति प्रा दृष्ट्वीति प्रा दृष्ट्वी मदर्थं परात्तत्र राजो तः परे परिषत्सभा १९ हन्तेति हर्षे परिवारेणा संचेन २० प्र
मिद ध्रुषी ग्रमिध्यायेति २१ राजाद्विजातिभिर्वसिष्ठादिभिर्जुष्टं चिरं निषेवितं राज्यमयोध्याराज्ये तत्र यौवराज्या

सा प्रहृष्टा महाराजं हितकामानुवर्तिनी जननी चार्थकामानामेकेकप्राधिपते सुता १७ दिष्ट्या
खलु महाराजो महिष्याधिप्रयात् ह समेत्रं प्राहितो दूतमर्थं कामकरं मम १८ प्रादृष्टोपरिषत्तत्र
तादृशो दूतस्त्वागतः ध्रुवमद्यैव मां राजा यौवराज्येभिषेक्ष्यति १९ हन्त शीघ्रमितो गत्वा द्रक्ष्यामि
च महीपतिम् सह त्वं परिवारेण सुखमास्व रमस्व च २० पतिसंमानिता सीता भर्तारमसितेक्षणा
आद्वारमनुवव्राज मंगलान्यभिदध्युषी २१ राज्यं द्विजातिभिर्जुष्टं राजसूयाभिषेचनम् कर्तुमर्हति ते रा
जा वासवस्येव लोककृत् २२

भिषेकं कृत्वा कालोत्तरे राजसूयाभिषेचनं राजसूयार्हमभिषेचनं महाराज्याभिषेचनं कर्तुमर्हतीति लोककृत् इंद्रस्येव यथा प्र
जाद्विजातिभिरत्रि प्रारभं गास्तुतीक्ष्णादिभिर्जुष्टं राज्यं वनराज्ये दत्वा राजसूयाभिषेचनं त्रैलोक्यविजयेन राजत इति राजा रावणा
त्रैलोक्यकंटकं स्वपते केल्यातेप त्वतादृशो योगे प्रभिषेचनं कर्तुमर्हतीति गूढं व्यंग्यम् २२ २२ २२ २२ २२ २२

वैदेहीसुमंत्रः विनीतवेषैर्विनीतः सन्नवरुद्धवानरूपेणरूपदेव वैदेहस्यान्वयः ११ विहारशयनस्थानरूपे स्थासनेविराजमा
नेप्रसन्नवदनेराजपुत्रे ॥ स्वेसमन्वयः १२ सुप्रजाः सुपुत्रेत्याखयेतिरोषः १३ समानप्रमाससुमंत्रवचोगोचकारेत्य
र्थः १४ मदंतरेमदर्थसमागम्यमिलित्वा प्रभिषेचनस्यसम्यकहितं किंचिद्विचारयतः १५ तत्रतर्कयतिलक्षयित्वे

त

ततःपैत्रमिवादित्यसमुपपन्नंस्वतेजसा ववंदेवरदंवंदी विनयज्ञोविनीतवत् ११ प्रांजलिःसु
मुखं दृष्ट्वाविहारशयनासने राजपुत्रमुवाचेदंसुमंत्रोराजसत्कृतः १२ कौसल्यासुप्रजा
रामपितात्वांद्रष्टुमिच्छति महिष्यासहकैकेय्यागम्यतांतत्रमाचिरम् १३ एवमुक्तस्तुसं
हृष्टोनरसिंहोमहाद्युतिः ततःसंमानयामाससीतामिदमुवाचह १४ देविदेवश्चदेवीच
समागम्यमदंतरे मंत्रयेतेध्रुवंकिंचिदभिषेचनसंहितम् १५ लक्षयित्वाह्यभिप्रायंप्रिय
कामासुदक्षिणा संचोदयतिराजानंमदर्थंमदिरेक्षणा १६

त्यादिश्लोकद्वयेनराज्ञोभिप्रायमदभि
वेकविषयंलक्षयित्वातात्वासुदक्षिणासमर्थाश्वतएवराज्ञःप्रियकामाश्वतएवप्रदृष्टादितकामानुवर्तिनीहित
वचनेनकामेनचराजानमनुवर्तितुंशीलेयस्याःसा दृष्टीमेजननीमदर्थकामामहाराजंराजानेमितिहर्षेवप्राप्नुनहि

वैश्रवणालये काश्चांत इव अधिके ऐश्वर्यसंपन्नं स्वलंकृतं महार्हदिव्याभूषणभूषितं तादृशैश्वर्यसामान्यानुरूपापूर्वं तस्यानं विशेषवि
शिष्टासोत्तरच्छदे शिरीषकुसुमसुकुमारतमदेहानुगुणाम्रदुतलतल्पयुक्ते सौवर्णे पर्यंके उपविष्टं स्वलंकृतं कृष्णाभूमिभर्त

तं वैश्रवणालयेकाशमुपविष्टं स्वलंकृतम् ददर्श सूतः पर्यंके सौवर्णे सोत्तरच्छदे ८ वराहरुधि
राभेण शुचिना च सुगंधिना अनुलिप्तं परार्ध्येन चंदनेन परंतपः ९ स्थितया पार्श्वतश्चापि
वालव्यजनहस्तया उपेतं सीतया भूयश्चित्रया शशिनं यथा १० सीतारामाभ्यां नमः।

श्रीरामं निकृष्टसीमाभूमिभृत्सूतो ददर्शेति कोयं भाग्यातिशय इति भावः ८ वराहरुधिरसमं लोहितवर्णमिति प्रसिद्धं
तत्सदृशेन शुचिना सीताकरस्पर्शपूतेन सुगंधिना चंदनकाश्मीरादियुक्तेन परार्ध्येन श्रेष्ठेन चंदनेनानुलिप्तं परंतपम् ९
वालव्यजनं हस्ते कृत्वा स्थितया सीतया उपेतं अतएव भूयो विराजमानमिति शेषः तस्य ददर्शेति पूर्वेणान्वयः तदा
नींतनातिशये दृष्टांतमुखेन स्पष्टीकरोति चित्रयेति चित्राख्यतारकयोपेतं शशिनमिव स्थितम् १० १० १० १०

 एवंसुमंत्रस्य रामोपस्थानमुक्त्वा रामस्य दशरथोपस्थानमाह सदंतरित्यादिना प्रविविक्तां जनैरसेवितां १ प्रासकार्मुका
णां धारकैः एकाग्रैरेकाग्रचित्तैः २ काषायिणः कुब्जादिकषायरक्तवस्त्रधारिणः ३ प्रदक्षिणः प्रकर्षेणासेवादेनि

सदंतःपुरद्वारं समतीत्य जनाकुलम् प्रविविक्तां ततः कक्ष्यामाससाद गुणावित् १ प्रासकार्मुक
बिभ्रद्भिर्युवभिर्मृष्टकुंडलैः अप्रमादिभिरेकाग्रैः स्वनुरक्तैरधिष्ठितम् २ तत्र काषायिणो
वृद्धान्वेत्रपाणीन्स्वलंकृतान् ददर्श विष्ठितान् द्वारि स्त्र्यध्यक्षान्सुसमाहितान् ३ ते समी
प्य समायांतं राममप्रियचिकीर्षवः सहसोत्पतिताः सर्वे ह्यासनेभ्यः ससंभ्रमाः ४ तानुवाच वि
नीतात्मा सूतपुत्रः प्रदक्षिणः क्षिप्रमाख्यात रामाय प्राप्तो मंत्री द्वारि तिष्ठति ५ ते राममुपसंग
म्य भर्तुः प्रियचिकीर्षवः सभार्याय च रामाय क्षिप्रमेवाचचक्षिरे ६ प्रतिवेदितमाज्ञाय सूत
मभ्यंतरं पितुः तत्रैवानाययामास राघवः प्रियकाम्यया ७

निपुणः शीघ्रमाख्यात कथयत ४ ६ प्रतिवेदितं द्वास्थैर्विज्ञापितं पितुरभ्यंतरं अत्यंतमंतरंगां प्रियकाम्यया पितुरिति शेषः

४५ कोट्याकोटिसंख्यायाः परार्धैः तत्संख्यैरुपलक्षितैर्जनैः ४६ महामेघाधिरूढपर्वतसदृशं प्रभिन्नं मत्तं प्रभिन्नो गर्वितो मत्तः स्यमरः अत्यंकुशं अंकुशं प्रतिक्रांतो कुशो रामोपवाह्यं स्वारोह्यं उदग्रकायं उन्नतशरीरं ४७ वल्लभानमात्

महेंद्रसद्मप्रतिमं तु वेश्म रामस्य रम्यं मृगपक्षिजुष्टम् ददर्श मेरोरिव शृंगमुच्चैर्विभ्राजमानं प्रभया सुमंत्रः ४५ उपस्थितैरंजलिकारिभिश्च सोपायनैर्जानपदैर्जनैश्च कोट्यापरार्धैश्च विमुक्तयानैः समाकुलं द्वारपथं ददर्श ४६ ततो महामेघमहीधराभं प्रभिन्नमत्यंकुशमत्यसह्यम् रामोपवाह्यं रुचिरं ददर्श शत्रुंजयं नागमुदग्रकायम् ४७ स्वलंकृतान्साश्वरथान्सकुंजरानमात्यमुख्यांश्च ददर्श वल्लभान् व्यपोह्य सूतः सहितान्समंततः समृद्धमंतःपुरमाविवेश ह ४८ तदद्रिकूटाचलमेघसन्निभं महाविमानोत्तमवेश्मसंघवत् अवार्यमाणः प्रविवेश सारथिः प्रभूतरत्नं मकरो यथार्णवम् ॥ ४९ ॥ इत्यार्षे रामायणे अयोध्याकाण्डे पंचदशः सर्गः ॥ १५ ॥॥

इति शेषः व्यपोह्य स्वरथागमनेन मार्गादेकदेशे कृत्वा ४८ अद्रिकूटेन गिरिशिखरेणाचलमेघेन च तत्संभमहाविमानेभ्यः उत्तमानां वेश्मानां संघस्तद्वत ४९ इति पंचदशः सर्गः १५

वरूथोरथगुप्तिस्तद्युतेनाजगन्महाभिपातिना रथेन राजकुलं राजमार्गं विराजयन् शोभयन् ससारथीरामगृहं समासद
दिति शेषः ४१ ततः ससारथिर्महाधनं महता धनेन युक्तं मेरौर्मयूरैश्च समाकुलैरितस्ततः प्रसृतैरुल्वणं श्वधिकशो

स वाजियुक्तेन रथेन सारथिर्नराकुलं राजकुलं विराजयन् वरूथिना रामगृहाभिपातिना पुर
स्य सर्वस्य मनांसि हर्षयन् ४१ ततः समासाद्य महाधनं महत् प्रहृष्टरोमा स बभूव सारथिः मृगै
र्मयूरैश्च समाकुलोल्वणं गृहं वराहस्य शचीपतेरिव ४२ स तत्र कैलाससनिभाः स्वलंकृताः प्रवि
श्य कक्ष्यास्त्रिदशालयोपमाः प्रियान्नरान् राममते स्थितान् बहून् अपोह्य शुद्धान्तमुपस्थितो र
थी ४३ स तत्र शुश्राव च हर्षयुक्ता रामाभिषेकार्थकृतां जनानाम् नरेन्द्रसूनोरभिमङ्गलार्थाः स
र्वस्य लोकस्य गिरः प्रहृष्टाः ४४

भावतवराहस्य उत्तमवस्त्वर्हस्य रामस्य प्राचीपतेरिव महद्गृहं समासाद्य प्रहृष्टरोमा वभूवेति सम्बन्धः ४२ अपोह्य अ
तिक्रम्य शुद्धान्तमेतः पुरम् ४३ रामस्याभिषेकार्थे रामाभिषेकप्रयोजनके कर्म कुर्वतां जनानां गिरो नरेन्द्रसूनोः राम
स्य अभितो मङ्गलं तत्प्रतिपादनमर्थो यासां ताः शुश्राव तथा सर्वस्य लोकस्य च गिरस्ता दृष्टीः शुश्राव ४४ रामाय राम० ७७

सुकृतैः स्वर्णादिनासम्यङ् निर्मितैरीहामृगैर्वृकैराकीर्णं व्याप्तम् कोकरुवीमृगोवृक इतिकोशः भक्तिभिर्वर्धकीनां सूक्ष्मचित्रशि
ल्पैरुत्कीर्णं चित्रवत् ३६ तिग्म तेजसा श्रुति शायितशोभया अप्रदत् आकर्षत् ३७ रामवेश्म ददर्श हेति पुनर्वचनस्य

सारसैश्च मयूरैश्च विनदद्भिर्विराजितम् सुकृतेहामृगाकीर्णमुत्कीर्णं भक्तिभिस्तथा ३६ म
नश्चक्षुश्च भूतानामाददत्तिग्मतेजसा चन्द्रभास्करसंकाशं कुबेरभवनोपमम् ३७ महेन्द्रधा
मप्रतिमं नानापक्षिसमाकुलम् मेरुशृङ्गसमं सूतो रामवेश्म ददर्श ह ३८ उपस्थितैः समाकीर्णं
जनैरञ्जलिकारिभिः उपादाय समाक्रान्तैस्तथा जानपदैर्जनैः ३९ रामाभिषेकसुमुखैरुन्मु
खैः समलंकृतं महामेघसमप्रख्यमुदग्रं सुविराजितम् नानारत्नसमाकीर्णं कुब्जकैरपि चावृ
तम् ४०

सामान्योक्तस्य विशेषकथनार्थत्वान्न पुनरुक्तिः ३८ उपस्थितैः समीपवर्तिभिः अञ्जलिकारिभिः नमस्कुर्वद्भिर्जनैः समाकी
र्णं तथा उपायनानि उपादाय आगतैः समाक्रान्तैर्द्वारपालनिरुद्धैर्जानपदैर्जनैः समाकीर्णमित्यपेक्षितपूरणेनान्वयः ३९
उन्मुखैः अनुकैः उदग्रं प्रशस्तं कुब्जकैर्दासैः ४०

ग्रं० ७६ हृष्टः पुलकितगात्रः प्रमुदितमानंदितचित्तः राजमार्गं विलोकयन्निति संबंधः ३० रामाधिकरणाः रामविषयाः हृष्टवत् हृष्टोऽभूत्
त्वा स्वार्थे वति ३१ ३२ पिहितं युक्तं वितर्दिर्वेदिका कांचनाः प्रतिमाः यस्मिन् तत्कांचनप्रतिमं एकैकं रथ्याग्रागं पुरोभागोऽयस्य तत्

प्रपन्नो राजमार्गं च पताकाध्वजशोभितं हृष्टः प्रमुदितः सूतो जगामाशु विलोकयन् ३० स सूत
स्तत्र शुश्राव रामाधिकरणाः कथाः अभिषेचनसंयुक्ताः सर्वलोकस्य हृष्टवत् ३१ ततो ददर्श रु
चिरं कैलाससदृशप्रभम् रामवेश्म सुमंत्रस्तु शक्रवेश्मसमप्रभम् ३२ महाकपाटपिहितं वित
र्दिशतशोभितम् कांचनप्रतिमैकाग्रं मणिविद्रुमतोरणम् ३३ शारदाभ्रघनप्रख्यं दीप्तं मेरु
गुहासमम् मणिभिर्वरमाल्यानां सुमहद्भिरलंकृतम् ३४ मुक्तामणिभिराकीर्णं चंदनागरु
भूषितम् गंधान्मनोज्ञान् विसृजद्धान्मनोज्ञान् विसृजद्दार्दुरं शिखरं यथा ३५

तमणि

तमणिविद्रुमयुक्तं तोरणं बहिर्द्वारं यस्य तत् शारदाभ्राणामिव घनानां प्रख्या प्रभा यस्य तत् वरमाल्यानां
स्वर्णमयमाल्यानामंतरालवर्तिभिर्महद्भिर्महार्घैर्मणिभिरलंकृतम् ३४ दर्दुरो मलयसन्निकृष्टः खंदनगम० ७६
गिरिः ३५

ताभिः कैकेयीप्रभृतिभिः पश्चादेतः प्रवृविष्टाभिः स्वनादेन प्रथमप्रविष्टानां स्त्रीणां वलस्वान्नादो नुद्रुतः पुनरुच्चभूदिति प्रोषः येना
नुद्रवणेन स्फीती कृतो वर्धितः सनादो भूयोऽधिकं तद्गृहं समनादयत् व्याप्तवान् २७ तदिति स्त्रीणां कैकेय्याः पर्युत्सुकज

ताभिः सवलस्वान्नादः क्रोशन्तीभिरनुद्रुतः॥ येन स्फीतीकृतो भूयस्तद्गृहं समनादयत्॥२७॥ त
त्परित्रस्तसंभ्रान्तं पर्युत्सुकजनाकुलम्॥ सर्वतस्तुमुलाक्रन्दं परितापार्तबान्धवम्॥२८॥ सद्यो
निपतितानन्दं दीनविक्लवदर्शनम्॥ बभूव नरदेवस्य सद्म दिष्टान्तमीयुषः॥२९॥ अतीतमा
ज्ञाय तु पार्थिवर्षभं यशस्विनं संपरिवार्य पत्नयः॥ भृशं रुदन्त्यः करुणं सुदुःखिताः प्रगृह्य बा
हू व्यलपन्ननाथवत्॥३०॥ इत्यार्षे रामायणे ऽयोध्याकाण्डे पंचषष्टितमः सर्गः॥६५॥ तम॥
ग्निमिव संप्रशान्तमम्बुहीनमिवार्णवम् गतप्रभमिवादित्यं स्वर्गस्थं प्रेक्ष्य भूमिपम् १ कौसल्या
बाष्पपूर्णाक्षी विविधं शोककर्षिता उपगृह्य शिरो राज्ञः कैकेयीं प्रत्यभाषत २

नाकुलं पूर्ववत्तोतत्स्तानायपर्युत्सुकजननिविडं दिष्टान्तं कालधर्मम् पेयुषः प्राप्तस्य नरदेवस्य सद्म परित्रस्तसंभ्रान्तत्वादिगुणविशि
ष्टं बभूव २८ २९ अतीतं मृतं पत्नयः पत्न्यः बाहू प्रगृह्य ऊर्ध्वमिहस्य ३० इति पंचषष्टितमः सर्गः ६५ राज्ञः शिर उपगृह्य अंके कृत्वेत्यर्थः २

निगमोवाणिज्यंतत्संबंधिनोनैगमाः २५ ततः सुमंत्रकर्तृकप्रतिबोधनानंतरं राजा दशरथः प्रतिबुध्य जवनिकांतर्हितमपि सुमंत्र-
ध्वनिंतात्वाइदंवचनमब्रवीत् २६ तदेवाह राममानयेतिहिस्तू तराममानयेसनया अभिहितोसि यत् अप्रतिबिद्धमनुमत

वंतंतंतदासूतंसुमंत्रंमंत्रकोविदं प्रतिबुध्यततोराजाइदंवचनमब्रवीत् २६ राममानयसूतेतिय
दस्यभिहितोनया किमिदंकारणंयेनममाज्ञाप्रतिहन्यते २७ नचैवसंप्रसुप्तोहमानयेहाशु।
राघवम् इतिराजादशरथःसूतंतत्रान्वशासुनः २८ सराजवचनंश्रुत्वाशिरसाप्रतिपूज्यतं नि
र्जगामनृपावासान्मन्यमानःप्रियंमहत् २९

न्व

मितिन्यायेनतदाज्ञापालनमदाज्ञाल्वात्तसेयंममाज्ञा प्रतिहन्यतेनानुष्ठीयतइतीदंकिंकारणंकिंकारणकमित्यर्थः २७ नच
निद्रांपरवशस्सएतच्छ्रमनुमतेन्वेतिसंशयितव्यंत्वयेसाहनचैवेति तत्रकेकेयीनियमितकार्ये अन्वशात् अन्वशासिस
पुनरितिवाक्यालंकारे २८ प्रियंमन्यमानः हादीमिष्टाप्राज्ञानात् २९

इत्वाकूराणांत्वेभिषेचनमुद्दिश्यपथास्मिन्निधेयेत वस्तुजातं तत्राजातीयमानघीरत्नजातमादायगृहीत्वा १३ राजवचमाद्राजाद्वारे समवेतानि
तिताब्रह्मणादयो महीपतिमपश्यंतो स्मात् राज्ञः कः प्रतिवेदयेदित्यब्रुवन् १४ यौवराज्याभिषेकस्तत्सामग्री १५ १६ राज्ञो नियोगेन राममाने

रा०७५

नःप्रतिवेदयेत् १४ नपश्यामश्चराजानमुदितश्चदिवाकरः यौवराज्याभिषेकश्चसज्जोराम
स्यधीमतः १५ इतितेशुश्रुवांसोपिसार्वभौमान्महीपतीन् अब्रवीत्तानिदंवाक्यंसुमंत्रो।
राजसत्कृतः १६ रामंराज्ञोनियोगेनत्वरयाप्रस्थितोह्यहम् पूज्याराज्ञोभवंतश्चरामस्यच
विशेषतः १७ अयंपृच्छामिवचनात्सुखमायुष्मतामहम् राज्ञःसंप्रतिबुद्धस्ययच्चा
गमनकारणम् १८ इत्युक्त्वांतःपुरद्वारमाजगामपुराणवित् सदासक्तंचतद्वेश्मसुमंत्रःप्र
विवेशह १९ तुष्टावास्यतदावंशंसुमंत्रःसविशांपतेः शयनीयंनरेंद्रस्यतदासाद्यव्यतिष्ठ
तः २० सोत्यासाद्यतुतद्वेश्मतिरस्करणिमंतरा आशीर्भिर्गुणयुक्ताभिरभितुष्टावराघ
वम् २१ सोमसूर्यौचकाकुत्स्थशिववैश्रवणावपि वरुणश्चाग्निरिंद्रश्चविजयंप्रदिशंतुते
२२ यथासांगाश्चवेदावैब्रह्माणंबोधयंतिते तथात्वांधीरबोधयामि उतिष्ठपुरुषर्षभ। २
३ गताभगवतीरात्रिरहःशिवमुपस्थितम् बुध्यस्वनरशार्दूलकुरुकार्यमनंतरम् २४ ब्रा।
ह्मणाबलमुख्याश्चनैगमाश्चागतान्नृपाः दर्शनंतेभिकांक्षंतेप्रतिबुध्यस्वराघव २५ स्तु

सु

राम०७५

तुंयद्यपिप्रस्थितस्तथापिभवंतोराज्ञोरामस्यचपूज्याइतिकृत्वाभूयोतःसमीपंगत्वाआयुष्मतांवचनात्संप्रतिबुद्धस्यापिराज्ञःआगमनस्यकारणंगेम
नस्यकारणंसुखंसर्वेनपृच्छामिविज्ञापयामि १७ १८ पुराणवित् त्रिकालज्ञःकथामित्रःप्रतिकथइतियावत् सदासक्तंसततमनिवारिते १९ शयनी
यंशयनगृहं २० अत्यासाद्यअतिप्रायेनसमीपंप्राप्यतिरस्करणिमंतराजवनिकामात्रंव्यवधानेकृत्वाराघवंदशरथंतुष्टावतज्जविज्ञापनस्यस्तुति
तोमुख्यत्वा पूर्वकत्वाद्पुनःस्तुतिप्रवृत्तिः २१ २२ २३ २४

उपकल्पितं सिद्धं कृतं उपकरणजातमिति शेषः ४ प्राग्वाहा इत्यादेर्नद्य इति शेषः ऊर्ध्ववाहाः ऊर्द्ध्वं गतप्रवाहाः नैमिषारण्यस्थावृत्ता वर्तीदि सरोविशेषाः यद्वा पर्वतगह्वरनादिनोर्द्ध्व प्रवाहवत्यो देशान्तर ऊर्ध्ववाहः दक्षिणोत्तरप्रवाहाः क्षीरिणः क्षीरपूर्णाः क्षीरमेत्र जलं शीवमाक ष्या मिः ६

मस्य च स्थिते ३ अभिषेकाय रामस्य द्विजेन्द्रैरुपकल्पितम् कांचनो जलकुंभोऽष्टमद्रपीठं स्वलं कृतम् ४ रथश्च सम्यगास्तीर्णो भास्वता व्याघ्रचर्मणा गंगायमुनयोः पुण्यात्संगमादाहृतं जलम् ५ याश्चान्याः सरितः पुण्या ह्रदाः कूपाः सरांसि च प्राग्वाहाश्चोर्द्ध्ववाहाश्च तिर्यग्वाहाश्च क्षीरिणः ६ ताभ्यश्चैवाहृतं तोयं समुद्रेभ्यश्च सर्वशः क्षौद्रं दधि घृतं लाजा दर्भाः सुमनसः पयः ७ अष्टौ च कन्या रुचिरा मत्तश्च वरवारणः सजलाः क्षीरिभिश्छन्ना घटाः कांचनराजताः ८ पद्मोत्पलयुता भान्ति पूर्णाः परमवारिणा ८ चंद्रांशुविकचप्रख्यं कांचनं रत्नभूषितम् सज्जं तिष्ठति रामस्य वालव्यजनमुत्तमम् ९ चंद्रमंडलसंकाशमातपत्रं च पांडुरम् सज्जं द्युतिकरं श्रीमदभिषेकपुरःसरम् १० पांडुरश्च वृषः सज्जः पांडुराश्वश्च संस्थितः प्रस्तुतश्च गजः श्रीमानौपवाह्यः प्रतीक्षते ११ अष्टौ कन्याश्च मांगल्याः सर्वाभरणभूषिताः वादित्राणि च सर्वाणि वंदिनश्च तथा परे १२ इक्ष्वाकूणां यथा राज्ये संभ्रियेताभिषेचनम् तथाजातीयमादाय राजपुत्राभिषेचनम् १३ ते राजवचनात्तत्र समवेता महीपतिम् अपश्यंतोऽब्रुवन्को नु राज्ञो

७ क्षीरिभिः क्षीरिवृक्षपल्लवैः पूर्वं जलकुंभमात्रमुक्तमत्र तद्विशेष इति न पुनरुक्तिः ८ चंद्रांशुवद्विकचा विस्तृता प्रख्या कांतिर्यस्य तत् कांचनं कांचनदंडं सज्जं गंधपुष्पादिभिरलंकृतं ९ अभिषेकपुरःसरं अभिषेकसामग्र्यां मुख्यम् १० प्रस्तुतः प्रकर्षेणालंकृतः औपवाह्यो राजवाह्यः

अत एव मिथ्यामप्याह रामहर्षयति रामाभिषेक हर्षेत्यर्थः ६२ ६३ ६४ कल्याणं महोत्सवम् ६५ निर्गमनकाले पुनस्त्वरितमानयेति तया कैकेय्या प्रेरितश्चिंतयामास किमित्येषाम् पुनस्त्वरयतीति चिंता ६६ व्यक्तं रामाभिषेकार्थमेव एषा त्वरयति इह धर्मभाक् धर्मपरायणा प्रस्थति प्राप्नोति प्रयासबाहुल्येन प्रायो वहिर्नागमिष्यतीति मतिं कृत्वेत्यन्वयः ६७

तो निद्रायाव शमागतः ६२ तद्गच्छ त्वरितं सूत राजपुत्रं यशस्विनम् राममानय भद्रं ते नात्र कार्या विचारणा ६३ स श्रुत्वा राजवचनं कथं गच्छामि भामिनि तच्छ्रुत्वा मंत्रिणो वाक्यं राजा मंत्रिणमब्रवीत् ६४ सुमंत्र रामं द्रक्ष्यामि शीघ्रमानय सुंदरम् स मन्यमानः कल्याणं हृदयेन ननंद च ६५ निर्जगाम च संप्रीत्या त्वरितो राजशासनात् सुमंत्रश्चिंतयामास त्वरितं चोदितस्तया ६६ व्यक्तं रामाभिषेकार्थमिहायस्यति धर्मभाक् इति सूतो मतिं कृत्वा हर्षेण महता वृतः ६७ निर्जगाम महातेजा राघवस्य दिदृक्षया सागरह्रदसंकाशात्सुमंत्रोंतःपुराच्छुभात् ६८ ततः पुरस्तात्सहसा विनिःसृतो महीपतेर्द्वारगतान्विलोकयन् ददर्श पौरान्विविधान्महाजनानुपस्थितान्द्वारमुपेत्य विष्ठितान् ६९ ॥ इत्यार्षे रामायणे अयोध्याकांडे चतुर्दशः सर्गः ॥ १४ ॥ ते तु तां रजनीमुष्य ब्राह्मणा वेदपारगाः ॥ उपतस्थुरुपस्थानं सह राजपुरोहिताः ॥ १ ॥ अमात्या बलमुख्याश्च मुख्या ये निगमस्य च राघवस्याभिषेकार्थे प्रीयमाणाः सुसंगताः २ उदिते विमले सूर्ये पुष्ये चाभ्यागतेहनि लग्ने कर्कटके प्राप्ते जन्म रा

पुरांतर्वर्तित्वात् ततः पुरस्तात् सागरतर्वर्ति हृदतुल्यत्वं ६८ ततः निर्गमनोत्तरं महीपतेर्द्वारगतानधिकारिणो विलोकयन् पौरान्महाजनान् पुरस्ताद्ददर्श ६९ इति चतुर्दशः सर्गः १४ अथ राजाज्ञया प्राप्ताः द्वारि मिलितानां जनानां परस्परं संभाषणप्रकारमाह तेत्विति रजनीमुष्य पर्युष्य तो वृद्धकोविदैः तेन त्रयोदशाहः जन्मकालिक ग्रहसंदर्भेणोपस्थानं राजद्वारे प्रविश्य रोल्लु ॥ १ निगमस्य वणिजां मुख्याः २

[Margin, vertical:] पुष्ये चाभ्यागतेहनि ... रमे २ ... (marginal note, partly illegible)

कृतानि कौतुके अभिषेकोत्सवे मंगलानि विचित्रवस्त्राभरणधारणादिरूपाणि येन सः अत एव वपुषा विराजमानस्त्वं मेरोर्दिवाकर इव तिष्ठोत्तिष्ठ ५१ ५२
सर्वानंदकरराममाभिषेकमहोत्सवोपयुक्तत्वाद्रात्रिः स्तूयते गता भगवतीति ५३ कर्तव्यं यदासन्नं तत्सर्वं कृतमित्याह उदतिष्ठतेति उपस्थितं संपन्नमभूदित्यर्थः
अभिषेचनं अभिषेकोपकरणं नैगमैः वणिग्जनैः ५४ ५५ यत्र देशे राजा न भवेन्न दृश्यते तत्र देश एवं भविता राष्ट्रं अतः शीघ्रं संनिधेहीति भावः ५६

उत्तिष्ठ सुमहाराज कृतकौतुकमंगलः विराजमानो वपुषा मेरोरिव दिवाकरः ५१ सोमसूर्यौ च काकु
त्स्थ शिववैश्रवणावपि वरुणश्चाग्निरिंद्रश्च विजयं प्रदिशंतु ते ५२ गता भगवती रात्रिरहः शिव
मुपस्थितम् प्रतिबुध्यस्व राजर्षे कृत्यमहदुपस्थितम् ५३ उदतिष्ठत रामस्य समग्रमभिषे
चनम् पौरजानपदश्चापि नैगमश्च कृतांजलिः ५४ स्वयं वशिष्ठो भगवान्ब्राह्मणैः सह तिष्ठति

ज क्षिप्रमाज्ञाप्यतां राजन्राघवस्याभिषेचनम् ५५ यथा ह्यपालाः पशवो यथा सेना ह्यना ना
यकाः यथा चंद्रं विना रात्रिर्यथा गावो विना वृषम् एवं हि भविता राष्ट्रं यत्र राजा न दृश्यते ५६
एवं तस्य वचः श्रुत्वा सान्त्वपूर्वमिवार्थवत् अभ्यकीर्यत शोकेन भूय एव महीपतिः ५७ त
तस्तु राजा तं सूतं सन्नहर्षः सुतं प्रति शोकरक्तेक्षणः श्रीमानुद्वीक्ष्योवाच धार्मिकः ५८ वाक्यै
स्तु खलु मर्माणि मम भूयो निकृंतसि ५९ सुमंत्रः करुणां श्रुत्वा दृष्ट्वा दीनं च पार्थिवम् प्र
गृहीतांजलिः किंचित्तस्माद्देशादपाक्रमत् ६० यदा वक्तुं स्वयं दैन्यान्न शशाक महीपतिः तदा
सुमंत्रं मंत्रज्ञा कैकेयी प्रत्युवाच ह ६१ सुमंत्र राजा रजनीं रामहर्षसमुत्सुकः प्रजागरपरिश्रां

एवं सान्त्वपूर्वं विनयोपेतं अर्थवद्दिवसाधिकमेव इवशब्द एवार्थे तस्य वचः श्रुत्वा महीपतिर्भूय एव शोकेनाभ्यकीर्यत व्याप्तोऽभवत् ५७ ततो राजा तं प्रतिराम
विषयस्नेहहर्षेण नष्टहर्षः शोकरक्तेक्षणः शोकजरोदनेन रक्ते ईक्षणे यस्य सः सुमंत्रमुद्वीक्ष्योवाच ५८ हे सुमंत्र ये मर्माणि कृंतसि के ये क्रूरवाक्यैः कृतानि मर्माणि पुनरपि कृंतसि वा
क्यैर्निकृंतसि अनुचितकाले प्रबुध्यमानत्वादिति भावः ५९ अपाक्रमत् भीतस्तिर इति शेषः ६० दैन्यात् तत्सपादं वेधनजातं मंत्रज्ञा स्वकीयवक्तव्यविचारज्ञा ६१

प्रीयमाणाः प्रीतियुक्ताः पार्थिवैः सह तिष्ठंति ४१ समुदिते मुहूर्त्ते गोरो रिति शेषः यथा रामो राज्यमाप्नुयात्तथा राजानं त्वरयस्वेति संबंधः ४२ ४३ पूर्वोदितं प्रवेशसदा न निवार णीय इति राज्ञा पूर्वमेवोक्तं एवमाज्ञातायां हेतुर्वृद्धमिति ४४ तां अवस्थां अजज्ञिवान् न ज्ञातवान् अतो वाग्भिरित्यादि परमतुष्टाभिः परितोषहेतुभिः ४५ यथाकालं

 वैवादित्रसंघाश्च वेश्याश्चालंकृतास्त्रियः आचार्या ब्राह्मणा गावः पुण्याश्च मृगपक्षिणः पौ-
रजानपदश्रेष्ठा नैगमाश्च गणैः सह ४० एते चान्ये च बहवः प्रियमाणाः प्रियंवदाः अ-
भिषेकाय रामस्य सह तिष्ठंति पार्थिवैः ४१ त्वरयस्व महाराज यथा समुदितेहनि पुष्ये नक्ष-
त्रयोगे च रामो राज्यमवाप्नुयात् ४२ इति तस्य वचः श्रुत्वा सूतपुत्रो महात्मनः स्तुवन्नृपतिशार्दू-
लं प्रविवेश निवेशनम् ४३ तं तु पूर्वोदितं वृद्धं द्वारस्था राजसंमताः न शेकुरभिसंरोद्धुं राज्ञः प्रि-
यचिकीर्षवः ४४ स समीपस्थितो राज्ञस्तामवस्थामजज्ञिवान् वाग्भिः परमतुष्टाभिरभिष्टो-
तुं प्रचक्रमे ४५ ततः सूतो यथाकालं पार्थिवस्य निवेशने सुमंत्रः प्रांजलिर्भूत्वा तुष्टाव जगती-
पतिम् ४६ यथानंदति तेजस्वी सागरो भास्करोदये प्रीतः प्रीतेन मनसा तथानंदय नस्ततः ४७
इंद्रमस्यां तु वेलायामभितुष्टाव मातलिः सोजयद्दानवान्सर्वांस्तथा त्वां बोधयाम्यहम् ४८ वे-
दाः सहांगा विद्याश्च यथा ह्यात्मभुवं प्रभुम् ब्रह्माणं बोधयंत्यद्य तथा त्वां बोधयाम्यहम् ४९
आदित्यः सह चंद्रेण यथा भूतधरां शुभाम् बोधयत्यद्य पृथिवीं तथा त्वां बोधयाम्यहम् ५०

प्रभातकालोर्हम् ४६ भास्करोदये तत्काले प्रवृद्धूर्मिप्रतिफलितरवितेजसा तेजस्वी सागरो यथा ल्लातु कामानंद तिनंदयति तथा नो अस्मान प्रीतो अस्मद्विषयके प्रीत्या अयं सन्नंदयमाः करोतीति व्युत्पत्त्या भाकरश्च दृष्ट्वा दृष्टेः सागरो यथेति वा ४७ इंद्रमिति अस्यां वेलायां उदयवेलायां तथा तुष्टया चोत्साहयुक्तः सन् सोजयत् तथा रिपुजयफलकं बोधनं ते करोमीत्यर्थः ३८ अंगैः सहिता वेदा विद्याश्चमीमांसादयः यथा ब्रह्माणं स्वष्टो बोधयंति एवं त्वां बोधयामि वेदेष्वप्येवमुक्तं

समुत्सुकं समुत्सुकजनां २८ । २९ । ३० । ३१ विनिःक्रांतं अंतःपुरात् द्वारे अंतःपुरद्वारे ३२ । वशिष्ठः सूतपुत्रमुवाच किमुवाचेत्याह क्षिप्रमित्यादि ३३ । कांचनाः सौवर्णाः
गंगोदकपूर्णाः घटाः सागरेभ्यश्च तज्जलपूर्णा घटा आहृता इति शेषः ३४

महोत्सवसमाकीर्णां राघवार्थे समुत्सुकम् ॥ चंदनागरुधूपैश्च सर्वतः परिधूपिताम् ॥ २८ ॥ तां पुरीं स
मतिक्रम्य पुरंदरपुरोपमाम् ॥ ददर्शांतःपुरं श्रीमान्नानाद्विजगणायुतम् ॥ २९ ॥ पौरजानपदाकी
र्णं ब्राह्मणैरुपशोभितम् ॥ यज्ञविद्भिः सुसंपूर्णं सदस्यैः परमार्चितैः ॥ ३० ॥ तदंतःपुरमासाद्य व्यति।
चक्राम तं जनं वशिष्ठः परमप्रीतः परमर्षिभिरावृतः ॥ ३१ ॥ स त्वपश्यद्विनिष्क्रांतं सुमंत्रं नाम सा
रथिम् ॥ द्वारे मनुजसिंहस्य सचिवं प्रियदर्शनम् ॥ ३२ ॥ तमुवाच महातेजाः सूतपुत्रं विशारदम्
वशिष्ठः क्षिप्रमाचक्ष्व नृपतेर्मामिहागतम् ॥ ३३ ॥ इमे गंगोदकघटाः सागरेभ्यश्च कांचनाः ॥ ३
४ ॥ औदुंबरं भद्रपीठमभिषेकार्थमाहृतम् ॥ सर्वबीजानि गंधाश्च रत्नानि विविधानि च ॥ ३५ ॥ क्षौ
द्रं दधि घृतं लाजा दर्भाः सुमनसः पयः ॥ अष्टौ च कन्या रुचिरा मत्तश्च वरवारणः ॥ ३६ ॥ चतुरश्वो रथः श्रीमान्निस्त्रिंशो धनुरुत्तमम् ॥ वाहनं नरसंयुक्तं छत्रं च शशिसंनिभम् ॥ ३७
श्वेते च वालव्यजने भृंगारश्च हिरण्मयम् ॥ हेमदामपिनद्धश्च ककुद्मान्पांडुरो वृषः ॥ ३८ ॥
केसरी च चतुर्दंष्ट्रो हरिश्रेष्ठो महाबलः ॥ सिंहासनं व्याघ्रतनुः समिद्धश्च हुताशनः ॥ ३९ ॥ स

३५ क्षौद्रं मधु सुमनसः पुष्पाणि ३६ निस्त्रिंशः खड्गः नरसंयुक्तं वाहनं शिबिका ३७ भृंगारं धातूरकुंभ मस्तकस्पर्शं हिरण्मयपात्रं ३८ हरिश्रेष्ठः सिंहः तमः
व्याघ्रतनुः व्याघ्रचर्म ३९ नैगमा वणिजः गणिकाः स्वगणाः ४०

नुन्नः व्यथितः प्रतोदेन तोत्रेण ताडिताश्वो नोदितो हयोत्तमः यथा ऽश्वारोहाधीनस्तत्पातदाक्यप्रेरितो राजा तदधीनो भूत्वा ऽहेत्यर्थः २३
तदाह धर्मेति धर्मबंधेन धर्मपाशेन एवं च मम अचेतनत्वात्त्वमेवं स्वामी ष्टं यथा सिध्यति तथा कुरु अहं न किमपि वक्ष्यामी

सनुन्नइवतीक्ष्णेनप्रतोदेनहयोत्तमः राजाप्रचोदितोभीक्ष्णंकैकेयीमिदमब्रवी
त् २३ धर्मबंधेनबद्धोस्मिनष्टाचममचेतना ज्येष्ठंपुत्रंप्रियंरामंद्रष्टुमिच्छामिधार्मि
कम् २४ ततःप्रभातांरजनीमुदितेचदिवाकरे पुण्येनक्षत्रयोगेचमुहूर्तेचसमागते २५
वसिष्ठोगुणसंपन्नःशिष्यैःपरिवृतस्तदा उपगृह्याशुसंभारान्प्रविवेशपुरोत्तमम् २६
सिक्तसंमार्जितपथांपताकोत्तमभूषिताम् संहृष्टमनुजोपेतांसमृद्धविपणापणाम् २७

तिभावः सर्वथा चेतनानाशात्प्राक् रामं द्रष्टुमिच्छामि एतावदेव मदिष्टं कुर्विति भावः २४ प्रभातां रजनीं व्युष्टां रव्या
कृतस्नानादिनित्यक्रियः इति शेषः २५ संभारान् कुशादीन् २६ सिक्ताः संमार्जिताः पंथाः पथ्यो यस्यां समृद्धा विपणाः क्रेयपदा
र्थाः येषु ते तादृशा आपणा यस्यां ताम् २७

ननु किमनेनात्मवधव्यवसायेन पुत्रादप्यात्मनः प्रियत्वादित्यत आह न शक्नोमीति। पूर्वं रामाभिषेकप्रारंभवेलायां तथा सुखं तं ता
दृशसुखयुक्तं जनं दृष्ट्वा इदानीं हतहर्षं निरानंदमवाङ्मुखं जनं पुनर्द्रष्टुं न शक्नोमि। १८। तां कैकेयीं प्रत्यानिरंतरराम

न शक्नोद्यस्म्यहं दृष्टुं दृष्ट्वा पूर्वं तथा सुखम्। हतहर्षं निरानंदं पुनर्जनमवाङ्मुखम्॥ १८
तं तथा ब्रुवतस्तस्य भूमिपस्य महात्मनः॥ प्रभाता शर्वरी उयया चंद्रनक्षत्रमालिनी॥ १९
ततः पापसमाचारा वै कैकेयी पार्थिवं पुनः॥ उवाच परुषं वाक्यं वाक्यज्ञा रोषमूर्छिता॥ २०
किमिदं भाषसे राजन्वाक्यं गररुजोपमम्॥ आनाययितुमक्लिष्टं पुत्रं राममिहार्हसि॥ २१
स्थाप्य राज्ये मम सुतं कृत्वा रामं वनेचरम्॥ निःसपत्नीं च मां कृत्वा कृतकृत्यो भविष्यसि॥
॥ २२॥

चिंतासमेतत्वात् प्रभाता प्रभातकालावच्छिन्ना जातेत्यर्थः। १९। रोषमूर्छिता क्रोधेन व्याप्ता। २०। गररुजोपमं विषज
नितव्याधिसदृशं किमिदं भाषसे व्यर्थमेवेति भावः। २१॥ २१॥ २१॥

किंच रामाभिषेको मया श्राक्यनिवारणाः स्याहस्रपातेत्यादि सूर्यस्योदयनं प्रति सूर्योदयं प्रतिलभ्याभिषेकं कर्तुमिति शेषः गुरु जनो मां त्वरयिष्यति अतो गुरुजनानुरोधेन मम रामः कृताभिषेकः कारयितव्यः त्वं तु त्याज्येति भावः २५ ननु मयि जीवत्यां

प्रभातां रजनीं देवी सूर्यस्योदयनं प्रति अभिषेकं गुरुजनस्त्वरयिष्यति मां ध्रुवम् २५
रामाभिषेकसंभारैस्तदर्थमुपकल्पितैः रामः कारयितव्यो मे मृतस्य सलिलक्रियाम् १६
सपुत्रया त्वया नैव कर्तव्या सलिलक्रिया व्याहतास्य शुभाचारे यदि रामाभिषेचनम् १७

कथं रामाभिषेको भविष्यति तत्राह राम इति श्लोकद्वयेन यदि गुरुजनप्रवर्तनाय रामाभिषेचनं व्याहतास्ति तर्हि घातं करिष्य सि तदा रामाभिषेकार्थं कल्पितै रामाभिषेकसंभारैर्मृतस्य मे सलिलक्रियां रामः कारयितव्यः वसिष्ठेनेति शेषः क्रोधादाहसप त्नयेति १६ १७

धर्माभिजनवान् धर्मयुक्तवंशवान् ।१६। बाहू विक्षिप्य भूमौ बाहू इति ।१७। शोकेन संवीतः व्याप्तचित्तः पितुर्मरणाच्च वशो न संजातदुः
खः भ्रान्त्या भ्रान्तवशिता आकुलिता विक्षिप्ता चेतना यस्य सः ।१८। विलापं दर्शयति एतदिति पुरा भाति स्म ।१९। अपशुष्कः शोषः

ते श्रुत्वा भरतो वाक्यं धर्माभिजनवान् ऋजुः। पपात सहसा भूमौ पितृशोकबलार्दितः ॥१६॥
हा हतोऽस्मीति कृपणां दीनां वाचमुदीरयन् ॥ निपपात महाबाहुर्बाहू विक्षिप्य वीर्यवान् ॥१७॥
ततः शोकेन संवीतः पितुर्मरणदुःखितः ॥ विललाप महातेजा भ्रान्ताकुलितचेतनः ॥१८॥
एतत्सुरुचिरं भाति पितुर्मे शयनं पुरा ॥ शशिनेवामलं रात्रौ गगनं तोयदात्यये ॥१९॥ तदिदं
न विभात्यद्य विहीनं तेन धीमता ॥ व्योमेव शशिना हीनमपशुष्क इव सागरः ॥२०॥ बाष्पमु
त्सृज्य कण्ठेन स्वार्तः परमपीडितः ॥ प्रच्छाद्य वदनं श्रीमद्वस्त्रेण जयतां वरः ॥२१॥ तमार्तं देवसं
काशं समीक्ष्य पतितं भुवि ॥ निकृत्तमिव सालस्य स्कन्धं परशुना वने ॥२२॥२२॥२२॥२२॥

अपशुष्कः अस्मिन्काले अग्निनाशः ।२०। श्रीमद्वदनं वस्त्रेण छादयित्वा कण्ठेन कण्ठस्वरेण सह बाष्पं नेत्रजलमुत्सृज्य भूमौ पतित्वा विपेति शेषः ।२१। सालस्य सालवृक्षस्य स्कन्धं शाखां ।२२।

तत्या

रा० वा० ग्र० तेउभेदेव्यौ प्रम्लासादिना सुप्ते दृष्ट्वा नृपं च तं सुप्तमेव संतं तद्वत्स्थापामेवोद्गतप्राणोल्लन्नत्तातो दृष्ट्वा तं वै मेचौतः पुरमदृश्यत
२४९

तेच दृष्ट्वा तदा सुप्तं उभे देव्यौ च तं नृपम् सुप्तमेवोद्गतप्राणमन्तःपुरमदृश्यत २० ततः प्रचुक्रुशुर्दीनाः सस्वरं ता वराङ्गनाः करेणव इवारण्ये स्थानप्रच्युतयूथपाः २१ तासामाक्रन्दशब्देन सहसोद्गतचेतने कौशल्या च सुमित्रा च त्यक्तनिद्रे बभूवतुः २२ कौशल्या च सुमित्रा च दृष्ट्वा स्पृष्ट्वा च पार्थिवम् हा नाथेति परिक्रुश्य पेततुर्धरणीतले २३ सा कोसलेन्द्रदुहिता चेष्टमाना महीतले न बभ्राज रजोध्वस्ता तारेव गगनाच्च्युता २४ नृपे शान्तगुणे जाते कौशल्यां पतितां भुवि अपश्यंस्ताः स्त्रियः सर्वा हतां नागवधूमिव २५ ततः सर्वा नरेन्द्रस्य कैकेयीप्रमुखाः स्त्रियः रुदन्त्यः शोकसन्तप्ता निपेतुर्गतचेतना २६

प्राणोतत्कत्वमदृश्यत २० स्थानात् वासस्थानात् प्रच्युतो यूथपो महागजो यासां ताः करेणव इव चुक्रुशुरित्यन्वयः २१ २२
हा भर्तेति हा भर्तरि स्पर्शः २३ शान्तगुणो उपशान्तजीवनधर्मे २५ २६
२४

पापंप्रससपार्श्वेउन्मोक्तुं विमोचयितुं वलिरिंद्रकृतंदंद्रधरितोयेंद्रकृतंपदत्रयमितंदेशप्रापतिस्म वरूपं पापाप्राम् ॥११॥ सद
प्रारयः युगचक्रयोरंतरंमध्यप्राप्यपरिस्पंदन्तिर्यक्चेष्टा। मानो धुर्यःखवउद्भ्रांतदृढयोविवर्णोवदनश्चाभवत् १२

॥ एवंप्रचोदितोराजाकैकेय्यानिर्विशंकया ॥ नापशक्त्वाप्रमुन्मोक्तुंवलिरिंद्रकृतंयथा ॥
॥११॥ उद्भ्रांतइंद्रयश्चापिविवर्णोवदनोऽभवत् ॥ सधुर्योवैपरिस्पंदन्युगचक्रांतरंयथा ॥१२॥
विह्वलाभ्यांचनेत्राभ्यामपश्यन्निवभूमिपः ॥ कृच्छ्राद्धैर्येणसंस्तभ्यकैकेयीमिदमब्रवी
त् ॥१३॥ यस्तेमंत्रकृतःपाणिरग्नौपापेमयाधृतः ॥ तंत्यजामिस्वजंचैवतवपुत्रंसहत्वया ॥ १४

संस्तभ्यविह्वलत्वंचित्तमितिशेषः ॥१३॥ हेदुष्टपापेःस्वजायायास्त्यागएवधर्मइतिमत्वाहयस्तइतिमंत्रकृतःगृभ्णामी
तिमंत्रेणासंस्कृतःसंत्यजामितस्यपुत्रंच्यवहारंत्यजामिस्वजंस्वस्माज्जातमपितवपुत्रंत्वयासहसंत्यजामि ॥१४

अ० ७०

सत्यस्य ब्रह्मणः प्रणवरूपैकपदवाच्यत्वाद्वाच्यवाचकयोरभेदात् प्रणवरूपं ब्रह्म तत्सत्यवाचकमेव सत्ये धर्मः प्रतिष्ठितः सत्यमेव धर्मस्य परा काष्ठेत्यर्थः अप्सु प्रावेदा इव सत्यमेव प्राधान्येन प्रतिपादयंतीत्यर्थः सत्येनैव परं

सत्यमेकपदं ब्रह्म सत्ये धर्मः प्रतिष्ठितः सत्यमेवाक्षया वेदाः सत्येनावाप्यते परम् ७
सत्यं समनुवर्त्तस्व यदि धर्मे धृता मतिः सवरः सफलो भीमस्तु वरदो ह्यसि सत्तम ८
धर्मस्थो याभिकामार्थं मम चैवाभिचोदनात् प्रव्राजय सुतं रामं त्रिः खलु त्वां ब्रवीम्यहम् ९
समये च ममार्यैमया दिदं त्वं न करिष्यसि अनन्ततस्ते परित्यक्ता परित्यक्ष्यामि जीवितम् १०

पदं ब्रह्मस्वरूपं प्राप्यते चित्तशुद्धिद्वारेति शेषः ७ तस्मात्सत्यमिति ८ धर्मस्य परलोकसिद्धिप्रयोजकस्य अभिकामार्थं पालनार्थं ममाभिचोदनात् प्रेरणाच्च खलु सुतं रामं प्रव्राजय एवं त्वां त्रिर्ब्रवीमि अप्रतीकाराहमस्मादन्याहमात्मन्नि वर्तितुं शक्नोतीति भावः ९ विपक्षे त्वीव धदोषमाधिकस्तेनैव अस्याह समयं वेति समयं रामविवासनं परित्यक्तानि रा० म० ६७०
एकता १०

इदमेव युक्तमिति दर्शयति प्राहुरिति सत्यं सत्यरूपं धर्ममाश्रितास्मि इति त्वया त्वं च त्वं तु मया प्रचोदितः वरदानविषये प्रेरितः तव सत्यं रक्षितुं मे मामेव प्रेरणोत्सर्पिः ३। ननु सत्यपरिपालने प्राणासंप्रायो जायत इत्याशंक्य प्राणादपि सत्यस्य

प्राहुः सत्यं हि परमं धर्मं धर्मविदो जनाः॥ सत्यमाश्रित्य हि मया त्वं च धर्मे प्रचोदितः॥३॥
संश्रुत्य शैब्यः श्येनाय स्वां तनुं जगतीपतिः॥ प्रदाय पक्षिणो राजञ्जगाम गतिमुत्तमाम्॥४
तथा ह्यलर्कस्तेजस्वी ब्राह्मणे वेदपारगे॥ याचमानः स्वके नेत्रे उद्धृत्याविमना ददौ॥५॥ सरितां तु पतिः स्वल्पां मर्यादां सत्यमन्वितः॥ सत्यानुरोधात्समये वेलां स्वां नातिवर्तते॥६॥

मेव रक्षणीयमिति सदृष्टान्तमाह संश्रुत्येत्यादि श्लोकद्वयेन ४ ५॥ सरितांपतिः सत्यमन्वितः सत्येन युक्तः सन् सत्यानुरोधात् स्वकृतसत्योच्छेदनभयात् स्वल्पामल्पां मर्यादां स्वावधिभूतां स्वां वेलां समये वृद्धिकालेऽपि नातिवर्तते ६॥

प्रतिबोधनं मंगलगीतादिकं निवारयामास दुःखवशादिति शेषः २६ इति त्रयोदशः सर्गः ॥ १३ ॥ अथ पापमविज्ञाय तन्निर्धारणं दृष्टीयतिपुत्रेत्यादिना पापाकैकेयीं विचेष्टमानं मरणकाल इव विकृतं उपेत्य सम्यक् दृष्ट्वापीत्सर्थः १ म

स

इतीव राज्ञो व्यथितस्य सा निशा जगाम घोरं श्वसतो मनस्विनः । विबोध्यमानाः प्रतिबोधनं तदा निवारयामास स राजसत्तमः २६ इत्यार्षे रामायणे अयोध्याकांडे त्रयोदशः सर्गः ॥ १३ ॥ पुत्रशोकार्दितं पापा विसंज्ञं पतितं भुवि विचेष्टमानमुत्प्रेक्ष्य ऐक्ष्वाकमिदमब्रवीत् १ पापं कृत्वेव किमिदं मम संश्रुत्य संश्रवम् शेषे क्षितितले सन्नः स्थित्यां स्थातुं त्वमर्हसि २ सीता॥ सीतारामाभ्यां नमः ॥॥

मसंश्रवं वरदानप्रतिज्ञां संश्रुत्य अङ्गीकृत्य तदकरणरूपं पापं कृत्वा वसन्नो विषण्णः सन् शेषे किमिदं न किमपि न किं प्रयोजनं अतः स्थित्यां सत्यपरिपालनमर्यादायां स्थातुं त्वमर्हसि न तु न्योये २ सीताराम सीताराम सीताराम ॥

त्वदंतलभतां त्वयावरवशाद्दुहितमेव राज्यं मत्वा प्रीत्स्पर्धाः एमायदेहोतस्यधीः ॥२२॥ गुरूणां वशिष्ठादीनां गुर्वी मातारापि साक्षा द

मि ॥२३॥ तामेव क्षणात्स्य दुःखोति शयेनेति शेषः स्मृत्वा कलस्याप्रस्नुपूर्णास्य । विचित्रे प्रमादनभर्त्सनसहितत्वात्तदुक्तैः प्राक्

प्रसीद देवि रामोपि

प्रसीद देवि रामोपि त्वद्दत्तं राज्यमव्ययम् ॥ लभतां मम हितापांगे पुत्रः प्रस्नवात्स्यति ॥२२॥ मम एतस्य लो
कस्य गुरूणां भरतस्य च । प्रियमेतद्गुरु श्रोणि कुरु चारुमुखे शुभे ॥२४॥ विशुद्धभावस्य हि दुष्टभावा
। तामेव क्षणात्स्या स्मृ कलस्य राज्ञः ॥ श्रुत्वा विचित्रं करुणं विलापं भर्तुर्नृशंसा न चकार वाक्यं
॥२५॥ ततः स राजा पुनरेव मूर्च्छितः ॥ प्रियाममतुष्टां प्रतिकूलभाषिणीं समीक्ष्य पुत्रस्य विवासने प्रतिक्षितौ
विसंज्ञो निपपात दुःखितः ॥२५॥

सदा प्रियां अप्रतुष्टां एवंविधविनयवाक्येनापि संतोषमप्राप्तां विवासने प्रतिप्राच्यमानं वरं समीक्ष्य दुःखितः चिरपरिचि
तप्रेमत्वात्तां धिक्कर्तुमशक्नुवन् प्रियतमं पुत्रं च सन्तुमशक्नुवन् कर्तव्यमूढतया दुःखितो मूर्च्छितः क्षितौ पपात २५ २५

 आर्तवत् रोगपीडितवत् १६ नेच्छामि प्रभाते सति रामविवासनं भविष्यतीति भयादिति भावः १६ निर्घृणां निर्दयां प्र
स्तुतं नृशंसां क्रूराम् १८ १९ त्वद्गतस्य त्वय्यासक्तस्य गतायुषः अल्पावशिष्टायुषः २०

तथैवोष्णं विनिश्वस्य वृद्धो दशरथो नृपः विललापार्तवद्दुःखं गगनासक्तलोचनः १६।
न प्रभातं त्वयेच्छामि निशे नक्षत्रभूषिते क्रियतां मे दया भद्रे मयायं रचितोंऽजलिः १७ अथवा
गम्यतां शीघ्रं नाहमिच्छामि निर्घृणाम् नृशंसां कैकेयीं द्रष्टुं यत्कृते व्यसनं महत् १८ ए।
वमुक्त्वा ततो राजा कैकेयीं संयतांजलिः प्रसादयामास पुनः कैकेयीं चेदमब्रवीत् १९ साधुवृ
त्तस्य दीनस्य त्वद्गतस्य गतायुषः प्रसादः क्रियतां मह्यं देवि राज्ञो विशेषतः २० शून्येन खलु सु
श्रोणि मयेदं समुदाहृतम् कुरु साधु प्रसादं मे बाले सहृदया ह्यसि २१

शून्येति जनप्रदेशे इदं रामाभिषेचनं न समुदाहृतं खलु किंतु राजसभायामुदाहृतं अतः प्रसादं कुरु सभ्योपहासो यथा
न भवेत्तथेत्यर्थः २१

प्रेषयिष्यामि प्रस्थापयिष्यामि ।१०। दुःखैरिति षष्ठ्यर्थे तृतीया दुःखं वनवासगमनरूपं दुःखसाधनम् ।११। संक्रम
णं लोकांतरगमनम् ।१२। मम प्रियेरामे विप्रियेण दंडकारण्यगमनेन किं किमर्थं प्रयोजयसे ।१३। एवं कीर्तिःस्त्री जित

कथमिंदीवरश्यामं दीर्घबाहुं महाबलम् । एवमिराममहं रामं प्रेषयिष्यामि दंडकान् ॥१०॥ सुखानामु
चितस्यैव दुःखैरनुचितस्य च । दुःखेनामानुपश्ये ऽहं कथं रामस्य धीमतः ॥११॥ यदि दुःखमकृत्वा
तु मम संक्रमणं भवेत् । एवं दुःखोर्हस्य रामस्य ततः सुखमवाप्नुयाम् ॥१२॥ नृशंसे पापसंकल्पे रामं सत्य
पराक्रमम् । किं विप्रियेण कैकेयि प्रियं प्रयोजयसे मम ॥१३॥ एवं कीर्तिरतुला लोके ध्रुवः परिभवश्च मे ।
तथा विलपतस्तस्य परिभ्रमितचेतसः । एवं स्तमभ्यागतः सूर्यो रजनी चाभ्यवर्तत ॥१४॥ सा त्रियामा तथा
र्तस्य चंद्रमंडलमंडिता । रामं विलपमानस्य न व्यभासत शर्वरी ॥१५॥५॥१५॥१५॥ सीतारामाभ्यां नमः

इति परिभवश्चानादरश्च भविष्यति ।१४। न व्यभासत तत्प्रकाशेन सुखदा ऽभूत् विलापेनैव रात्रिकालो व्यतीत
इति भावः ।१५॥

रामप्रवासदुःखेन मृत्वा स्वर्गं गतस्यापि मम सुखं नास्तीत्याह स्वर्गोपीति स्वर्गोपि रामस्य कुशलं प्रति दैवतैः प्रत्यादेशा
दभिहितं धिक्कारपूर्वकं हे मूढ त्वं हि तेनोः कथं गुणावस्य त्वत्रे त्यक्त्वानसीति कथितं वाक्यं कथं वत्त धारयिष्ये इहत्स्म

स्वर्गोपि खलु रामस्य कुशलं दैवतैरहम् प्रत्यादेशादभिहितं धारयिष्ये कथं वत ६ केकेय्याः प्रि
यकामेन रामः प्रव्राजितो वनम् यदि सत्यं ब्रवीम्येतत्तदसत्यं भविष्यति १ अपुत्रेण मया पुत्रः श्र
मेण महता महान् रामो लब्धो महाबाहुः स कथं सत्यज्यते मया ८ शूरश्च कृतविद्यश्च जितक्रोधः
क्षमापरः कथं कमलपत्राक्षो मया रामो विवास्यते १०

स्य कुशले प्रतिषिध्यात त्रदेवैः प्रत्ययः कथं सह्यिष्य इत्यर्थः वत खेदे ६ ननु सत्यवशाद्रामः प्रव्राजित इत्युत्तरं ब्रूहि
त्यत्राह केकेय्या इति प्रियकामेन प्रियेणावरेण एतत्सत्यं यदि यद्यपि ब्रवीमि तत्त थापि तन्मे वाक्यम् असत्यं भवि
ष्यति ७ अत्र सत्यं मस्यं तीत्यर्थः कामकृतपापप्रव्राजित इत्येवं मस्यंत इत्याशयः ७ त्यज्यतेत्य क्ष्यते ८ १०

अथ यत्सत्यपाशावबद्धत्वेनन्नेति करिष्यामि वचसि इति दृढं वक्रं मत्वा न कुर्वन् पुनरपि प्रसादयति अतदर्हमिति तादृशाचलापानर्हमि
त्यर्थः अतथोचितमधःशयनानुचितं १ अनर्थरूपा कुत्सितेति शेषः असिद्धार्थाः प्रयोजनं यस्याः अभीता जनापवादा

अतदर्हं महाराजं शयानमतथोचितम् ॥ ययातिमिव पुण्यान्ते देवलोकात्परिच्युतम् ॥१॥ अनर्थरूपासिद्धा
र्था ह्यभीता भयदर्शिनी ॥ पुनराकारयामास तमेव वरमङ्गना ॥२॥ त्वं कत्थसे महाराज सत्यवादी दृढव्रतः म
म चेमं वरं कस्माद्विधारयितुमिच्छसि ॥३॥ एवमुक्तस्तु कैकेय्या राजा दशरथस्तदा ॥ प्रत्युवाच ततः क्रु।
द्धो मुहूर्तं विह्वलन्निव ॥४॥ मृते मयि गते रामे वनं मनुजपुङ्गवे ॥ हन्तानार्ये ममामित्रे सकामा सुखिता भव
५

त् भयदर्शिनी रामाद्भरतस्येति शेषः तमेव वरमद्विपराजानं पुनराकारयामास संबोधयामास । २ । तदेवाह त्वमि
ति । सत्यवादी दृढव्रत इति कत्थसे श्लाघसे विधारयितुं अन्यथात्वेनेति शेषः । ३ । ४ । ५ । सीतारामाभ्यां नमः सत ।

अत्यप्रियं वदन्तीं मिथ्याप्रियभाषिणीं प्रदुष्टभावां दुष्टान्तःकरणां मम तव क्रमनोरमां सबंधनं सप्राणां हृदयं दिधक्षमाणां त्वां जीवितुं न विषहे नोत्सहे तव नाशमेवाशंसे इत्यर्थः १११ देऽवाक्यमुक्त्वा पुनः समाहनेति पदेवमतो

दृढोपमानो नित्यमत्यप्रियं वदां प्रदुष्टभावां स्वकुलोपघातिनीम् न जीवितुं त्वां विषहेऽमनोरमां दिधक्षमाणां हृदयं सबंधनम् १११ न जीवितं मेऽस्ति कुतः पुनः सुखं विनात्मजेनात्मवतः कुतो रतिः ममाहितं देवि न कर्त्तुमर्हसि स्पृशामि पादावपि ते प्रसीद मे ११२ स भूमिपालो विलपन्ननाथवत् स्त्रिया गृहीतो हृदयेऽतिमात्रया पपात देव्याश्चरणौ प्रसारितावुभावसंस्पृश्य यथातुरस्तथा ॥११३॥ इत्यार्षे रामायणे वाल्मीकीये अयोध्याकांडे द्वादशः सर्गः सर्गः ॥१२॥

ममेत्यादि ११२ अतिमात्रया अतिक्रांतमर्यादया हृदये मर्मणि गृहीतः अनेन चित्तस्त्रीजनितवैवश्यं द्योतितं तदेवाह यथातुर इति आतुरो यथा किंचित्स्पृष्टुकामोऽस्पृष्ट्वैव मध्ये मूर्छया पततीति चेत्यर्थः ॥११३॥ इति द्वादशः सर्गः ॥१२॥

ततोवेप थु युक्ता ए ज्ञाः प्रारोभ प्रोकिताः सत्यः प्रतिस्रोत स्त्व गागत्रारांसि तोभिप्रवर्त्तमाना त्तु गागस्यारांसि दृष्ट्रासंच कात्रिरे चकंपे
पिरेदत्यर्थः १५ पोयंमरणांत स्यविनिश्चयोजज्ञेजातः १६ कालसमन्वितेमरत्ते २वन प्रवुध्यते १७ प्रोकेनसन्नाउपहतास

तावेपथुपरीताश्च राज्ञः प्रारोभ प्रोकिताः प्रतिस्रोतस्त गागस्यारांसि दृष्ट्रासंच काम्निरे १५
प्रप्रपसंदेहमानानांस्त्रीरणां दृष्ट्वा च पार्थिवम् यत्तदा प्रोकितंपापंतस्यजज्ञे विनिश्चयः
१६ कौशल्या च सुमित्रा च पुत्रप्रोकपराजिते प्रुमुष्टेन प्रबुध्येते यथा कालसमन्विते
१७ निष्प्रभा च विवर्णा च सन्ना प्रोकेनसन्नता न व्यराजत कौशल्या तारेव तिमिरा
वृता १८ कौशल्यानन्तरं राज्ञः सुमित्रा तदनंतरम् न स्म विभ्राजते देवी प्रोका प्रुलुलिता
ननी १९

त्तताक्षिव प्रातेकुचितहस्तपादादिकरणा १८ कौशल्येति अत्रसुप्तेतिपदमध्याहर्तव्यंराज्ञः अनंतरंसमीपेसुप्ता कौशल्यान
स्मविभ्राजतेतदनंतरंतस्याकौशल्याया अनंतरं समीपेसुप्तादेवीसुमित्रानस्मविभ्राजतेइतिसंबंधः तत्रहेतुः प्रोकेत्यादि १९

व्यसनप्रहारिणि वाङ्कुक रूपापदि पुत्रवियोगरूपप्रहारकारिणि प्रसह्यपतिपत्नीभावेतिरस्कृत्य क्रूरवाक्यं
भाषसेयतस्त्वतस्ते दर्शिनाः केननामहेतुना सहवधाविप्रोधीमात्तताः संतोनपततीतिनजानेऽतिशेषः॥ १०८
अप्रियवचोः कथनेहेतुर्नवेत्तीत्यादि अभिरामवादिनितमेदोषान जटाचीरधारणावनवासादीना।

नव्रूंसवक्त्रे व्यसनप्रहारिणि प्रसह्य वाक्यापदिहा द्यभाषसे॥ ननामत्तेकेनमुखात्पतं
त्यघोविप्रोधीमात्तादशानाःसहस्रधा॥ १०८॥ नकिंचिदाहाहितमप्रियंवचोनवेत्तिरा
मःपरुषाणिभाषितुम्॥ कथंनुरामोह्यभिरामवादिनिब्रवीषिदोषान्गुणनित्यसंमते॥ १०९
प्रताम्यवाप्रज्वलवाप्रणाशूपवासहस्रधा वास्फुटितामहींव्रज॥ नतेकरिष्यामिवचःसु
दारुणंममाहितंकेकयराजपांसनि॥ ११०॥

त्मदोषजनकान्कथंनुब्रवीषिगुरोर्नित्यंसर्वेषांसम्मते॥
१०९॥ प्रताम्यग्लायस्वप्रज्वलत्प्रग्निप्रवेशेन प्रणश्यविषेणाकुद्दालप्रहारैःसहस्रधावास्फुटितामहीं
व्रज अप्रियापितेवचोनकरिष्ये इतिसंबंधः॥ ११०॥११०॥

 कृपीत्यर्थः सूर्येण विनापि लोकस्य प्रवृत्तिर्व्यवहारः स्यात् वज्रधरेण अवर्षता पि वृत्तिर्लोकस्य जीवनं स्यात्
रामं तु विना न कस्यापि जीवनमिति मतिः मम जीवनं तु किमुत १०४ किं च त्वामामनोमत्कुमि वस्त्र
हे हम वासये किं च त्वं महाविषा सर्पी मया केन मोहात्त्वं नाम्नातानाद्भृतासि तेनो कथाररामाहेतु नाहं हतोस्मि

विना हि सूर्येण भवेत्प्रवृत्तिरवर्षता वज्रधरेण वापि रामं तु गच्छन्तमितः समीक्ष्य जीवेन्न कश्चित्त्विति चेतना मे १०५ विनाशकामामहितामभित्रामावासयं मत्कुमिवात्मनस्त्वामचिरं वताकेन च ताहि सर्पी महाविषा तेन हतोस्मि मोहात् १०६ मया च रामेण सत्वदूमा लोन प्रजात्तु हीनो भरतस्त्वया सह पुरं च राष्ट्रं च निहत्य बांधवान्ममाहितानां च भवाभिभाविता १०७

१०६ पुरं च राष्ट्रं चेयस्य प्रजाखिलं तेनेनसहाम्बधः त्वे च बांधवान्पति पुत्रादीन निहत्य ममाहितानां शत्रूणाम भिभावता प्रीत्याभव वार्तौ कर्तर्पा बांधनाभावादिति भावः अभिहर्षिता इति पाठे अहितानां अभिहर्षिती ममामित्रेषु त्वेह पुत्रा भवेयत्यर्थः १०७ रामाराम सीताभरामाभ्यां नमः सीतारामाभ्यां नमः राम०

अनेर्थस्वपरानर्थसाधनेभावोऽसि प्रायोऽयस्याः अर्थपरे स्वार्थसाधनपरे मदनुतापार्थे निविष्टः भावो दुष्टभा
वो यस्याः मन्निमित्तं मद्धेतुकं किमप्रियं अपकारे पश्यसि कृत्स्नजगद्धितकारिणि रामेवा १०२ रामं वन
वासरूपे व्यसने निमग्नं दृष्ट्वा कृत्स्नं जगत्त्वां प्रत्येव कुपितं स्यात् । १०३ । स्वस्य रामं विना जीवनव्यतिरेके दर्शि

अनर्थभावेर्थपरे नृशंसे ममानुतापाय निविष्टभावे ॥ किमप्रियं पश्यसि मन्निमित्तं
हितानुकारिण्यपि वापि रामे ॥ १०२ ॥ परित्यजेयुः पितरोऽपि पुत्रान्भार्याः पतीन्वा
पि कृतानुरागाः ॥ कृत्स्नं हि सर्वं कुपितं जगत्स्याद् दृष्ट्वैव रामं व्यसने निमग्नम् ॥ १०३
अहं पुनर्देवकुमाररूपमलंकृतं तं सुतमाव्रजंतम् ॥ नंदामि पश्यन्निव दर्शनेन भवा
मि दृष्ट्वेव पुनर्युवेव ॥ १०४ ॥

प्रियप्रत्ययतदन्वये स्वजीवनान्वयं दर्शयति । अहमिति आव्रजंतं मत्समीपे ।
आगच्छंतं मत्वा दर्शनेन चक्षुषा पश्यन्निव नंदामि दृष्ट्वेव दृष्ट्वा तु पुनः चिरवृद्धोऽपि पुनर्युवेव दुःखरूप
पातं बहिः परिकरोमि भवामि । १०४ ॥

रा०६४ कषायादि त्वयं रूपं वन्यमाहारं भक्षयन् कथं नु वर्तयिष्यति केन प्रकारेण जीविष्यति ९८ महार्हाणीति त्वाच्छादनवस्त्रेण संवीतः चिरकालं सुखोत्तरस्तोचितः कषायेण रक्तं काषायं परिधानवस्त्रं यस्य ते योक्तः ९९ रामस्यारण्यगमनं भरतस्याभिषेचनमित्येवं विधमचिंतितं एतद्दारुणं वाक्यं वाक्यं श्राव

सकथन्त्वकषायाणि तिक्तानि कटुकानि च भक्षयन्वन्यमाहारं सुतो मे वर्तयिष्यति ९८

महार्हवस्त्रसंवीतो भूत्वा चिरसुखोचितः काषायपरिधानस्तु कथं भूमौ निवत्स्यति ९९

कस्यैतद्दारुणं वाक्यमेवंविधमचिंतितम् रामस्यारण्यगमनं भरतस्याभिषेचनम् १००

धिगस्तु योषितो नाम शठाः स्वार्थपरायणाः न ब्रवीमि स्त्रियः सर्वा भरतस्यैव मातरम् १०१

तां कस्य कीदृग्विधदुष्कर्मिणः प्रलोभं एतत्कस्य क्रूरस्य वाक्यमनुपदेशः १०० कैकेयी दोषं त्वं दृष्ट्वा स्त्रीमात्रं निंदति धिगस्त्विति स्त्रियो निघ्नात्यर्थः पुनः स्वाभाविकविवेकेनाहनेति कौसल्यादीनां निंदा नहि स्यादिति भावः १०१

रामा०
६४

रामप्रव्रजनस्य भरतसंमतत्वे सम्मे पुत्र एव ने स्यात् प्राप्ते नाहं प्रियं चेदिति । १२ हंतेत्यर्द्धमित्रं वाक्यं ॥ १३ ॥ १४ ॥ त्वं राज
पुत्रीवादेन राजपुत्रीति व्यपदेशमात्रेण मम वेश्मनि न्यवसः मे लोके स्वकीर्तिः परोदात्तप्रख्याः परिभवो महाजन

प्रियं चेद्भरतस्यैतद्रामप्रव्राजनं भवेत् ॥ मास्म मे भरतः कार्षीत्प्रेतकृत्यं गतायुषः ॥ १२ ॥ हंतानार्ये
ममामित्रे सकामा भव केकयि ॥ १३ ॥ मृतं मयि गते रामे वनं पुरुषपुंगवे ॥ सेदानीं विधवा रा
ज्यं सपुत्रा कारयिष्यसि ॥ १४ ॥ त्वं राजपुत्रीवादेन न्यवसो मम वेश्मनि ॥ स्वकीर्तिस्त्वातुला लो
के ध्रुवः परिभवश्च मे ॥ सर्वभूतेषु चावज्ञा यथा पापकृतस्तथा ॥ १५ ॥ कथं रथैर्विभुर्याखा ग।
जाश्वैश्च मुहुर्मुहुः ॥ पद्भ्यां रामो महारण्ये वत्सो मे विचरिष्यति ॥ १६ ॥ यस्य चाहारसमये सूदा
: कुंडलधारिणः ॥ अहं पूर्वाः पचंति स्म प्रशस्तं पानभोजनम् ॥ ०१ ॥ ०७ ॥ ०७ ॥ ०७ ॥ ०१ ॥

सम्मते धिक्कारं सर्वभूतेष्ववज्ञा दुर्दुत्वेन प्रतिपत्तिश्च प्रत्यतो न्यवसोऽतः एतत्सर्वं भविष्यतीति शेषः ॥ १५ ॥ १६ ॥ ६
सूदाः पाचकाः अहं पूर्वाः अहंकारपूर्वाः ॥ १७ ॥

प्रोषेगप्रवसिते कौशल्यादिरूपे जने किं पापं मनोवागगोचरं दुःखं प्रतिपत्स्यसे करिष्यसि ८८ तदेव दुःखं दर्शयति कौशल्येति यदि कौशल्यां मां रामं च हास्यति ताभ्यो हीना भविष्यति चात्सुमित्राया यदि पुत्रौ च त्वाद्रामं मां च एतैर्यदि हीना भविष्यति तदा दुःखान्यसहती देवी कौशल्या सुमित्रा च मामेवानुमरि

ष्यते मपि गत्ते रामे वनं मनुजपुंगवे इक्ष्वाकुजने प्रोषे किं पापं प्रतिपत्स्यसे ८८ कौ

शल्यां मां च रामं च पुत्रौ च यदि हास्यति दुःखान्यसहती देवी मामेवानुमरिष्यति ८७

कौशल्यां च सुमित्रां च मां च पुत्रैस्त्रिभिः सह प्रक्षिप्य नरके सा त्वं कैकेयि सुखिता

भव ७० मया रामेण च त्यक्तं शाश्वतं सत्कृतं गुणैः इक्ष्वाकुकुलमक्षोभ्यमाकुलं पा

लयिष्यसि ७१

प्रातिव्रत्ये मया त्यक्ते रामे ता सह निःपतं राम नाति प्राप्त प्रियस भरतान प्रापयित्वेपि प्रतीवत्व दत्तु रंजने कुर्वतो राम

स्य वनस्य पित्वया ति कूरतया निराकरणसंभवात पुत्रो हास्यतीत्युक्तं तेन तस्याः कौशल्याति प्रशोच्यत्वः

८७ एवं च सति कौशल्या मिति नरके दुःखे ७० मया रामेण तौ त्याद्दिव्य श्लोकैः त्वा कुले इति ७१

आक्रोशप्रकारमाह वालिश इति ८३ उपकर्षितः कार्श्यं प्रापितः। कृच्छ्रं जटाद्युपेततया वनवासहेतुम् ८४ द्वितीयं वचनं परिहाररूपं वचनं प्रतिभाषितुं नालं न समर्थः। गृहमिव धर्मयंत्रितत्वात्। ८५ यदि मे राघवः प्रतिकूलं कुर्या

वालिशो बत कामात्मा राजा दशरथो भृशम्॥ स्त्रीकृते यः प्रियं पुत्रं वनं प्रस्थापयिष्यति॥ ८३
व्रतैश्च ब्रह्मचर्यैश्च गुरुभिश्चोपकर्षितः। भोगकाले महत्कृच्छ्रं पुनरेव प्रपत्स्यते॥ ८४
नालं द्वितीयं वचनं पुत्रो मां प्रतिभाषितुम्॥ स वनं प्रव्रजेत्युक्तो बाढमित्येव वक्ष्यति॥ ८५॥
यदि मे राघवः कुर्याद्वनं गच्छेति चोदितः। प्रतिकूलं प्रियं मे स्यान्न तु वत्सः करिष्यति॥
शुद्धभावो हि भावं मे न तु ज्ञास्यति राघवः॥ ८६॥ राघवे हि वनं प्राप्ते सर्वलोकस्य धिक्कृतं
मृत्युरक्षमणीयं मां नयिष्यति यमक्षयम्॥ ८७॥ सीतारामाभ्यां नमः सीतारामाभ्यां नमः त॥

त्तन्मे प्रियं स्यादिति संशयः। ८६। ततः किमत आह राघवे हीति सर्वलोकस्य धिक्कृतं धिक्कारं अक्षमणीयं सोढुमशक्यं माम्। ८१॥

पुत्रविक्रायिकं पुत्रिणां मूल्येन स्त्रीसुखक्रेतारं अनार्यः पापीति रथ्यासु विकरिष्यंति विगर्हिष्यंति ७८ एतादृशा दुःख स्यानुभूतत्वाद्विषादातिशयेन विस्मयते अहो इति दुःखं कष्टं कृच्छ्रं कष्टं । अहो कष्टमहो कष्टमिति यावत् यत्र वरदानविषये त्वं मे भवतु तथा यस्य इत्येवंविधास्तव वाचः क्षमे पश्चात् पुराकृतमशुभमिव अशुभफलमिव एवं

अनार्य इति मामार्याः पुत्रविक्रायिकं ध्रुवम् विकरिष्यंति रथ्यासु सुरापं ब्राह्मणं यथा
७८ अहो दुःखमहो कृच्छ्रं यत्र वाचः क्षमे तव दुःखमेवंविधं प्राप्तं पुराकृतमिवाशुभम् ७९
चिरं खलु मया पापे त्वं पापेनाभिरक्षिता अज्ञानादुपसंपन्ना रज्जुरुद्बन्धनी यथा ८०
रममाणस्त्वया सार्धं मृत्युं त्वां नाभिलक्षये बालो रहसि हस्तेन कृष्णसर्पमिवास्पृशम् ८१
तं तु मां जीवलोकोऽयं नूनमाक्रोष्टुमर्हति मया ह्यपितृकः पुत्रः स महात्मा दुरात्मना ८२

विधं अपरिहार्यत्वेनावश्यानुभाव्यं दुःखं प्राप्तमिति संबंधः ७९ पापेन मया उपसंपन्ना कंठसंलग्नासि त्वं पापकृते त्वदुक्तानां स्वनाशाय परिरक्षितेति भावः ८० बाल इवेति संबंधः ८१ महात्मा तु रामो मया जीवतापि अपितृकः पितृप्रयुक्तराज्यरहितः कृतः तं तु मां आक्रोष्टुं निंदितुमर्हति ८२

वैदेहीमिमदर्थउपलभ्यतामेतत्रामार्थंच शोचंतीस्वस्यप्राणानतत्यक्ष्यति वर्ततेति वेदे ७३ सीताप्राग्वममापिप्राणा
त्यक्तांप्राप्नुमित्याहनहीति ७४ नूनंध्रुवं ७५ सतींमयायातरमतीमसद्वृत्तवतींमुग्धसूषादिनासतीत्वेनप्रतीतांमुस

वैदेहीवर्तमेप्राणान्शोचंतीत्यक्ष्यति॥ हीनाहिमवतःपार्श्वेकिंनरेणेवकिन्नरी॥७३
नहिरामसहंदृष्ट्वाप्रवसंतंमहावने॥ चिरंजीवितुमाशंसेरुदंतींचापिमैथिलीम्॥७४॥
सानूनंविधवाराज्यंसपुत्राकारयिष्यसि॥ रामेप्रव्राजितेदेविनाहंजीवितुमुत्सहे॥७५
सतींत्वामहमत्यंतंव्यवस्याम्यसतींसतीम॥ रूपिणींविषसंयुक्तांपीत्वेवमदिरांनरः॥७६
अनृतैर्वतमांसांत्वैःसांत्वयंतीवभाषसे॥ गीतशब्देनसंरुध्यलुब्धोमृगमिवावधीः॥७७

तींसतींपतिमारकत्वेनसर्वथाप्यसतींव्यवस्यामिनिश्चिनोमितद्रूपिणींदृश्य...षितांप्रियांमदिरांपीत्वापश्चाद्विकारेणावि
षसंयुक्तांयथाजानातितत्वैःस्पर्धः ७६ यच्चत्वमनृतैःसांत्वैरिष्टवचनैःसांत्वयंतीवमांभाषसेतत्गीतशब्देनगी
तध्वनिनामृगंसंरुध्यलुब्धकइवमामवधीः॥७७॥

यदायदेतित्तदुचित्तकालेऽस्यर्थः कौशल्यासेवायां दासीवत् रहस्यार्थकथने सखीवत् धार्मीचरणे भार्यावत् हितांशं
सने भगिनीवत् स्थानदाने मातृवत् चोपतिष्ठते सेवतेऽस्यर्थः तासुप्रकारैः सत्कारार्हापि त्वत्कृते त्वद्धेमनस्यपरिहारा
र्थं न सत्कृता तदिदानीं रामविवासनवरे त्वयोक्ते सति पत्न्यावमयासुकृतं शोभनं कर्म त्वदनुसरणारूपं कृतं तत्तदपथ्यव्यंज

यदा यदा च कौशल्या दासीवच्च सखीव च भार्यावद्भगिनीवच्च मातृवच्चोपतिष्ठते ६८
सततं प्रियकामा मे प्रियपुत्रा प्रियंवदा न मया सत्कृता देवी सत्कारार्हा कृते तव ६९
इदानीं तत्तपति मां यन्मया सुकृतं त्वयि अपथ्यव्यंजनोपेतं भुक्तमन्नमिवातुरम् ७०
विप्रकारं च रामस्य संप्रयाणं वनस्य च सुमित्रा प्रेक्ष्य वै भीता कथं मे विश्वसिष्यति ७१
कृपणं वत वैदेही श्रोष्यति द्वयमप्रियम् मां च पंचत्वमापन्नं रामं च वनमाश्रितम् ७२

नोपेतं भुक्तमन्नं आतुरं रुग्णमिव परितापयतीत्यर्थः ६८ ६९ ७० वनस्य संप्रयाणं संप्रयाणमेकं रामस्य विप्रकारं मया
कृतमपकारं प्रेक्ष्य भीता सुमित्रा मे मह्यं कथं विश्वसिष्यति सकललोकानंदकारमपि रामं त्यजेत्तो राज्ञो न किंचिद

ततो वेपथुपरीता राज्ञः प्राणा सु प्रोक्षिताः सत्यः प्रतिस्त्रोतस्तटाद्गङ्गायास्तस्मात्तोयमिव स्ववर्तमानास्तस्मात्सास्तां स दृष्ट्वा संचकाशिरे चके-
पिरेरस्य पः १५ पापं मरणं तस्य विनिश्चयो जज्ञे जातः १६ कालसमन्विते मृते इव न प्रबुध्येते १७ शोकेन सन्ना उपहता

तावेवं पुत्रौ परित्यज्य राज्ञस्तः प्राणा वै प्रोक्षिताः प्रतिस्त्रोतस्तटाद्गङ्गायास्तस्य दृष्ट्वा संचकाशिरे १५
अप्युपसंदेहमानानां स्त्रीणां दृष्ट्वा च पार्थिवम् यत्तदा प्रोक्षितं पापं तस्य जज्ञे विनिश्चयः
१६ कौशल्या च सुमित्रा च पुत्रशोकपराजिते प्रसुप्तेन प्रबुध्येते यथा कालसमन्विते
१७ निष्प्रभा च विवर्णा च सन्ना शोकेन संनता न व्यराजत कौशल्या तारेव तिमिरा-
वृता १८ कौशल्यानन्तरं राज्ञः सुमित्रा तदनन्तरम् न स्म विभ्राजते देवी शोकाश्रुललिता-
नना १९

तारा इव प्राते कुचितहस्तपादादिकरणा १८ कौशल्येति अत्र तस्येति पदमध्याहर्तव्यं राज्ञः अनंतरं समीपे स्थिता कौशल्या न
स्म विभ्राजते तदनंतरं तस्याः कौशल्यायाः अनंतरं समीपे स्थिता देवी सुमित्रा न स्म विभ्राजते इति संबंधः तत्र हेतुः शोकेत्यादि १९

यदा बहवो वृद्धाः परिप्रक्ष्यंति क्व रामः इति तदाऽहं किमुत्तरं दास्यामि उत्तरास्फूर्तेर्मौनमेव भजिष्यामि। ६५ ननु कैकेय्या क्लिश्यमानेन मया रामः प्रस्थापित इत्युत्तरं दीयतामत आह कैकेय्येति क्लिश्यमानेन पीड्यमानेन मया रामो वने

यदा हि वहवो वृद्धा गुणवंतो वहुश्रुताः॥ परिप्रक्ष्यंति काकुत्स्थं वक्ष्यामि किमहं तदा॥६५॥
कैकेय्या क्लिश्यमानेन रामः प्रव्राजितो मया॥ यदि सत्यं ब्रवीम्येतत्तदसत्यं भविष्यति॥६६॥
किं मां वक्ष्यति कौशल्या राघवे वनमास्थिते॥ किं चैनां प्रतिवक्ष्यामि कृत्वा विप्रिय-
मीदृशम्॥६७॥

प्रस्थापित इति एतत्सत्यं यदि ब्रवीमि तत् पूर्वोक्तं पूर्वं ध्रुवं वसिष्ठवामदेवादिसहितराजसभायामुक्तं रामाभिषेकविषयप्रतिज्ञावाक्यमसत्यं भविष्यति। ६६ मया मातृत्रेणा वा ते किमपराद्धमिति यदा वक्ष्यति तदैनां प्रति किं वक्ष्यामि
न किमपीत्यर्थः। ६७

अ० ६० दुःखं दुःसाधनं अलीकमपराधम ६० अर्थं चेदमतिक्लिष्टमित्याह न कथंचिदिति रामादृते रामं विना भरतः कथंचि
दपि राज्यं नावसेत् नाक्रमेत् नावसेदित्यत्र हेतुमाह रामादिति हि यतस्तं भरतं रामादपि धर्मतो बलवत्तरं अपि शब्दे
न धर्मवेत्तमं मन्ये ६१ वनं गच्छेति भाषिते मया उक्ते सति उपप्लुतं राहुग्रस्तमिंदुमिव विवर्णं रामस्य मुखवर्णं कथं द्र

नृशंसे पापसंकल्पे क्षुद्रे दुष्कृतकारिणि । किं नु दुःखमलीकं वा मयि रामे च पश्यसि ६०
न कथंचिदृते रामाद्भरतो राज्यमावसेत् रामादपि हितं मन्ये धर्मतो बलवत्तरम् ६१ क
र्मविहीनानि धूपसंमोदनेन च॥ अनाश्रितकुड्यानि प्रभाहीनजनानि च॥३८॥ अलक्ष्मीका
नि पश्यामि कुड्यविभवान्यहम्॥ अपेतमाल्यशोभानि असंमृष्टाजिराणि च॥३९॥ देवागा
रशिशून्यानि न च भांति यथापुरम्॥ देवतार्चाः प्रविद्धाश्च यज्ञगोष्ठ्यस्तथाविधाः॥४०॥ मा
ल्यापणेषु राजंते नाद्य पण्यानि वै तथा॥ दृश्यंते वणिजोऽप्यत्र न यथापूर्वमद्य वै॥४१॥

माः प्रविद्धाः निरस्तपूजनाः यज्ञगोष्ठ्यः यज्ञसभाः तथाविधाः यज्ञरहिताः।४०। माल्यापणेषु माल्यविक्रयापणेषु पण्यानि
माल्यरूपाणि।४१।

नूपुरेण ३ ऌलु च्छातिरस्कृताहं सा दिलीलाय यासे वरवैलेकोतें यथा भवतितथा गच्छतीत्यर्थः इदानीमपि वनगमनवेलायामपि तद्वागे
गताभर्तृ प्रीतिपूर्वो जक भूषणानानुरागेण त्यक्तानि त्यक्तानि भूषणानि यया ११ नाहारयति नसंप्राप्नोति १२ तथैव तैरभा
दयो नशोच्याः तेतवा तमोय्यतएवन शोच्यः राजापि न शोच्यः सत्यसंधत्वात् इतोपि नशोच्यो इत्याह इदं हीति शाश्वमपिरा

नूपुरोत्कृष्टहेलेव खेलाच्छतिभामिनी इदानीमपि वैदेही तद्रागान्यस्तभूषणा १९ गजं वा वी
क्ष्य सिंहं वा व्याघ्रं वा वनमाश्रिता नाहारयति संत्रासं बाहू रामस्य संश्रिता २० न शोच्यास्तेन ।
चात्मा ते शोच्यो नापि जनाधिपः इदं हि चरितं लोके प्रतिष्ठास्यति शाश्वतम् २१ विधूय
शोकं परिहृष्टमानसा महर्षियाते पथि सुव्यवस्थिताः वने रता वन्यफलाशनाः पितुः शुभां
प्रतिज्ञां प्रतिपालयिष्यति २२ तथापि सूतेन सुयुक्तवादिना निवार्यमाणा सुतशोककर्षिता
न चैव देवी विरराम कूजितात्प्रियेति पुत्रेति च राघवेति च २३ १ सीता तमाभ्यां नमः सीता

विराम २३

ज्यंमहावनोपिपरित्य ज्यपितवचनमपालयदित्येव मिदं रामचरितं शाश्वतं वहु काल प्रतिष्ठास्यति शतिष्ठालप्स्यते २१
महर्षिभिर्याते याते २२ सुयुक्त वादिनासूतेन तथा निवार्यमाणापि सुत शोककर्षितत्वा देवी प्रियेत्यादि कूजितान्ने

रा० वा० अ०
२२९

अस्यासीताया: संबंधि इदमेव प्रस्तुतवत्तां न जातमेव स्मरामि केकेयीसंस्थितं केकेयीसदृशप्रकृतिं सहसा हसन्सीतयामां प्रति यत्तद्विषये जल्पितं वाक्यमुपजल्पितमुक्तं तदिदानीं मां न प्रतिभाति एवं रत्येवं रूपे तत्प्रमादात् पर्युपस्थितम् त्वान्निर्गतं केकेयीविषये सीतावाक्यं ध्वंसयित्वा व्यवहारांतरेणानुक्तं प्राप्यमिव कृत्वा देव्या: कौशल्याया

इदमेव स्मराम्यस्या: सहसैवोपजल्पितम् केकेयीसंस्थितं जल्पेनेदानीं प्रतिभाति माम् १४
ध्वंसयित्वा तु तद्वाक्यं प्रमादात्पर्युपस्थितम् आह्लादयन्वचनैः सूतो देव्या मधुरमब्रवीत् १५
अध्वना वातवेगेन संभ्रमेणातपेन च न विगच्छति वैदेह्याश्चंद्रांशुसदृशी प्रभा १६
सदृशं शतपत्रस्य पूर्णचंद्रोपमप्रभम् वदनं तद्वदान्याया वैदेह्या न विकंपते १७
अलक्तरसरक्ताभावलक्तरसवर्जितौ अद्यापि चरणौ तस्या: पद्मकोशसमप्रभौ १८

आह्लादकरं मधुरं वचनं सूतोऽब्रवीदित्याह कविः १४ १५ संभ्रमेणाव्याघ्रादिदर्शनजन्यव्याकुलत्वेन १६ वदान्याया वल्गुवाचो वैदेह्या वदनं न विकंपते म्लानतां न याति इत्यर्थः वदान्यो वल्गुवागपि इत्यमरः १७ अलक्तरसवर्जितावपि अलक्तरसरक्तौ कांतिस्वभावरक्ततया अद्यापि वनागमनेपि पद्मकोशसमप्रभौ न तु मार्गगतिश्रमकाठिन्यभाजौ १८ रम० २२९

९ क्रीडैकरसत्वाद्बालेवेति दृष्टांतः अबालचंद्रनिभाननारामारामे चिदानंदरूपे अधीनात्मा सक्तचित्तेत्यर्थः १० तस्याद्हृदयं
तद्गते रामं गते जीविते चात दधीनं तस्मात्कारणात् प्रधारामयुक्तं वनमपि अयोध्या तथा रामहीना यो ध्यापि वनं भवेत् ११

नगरोपवने गत्वा यथा स्म रमते पुरा तथैव रमते सीता निर्जनेषु वनेष्वपि ९ बालेव रमते
सीता बालचंद्रनिभानना रामारामे ह्यधीनात्मा विजनेपि वने सती १० तद्गते हृदयं ह्यस्या
स्तस्य दधीनं च जीवितम् अयोध्यापि भवेदस्या रामहीना तथा वनम् ११ परिपृच्छ
ति वैदेही ग्रामांश्च नगराणि च गतिं दृष्ट्वा नदीनां च पादपान्विविधानपि १२ रामं वाल
क्ष्मणं वापि पृष्ट्वा जानाति जानकी अयोध्या क्रोशमात्रे तु विहारमिव संश्रिता १३

३ ह्यानमिव वनमाश्रिता वैदेही नदीनां गतिं नाम न नारक्षान् दृष्ट्वा रामं वा लक्ष्मणं वा परिपृच्छति पृष्ट्वा जानाति अ
योध्यातः क्रोशमात्रे विद्यमाने विहारे संश्रिता यथा रमते स्म तथैव वनेपि प्ररमते त्यर्थः १२ १३ ९३ ९३ ९३

 भूतोपसृष्टेव भूता विह्वेव गतसत्त्वेव गता तालुरिव धरण्यां स्थितेति शेषः १२ अपश्यदिति ३ सज्जमानया विक्लवया ४ संभ्रममावेगः ५

ततो भूतोपसृष्टेव वेपमाना पुनः पुनः धरण्यां गतसत्त्वेव कौसल्या सूतमब्रवीत् १ नय मां यत्र काकुत्स्थः सीता यत्र च लक्ष्मणः तान्विना क्षणमप्यद्य जीवितुं नोत्सहे ह्यहम् २ निवर्त्तय रथं शीघ्रं दण्डकान्नय मामपि अथ तान्नानुगच्छामि गमिष्यामि यमक्षयम् ३ बाष्पवेगोपहतया स वाचा सज्जमानया इदमाश्वासयन्देवीं सूतः प्राञ्जलिरब्रवीत् ४ त्यज शोकं च मोहं च संभ्रमं दुःखजं तथा व्यवधूय च संतापं वने वत्स्यति राघवः ५ लक्ष्मणश्चापि रामस्य पादौ परिचरन्वने आराधयति धर्मज्ञः परलोकं जितेन्द्रियः ६ विजनेऽपि वने सीता वासं प्राप्य गृहेष्विव विस्रम्भं लभतेऽभीता रामे विन्यस्तमानसा ७ नास्या दैन्यं कृतं किंचित्सुसूक्ष्ममपि लक्षये उचितेव प्रवासानां वैदेही प्रतिभाति माम् ८

रामस्य पादौ परिचरन् परलोकमाराधयति साधयति ६ अभीतेति छेदः विस्रम्भं प्रणयम् ७ कृतं वनवासकृतं दैन्यमित्यर्थः प्रवासानां उचितेव योग्येव अभ्यस्तवनवासश्रमेवेत्यर्थः ८

समवृत्तमणिकुंडलं धृत रत्नं कुडलम् २५ अनोन्विष्यतः प्रच्छार्यमाह इमामिति २६ २७ अर्पितचेतनः गतचेतनः [illegible]
सुदुष्पारं शोकसागरं ख्वगाढः प्रविष्टः अब्रवीत् शोकसागरत्वेनावरोपयत् २८ तदाह रामेत्यादि रामशोकरूपी महा

प

लोहिताक्षं महाबाहुं समवृत्तमणिकुंडलम् रामं यदि न पश्यामि मे[ष्या]मि यमक्षयम् २५ अ
तो नु किं दुःखतरं योहमिक्ष्वाकुनंदनम् इमामवस्थामापन्नो नेह पश्यामि राघवम् २६
हा राम रामानुज हा हा वैदेहि तपस्विनि न मां जानीत दुःखेन म्रियमाणमनाथवत् २७ स
तेन राजा दुःखेन भृशमर्पितचेतनः अवगाढः सुदुष्पारं शोकसागरमब्रवीत् २८ रामशो
कमहावेगः सीताविरहपारगः श्वसितोर्मि महावर्तो बाष्पवेगजलाविलः २९ बाहुवि
क्षेपमीनौघो विक्रंदितमहास्वनः प्रकीर्णकेशशैवालः कैकेयीवडवानलः ३०

नावेगोव वृत्यंयस्यसः सीताविरहरूपं पारगः परतीरसंबंधो यस्यसः श्वसितरूपऊर्मियुक्तो महावर्तोयस्यसः बाष्पवेगरूपनदीजलैः
आविलः २९ शोचि हस्तांप्रकीर्णकेशाएव शैवालं यत्र कैकेयीव वडवानलो यत्र ३०

नैगमैः वेदशास्त्रविद्भिः १९ भवितव्यतया अवश्यप्राप्तकटुरदृष्टवशात् वा इति विशेषाद् समानार्थे यदृच्छया दैवेच्छया २० सुकृतं प्रि-
यं संत्वरयंतीति निष्क्रमितुमिच्छंतीति यावत् २१ यदि यदि वा अद्यैवेति यावत् मदाज्ञया मम वा आगत्वा राघवं निवर्त्तयतु न तु भरतः

मा

न सुहृद्भिर्न चामात्यैर्मंत्रयित्वा न नैगमैः मयायमर्थः संमोहात् स्त्रीहेतोः सहसा कृतः १९ भवित-
व्यतया नूनमिदं वा व्यसनं महत् कुलस्यास्य विनाशाय प्राप्तं सूत यदृच्छया २० सूत यद्य-
स्ति ते किंचिन्मयापि सुकृतं कृतम् त्वं प्रापयाशु मां रामं प्राणाः संत्वरयंति माम् २१ यद्यद्या-
पि ममैवाज्ञा निवर्त्तयतु राघवम् न शक्ष्यामि विना रामं मुहूर्त्तमपि जीवितुम् २२ अथवा-
पि महाबाहुर्गतो दूरं भविष्यति मामेव रथमारोप्य शीघ्रं रामाय दर्शय २३ वृत्तदंष्ट्रो महेष्वा-
सः क्वासौ लक्ष्मणपूर्वजः यदि जीवामि साध्वेनं पश्येयं सीतया सह २४ सीतारामाभ्यानमः

४३

यत्वया राज्यस्य दत्तत्वात्त्वदाज्ञाया कथं गतत्वेनत्वाह अद्यापि ममैवाज्ञा यदि प्रवर्त्तते यावद्दूरतागमनमिति भावः निवृत्तौ हेतु-
र्न शक्ष्यामीति २२ पुनरपि रामनिवर्त्तनस्याशक्यत्वात्स्वनयनमेवाह अथवापीति २३ वृत्तदंष्ट्रः कुंदकुड्मलाकारदं-
ष्ट्रः यदि पश्येयं तर्हि जीवामीति संबंधः २४

अन्योन्यं शत्रूणां तथामित्राणां उदासीनजनस्य च आर्त्ततया आर्त्तत्वगुणात्मेनविप्रोषेनोपलक्ष्ये इत्यन्वयः यत्पिरा मस्यत्वतोमित्रा संभवः कैकेयी कुब्जयोर्देवा दमित्रत्वस्य संभवेपितयो र्त्तत्वाभावः तथाप्येतयोः शत्रुत्वमनयोर्मित्रत्वमस्यमु दासीन इतिभेदेनजायत इतितात्पर्यं १४ विनिश्वसितनिस्वना दीर्घनिश्वासस्वनयुक्ताः १५ पुत्रहीनापुत्रविप्रयुक्ता कौशल्ये

नामित्राणांनमित्राणामुदासीनजनस्य च अहमार्त्ततयाकेचिद्विप्रोषेनोपलक्ष्ये १४
अश्रुहृष्टमनुष्याच दीनानानातुरांगमा आर्त्तस्वरपरिम्लाना विनिश्वसितनिस्वना १५
निरानंदा महाराज रामप्रव्राजनातुरा कौशल्या पुत्रहीनेव अयोध्या प्रतिभातिमाम्
१६ सूतस्य वचनं श्रुत्वा राजा परमदीनवत् वाष्पोपहतया वाचा तं सूतमिदमब्रवीत् १७
कैकेय्याविनियुक्तेन पापाभिजनभावया मयानमंत्रकुशलैर्वृद्धैः सह समंत्रितम् १८

व अनेनसर्वेषांणमे पुत्रवत्स्नेमध्वतितम् १६ १७ सुमंत्रः प्रस्योत्तरमभिधायममाकृप कराणां द्योतनायैतत्तोऽधिकक थयतीतिबुध्वांशोकारेणोत्तरमाह कैकेय्येति पापाभिजनभावया पापान्वोजनमभूम्यभिप्रायप्या विनियुक्तेन रामप्रव्राजने पितियोगं प्रापितेन मया मंत्रकुशलैर्वृद्धैः सह न सुमंत्रितं न विचारितम् १८

लीनं संकुचितं पुष्करपत्रं नलिनीदलं यासां ताः संतप्तपद्माः शुष्कपद्माः पद्मिन्यः सरांसि लीनाः मीनाः विहंगमाः जलपक्षिणो यासां ताः ७ स्थलजानि माल्यानि पुष्पाणि यथापुरं यथा पूर्वम् ८ उद्यानानि पुष्पवाटिकाः आरामान् कृत्रिमवनानि

लीनपुष्करपत्राश्च नरेन्द्र कलुषोदकाः संतप्तपद्माः पद्मिन्यो लीनमीनविहंगमाः ७
जलजानि च पुष्पाणि माल्यानि स्थलजानि च नाद्य भान्त्यल्पगन्धीनि फलानि च यथापुरम्
८ अत्रोद्यानानि शून्यानि प्रलीनविहगानि च नचाभिरम्यानारामान्पश्यामि मनुजर्षभ ९
प्रविशन्तमयोध्यायां न कश्चिदभिनन्दति नराणाममपश्यन्तो निश्वसन्ति मुहुर्मुहुः १० दे
वराजरथं दृष्ट्वा विना राममिहागतम् दुःखादश्रुमुखाः सर्वे राजमार्गगता जनाः ११ हर्म्यै
र्विमानैः प्रासादैरवेक्ष्य रथमागतम् हाहाकारकृता नार्यो रामादर्शनकर्शिताः १२ आयतै
र्विमलैर्नेत्रैरश्रुवेगपरिप्लुतैः अन्योन्यमभिवीक्षन्तेऽव्यक्तमार्ततराः स्त्रियः १३

९ मनुष्याणां तु दुःखं किं वक्तव्यमित्याह प्रविशन्तमिति १० देवेति सेवबुद्धिः अश्रुमुखाः अश्रुमुद् इति शेषः ११ १२ अव्यक्त
मिति छेदः रामप्रवासजनितपीडयार्ताः परस्परं समदुःखा वीक्षन्ते इत्यर्थः १३

कैकेयीनिमित्ते रामविवासनं सर्वक्षोभकरमभूदित्याह विषयेत इति । विषये देशे सपुष्पांकुरा कोरकाः पुष्पाण्यपि भिन्नविकसितानि अंकुराः शाखासु नवपल्लवोद्भेदाः कोरकाः पुष्पमुकुलानि तैः सहिताः वृक्षा अपि परिम्लानाः शुष्कं भावं गमन्तः जगाद मिन्न निमित्तोपादानकारणत्वेन सर्वात्मत्वाद्रामे कजीवित्वाद्वृक्षादयो रामादर्शने व्यसनकर्षिता म्लेछ दन्ते विनापि

विषये ते महाराज रामव्यसनकर्षिताः अपि वृक्षाः परिम्लानाः सपुष्पांकुरकोरकाः ४ उपतप्तोदका नद्यः पल्वलानि सरांसि च परिशुष्कपलाशानि वनान्युपवनानि च ५ न च सर्पन्ति सत्वानि व्याला न प्रसरन्ति च रामशोकाभिभूतं तन्निष्कूजमभवद्वनम् ६ ६ ६

परिम्लानाः सद्य एव शुष्कप्राया बभूवुः किं मनुष्यादय इति ४ पल्वलानि सरांसि च तप्तोदकानि अनेनात्याधिकविभागमंतरेण परितप्तत्वं द्योत्यते पलाशाः पत्रं ५ सत्वानि हिंस्राः पशवः न सर्पन्ति न प्रचरन्ति आहारार्थमपि न संचरन्ती त्यर्थः एतत्सर्वं शोकाज्जातं रामशोकाभिभूतेत द्वनं मार्गस्थम्वत्तेपक्षिशब्दवत् निष्कूजमिव पक्षिशब्दरहितम् ६

एवं तमवतीतमुक्त्वाऽश्वस्यागतिस्समयानुभूतस्वदेशाऽश्वतीतमाहममत्वय्यादृत इति मम मयानिवृत्तिमिति मर्गे ऽस्मिन्प्रावर्त्तत न्यवर्त्तत
त्वय्यभावः प्राप्तमरवमुखविबुधदुर्लभाः श्रीरामसेवा ऽहस्मामि भोग्य्रहैव ध्यासनि ईद्यनदैवेनविघटिता ततः परं कीं करिष्यामो स्माकं व्य
र्थ जीवनं किमर्थं मितस्सेत दुःखेनाश्रुनिसंचन्नो मयि स्थति कठिन हृदयेश्वतिनिकृतेऽप्यस्मिन्त्यवर्त्ततत थापि मया कथं चिन्निवर्त्तिता इति १

मम त्वय्यनिवृत्तेऽस्मिन्प्रावर्त्तत वर्त्मनि ३ एवमस्त्रु विमुंचन्तो रामे संप्रास्थिते वनम् १
उभाभ्यां राजपुत्राभ्याम् यथाकृत्वाहमंजलिम् प्रस्थितो रथमास्थाय तद्दुःखमपि धा
रयन् २ गुहेन सार्धं तत्रैव स्थितोऽस्मि दिवसान्बहून् आशया यदि मां रामः पुनः
शब्दापयेदिति ३

तदुःखं तद्वियोगदुःखम् २ गुहेन सार्द्धमहं बहून्दिवसान् तत्र स्थितोऽस्मि किमर्थं तत्र स्थितिस्तत्राह शब्दापयेदिति आकारयेदिसर्थः ननु
ततः सायाह्नसमये तत्तीर्थे हनिसार्थितः निवृत्त इति पूर्वमुक्तं सत्तोद्धि दिवसमेव तत्र स्थितिरित्यवगम्यते अत्र तु बहून्दिवसानिस्थि
त इत्युच्यते कथमेतत्संगच्छते नास्ति विरोधः रामस्य गंगावतरणादिवसत्रादंचसाकल्येन दिवसद्वयं चतत्तीर्थे पि दिवसे भरद्वाजाश्र
मागाच्च रामगमनं तत्र स्थित इति बहुदिवसावस्थान सिद्धिः ३

अनिष्टानि अनिष्टसूचकानि पापानि क्रूराणि काकादीनि अमनोज्ञानि अशुभसूचकानि निमित्तानि वामाक्षिस्पंदनादीनि ॥३०॥ असति संमोहे तत्कारणे ॥३१॥ विषण्णो दीनः श्रान्तहृदयः खिन्नचित्तः संलुलिते संक्षुभिते ॥३२॥ वैजयंतेन

अनिष्टानि च पापानि पश्यामि विविधानि च॥ निमित्तान्यमनोज्ञानि तेन सीदति मे मनः॥३०॥
सर्वथा कुशलं सूत दुर्लभं मम बंधुषु॥ तथा ह्यसति संमोहे हृदयं मे वसीदति॥३१॥ विषण्णः।
श्रान्तहृदयस्त्रस्तः संलुलितेंद्रियः॥ भरतः प्रविवेशाशु पुरीमिक्ष्वाकुपालिताम्॥३२॥ अथ द्वाःस्थैः?
द्वारेण वैजयंतेन प्राविशच्छ्रान्तवाहनः॥ द्वाःस्थैरुत्थाय विजयं पृष्टस्तैः सहितो ययौ
॥३३॥ स त्वनेकाग्रहृदयो द्वाःस्थं प्रत्यर्च्य तं जनम्॥ सूतमश्वपतेः क्लांतमब्रवीत्तत्र राघवः॥३४॥
किमहं त्वरयानीतः कारणेन विनानघ॥ अशुभाशंकि हृदयं शीलं च पततीव मे॥३५॥ सीतास मायो?

वैजयन्ताख्येन ॥३३॥ अनेकाग्रहृदयः व्याकुलचित्तः द्वाःस्थजनं प्रत्यर्च्य सोपचारं निवर्त्य अश्वपतेः केकयस्य ॥३४॥ आनीतः
दूत द्वारेति शेषः कारणेन विना कारणं किं विना अनघ एवमेतद् हृदयमशुभाशंकि शीलं धैर्यादिस्वभावः पततीति गलति इत्यर्थः॥

श्रीसंचय

कथं राजा भविष्यसि इत्येवं राजानं ब्रूहीति प्रोषः ३३ जानकीतु इदं पश्यन्तीव्या लिरिकेरा निश्वसंतीमनस्विनी गंभीरमनस्कारभूतोपह तचित्तेव विष्ठितास्मि स्मितोविस्म्रृतोविस्म्रृतसर्वप्रयोजना अस्मिता स्मितरहिता स्थितेति प्रोषः ३४ तेन दुःखेन भर्तृदुःख

सर्वप्रजाभिरामं हि रामं रक्षा प्रव्राज्य धार्मिकं सर्वलोकं विरुध्येमं कथं राजा भविष्यसि ३३ जानकी तु महाराज निश्वसंती तपस्विनी भूतोपहतचित्तेव विष्ठिता विस्मृताऽस्मिता ३४ अदृष्टपूर्वव्यसना राजपुत्री यशस्विनी तेन दुःखेन रुदती नैव मां किंचिदब्रवीत ३५ उद्वीक्षमाणा भर्तारं मुखेन परिशुष्यता मुमोच सहसा बाष्पं प्रयांतमुपवीक्ष्य सा ३६ तथैव रामोऽश्रुमुखः कृतांजलिः स्थितोब्रवीत् लक्ष्मणबाहुपालितः तथैव सीता रुदती तपस्विनी निरीक्षते राजरथं तथैव मां ३७ इत्यार्षे रामायणे वाल्मीकिये अयोध्याकांडे अष्टपंचाशः सर्गः ॥ ५८ ॥ रामायनमः

दर्शनेन दुःखेन रुदती मां किंचिदपि नैवाब्रवीत् केनचित्संभाषणास्याप्यसंहितत्वात् ३५ ३६ लक्ष्मणबाहुपालितः लक्ष्मणेनावे क्ष्यमानः अब्रवीत् उक्तमिति प्रोषः निरीक्षते राजरथं मां च ३७ इत्यष्टपंचाशः सर्गः ५८ ॥

दैवप्रेरणाया प्रश्नस्याप्यादृष्टार्थयोनोपालम्भ्य इत्याशंक्य दैवप्रेरितेनापि दोषसम्भावे त्यागः कार्यः स चाभिरामे रामे न दृष्ट इत्याह इदमि
ति ईश्वरस्य कृते ईश्वरप्रेरणायां सत्यां यथाकामं ईश्वरेच्छामनतिक्रम्य इदं तावत्कृतं भवतु तथापि तु रामस्य परित्यागे हेतुभूतं दोषं न पश्या
मि २९ अतः केवलं बुद्धिलाघवात् असमीक्ष्य उचितानुचितमनवेक्ष्य धर्मशास्त्रविरुद्धमारब्धं रामविवासनं कर्तृ राघवस्य दशरथस्य संक्रो

इदं तावद्यथाकाममीश्वरस्य कृते कृतम् रामस्य तु परित्यागे न हेतुमुपलक्षये २९ अ
समीक्ष्य समारब्धं विरुद्धं बुद्धिलाघवात् जनयिष्यति संक्रोशं राघवस्य विवासनम्
३० अहं तावन्महाराजे पितृत्वं नोपलक्षये भ्राता भर्ता च बन्धुश्च पिता च मम राघवः ३१
सर्वलोकप्रियं त्यक्त्वा सर्वलोकहितं त्विमम् सर्वलोकोऽनुरज्येत कथं त्वानेन कर्मणा ३२

शं निंदां जनयिष्यत्येव ३० गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः उत्पथं प्रतिपन्नस्य परित्यागो विधीयते इति वचनार्थं हृदि निधा
याह अहं तावदिति भर्ता स्वामी ३१ अन्यदप्याह सर्वलोकेत्यादि सर्वलोकप्रियं त्यक्त्वा स्थितेन त्वां अनेन क्रूरेण कर्मणा सर्वलोकः
कथमनुरज्येत ३२

मायव्यवरोरुधः राज्यात्मात्रं प्रायेसर्पः जीवस्वसंतोषकरु २३ पुत्रगर्द्धिनी पुत्राभिकांक्षिणि राहि भरत मम माता तव माते व दुष्ट्या २४ उपसंहर ति इतीति इत्येवं प्रकारेण मां ब्रुवन्नेव प्रभ्रूणाप वर्त्तितवान् जात २५ लक्ष्मणस्त्विति वाक्यमब्रवीत् तत् दे वाहके नायमपराधेन त्वारण्यसाधितश्चो केन २६ येन रामविवासनेनवयं पीडिताः तेद्विवासनमकार्यं तु ग्प्रकार्यमेवराज्ञा तु कैकेय्यालघुतुच्छ शासनमाश्रित्य कार्यमिव कृतं खलु वाग्रन्दरवा

इति क्रोतवषा राजा मामस्मैन व्यवरोरुधः कुमार राज्ये जीवस्व तस्यैवाज्ञाप्रवर्तताम् २३ एवब्रवी च्चापि मां भूयो मप्याम भूणोनिवर्त्तयन् मातेक्रमम माताते दुष्ट्या पुत्राभिर्द्दिनी २४ इत्येवं मां महा बाहुर्ब्रुवन्नेव महायशाः रामोराजीवताम्राक्षो भ्प्राम भ्रूणापवर्तत २५ लक्ष्मणस्तु सुसंक्रु द्धो निश्वसन्वाक्यमब्रवीत् केनायमपराधेन राजपुत्रो विवासितः २६ राज्ञानुरवलु कैकेय्याल घुत्वाश्रित्य शासनम् कृतं कार्यमकार्यं वा वयं येनाभिपीडिताः २७ यदि प्रव्राजितो रामो लोभ कारणकारितम् वरदाननिमित्तं वा सर्वथा दुष्कृतं कृतम् २८

यैः २७ प्रतिज्ञातार्थस्य प्रदानस्य कथमकार्यत्वं तत्रा

ह यदि तिरामःप्रव्राजितो यदि प्रव्राजित इति यतश्च तत्प्रव्राजनं लोभरूपेण कारणेन कैकेय्या कारितं यद्वा कैकेय्यै प्रतिश्रुतवरदाननिमि त्तं वा भवतु सर्वं यात्पक्षद्वये दुष्कृतं ग्प्रनुचितं कृतं वरदानसमये वरद्वयस्य भरताभिषेकरामविवासनरूपेणाविनियोगाभावात् २८

सर्वमंतःपुरं त्वया मद्वचनात् रामोक्तः सर्वा अपि विशेषेणारोग्यं पृच्छतीति वाच्यं यथायोग्यं तासां मदभिवादनं च वाच्यम् १६ ततो मम माता कौशल्याम् मद्वचनात् कुशलं प्रणामं धर्मे अप्रमादं च वक्तव्या किं च एनामिदं वक्ष्यमाणं विप्रियं ब्रूयाः १७ किं तदित्याह धर्मेत्यादि १८ अभिमानः

सर्वमंतःपुरं वाच्यः सूत मद्वचनात्त्वया । आरोग्यमविशेषेण यथार्हं चाभिवादनम् १६ माता च मम कौशल्या कुशलं चाभिवादनम् । अप्रमादं च वक्तव्या ब्रूयाश्चैनामिदं वचः १७ धर्मनित्या यथाकालमग्न्यगारपरा भव । देवि देवस्य पादौ च देववत्परिपालय १८ अभिमानं च मानं च त्यक्त्वा वर्तस्व मातृषु । अनुराजानमार्यां च कैकेयीमंब कारय १९ कुमारे भरते वृत्तिर्वर्तितव्या च राजवत् । अर्थज्येष्ठा हि राजानो राजधर्ममनुस्मर २० भरतः कुशलं वाच्यो वाच्यो मद्वचनेन च । सर्वास्वेव यथान्यायं वृत्तिं वर्तस्व मातृषु २१ वक्तव्यश्च महाबाहुरिक्ष्वाकुकुलनंदनः । पितरं यौवराज्यस्थो राज्यस्थमनुपालय २२

प्रधानमहिषीत्वप्रयुक्तोऽहंकारः मानस्तत्प्रयुक्त इतरतिरस्कारः कश्चित्तविकारः तौ त्यक्त्वा मदीयासु मातृषु वर्तितव्यम् अनुराजानं राज्ञः पश्चात्कैकेयीमार्यां श्लाघ्यां कारय तया सह मा विरोधी स्या इत्यर्थः १९ इति रूपचारा वर्तितव्या कार्या कुतस्तत्र यत्मिस्तत्राह अर्थी ज्येष्ठा इति अर्थिनैव ज्येष्ठानानुवयसेत्यर्थः २० यथान्यायं यथाक्रमं वृत्तिं वर्तस्व प्रवृत्तिं कुरु इत्यर्थः २१ राज्यस्थं प्रधानराज्यस्थं पितरं यौवराज्यस्थस्त्वमनुपालयेत्यन्वयः २२

रथादवरुह्य कथं पादैर्गतौ ९ अश्विनाविव मंदरं मंदरस्य कान्दर्यमिवाच्छन्नसादृश्यम् १० आसितादयो भावे निष्ठांताः एतेन आसना
दिव्यापारश्रवणेन ययातिरिव साधुषु स्वर्गात्पतन् ययातिर्यथा साधुषु पातप्रेक्षितैर्दत्तार्थितपुण्याय स्यासाधुषु पतितस्तद्दत्तपुण्यास्तु खजीव
नो जातः एवं स्वर्गतुल्यात्सत्संयोगाद्भ्रष्टस्य भवद्वृत्तश्रवणासाधुसमागमात्पुत्रवार्ताश्रवणेन जीविष्यामीति भावः १२ सज्जमानया।

सुकुमार्यातपस्विन्यासुमंत्रसहसीतया राजपुत्रौकथंपादैरवरुह्यरथाद्गतौ ९ सिद्धा
र्थःखलुसूतत्वंयेनदृष्टौममात्मजौ वनंतंप्रविशंतौतावश्विनाविवमंदरम् १० कि
मुवाचवचोरामःकिमुवाचचलक्ष्मणः सुमंत्रवनमासाद्यकिमुवाचचमैथिली ११
आसितंशयितंभुक्तंसूतरामस्यकीर्तय जीविष्याम्यहमेतेनययातिरिवसाधुषु १२ इतिसूतो
नरेंद्रेणचोदितःसज्जमानया उवाचवाचाराजानंसबाष्पपरिबद्धया १३ अब्रवीन्मांम
हाराजधर्ममेवानुपालयन् अंजलिंराघवःकृत्वाशिरसाभिप्रणम्यच १४ सूतमद्वचनात्त
स्यदेवस्यविदितात्मनः शिरसावंदनीयस्यवंद्यौपादौमहात्मनः १५

स्खलंत्यावाष्पपरिबद्धयाकंठगतवाष्पनि
रुद्धया १२ हे महाराज राघवो धर्ममेवानुपालयन् तत्पालनाद्धेतोः अब्रवीत् वक्ष्यमाणं वचः हे सूत मत्प्रतिनिधित्वेन राज्ञे अंजलिं कृत्वा तथैव शि
रसानत्वा विदितात्मनः लोके धर्मिष्ठत्वेन प्रसिद्धस्य शिरसा वंदनयोग्यस्य राज्ञः पादौ मद्वचनात्तरामोऽभिवादये इत्युक्त्वा वंद्यौ १४ १५

ण्योकद्वयमेकं वाक्यं सूतः नवग्रहं नवोनूतनो गजः होग्रहणं प्रस्पतं द्विपमिव विनिःश्वसंतं प्रस्वस्थं स्वीयमध्येन स्थितं कुंजरमिव ध्या
यते महाराजे उपस्थितः समीपेतस्थौ २ ३ रजसाध्वस्तांगं धूसरितांगं परमार्त्तवत् परमदीनः सन् ४ । वत्स्यति वत्स्यति ग्रशिष्यति

ग्श तः सूतो महाराजे कृतांजलिरुपस्थितः रामम् एवानुशोचंतं दुःखशोकसमन्वितम् २ वृ
द्धं परमसंतप्तं नवग्रहमिव द्विपं विनिःश्वसंतं ध्यायंतमस्वस्थमिव कुंजरम् ३ राजा तु रजसा
सूतं ध्वस्तांगं समुपस्थितम् अश्रुपूर्णमुखं दीनमुवाच परमार्त्तवत् ४ क्व नु वत्स्यति
धर्मात्मा वृक्षमूलमुपाश्रितः सोत्यंतसुखितः सूत किमशिष्यति राघवः ५ दुःखस्यानुचि
तो दुःखं सुमंत्र शयनोचितः भूमिपालात्मजो भूमौ शेते कथमनाथवत् ६ यं यांतमनुया
ंति स्म पदाति रथकुंजराः स वत्स्यति कथं रामो विजनं वनमाश्रितः ७ व्यालैर्मृगैराचरि
तं कृष्णसर्पनिषेवितम् कथं कुमारौ वैदेह्या सार्धं वनमुपस्थितौ ८ ८ ८ ८ ८

ग्रश्नाति यद्वा वनवासकालस्य बहुदीर्घत्वाद्द्विपदयोगः ५ दुःखस्यानुचितोपि दुःखं प्राप्नुइति शेषः दुःखमित्येतत् क्रियाविशेषणं वा श
यनोचितः महार्हशयनोचितः ६ ७

विप्रविध्वंसितः शोकम् ३१ बाष्पविप्लुतभाषिणी गद्गदभाषिणी ३२ ३३ समीक्ष्य श्रुत्वा पुनरेव रामगमनकालवत् रवसंकुलं व्याकुलमासीत्

देवयस्मात्मया दुःखं नानुपृच्छसि सारथिम् नेह तिष्ठति कैकेयी विस्रब्धं प्रतिभाष्यताम् ३१ सा तथोक्त्वा महाराजं कौसल्या शोकलालसा धरण्यां निपपाताशु बाष्पविप्लुतभाषिणी ३२ विलपन्तीं तथा दृष्ट्वा कौसल्यां पतितां भुवि ॥ पतिं चावेक्ष्य ताः सर्वाः समन्तात् रुरुदुः स्त्रियः ३३ ततस्तमन्तःपुरनादमुत्थितं समीक्ष्य वृद्धास्तरुणाश्च मानवाः ॥ स्त्रियश्च सर्वा रुरुदुः समन्ततः पुरं तदासीत् पुनरेव संकुलम् ॥ ३४ ॥ इत्यार्षे रामायणे वाल्मीकीये श्रयोध्याकाण्डे सप्तपञ्चाशः सर्गः ॥ ५७ ॥ प्रत्याश्वस्तो यदा राजा मोहात् प्रत्यागतस्मृतिः तदा जुहाव तं सूतं रामवृत्तान्तकारणात् १

इति सप्तपञ्चाशः सर्गः ५७ प्रत्याश्वस्तः कृतोपचारः मोहात् मोहं परित्यज्य प्रत्यागतस्मृतिः प्रत्यागतसंज्ञः राजा यो रामसकाशात् प्रत्यागतस्तं सूतं रामवृत्तान्तकारणात् रामवृत्तान्तं प्रष्टुं पुनराजुहाव १

सत्यरूपंपरमार्थरूपंतत्स्त्रीणांवाक्यं ॥ राजन् शोकेनप्रदीप्तइवसन्राजगृहंविवेश २३ परिद्यूनंम्लानम् २४ प्रत्यवेदयत्विस्तरेणाप्रति पादनमग्रेभविष्यति २५ तूष्णींभावेहेतुर्विभ्रांतमानसइति २६ मूर्छितेत्याविद्धंशोकेनाभिहतमभूदितिशेषः पतितेवाहू उद्धृत्यचुक्रो

सत्यरूपंतुतद्वाक्यंराजस्त्रीणांनिशामयन् प्रदीप्तइवशोकेनविवेशसहसागृहम् २३ सप्र विश्यपाश्चमींकक्ष्यांराजानंदीनमातुरम् पुत्रशोकपरिद्यूनमपश्यत्पाण्डुरेगृहे २४ सभिगा म्यतमासीनंराजानमभिवाद्यच सुमंत्रोरामवचनंयथोक्तंप्रत्यवेदयत् २५ सतूष्णीमेवतत् श्रुत्वाराजाविभ्रांतमानसः मूर्छितोन्यपतद्भूमौरामशोकाभिपीडितः २६ ततोंतःपुरमा विद्धंमूर्छितेपृथिवीपतौ उद्धृत्यबाहूचुक्रोशन्नृपतौपतितेक्षितौ २७ सुमित्रयातुसहिता कौशल्यापतितंपतिम् उत्थापयामासतदावचनंचेदमब्रवीत् २८ इमंतस्यमहाभागदूतं दुःष्करकारिणः वनवासादनुप्राप्तंकस्मान्नप्रतिभाषसे २९ अद्येममनयंकृत्वाव्यपत्रपसि राघव उत्तिष्ठसुकृतंतेस्तुशोकेनस्यात्सहायता ३०

शेषस्पष्टः २७ २८ २९ इमंदुःखसाधनंपुत्रप्रवासनरूपमन्यायंकृत्वा व्यपत्रपसेकिंव्यपत्रपसिलज्जांप्राप्तोसिनप्रतिभाषसेतस्मात्शोकंविधूयोत्तिष्ठतेसुकृतंसत्यपरिपालनरूपंपुण्यमस्तु किंचएवंशोकेनत्वया क्रियमाणोत्वसहायतासहायसमूहःपरिजनःसर्वोपिनस्यात्त्वच्छोकेनसर्वोपिन्नश्येदितिशेषः ३०

हर्म्यं धनिकगृहं विमानं सप्तभूमिकं गृहं प्रासादश्चित्रभूमिकं गृहं तैः करणैरवेक्ष्य रामेण विना समागते सुमंत्रे दृष्ट्वा हाहाकारः कृतो याभिस्ताः तथा नार्यो बभूवुरिति शेषः १८ अन्योन्यम् अव्यक्तं यथा भवति तथा वीक्षन्ते इति कर्त्तव्यतामोहादिति शेषः १९ प्रासादेभ्यः सुमंत्रस्य राज

हर्म्यैर्विमानैः प्रासादैरवेक्ष्य रथमागतम् हाहाकारकृता नार्यो रामादर्शनकर्शिताः १८ प्रसृतैर्विमलैर्नेत्रैरस्रुवेगपरिप्लुतैः अन्योन्यमभिवीक्षन्तेऽव्यक्तमार्त्ततराः स्त्रियः १९ ततो दशरथः स्त्रीणां प्रासादेभ्यस्ततस्ततः रामशोकाभितप्तानां मंदं शुश्राव जल्पितम् २० सह रामेण निर्यातो विना राममिहागतः सूतः किं नाम कौशल्यां क्रोशन्तीं प्रतिवक्ष्यति २१ यथा च मन्ये दुर्जीवमेवं न सुकरं ध्रुवम् आच्छिद्य पुत्रे निर्याते कौशल्या यत्र जीवति २२ २२

वेश्मप्रवेशं दृष्ट्वा प्रासादेभ्यो वर्त्तिनीनां मंदं गन्तसान्निध्यान्मंदत्वम् २० किं नाम प्रतिवक्ष्यति प्रति घोरत्वान्न किमपि वक्तुं शक्यमिति भावः २१ अथ प्रलपं राममातॄणां दुःखप्रलापः यथा चेति यथा येन प्रकारेण अस्मज्जीवितं दुर्जीवं दुःखेन जीवनार्हं मन्ये एवमेव कौसल्या पुत्रे निर्याते सति आच्छिद्य प्रसह्य जीवतीति यत् तन्न सुकरं दुःसंपादमिति ध्रुवं मन्ये इत्येके कथं त्वं येऽन्ये एकवचनेन पुत्रेति यदि सर्वेऽद्वयम् २२

तीराणि गंगायमुनातीर्थानि गताः ११ वृंदं वृंदं संघशस्तिष्ठतां तेषां जनानां ये इह रथे रामं न पश्यामस्ते हताः खलु इति वचः स शुश्राव १२ दानयज्ञादिषु
समाधिषु समाजेषु च अंतरा मध्ये धार्मिकं रामं जातु न द्रक्ष्याम इति च शुश्राव १२ अस्य जनस्य किं समर्थं किं सुखं चित्तं किं प्रियं प्रिय

तेतीराणीति विज्ञाय वाष्पपूर्णमुखा नराः अहो धिगिति निःश्वस्य हा रामेति विचुक्रुशुः ११
शुश्राव च वचस्तेषां वृंदं वृंदं च तिष्ठताम् हतास्म खलु ये नेह पश्याम इह राघवम् १२
दानयज्ञविवाहेषु समाजेषु महत्सु च न द्रक्ष्यामः पुनर्जातु धार्मिकं राममंतरा १३ किं समर्थं
जनस्यास्य किं प्रियं किं सुखावहम् इति रामेण नगरं पित्रेव परिपालितम् १४ वातायन
गतानां च स्त्रीणामन्वंतरापणम् राममेवाभितप्तानां शुश्राव परिदेवनम् १५ स राजमार्ग
मध्येन सुमंत्रः पिहिताननः यत्र राजा दशरथस्तमेवोपययौ गृहम् सोवतीर्य रथाच्छीघ्रं रा
जवेश्म प्रविश्य च कक्ष्याः सप्ताभिचक्राम महाजनसमाकुलाः १७ सीतारामाभ्यां नमः

करं वस्तु किमिहामुत्र सुखावहं वस्तु इति पित्रेव रामेण परिपालितं नगरं चिंताकुलं चिंताव्याप्तं बभूवेति शेषः १४ आपणानां अंतरे वातायनगता
नां स्त्रीणां राममुद्दिश्य अभितप्तानां परिदेवनं अंतरापणं आपणानां मध्ये गच्छन् शुश्राव १५ १६ कक्ष्या द्वाराणि १७ सीतारामप्रेम

हे देव तदा देवासुरे युद्धे प्रीतेन त्वया मे द्वितीयो वरो दत्तः तस्यापि कालोऽयमागतः॥२६॥ नव पंच च चतुर्दश वर्षाणि दंडकार
ण्यनिवासी चीरं वल्कलं अजिनं मृगचर्म च परिदधानो धीरो रामस्तापसो भवतु॥२७॥ निष्कंटकं साम्राज्यं नमि
द्या के टके यौवराज्यं भरतो भजतां श्वः द्यैव च वचनेन प्रयांतं राघवं हि पश्येयमेष मे परमः कामोऽतो दत्तमेव वरं वृणोम्यनत्व

द्वितीयो वरो देव दत्तः प्रीतेन मे त्वया॥ तदा देवासुरे युद्धे तस्य कालोऽयमागतः॥२६॥ नव पं
च च वर्षाणि दंडकारण्यमाश्रितः॥ चीराजिनधरो धीरो रामो भवतु तापसः॥२७॥ भरतो भ
जतामद्य यौवराज्यमकंटकं। एष मे परमः कामो दत्तमेव वरं वृणोम्यद्य चैव हि पश्येयं प्रयां
तं राघवं वने॥२८॥ स राजराजो भव सत्यसंगरः कुलं च शीलं च हि जन्म रक्ष च। परत्रवासे हि
वदंत्यनुत्तमं तपोधनाः सत्यवचो हितं नृणाम्॥२९॥

न्यायेन त्वां नियोजयामि अद्य चैव स्वेनेन कालविलंबो न कृतः॥२८॥ स राजराजः प्रसिद्धस्त्वं सत्यसंगरः सत्यवचनो भव से पूर्वोद्धिरते वचनापीतकमेराप र तेनैव हेतुना कुलादिकं रक्ष सत्यसंगरत्वमेव स्वजन्मादिरक्षणसाधनमिति कुत इत्यत आह परत्रेति परत्रवासे परलोकवासविषये हि तं वदंति॥२९॥

पापसंकल्पां तमामिषैकविघातादिमनोरथाम्॥२३॥ विनिष्कृतां छिन्नां पतितां स्वर्गादिति शेषः निर्धूतां
पुण्यक्षये स्वर्लोकात्पातितां च्युतां स्वर्गात्॥२४॥ परिभ्रष्टां वरमोहनां पद्ममुक्तां मध्ये एव स्थितां मामपि वस्थितां

सद्वृत्तां हरणीं भार्यां प्रातोऽभ्योपि च राघवस्य सीमाम्॥ अपापः पापसंकल्पां दृष्ट्वा धरणीतले॥२३॥
लतामिव विनिष्कृत्तां पतितां देवतामिव॥ किन्नरीमिव निर्धूतां च्युतामप्सरसं यथा॥२४॥
मामपि वपरिभ्रष्टां हरिणीमिव संयताम्॥ करेणुमिव दिग्धेन विद्धां मृगयुना वने॥२५॥
महाराजः स्वारत्येपत्नीं स्नेहात्परिममर्ष ताम्॥ परिमृश्य च पाणिभ्यामभिसंत्रस्तचेतनः॥२६॥
कामी कमलपत्राक्षीमुवाच वनितामिदम्॥ न तेऽहमभिजानामि क्रोधमात्मनि संश्रितम्॥२७॥

संयतां वा गुरावद्धां मृगयुना व्याधेन दिग्धेन विषलिप्तेन बाणेन विद्धां करेणुं करिणीमिव स्थितां भार्यां दृष्ट्वेति पूर्वे-
णान्वयः॥२५॥ स्वरत्येमहाराजः पूर्वोक्तं करेणुमिवक्तां स्नेहात्परिममर्श परिमृश्य॥२६॥ पाणिभ्यां परिमृश्य स्पृष्ट्वा किं
करिष्यति किं वदिष्यतीत्यभिसंत्रस्ता चेतनाय स्यसः कामी दृष्टप्रत्ययः वनितामिदमुवाच संनिहितापि संश्रितं क्रोधं
मे

विषादहेतुमाह नहीति तां वेलां स्वागमनसमयं नातिक्रान्तवती ॥ च तामतिक्रान्तेति विषादः । शून्यं कैकेयीरहितं
॥१८॥ स्वार्थलिप्सुं भरताभिषेकेच्छावतीम् अपण्डितां कार्याकार्यविवेकरहितां अविज्ञाय यथापूर्वमपृच्छतेत्यन्व

नहि तस्य पुरा देवी तां वेलामत्यवर्त्तत ॥ न च राजा गृहं शून्यं प्रविवेश कदाचन ॥१८॥ ततो
गृहगतो राजा कैकेयीं पर्यपृच्छत ॥ यथापुरमविज्ञाय स्वार्थलिप्सुमपण्डिताम् ॥१९॥ प्र
तिहारी त्वथोवाच संत्रस्ता सुकृताञ्जलिः ॥ देव देवी भृशं क्रुद्धा क्रोधागारमभिद्रुता ॥२०॥ प्र
तिहार्या वचः श्रुत्वा राजा परमदुर्मनाः ॥ विषसाद पुनर्भूयो लुलितव्याकुलेन्द्रियः ॥२१॥ त
त्र तां पतितां भूमौ शयानामतथोचिताम् ॥ प्रतप्त इव दुःखेन सोऽपश्यज्जगतीपतिः ॥२२॥ र

यः ॥१९॥ प्रतीहारी दौवारिकी क्रोधागारे अभिद्रुता ऽस्त्विवाचेति संबंधः ॥२०॥ भूयोऽतिशयेन स्वदर्शनविषादादपि क्रो
धागारप्रवेशश्रवणादयं तं विषसाद लुलितान्यतिचञ्चलानि व्याकुलानि विवशानि इन्द्रियाणि यस्य सः
॥२१॥ अतथोचितां तथा शयनानुचितां ऽवस्था एवार्थः ॥२२॥

रुतायुतं रुतयुक्तं कुब्जाभिर्वामनिकाभिः स्वामिभिश्च युतं सुरूपदासीनां सापत्न्यस्य भावनपातः पुरेऽवामाता ॥ १२ ॥ लता
गृहैश्चित्रयुक्तगृहैः शोभितो पलक्षितं ॥ गजदंतराजतस्वर्णनिर्मितवेदिकाभिः समायुतं युक्तम् ॥ १३ ॥ नित्यपुष्पफलैरिति

शुकबर्हिसमायुक्तं क्रौंचहंसरुतायुतम् ॥ वादित्ररवसंघुष्टं कुब्जावामनिकायुत
म् ॥ १२ ॥ लतागृहैश्चित्रगृहैश्चंपकाशोकशोभितैः ॥ दांतराजतसौवर्णवेदिकाभिः स
मायुतम् ॥ १३ ॥ नित्यपुष्पफलैर्वृक्षैर्वापीभिरुपशोभितम् ॥ दांतराजतसौवर्णैः संवृ
तं परमासनैः ॥ १४ ॥ विविधैरन्नपानैश्च भक्ष्यैश्च विविधैरपि ॥ उपपन्नं महार्हैश्च भूषि
तैस्त्रिदिवोपमम् ॥ १५ ॥ तत्प्रविश्य महाराजः स्वमंतःपुरमृद्धिमत् ॥ न ददर्श प्रियां रा
जा कैकेयीं शयनोत्तमे ॥ १६ ॥ स कामबलसंयुक्तो रत्यर्थी मनुजाधिपः ॥ अपश्यन् दयि
तां भार्यां पप्रच्छ विषसाद च ॥ १७ ॥

दोहदविरोधादिति शेषः ॥ १४ ॥ मंचैरप्युपादिभिर्भूषितैः स्त्रीजनैरि
ति शेषः अतएव त्रिदिवोपमम् ॥ १५ ॥ १६ ॥ कामबलेन तदुद्रेकः तत्संयुक्तः अतएव रत्यर्थी ॥ १७ ॥ १२ ॥ १३ ॥ ११ ॥ ११ ॥

७ एकवेणी पुरो भागीयवेणीति द्व्यमनुस्यापयेत् एकवेणी गतसर्वभूषणा सुरिव ॥ ८ कैकेयी व तां तं प्रदोषकालिकमप
वरापराजेव तां न माह आज्ञाप्येति उपस्थाने मंत्रिपुरोहितादिसभा तामनुज्ञाप्य स्वयं हा रामेति तदनुज्ञां गृहीत्वा

तथा तान्यपविद्धानि माल्यान्याभरणानि च ॥ अशुभो भर्तृतव वस्त्रधानं तत्रारातिपथा
नभः ॥ ७ ॥ क्रोधागारे च पतितां तां वभौ मलिनांवरा ॥ एकवेणी दृढं बद्धा गत
सत्वेव किन्नरी ॥ ८ ॥ आज्ञाप्य तु महाराजो राघवस्याभिषेचनं ॥ उपस्थानमनुज्ञाप्य
प्रविवेश निवेशनम् ॥ ९ ॥ अद्य रामाभिषेको वै प्रसिद्ध इति जज्ञिवान् ॥ प्रियार्हां प्रिय
माख्यातुं विवेशान्तःपुरं वशी ॥ स कैकेय्या गृहं श्रेष्ठं प्रविवेश महायशाः ॥ पाण्डुराभ्रमि
वाकाशं राहुयुक्तं निशाकरः ॥ ११ ॥

निवेशनं प्रविवेश ॥ ९ ॥ अद्यैव रामाभिषेकः प्रसिद्धः निश्चित इति ततः
पूर्वं कैकेय्यानसूति गो । चरइति जज्ञिवान् ज्ञातवान् ॥ अतस्तां तत्प्रियमाख्यातुं मंतःपुरं प्रविवेश ॥ १० ॥ श्वत्रग
ह स्थलस्य कैकेयीयुक्तं तत्पार्श्व धावलततया वराहुयुक्त पाण्डुराभ्राकाशसादृश्यम ॥ ११ ॥ ११ ॥ ११ ॥ ११ ॥ ११ ॥

॥श्री०४६

साप्यपंमनसा कृत्यमेनं घवत्प्रदिष्ट कार्यनिश्चित्यपुनः मैवैतदितिनिर्धार्य शास्त्राभ्यामालोचितं सर्वं सम्यगिति मे परापेशनैरश्च च देवीत्यर्थः ॥२॥ तदेव प्रपंचयति सादीनेत्यादि सार्द्ध श्लोकद्वयं केवलाकं ॥ मार्गमेवपरोक्षं ध्यात्म सुखावहमितिचिंतयामास ॥३॥ सा मे परासह हृत्परमात्मभूतार्थकामा केकेप्रीकार्यपरात न्निश्चयं केकेप्रो कृते

निश्चित्य मनसा कृत्यं सा सम्यगिति भामिनी ॥ मे परापेशनैः सर्वमाच चक्षे विचक्षणा

२ सादीनानिश्चयं कृत्वा मे परा वाक्यमोहिता ॥ नागकन्येव निश्चसद्दीर्घमुच्चं च भामिनी ॥ मुहूर्तं चिंतयामास मार्गमात्मसुखावहम् ॥३॥ सा तु कृत्वार्थकामा च तं निशम्य विनिश्चयम् ॥ बभूव परमप्रीता सिद्धिं प्राप्यैवमेपरा ॥४॥ अथ पसारुद्धिता देवी सम्यक्कृत्वा विनिश्चयं सविवेशावलाभूमौ निविशेषा भुकुटिमुखे ॥५॥ ततश्चित्राणि माल्यानि दिव्यान्याभरणानि च ॥ अपविद्धानि केकेय्या तानि भूमिं प्रपेदिरे ॥६॥

कार्यं निशम्य तात्वा सिद्धिं राज्यसाधनादि सिद्धिं प्राप्यैवं परमप्रीता बभूव ॥४॥ सविवेशावलाभूमावितिपुनः संवेशो नोक्तिर्भ्रुकुटीकरणविशेषप्रदर्शनार्थो ॥५॥ यानि केकेय्या अपविद्धानि उत्सृष्टानि तानि भूमिं प्रपेदिरे प्राप्तानीत्यर्थः ॥६॥६॥७॥६॥६॥६॥६६॥६६॥ ॥५॥

निश्चयं रामा० ४६

नाजनपानभोजनमितिसमाहारद्वंद्वः ।६४। अथ क्रोधागारप्रवेशानंतरं निधायेत्यादि सर्वाभरणानि भूमौप
तिताकिन्नरीव ।६५। तदा शयनकाले उदीर्णो उद्रिक्तः संरंभः क्रोधः एव तमस्तेन वृतमाननं यस्याः। अथ वमुक्तानि
उत्तममाल्यभूषणानि ययासा विमना दुर्मनाः मग्नतारका अस्तमिततारका द्यौरिव स्थिता ॥६६॥ इति नव

अहं हि नैवास्तरणानि न स्रजो न चंदनं नांजनपानभोजनम् ॥ न किंचिदिच्छामि न चे
ह जीवितं न चेदितो गच्छति राघवो वनम् ॥६४॥ अथैवमुक्त्वा वचनं सुदारुणं निधा
य सर्वाभरणानि भामिनी ॥ असंवृतामास्तरणेन मेदिनीं तदाधिशिश्ये पतितेव किन्नरी
६५॥ उदीर्णसंरंभतमोवृतानना तदावमुक्तोत्तममाल्यभूषणा ॥ नरेंद्रपत्नी विमना बभूव सा
तमोवृता द्यौरिव मग्नतारका ॥६६॥ इत्यार्षे रामायणे अयोध्याकाण्डे नवमः सर्गः ॥९॥
विदर्भिता यदा देवी कुब्जया पापया भृशम् ॥ तदा शेते स्म सा भूमौ दिग्धविद्धेव किन्नरी ॥१॥

मः सर्गः ॥९॥ अथ पूर्वोक्तं कैकेयीक्रोधमविचाल्य लक्ष्यसूचनायानुवदन्नाह केकेयीदर्शनात् नयो दर्शयति विदर्भिते
ति विदर्भिता विप्रतीतमर्थं ग्राहिता दिग्धविद्धेव विषाक्तेन बाणेन विद्धा प्रतिहता किन्नरीव किन्नरीका मृगपत्नी

॥ अ॰ ४५ ॥ अथो पुनः पुनरपि कुब्जा महीक्षितो दशरथस्य तां महिषीं भरतस्य मातरं प्रत्यर्थमहापराक्रमैः इति क्रूरैर्वचोभिर्भरतस्य हितं राममप्रेत्य रामे प्राप्य अहितं रामविषये लोकदृष्ट्या अहितं वच उवाच ॥ ६० ॥ ६१ ॥ कुब्जा मुहुर्मुहुरि

अथो पुनस्तां महिषीं महीक्षितो वचोभिरत्यर्थमहापराक्रमैः ॥ उवाच कुब्जा भरतस्य मातरं हितं वचो राममुपेत्य चाहितम् ॥ ६० ॥ प्रपत्स्यते राज्यमिदं हि राघवो यदि ध्रुवं त्वं ससुता च तप्स्यसे ॥ ततो हि कल्याणि यतस्व तत्तथा यथा सुतस्ते भरतोऽभिषेक्ष्यते ॥ ६१ ॥ तथातिविद्धा महिषीति कुब्जया समाहता वागिषुभिर्मुहुर्मुहुः ॥ निधाय हस्तौ हृदयेऽतिविस्मिता शशंस कुब्जां कुपिता पुनः पुनः ॥ ६२ ॥ यमस्य वा मां विषयं गतामितो निशाम्य कुब्जे प्रतिवेदयिष्यसि ॥ वनं गते वा सुचिराय राघवे समृद्धकामो भरतो भविष्यति ॥ ६३ ॥ ६२ ॥ इ

ति पूर्वोक्तैर्वाग्बाणैः समाहता ताडिता अतिविद्धा च अस्तीति विस्मिता राजमहिषी एवं प्रतारितवानिति स्मितं प्रकाश्य प्रशंस उवाच ॥ ६२ ॥ निशाम्य दृष्ट्वा प्रतिवेदयिष्यसि दशरथायेति शेषः ॥ ६३ ॥ ६३ ॥ ३६ ॥ ६६ ॥ ६ ॥ ६६ ॥

राम॰
४५

एवंव्यवस्थावार्त्ताभिः कालात्ययेन कार्यं स्यादित्याहुगते त्याहुगते त्यादि तमभिषेकानंतरं वररहणं व्यर्थमिति भावः
राजानमनुदर्शय क्रोधागारे आत्मानमिति शेषः ॥५४॥ ५५ अनेकशतसाहस्रेति वस्त्रविशेषो मूल्यमव
ग

गतोदकेसेतुबंधोनकल्याणिविधीयते ॥ उत्तिष्ठ कुरु कल्याणि राजानमनुदर्शय ॥ ५५
तथा प्रोत्साहितादेवीगत्वामंथरयासह ॥ क्रोधागारंविशालाक्षीसौभाग्यमदगर्विता
॥५५॥ अनेकशतसाहस्रंमुक्ताहारंवरांगना अवमुच्यवरार्हाणिशुभान्याभरणानिच
५६ ॥ तदाहेमोपमातत्रकुब्जावाक्यवशंगता संविश्यभूमौकैकेयीमंथरामिदमब्रवीत् ॥ ५७ म
इहावामांमृतांकुब्जेनृपायावेदयिष्यसि ॥ वनंतुराघवेप्राप्तेभरतःप्राप्स्यतिक्षितिम् ॥ ५८ ॥
नसुवर्णेनमेह्यर्थोनरत्नैर्नचभोजनैः ॥ एषमेजीवितस्यांतोरामोयद्यभिषिच्यते ॥ ५९

हीशिवरूमूल्यानि ॥ ५६ ॥ हेमोपमास्वर्णवर्णा कैकेयी ॥ ५७ ॥ इह क्रोधागारे मदभीष्टासिद्धौ मदुपेक्षकाय राज्ञे दर्श
यायमांमृतामावेदयिष्यसि तुर्वार्थेराघवे वनंप्राप्ते भरतःक्षितिंप्राप्स्यतेवानतु पदांतरमस्तीति भावः ॥ ५८ ॥ ४७

॥प्र० ४४ किंच लब्ध्वार्थी प्राप्तमनोरथा प्रतीतो हं तुष्टाहं जातरूपकृतस्वर्णालंकृतभूषणो नतेस्याङ्गलेपयिष्यामि अङ्गप्रोत्करिष्या० मीत्यर्थः ॥४९॥ जातरूपमयं स्वर्णमयं चित्रं नानारत्नखचितं तथा नानावर्णं तिलकं तिलकाकारभूषणं ॥५०

जात्येन चन्दनेन मुनिष्ठेन सुंदरि ॥ लब्ध्वार्थी च प्रतीता च लेपयिष्यामि ते स्थगु ॥४९॥ मुखे च ते तिलकं चित्रं जातरूपमयं शुभम् ॥ कारयिष्यामि ते कुब्जे शुभान्याभरणानि च प रिधाय शुभे वस्त्रे देवतेव चरिष्यसि ॥५०॥ चंद्रमाह्वयमानेन मुखेनाप्रतिमानना ॥ गमि ष्यसि गतिं मुख्यां गर्वयंती द्विषज्जनम् ॥५१॥ तवापि कुब्जाः कुब्जायाः सर्वाभरणभूषिताः ॥ पादौ च परिचरिष्यंति यथैव त्वं सदा मम ॥५२॥ प्रशस्यमाना सा कुब्जा कैकेयीमिदमब्रवी त् ॥ शयानां शयने शुभ्रे वेद्यामग्निशिखामिव ॥५३॥२

चंद्रमाह्वयमानेन चंद्रमुख्यं स्पर्द्धमानेन मुखेनाप्रतिमानना त्वं द्विषज्जनं गर्वयंती गर्वं कुर्वती मुख्यां गतिं श्रेष्ठां गतिं पादन्यासविशेषं गमिष्यसि ॥५१॥५२॥५३॥

आयताभ्यां सुविभक्ताभ्यां ऊरुभ्यां ॥४५॥ स्थगुं स्तोतनुमुखे दृते तेषामन्निति ॥४६॥ यातास्तव हृदये निविष्टा माया सुदेवे
देवदीर्घं स्थगुइत्यन्वयः रथघोणां चक्रे ध्रुसमीपोन्नतप्रदेशात हृदायते ॥ पार्श्वयोः समनिवेशः मध्ये उन्नतः
लोकविलक्षणो वदो विक्षेपः स्थगुरूत्वा पीः ततः किमतआह मतय इति स्मृति ख्यातीत विषयामति रामा मिगो

त्वमायताभ्यां सुश्लिष्टाभ्यां मे परेदौमवासिनि ॥ आगतो मम गच्छं तीरा जहं सीवराजसे ४५
आसन्याः संवरे मायाः सहस्रमसुराधिपे ॥ सर्वास्त्वयि निविष्टास्तामूरुभ्यामुपास
हस्व प्राः ॥४६॥ तवैदं स्थगु पदीर्घं रथघोणामिवायतम ॥ मतयः तत्रवि घाभ्वमायाः
श्चात्र वसंतिते ॥४७॥ अत्र तेहं प्रमोद्यामि मालां कुञ्जे हिरण्मयीम ॥ अभिषिक्ते च भर
तेराघवे च वनेगाते ॥४८॥

चराबुद्धिमात्कालिकीज्ञेया प्रज्ञा त्रैकालिकीमतेत्युक्तविषयविभागेनम
तेर्बाहुल्ये तत्रविद्याघजनीतयः मायाःविचित्रकुत्सितप्राक्रमः अत्र स्थगुनिवसंतितिष्ठंति ॥४७॥ अत्र तेत्वस्य
सन्निपतोत्रमत्यादिकं वसंति अतोत्र मालां प्रमोद्यामि परिधापयिष्यामि ॥४८॥४८॥ ८ २६ ६ ६ ६ ॥

||श्री० ५२ धर्मेणाप्रतिश्रुत्य धर्मेण शपथपूर्वकदानप्रतिज्ञां कृत्वा ।२१। वाङ्मात्रेण पूर्वदत्तवरस्मारकवचनमात्रेण कैकेय्या स्ववशीकृतो राजा पाशं धर्मपाशं मृग इवात्मनो विनाशाय प्रचस्कंद विवेश प्राप्तवानित्यर्थः कर्त्तव वाङ्मात्रेणातिगीतेन वशीकृतः पाशं वा बद्धसंभ्रमस्तद्वत् ।२२। ततः परं वाङ्मात्रेण वशीकरणानंतरं काममोहितं वरदं राजानमिदमुवाच ।२३।

तत्प्रतिश्रुत्य धर्मेण न चेद्दास्यसि मे वरौ ॥ अद्यैव हि प्रहास्यामि जीवितं त्वद्विमानिता ।२१
वाङ्मात्रेण तदा राजा कैकेय्या स्ववशीकृतः ॥ प्रचस्कंद विनाशाय पाशं मृग इवात्मनः ॥२२
ततः परमुवाचेदं वरदं काममोहितम् ॥२३॥ वरौ मे यौ त्वया देव तदा दत्तौ महीपते ॥ तौ ताव
दहमद्यैव वक्ष्यामि शृणु मे वचः ॥२४॥ अभिषेकसमारंभो राघवस्योपकल्पितः ॥ अ
नेनैवाभिषेकेण भरतो मेभिषिच्यताम् ॥२५॥

देव तदा रात्रियुद्धे यौ वरौ मे दत्तौ तौ तावदहमद्यैव वक्ष्यामि इमा वितिविभज्य कथयामि तन्मे वचः शृणु ।२४। किं तदित्यत आह अभिषेकेति राघवस्याभिषेकसमारंभो य उपकल्पितः राघवस्येव अभिषेकसामग्री प्रासंपादिता अनेनैवाभिषेकेण अभिषेकसामग्र्या मे भरतोऽभिषिच्यताम् ।२५ रा०म० ५२ ||

॥ अ० ४३

कुब्जां

अथ षट्कुब्जांतरवैरनलापेनस्तौति संतोत्पादिदुःसंस्थिताः दुष्टावयवसंस्थानविशेषयुक्ताः ॥ अत एव परमपापि
काः परमपापदर्शिनाः नैवं त्वमित्याह त्वमिति यथा सहजसुंदरं पद्मं वातेन न म्लानमपि न निंद्यते तथा वातो
द्रेकाद्वक्रतामापन्नापि त्वेन निंद्या किंतु प्रियदर्शना सुंदरी असि ॥ ४१ ॥ ते उरवदः अभिनिविष्टं अभितः याम्यियो

संति दुःसंस्थिताः कुब्जा वक्राः परमपापिकाः ॥ त्वं पद्ममिव वातेन सन्नता प्रियदर्शना ॥ ४१ ॥
उरस्तेऽभिनिविष्टं वै पादवत्स्कंधात्समुन्नतम् ॥ अधस्ताच्चोदरं प्रांतं सुनाभमिव लज्जितम् ॥
म ॥ ४२ ॥ परिपूर्णं च जघनं सुपीनौ च पयोधरौ ॥ विमलेंदुसमं वक्त्रमहो राजसि मंथरे ॥ ४३ ॥
जघनं तव निर्घुष्टं रशनादामभूषितम् ॥ जंघे भृशमुपन्यस्ते पादौ च व्यायतावुभौ
॥ ४४ ॥

निविष्टं पादवत्स्कंधात् स्कंधपर्यंतं समुन्नतं उच्छ्रितं च अधस्तात् उदरं अधस्तात् प्रांतं भवनं नाभिसुंदरं लज्जि
तमिव प्रांते उरसउन्नतिं दृष्ट्वा लज्जितमिव कृशमित्यर्थः ॥ ४२ ॥ परिपूर्णं विस्तीर्णं ॥ ४३ ॥ हर्षीति प्रायः [illegible] मति
जघनं पुनर्वर्णयति जघनमिति रशनादामशोभितं सत् निर्घुष्टं रशनास्थघंटाभिः शब्दायमानं उपन्यस्ते

[illegible] ४१ [illegible]

रा० अ० ४३

प्रतीतेस्तस्योपपादनं साहीति किशोरी बालवत्साबुद्धास्यायथा स्वकिशोरी तथा उत्पथं गच्छतीति कथ्या हस्तेनारूढापि तथैवं राजाधीनापि भरतार्थे उन्मार्गगतेत्यर्थः। केकयी केकयराजकन्या परं विस्मयं प्राप्ता परमदर्शना प्राप्येतवि प्रोषदर्शनवतीयदा परमत्वर्थमदर्शना विरूढदर्शना तदामे प्राम्यमिदमब्रवीदित्यन्वयः। ३८। कुब्जे त्वां श्रेष्ठाभि

साहि वाक्येन कुब्जायाः किशोरीवोत्पथं गता ॥ केकयी विस्मयं प्राप्ता परं परमदर्शना ॥३८॥ कुब्जे त्वां नाभिजानामि श्रेष्ठां श्रेष्ठाभिधायिनीम ॥ पृथिव्यामसि कुब्जानामुत्तमा बुद्धिनिश्चये ॥३९॥ त्वमेव तु ममार्थेषु नित्ययुक्ता हितैषिणी ॥ नाहं समवबुध्येयं कुब्जे राज्ञश्चिकीर्षितम ॥४०॥

धायिनीत्यादि विशिष्टां नाभिजानामि न ज्ञातासि षमित्यर्थः कुब्जानां कुब्जत्वविशिष्टराजदासीनां मध्ये बुद्धिनिश्चये बुद्धिविषयकार्याकार्यनिश्चये उत्तमा पृथिव्यां त्वमेवासि। ३९। श्रेष्ठाभिधायिनी त्वमुपपादयति त्वमेवेति हितैषिणीः इच्छापूर्वं हितवक्त्री राज्ञश्चिकीर्षितं रामाभिषेकादि भरतस्य विवासनादि क महं न समवबुध्ये त्वत्कृतबोधनाभावे इति शेषः। ४०। ४०॥ ४०॥

रामः स्वराम इति छेदः प्रियः प्रजानां भविष्यतीत्यर्थः॥ ३२॥ कृतमूलो दृढमूलः॥ ३४॥ कृतमूलत्वमेव विवृणोति सं
गृहीतेति सम्यक् पालनेनानुरंजितमनुष्य इत्यर्थः आत्मवान् प्रशान्तचित्तः सुहृद्भिः सार्कं कृतमूलो भविष्यती।

एवं प्रव्राजितश्चैव रामोऽरामो भविष्यति॥ भरतश्च हतामित्रस्तथा राजा भविष्यति॥ ३३॥ येन का
लेन रामश्च वनात्प्रत्यागमिष्यति॥ तेन कालेन पुत्रस्ते कृतमूलो भविष्यति॥ ३४॥ संगृही
तमनुष्यश्च सुहृद्भिः सार्द्धमात्मवान्॥ ३५॥ प्राप्तकालं तु ते मन्ये राजानं वीतसाध्वसा। रामा
भिषेकसंकल्पान्निगृह्य विनिवर्त्तय॥ ३६॥ अनर्थमर्थरूपेण ग्राहिता सा ततस्तया॥ हृ
ष्टा प्रतीता कैकेयी मंथरामिदमब्रवीत्॥ ३७॥

ति पूर्वेणान्वयः॥ ३५॥ वीतसाध्वसा त्यक्तभया सती त्वं राजा
नं निग्रहानिर्बंधेन स्वाधीनं कृत्वा रामाभिषेकसंकल्पाद्विनिवर्त्तय एतन्निवर्त्तने प्राप्तकालं मन्ये इत्यर्थः अभि
षेकनिवर्तनस्यायमेव काल इति भावः॥ ३६॥ अनर्थं विरुद्धार्थं अर्थरूपेणानुकूलार्थरूपेण ग्राहिता बोधिता प्रतीता
तथैव गृहीतार्था॥ ३७॥

मंदस्वभावेऽप्यलसस्वभावे सौभाग्यबलेसौंदर्यबलत्वम् । रघे । २७ । सोऽर्थिः तामवि वासनभरतामिषे चनरूपोर्थिः
त्वां मातिक्रमेत मा तिक्रामतु । २८ । अवस्थाप्य प्रार्थयेः सत्येस्थापयित्वा । २९ । वरमसिनीयदर्शयतिरा

न ह्यतिक्रमितुं शक्तस्तव वाक्यं महीपतिः ॥ मंदस्वभावे बुध्यस्व सौभाग्यबलमात्मनः
२६ ॥ स शीरत्नस्ववशो चरत्तानिविविधानिच ॥ दद्यादृष्टारयोराज्ञामास्मत्ते शुभमतः
कृथाः ॥ २७ ॥ यौतौदेवासुरेयुद्धे वरौदशरथोददौ ॥ तौस्मारय महाभागे सोर्थो मात्वाम
तिक्रमेत् ॥ २८ ॥ यदा तु ते वरं दद्यात्स्वयमुत्थाप्य राघवः ॥ व्यवस्थाप्य महाराजं त्वमिमं व
णुया वरम् ॥ २९ ॥ रामं प्रव्राजनारण्ये नव वर्षाणि पंच च ॥ भरतः क्रियतां राजा पृथिव्यां पार्थिवर्ष
भः ॥ ३० ॥ चतुर्दशहि वर्षाणि रामेप्रव्राजिते वने ॥ रूढश्च कृतमूलश्च शेषंस्थास्यति ते सु
तः ॥ ३१ ॥ रामप्रव्राजनं चैव देवि याचस्व तं वरम् ॥ एवं सेत्स्यति पुत्रस्य सर्वार्थास्तव कामि
नि ॥ ३२ ॥

मसिति । ३० । रूढो दृढराज्यः कृतमूलो वशीकृतमूलबलः । शेषमायुः कालं स्थास्यतेव भवतः पुनरागमनेऽपि न राम
स्य राज्यप्राप्तिता त्पर्यं । ३१ । तं राजानं ३२

॥रा०४१ चतुर्दश हि संख्याकिमर्थमित्याह प्रजेति प्रजानां भावैः करणीभूतैः प्राप्तः स्नेहो यस्य तादृशस्तेषु प्रजासु राज्ये स्थिरो भविष्यति ॥२१॥ वरदानप्रवर्तनोपायमाह क्रोधागारं क्रुद्धे वस्त्र प्राद्य एव वार्धे ॥२२॥ एवमुपायमुद्दिश्योपाया

चतुर्दश हि वर्षाणि रामे प्रव्राजिते वनम् ॥ प्रजाभावगतस्नेहः स्थिरः पुत्रो भविष्यति ॥२१॥
क्रोधागारं प्रविश्याद्य क्रुद्धेवाश्वपतेः सुते ॥ शेष्वानन्तर्हितायां त्वं भूमौ मलिनवासिनी ॥२२॥ मास्मैनं प्रत्युदीक्षेथाः मा चैनमभिभाषथाः ॥ रुदन्ती चापि तं दृष्ट्वा जगत्यां शोकलालसा ॥२३॥ दयिता त्वं सदा भर्तुरत्र मे नास्ति संशयः ॥ त्वत्कृते च महाराजो विशेदपि हुताशनम् ॥२४॥ न त्वां क्रोधयितुं शक्तो न क्रुद्धां प्रत्युदीक्षितुम् ॥ तव प्रियार्थं राजा तु प्राणान्
नपि परित्यजेत् ॥२५॥

प्रवर्तनप्रकारमाह मास्मेति तं दृष्ट्वा रुदन्ती शोकलालसा च सती भूमौ शयाना एनं मा स्म प्रत्युदीक्षेथाः मा अभिभाषेथाः इत्यन्वयः २३ यद्येवं क्रियते तर्हि मम भर्तुः परित्यागरूपोऽनर्थ एव स्यादित्यत आह दयितेति २४

त्वयासारथ्यं कुर्वाणया ऽस्य वाक्यसंग्रामादस्मत्रनीत्वा तत्रापिता दृष्टापत्का लेपि प्राङ्खैर्विदितोऽतएवनष्ट चेतनोमूर्छितस्तेपतिस्त्वयारक्षितः प्रीतोपचारैराप्यायितः एवंद्विःप्राणरक्षणातोवरद्वयदानमित्याह ॥ १६ ॥

प ऽथवा यत्वा याादेवि संग्रामान्नष्टचेतनः ॥ तत्रापिविदितः प्राङ्खैः पतिस्तेरक्षितस्त्वया ॥ १६ ॥
तुष्टेनतेनदत्तौतुद्वौवरौशुभदर्शने ॥ सत्वयोक्तः पतिर्देवियदेच्छेयंतदावरौ ॥ गृह्णी
यामितितत्तेनतथेत्युक्तंमहात्मना ॥ १७ ॥ अहंनभिज्ञाह्यहंदेवित्वयैवकथितापुरा ॥ १८ ॥
कथैषातववृत्तस्नेहान्मनसाधार्यतेमया ॥ रामाभिषेकसंभारान्निगृह्यविनिवर्तय ॥ १९ ॥
तौवरौयाचभर्तारंभरतस्याभिषेचनं ॥ प्रव्राजनंचरामस्य त्वंवर्षाणिचतुर्दश ॥ २० ॥

तेनराज्ञापत्यदाइच्छेयंमतः तदावरौगृह्णीयांतुइत्यन्वयः ॥ १७ ॥ कथमिदंत्वयाज्ञातमित्यत्राह अहनभिज्ञेति ॥ १८
निगृह्यभर्तारंवरबलेनवशीकृत्य ॥ १९ ॥ निवर्तयप्रकारमेहत्ताविति ॥ २० ॥ २० ॥ २० ॥ २० ॥ २० ॥ २० ॥

॥रा०४०

दक्षिणांदिशमास्थाय स्थितान् दंडकान् जनपदान्प्रति तत्संवधिः वैजयंतमितिपुरं ख्यातं यत्र तिमिध्वजनामा राजाऽभवत् ।१२। स एव ख्यातो के शंवरपतिर्ख्यातः देवसंघैः सहितस्य शक्रस्य ।१३। तस्मिन्महतिपुरे दैत्यै

दिशमास्थाय वैदेवि दक्षिणां दंडकान्प्रति ॥ वैजयंतमितिख्यातं पुरं यत्र तिमिध्वजः ॥१२॥
शंवर इति ख्यातः शतमायो महासुरः ॥ददौ शक्रस्य संग्रामं देवसंघैरनिंदितः ॥१३॥
तस्मिन्महति संग्रामे पुरुषान्क्षतविक्षतान् ॥ रात्रौ प्रसुप्तान्घ्नंति स्म तरसापास्य राक्षसाः ॥१४॥ तत्राकरोन्महद्युद्धं राजा दशरथस्तदा ॥ असुरैश्च महाबाहुः शस्त्रैश्च शकलीकृतः ॥१५॥

रक्षःशस्त्रैवेधैर्विक्षतान् विशेषेणाविद्धान्पुरुषान् दिनकृतयुद्धश्रांत्या रात्रौ प्रसुप्तान् तरसा वेगेनापास्य शय्यातः राक्षसा घ्नंति स्म ।१४। तत्र तद्युद्धे शकलीकृतः सर्वांगेषु विक्षतः ।१५। ।१५। ।१५। ।१५। ।१५ रा०म०॥
३४०॥

हे कैकेयि यद्यस्मात्ते मया उच्यमानं आत्मार्थं आत्मप्रयोजनोपायं मत्तः मत्सकाशाद् श्रोतुमिच्छसि चेत्तत्तमुपायं त्वं स्म
रसि किं स्मरन्ती वा निगूहसे आच्छादयसि किं ॥६॥ मयोच्यमानं त्वत्प्रयोजनोपायं छन्दः इच्छा विधीयतां विस्मृत्य पुनः चेत्

किं न स्मरसि कैकेयि स्मरन्ती वा निगूहसे ॥ यदुच्यमानमात्मार्थं मत्तस्त्वं श्रोतुमिच्छसि ॥६॥ मयो
च्यमानं यदि ते श्रोतुं छन्दो विलासिनि ॥ श्रूयतामभिधास्यामि श्रुत्वा चैतद्विधीयताम् ॥७॥ श्रु
त्वैवं वचनं तस्या मन्थरायास्तु कैकेयी ॥ किंचिदुत्थाय शयनात्स्वास्तीर्णादिदमब्रवीत् ॥८॥ क
थय त्वं ममोपायं केनोपायेन मन्थरे ॥ भरतः प्राप्नुयाद्राज्यं न तु रामः कथंचन ॥९॥ एवमुक्ता
तदा देव्या मन्थरा पापदर्शिनी ॥ रामार्थमुपहिंसन्ती कुब्जा वाक्यमथाब्रवीत् ॥१०॥ पुरा दे
वासुरे युद्धे सह राजर्षिभिः पतिः ॥ अगच्छत्त्वामुपादाय देवराजस्य साह्यकृत् ॥११॥ तत्र

क्रियतां ॥७॥ श्रवणोऽनुष्ठाने चोत्साहं दर्शयति अभ्यायेत्यादि ॥८॥९॥१०॥ वरं स्मारयितुं पूर्ववृत्तं कथयामाह पुरेति देवासुरे दे
वासुर संवेधिनि युद्धे राजर्षिभिः सह तव पतिस्त्वामुपादाय गृहीत्वा देवराजस्य साहाय्यकर्ता अगच्छत ॥११॥

अथ रावणवधार्थं देवैः प्रेरितचित्तायाः कैकेय्याः रामाभिषेकविघातोपक्रममाह एवमित्यादि एवमुक्ता मंथरयाप्रोत्साहिता प्रोत्साहिता॥१॥ इतः नगरात्॥२॥ अथ तदुपायं पृच्छति इदं क्षितिः इदमिदानीं संप्रपश्य विचारय॥३॥ रामार्थं

एवमुक्ता तु कैकेयी क्रोधेन ज्वलितानना॥ दीर्घमुष्णं च निःश्वस्य मंथरामिदमब्रवीत्॥१
अद्य रामम् इतः क्षिप्रं वनं प्रस्थापयाम्यहं॥ यौवराज्येन भरतं क्षिप्रमेवाभिषेचये॥२॥ इदं क्षि
दानीं संप्रपश्य केनोपायेन मंथरे॥ भरतः प्राप्नुयाद्राज्यं न तु रामः कथंचन॥३॥ एवमुक्ता
तु सा देव्या मंथरा पापदर्शिनी॥ रामार्थमुपहिंसंती कैकेयीमिदमब्रवीत्॥४॥ हंतेदानीं प्र॥
पश्य त्वं कैकेयि श्रूयतां च मे॥ यथा ते भरतो राज्यं पुत्रः प्राप्स्यति केवलम्॥५॥५॥५॥

रामाभिषेकरूपप्रयोजनं उपहिंसंती विघातयंती ४ हंतेति हर्षे कैकेयी स्वमतानुवर्तिनी जातेति हर्षः ते पुत्रो
भरतः केवलं भरत एव यथा येनोपायेन राज्यं प्राप्स्यति तमुपायमिदानीं त्वं प्रपश्य आलोचय त्वयि तदु
पायपरिज्ञानाभावेपि मत्तः श्रूयताम् ५

तस्मात् अरण्ये सिंहेनाभिद्रुतं गजयूथपमिव रामेण प्रच्छाद्यमानमभिभूयमानं भरतं तदभिषेकनिरोधेन त्रातुमर्हसि
३६ अन्यथा तवाप्यनर्थ इत्याह दर्पादिति निर्यातयेत् त्वयि दास्यं तं पादनेन वैरशुद्धिं कथं न कुर्यात् ॥३७॥ उपसंहरति यदा

अभिद्रुतमिवारण्ये सिंहेन गजयूथपम् ॥ प्रच्छाद्यमानं रामेण भरतं त्रातुमर्हसि ॥३६॥ दर्पान्निरा
कृता पूर्वं त्वया सौभाग्यवत्तया ॥ राममाता सपत्नी ते कथं वैरं न यातयेत् ॥३७॥ यदा हि रामः पृथि
वीमवाप्स्यति प्रभूतरत्नाकरशैलपत्तनाम् ॥ तदा गमिष्यस्यशुभं पराभवं सहैव दीना भरतेन भा
मिनि ॥३८॥ यदा हि रामः पृथिवीमवाप्स्यति ध्रुवं प्रनष्टो भरतो भविष्यति ॥ अतो हि संचिंतय रा
ज्यमात्मजे परस्य चाद्यैव विवासकारणम् ॥३९॥ इत्यार्षे रामायणे अयोध्याकाण्डे अष्ट
मः सर्गः ॥८॥

हीति अशुभं पराभवं दास्यम् ३८ अतः आत्मजे भरते राज्यं राज्यप्राप्तिकारणं संचिंतय परस्य रामस्य विवासकारणं वनवासका
रणं संचिंतय ॥ ३९ इति विषमपदव्याख्याने अष्टमः सर्गः ॥८॥८॥८॥८॥८॥८॥८॥८॥८॥८॥८॥८॥

५

१५ सर्वे दैवताः देवाः दैवतानि पुंसि वेत्यमरः ॥ १६ ॥ परिग्रह्य धर्मपाशेन संयम्य । अभिप्रायमस्य सं ध इत्यादिना स्वकार्यसिद्धे
यो यत्नस्तु त्वाच ॥ १७ ॥ तद्भाव्यमाहस्मेत्यादि ॥ तत्र रात्रिषु देशान्तरे ग्रावरः तव जीवितमंत्र राज्ञा यांचिना त्वां गत्वा व्याप्य तत्र

निशाचराणि भूतानि यहेयुर्महदेवताः ॥ यानि चान्यानि भूतानि [illegible]नी पुर्भावितं तव ॥ १५
सत्यसंधो महातेजा धर्मरतस्समाहितः ॥ वरं मम ददात्येष सर्वे [illegible] एवं तु दैवताः ॥ १६ ॥ इति दे
वी महेष्वासं परिगृह्याभिभाष्य च ॥ ततः परमुवाचेदं वरदं काममोहितम् ॥ १७ ॥ स्मरराजन्पु
रा वृत्तं तस्मिन्देवासुरे रणे ॥ तत्र त्वां च्यावयच्छत्रुस्तव जीवितमंतरा ॥ १८ ॥ तत्र चापि मया
देव यत्त्वं समभिरक्षितः ॥ जाग्रत्या यतमानाया ततो मे प्रददौ वरौ ॥ १९ ॥ तौ दत्तौ च वरौ देव नि
क्षेपौ मृगयाम्यहम् ॥ तवैव पृथिवीपाल सकाशे सत्यसंगर ॥ २० ॥

च्युतवीर्यमकरोत् प्रउभावप्रार्थः १८
जाग्रत्या मया यत्नतस्त्वं समभिरक्षितस्ततः स्वजीवनाय यतमानाया मम भवान्वरौ प्रददौ ॥ १९ ॥ तौ वरौ तवैव सकाशे नि
क्षेपभूतौ त्वय्येव स्थापितौ इदानीं त्वमाद्मैस्मी कर्तुं मृगयामि प्रार्थये यामि ॥ २० सा तातामा

नन्वेषदेषो बालत्वाल्लक्ष्मणस्यापि समानो तत्राह गोप्ताहीति ॥ ३१ पापं वधं ॥ ३२ तस्माद्राघवस्य भावनाशत्वात् राजगृहाद्देव
राघवो भरतः मह्यं रोचते त्वदिष्टत्वात् भृशं चापि हितं तव वेषु च यौवनसंभवात ॥ ३३ एवं चेत् एवं सति मातुलस्य

गोप्ता हि रामं सौमित्रिर्लक्ष्मणं चापि राघवः । अश्विनोरिव सौभ्रात्रं तयोर्लोकेषु विश्रुतं ॥ ३१
तस्मान्न लक्ष्मणे रामः पापं किंचित्करिष्यति ॥ रामस्तु भरते पापं कुर्यादिति न संशयः ॥ ३२ ॥
तस्माद्राजगृहादेव वनं गच्छतु राघवः ॥ एतद्धि रोचते मह्यं भृशं चापि हितं तव ॥ ३३ ॥ एवं चे
ज्ञाति वर्गस्य श्रेयश्चापि भविष्यति ॥ यदि चेद्भरतो धर्मात्पित्र्यं राज्यमवाप्स्यति ॥ ३४ ॥
स ते सुखोचितो बालो रामस्य सहजो रिपुः ॥ समृद्धार्थस्य नष्टार्थो जीविष्यति कथं वशे ॥ ३५ ॥

हादेव वनगमने सति ते ज्ञातिवर्गस्य श्रेयस्यदादेः श्रेयः जीवनं सुखं च भविष्यति । यदि । चेत् यदि वा धर्मात् पित्र्यं
दीप्रमानत्व रूपान्भरतः पित्र्यं राज्यं अवाप्स्यति तदा वा ज्ञातिवर्गस्य श्रेयः इत्यर्थः ॥ ३४ ॥ अनन्यथा दुःखमेवेत्याह सत इ

रम करोति के भावान्नर्थप्रद रूपि के केपी कारे कमप्यनर्थं दर्शयति बाल एव हीति मातुल्यं मातुलगृहं नायितः प्रापितः न
नु किं तावता अत आह सन्निकर्षादिति स्थावरेष्वपि तितलागुल्मादिष्वपि सन्निकर्षात् सौहार्दं अन्योन्यापेक्षा रूपं जा
यते तादृशश्च सन्निकर्षस्त्वया विघटित इति भावः ।२८। शत्रुघ्नस्थितौ वा भरतस्य कार्यस्यत्वनाशः स्यात्सोपि गत इत्याह भ

बाल एव हि मातुल्यं भरतो नायितस्त्वया ॥ सन्निकर्षाच्च सौहार्दं जायते स्थावरेष्वपि ॥ २८ ॥ भरत
स्याप्यनुवशा वयं शत्रुघ्नोपि समागतः ॥ लक्ष्मणोहि प्रियो रामं तथासौ भरतं गतः ॥ २९ ॥ श्रूयते हि
द्रुमः कश्चिच्छेत्तव्यो वनजीविभिः ॥ सन्निकर्षादिषीकाभिर्मोचितः परमाद्भयात् ॥ ३० ॥

रतस्येति अनुवशा वशवर्तिनो वयं पिता दैववशात्स्वर्गं गतः एक शत्रुघ्नः सोपि तत्रेति शेषः ।२९। स्थावरेष्वपीति
यदुक्तं तदुपपादयति श्रूयते हीति वनजीविभिः वनोद्भवतत्सलाकाष्ठजीविभिः व्याधादिभिः छेत्तव्यः कश्चिद्द्रुमः
कंटकप्रचुरवेत्रलतादिभिः सन्निकर्षाच्छेत्तो भयं दनरूपाद्भयान्मोचितः अश्वच्छाद्य रहित इति श्रूयते हीति
योजना तस्मात्सन्निकर्षो रक्षणाकारणं स त्वयैव परिहृतः ॥ ३० ॥

भरतोपि रामराज्यानंतरं राज्यमवाप्स्यतीत्युक्तं दूषयंती भवितेति परिहास्यते हीनो भविष्यति ॥२२॥ तत्र हेतुमाह नहीति स
र्वेषां राज्ये स्थितौ बाधकमाह स्थाप्यमानेष्विति ॥२३॥ अनयो न्यायः ईर्ष्यया परस्परप्रजापीडनरूपः ॥२३॥ राज्यतंत्राणि राज्यं
गानि हस्त्यश्वादीनि ज्येष्ठस्याऽगुणवत्त्वे तु गुणवत्कनीयःस्वपि ॥२४॥ तस्माज्ज्येष्ठे देवत्कनीयःपदेवमतोः सावितीति

भविता राघवो राजा राघवस्य च यः सुतः ॥ राजवंशात्तु भरतः कैकेयि परिहास्यते ॥२२॥ न हि राज्ञः
सुताः सर्वे राज्ये तिष्ठन्ति भामिनि ॥ स्थाप्यमानेषु सर्वेषु सुमहाननयो भवेत् ॥२३॥ तस्माज्ज्येष्ठे
हि कैकेयि राज्यतंत्राणि पार्थिवाः ॥ स्थापयंत्यनवद्यांगि गुणवत्स्वितरेषु च ॥२४॥ असा
वत्यंतनिर्भग्नस्तव पुत्रो भविष्यति ॥ अनाथवत्सुखेभ्यश्च राजवंशाच्च वत्सले ॥२५॥ साहं त्व
दर्थे संप्राप्ता त्वं तु मां नावबुध्यसे ॥ सपत्निवृद्धौ या मे त्वं प्रदेयं दातुमर्हसि ॥२६॥ ध्रुवं तु भरतं रा
मः प्राप्य राज्यमकंटकम् ॥ देशांतरं नाययिता लोकांतरमथापि वा ॥२७॥ सीतारामाय नमः।

अभग्नो हि नः वत्सले सर्वत्र दयाप्रीते ॥२५॥ त्वदर्थे त्वत्पुत्रराज्यभ्रंशपरिहारकथनार्थं सपत्नीवृद्धावित्यार्थो हृत्वः प्रदे
यं पारितोषिकं अर्हसि अर्हैर्वा चरसि इच्छसीत्यर्थः ॥२६॥ नाययिता नयिष्यति लोकांतरमिति हनिष्यतीति यावत् ॥२७॥

सात्वंह्यभ्युदयेरामाभिषेकरूपेवर्तमानेप्राप्तेइदानींप्राप्तेकल्याणेतोभरतामिषेकरूपेकियताकालेनभविष्यतिचकिम
र्थंपरितप्यसे ।१७। तथाशपितोपिभरतादपिभूयोस्यति प्रायेणराघवोमान्यःकुतःकौशल्यातोऽतिरिक्तःअधिकं।
१८। सत्वयापिभरतस्यराज्यमहत्सैवेत्याहराज्यमिति ।१९। एवंराज्यापहारपरिहृतवतींकैकेयींमंथरातीयपर्या

सात्वमभ्युदयेप्राप्तेवर्तमानेचमंथरे ।भविष्यतिचकल्याणेकिमर्थंपरितप्यसे ॥१७॥ यथामेभ
रतोमान्यस्तथाभूयोपिराघवः ।कौशल्यातोतिरिक्तंचसोनुशुश्रूषतेहिमाम् ॥१८॥ राज्यंयदिह
रामस्यभरतस्यापितत्तथा ।मन्यतेहियथात्मानंतथाभ्रातॄंस्तुराघवः ॥१९॥ कैकेय्यावचनंश्रु
त्वामंथराभृशदुःखिता ।दीर्घमुष्णंचनिःश्वस्यकैकेयीमिदमब्रवीत् ।२०। अनर्थदर्शिनी
मौर्ख्यान्नात्मानंनावबुध्यसे ॥ शोकव्यसनविस्तीर्णेमज्जंतीदुःखसागरे ॥२१॥ सीतारामाभ्यांनमः

येनापुनर्भेदयतिकैकेय्याइति ।२०। अनर्थदर्शिनीअनर्थस्यैवानर्थत्वेनदर्शनशीलाशोकःदुःखवियोगजः ।व्यसनंवि
पत्तिर्यस्तनताभ्यांविस्तीर्णेव्याप्तेदुःखसागरेमज्जंतीत्वमात्मानंमज्जंतंनावबुध्यसेरत्यर्थः ।२१। ततततारारारारारारारा

अ॰ ३६

अप्रमनर्थोऽयमित्यापीत्या हृएवं चेति ॥११॥ परमाः स्त्रिय इति बहुवचनेन सीतासख्यः भरतक्षये भरतप्रभावनाशे
वा १२ परमप्रीतां परं रामे अप्रीतामित्यर्थः देवी शुद्धस्वभावा ॥२३॥ मंथरोक्तमुपेक्ष्य प्रतिद्विपति धर्मज्ञस्त्या

एवं च त्वं सहास्माभिस्तस्याः प्रेष्या भविष्यसि ॥ पुत्रश्च तव रामस्य प्रेष्यभावं गमिष्यति ॥११॥
हृष्टाः खलु भविष्यंति रामस्य परमाः स्त्रियः ॥ अप्रहृष्टा भविष्यंति स्नुषास्ते भरतक्षये ॥१२॥ तां
दृष्ट्वा परमप्रीतां ब्रुवंतीं मंथरां ततः ॥ रामस्यैव गुणान्देवी कैकेयी प्रशशंस ह ॥१३॥ धर्मज्ञो गुरु
भिर्दांतः कृतज्ञः सत्यवाक् शुचिः ॥ रामो राज्ञः सुतो ज्येष्ठो यौवराज्यं ततोर्हति ॥१४॥ भ्रातॄन्भृ
त्यांश्च दीर्घायुः पितृवत्पालयिष्यति ॥ संतप्यसे कथं कुब्जे श्रुत्वा रामाभिषेचनम् ॥१५॥ भरत
श्चापि रामस्य ध्रुवं वर्षशतात्परम् ॥ पितृपैतामहं राज्यमवाप्स्यति नरर्षभः ॥१६॥ सीता रामा

दिना गुरुभिर्दांतः सुशिक्षितः ज्येष्ठत्वेनैन तस्यैव राज्यं योग्यमिति तस्या धारणां परिहृतम् ॥१४॥ भरतानर्थोपि नेत्य
हृत्या ह्वनिति ॥१५॥ वर्षशतात्परं रामराज्यानंतरमित्यर्थः अवाप्स्यति अवाप्स्यति ॥१६॥ रामरामरामरामरामरामरामराम

रामा॰
३६

तपो राज्यसाधारणाभावे हेत्वंतरमाह प्रत्यासन्नेति प्रत्यासन्नोपः क्रमः अत्यतिक्रमहीनापि हेतुना भरतस्यैव राज्यक्रमः
सन्निहितः प्रतिशेषः तपोस्तु पवीयस्त्वात्तु विप्रकृष्टो दूरस्थः क्रदत्तमर्थः ॥ ७ ॥ पुनः रामाभ्द्रयमुपसंहरति विदुषः सर्वे प्राप्त्यज्ञस्य
स्वेच्छाचारित्रे राजनीति विषये प्राज्ञस्य प्राप्तकारिणः अविलंबेन कालोचितकर्त्तव्यार्थकारिणो ममस्य भ पात्त वात्म

प्रत्यासन्नक्रमेणापि भरतस्यैव भामिनि ॥ राज्यक्रमो विप्रकृष्टस्तपोस्तावद्दवीयसोः ॥ ७ ॥ विदुषः
स्वचारित्रे प्राज्ञस्य प्राप्तकारिणः ॥ ममास्त्वेवे परामस्य चिंतयंतीत वात्मजम् ॥ ८ ॥ सभगास्व
लुकौ प्राप्त्याप्रस्याः पुत्रोभिषिच्यते ॥ यौवराज्येन महता भवःपुष्येण तद्धि जोत्तमैः ॥ ९ ॥ प्राप्तांवसुम
तीं प्रीतिं प्रतीतां तां हतद्विषम् ॥ उपस्थास्यसि कौसल्यां दासीवत्वं कृतांजलिः ॥ १० ॥ श्री सीता

जम् क्रवैदुष्यादिरहितं चिंतयंतीतन्निमित्ता द्रुपात प्रवेपकंपे ॥ ८ ॥ एवं पुत्रान र्थं प्रदर्श्य पितस्या अप्यनर्थं दर्शयितुं कौ
सल्याः वृद्धिमाह सुभगेति सुभगा भाग्यवती त्वापि यौवराज्येन तिहेतौ न तीया पुष्येण पुष्ये ॥ ९ ॥ वसुमतीं प्राप्तां तत्स्वाप्रि
तिमितां प्रीतिं च प्राप्तां हतापुष्यदादिसपत्नी रूपा विद्विषो यथा तां अतएव प्रतीतां सिद्धे उपस्थास्यसि गत्वा सेविष्यसे ॥ १० ॥

यद्यस्मात्त्वं हृदि इदं व्यसनं रामराज्यप्राप्तिरूपं विपदं प्राप्य शोचितव्ये हृष्टासि तस्माद्दुःखेन पीडिताहं त्वां मनसा प्रहसा
मि ते तव दुर्मतित्वं गृहनर्थकरं प्रीतिविषयत्वं शोचामि । सपत्नीरिवस्य तुल्यस्य सपत्नीपुत्रस्य श्वो रेः श्रा ज्ञो रामस्य भाग ।
तो वृद्धिं का हि प्राज्ञा प्रहर्षयेत् प्रहर्षसाधनं कुर्यात् ॥४॥ सपत्नीरिवेति व्युत्पादप्रति भरतादिति रामस्य भरता देवभयमसि

मनसा प्रहसामि त्वां देवि दुःखार्दिता सती ॥ यच्छोचितव्ये हृष्टासि प्राप्येदं व्यसनं महत् ॥३॥ शो
चामि दुर्मतित्वं ते का हि प्राज्ञा प्रहर्षयेत् ॥ अरेः सपत्नीपुत्रस्य वृद्धिं मृत्योरिवागताम् ॥४॥ भर
तादेव रामस्य राज्यसाधारणाद्भयम् ॥ तद्विचिन्त्य विषण्णास्मि भयं भीताद्धि जायते ॥५॥ लक्ष्म
णो हि महेष्वासो रामं सर्वात्मनागतः ॥ शत्रुघ्नश्चापि भरतं काकुत्स्थं लक्ष्मणो यथा ॥६॥

तत्र हेतुः राज्यसाधारणाद्धितिराज्ये साधारणं यस्मात् राज्यरूपसाधारणाद्भोग्याद्धेतोर्भरतादेव रामस्य भयं पश्यति
तद्विचिन्त्य विषण्णास्मि कुतः हि यतः भयं भीताज्जायते यो यस्माद्भीतः स तस्य भयमुत्पादयति अतो भीतो रामः भ
यहेतुं भरते निराकुर्यादेवेति भावः ॥५॥ लक्ष्मणो रामं शत्रुघ्नो भरतं पितरि राज्यसाधारणं किं न स्यादित्याशंक्य तयोस्तत्परत्वे
त्वात्तत्साधारण्यमित्याह लक्ष्मणो हीति सर्वात्मना गतः मनोवाक्कायव्यापारैरनेनैवोक्तं प्राप्तः ॥६॥६॥६॥६॥६॥

२

हे प्रियार्ह प्रियदानार्ह मे स्तः परं रामाभिषेककथनादन्यत् प्रियं श्रुभिमतं परं वचः त्वया पुनर्नस्तुवचैव वक्तुं शक्यं हि
यस्मात्कारणात् त्वं तथाश्रवोचः सर्वप्रियेभ्योऽधिकश्रीरामाभिषेकमुक्तवत्यसि श्रतः प्रियोत्तरं प्रियाख्यान
स्योत्तरपारितोषिकरूपं परं श्रन्यं वरं ते तुभ्यं प्रददामि तं वृणुष्वेति योजना। ३६ इति सप्तमः सर्गः॥ ७॥ मं

न मे परं किंचिदितस्त्वया पुनः प्रियं प्रियार्हे सुवचं वचो वरम्॥ तथा ह्यवोचस्त्वमतः प्रियोत्तरं
परं वरं ते प्रददामि तं वृणु॥ ३६॥ इत्यार्षे रामायणे श्रयोध्याकाण्डे सप्तमः सर्गः॥ ७॥ मंथरा ह्य
भ्यसूयैनामुत्सृज्याभरणं च तत्॥ उवाचेदं ततो वाक्यं कोपदुःखसमन्विता॥ १॥ हर्षं किमिदम
स्थाने कृतवत्यसि बालिशे॥ शोकसागरमध्यस्थमात्मानं नावबुध्यसे॥ २॥ सीताराम्रायममम॥

पकुमतिजनसंसर्गान्महतामपि कदाचिच्चित्तं चलेदित्याद्यर्थं द्योतयन्नाह मंथरेति श्रभ्यसूय शसूर्यां कृत्वा एनां
प्रतीति शेषः हितामवरणात्कोपः एतदहितं जायतइति दुःखं १ बालिशे मूर्खे श्रस्थाने प्रहर्षविषये हर्षं कृतव
त्यसि इदं किंचिन्नमित्यर्थः २

प्र०२४

सा त्वं प्राप्तकाले प्राप्तावसरे यत्तव हितं तत्कुरु विस्मयदर्शने अद्भुतदर्शने तत्कालोचितोपायविचारकुशले इत्यर्थः ३०
एवं मंथरया नर्मत्वेन प्रकाशिते रामाभिषेके महाकुलप्रसूता निसर्गिकस्या रामस्नेहात् सर्वं ज्ञातं हि मन्यमाना हमे प्रव

सा प्राप्तकाले कैकेयि प्रियं कुरु हितं तव ॥ त्रायस्व पुत्रमात्मानं मां च विस्मयदर्शने ॥३०॥
मंथराया वचः श्रुत्वा शयनात्सा शुभानना ॥ उत्तस्थौ हर्षसंपूर्णा चन्द्रलेखेव शारदी ॥३१॥
अतीव सा तु संहृष्टा कैकेयी विस्मयान्विता ॥ एकमाभरणं तस्यै कुब्जायै प्रददौ शुभम् ॥३२॥
दत्त्वा त्वाभरणं तस्यै कुब्जायै प्रमदोत्तमा ॥ कैकेयी मंथरां दृष्ट्वा पुनरेवाब्रवीदिदम् ॥३३॥
इदं हि मे प्रियं मह्यमाख्यासि परमं प्रियम् ॥ एतन्मे प्रियमाख्यातुं भूयः किं वा करोमि ते ॥३४॥
रामे वा भरते वाहं विशेषं नोपलक्षये ॥ तस्मात्तुष्टास्मि यद्राजा रामं राज्येऽभिषेक्ष्यति ॥३५॥

प्रहस्यादि ॥३१॥ विस्मयः अत्यद्भुतत्वेन श्रवणात ॥३२॥ ३३ मे प्रत्तप्रियं भूयः आख्यातुं ते किं वा करोमीति संबंधः
॥३४॥३५॥

रा० ३४

अपवाह्य वं धुरश्रीनश्राजेनाल्प ब्रनीत्वा कालमर्हतीति काल्यं श्वः प्रातःकाले स्थापयिष्यति २५ हे बाले श्रा
गाम्यनर्थान मिति पतिप्रवादेन पति व्यपदेशेन शत्रुः हितकाम्यया हिताचरणेन मात्रेव मातस्तुल्यया अंकेना

अपवाह्य स दुष्टात्मा भरतं तव बंधुषु ॥ काल्यं स्थापयिता रामं राज्ये निहतकंटके ॥ २६ ॥ श
त्रुः पतिप्रवादेन मात्रेव हितकाम्यया ॥ आशीविष इवांकेन बाले परिधृतस्त्वया ॥ २७ ॥ य
था हि कुर्यात्सर्पो वा शत्रुर्वा प्रत्युपेक्षितः ॥ राज्ञा दशरथेनाद्य सपुत्रा त्वं तथा कृता ॥ २८
पापेनानृतसांत्वेन बाले नित्यं सुखोचिते ॥ रामं स्थापयिता राज्ये सानुबंधा हतास्यसि ॥ २९

शीविषः सर्पस्तद्वत्परिधृतः रक्षितो जनः यथा सर्पः पोषयित्री बालां सर्पस्पोत विषमत्वात् त्वां केवलं हितकाम्यया अंके
उपलालयति तथा त्वमपि बाला अभर्तृ कुटिलहृदयं न जानतीति तं अंके उपलालयसीत्यर्थः २७ तद्वारणेन चेतेऽन
र्थः स एव तस्माह यथेति शत्रुपेक्षितः उपेक्षितत्वान्ना प्राः २८ कथं हतेत्यत्राह पापेनेति सानुबंधा पुत्रमित्रादिसहिता
२९

॥ श्र० ४१

तदर्पमनाः तस्मिन्संकल्पिते पर्यमनोप्रस्माः सातदभिप्रायंततत्त्वाभिमतार्थसंपादनं अभिप्रायो यस्यतं अभ्यागतं अभ्यागतकल्पमेप्राप्तं दर्शनं ज्ञात्वा निर्माध्यस्यात्तमाध्यस्थाभावमवलंब्य स्वपुत्रवदेपातेनेति यावत् हृषीत् राज्ञः स्ववशात्स्वदर्शनजात दर्पेन शत्रूनामपि वक्रमशक्यं वचो वभाषे भाषितुमारब्धवती ॥११॥ ते

सा तद्दर्पमनादेवी तदभिप्रायमागतम् ॥ निर्माध्यस्यात्सहर्षोच्चैर्वभाषेदूर्वंचवचः ॥११॥
तेन वाक्येन तं दृष्ट्वा तमभिप्रायमात्मनः ॥ व्याजहार महाघोरमभ्यागतमिवोत्तमम् ॥१२॥
प्रपाक्रमेणप्राप्तस्विवरंममददामिच ॥ तन्ङ्कृत्वैवंतुत्र्यहिंशदेवाःसेंद्रपुरोगमाः ॥१३॥
चंद्रादित्यौनभश्चैववगनहारात्महनीदिशः ॥ जगच्चपृथिवीचैवपर्वताःसरितस्तथा ॥१४॥

न वाक्येन त्वमेव प्राप्यपूर्वकं स्ववचनं किं यावाक्येन अभ्यागतमेतत्कमिव घो[illegible]नः प्राणाहरं तमात्मनोऽभिप्रायं व्याजहार व्याहर्तुं निश्चितवती ॥१२॥ त्वत्तः प्रतिसाम शेषसाक्षीकरोति स्थिरयति प्रपाक्रमेणेति अतिप्रियपुत्रस्नेहतादिक्रमेण प्राप्यं कथंचित्पूर्वकं वरं त्वममददासि इति तव वाक्यं ॥१३॥ जगत्पदोक्तस्वर्गादिभुवनदेवताविषयं भुवनेजगदित्यमरः पृथिवीपर्वताद्यभिमानदेवता ॥१४॥

दम० ॥
४१ ॥

रा० ३३

दुःखशोकसमन्विता अहमभिमतलाभाभिषेकश्रवणाद्दुःखं प्राप्ता अभिमतभरताभिषेकाद्धि स्याच्छोकः क्रोशाभ्यां सम
न्विता शत्रुराज्यसमागतस्य वततोभये त्वद्धितार्थे त्वद्धितावोधनार्थं ॥ २१ ॥ ननु दासी त्वं किं कुतो भयमागतमित्याह तवेत्यादि ॥ २२

सास्म्यागाधेमवेमाना दुःखशोकसमन्विता ॥ दह्यमानानलेनेव त्वद्धितार्थमिहागता ॥ २१ ॥
तव दुःखेन कैकेयि मम दुःखं भवेन्महत ॥ त्वद्वृद्धौ मम वृद्धिश्च भवेदेव न संशयः ॥ २२ ॥ नरा
धिपकुले जाता महिषी त्वं महीपतेः ॥ उत्तमं राजधर्माणां कथं देवि न बुध्यसे ॥ २३ ॥ धर्मवादी
शठो भर्ता श्लक्ष्णवादी च दारुणः ॥ शुद्धभावेन जानीषे तेनैवमतिसंधिता ॥ २४ ॥ उपस्थितं प्र
युंजानस्त्वयि सांत्वमनर्थकं ॥ अर्थेनैवाद्य ते भर्ता कौसल्यां योजयिष्यति ॥ २५ ॥ सीतारामाय

उत्तमं क्रौर्ये ॥ २३ ॥ धर्मवादी वाङ्मात्रधार्मिकः ॥ श्लक्ष्णवादी च स्मितमधुरभाषी एवं तत्तु शठः अरूपावान् अतः
व दारुणः क्रूरहृदयः शुद्धभावेन इति सं वोधने शुद्धहृदये तमेवं न जानीषे सर्वपातेन एवं उक्तरीत्या अतिसंधिता वं
चितेत्यर्थः ॥ २४ ॥ उपस्थितः त्वत्समीपे स्थितः अनर्थकं फलरहितं सांत्वं प्रियवचनं त्वयि प्रयुंजानः अर्थेन राज्यरूप

रा०म० ३३

सभगाकारे पूर्णमनाकारे स्वनिष्ठे भर्तरि प्रिये सौभाग्येन पतिव्रतत्वेन विकल्पसे आत्मानं वृथा कल्पयसे उत्तमयोगे नीचयोगे स्वी
तति न घाःस्वा न स्वतत्वसौभाग्यं चञ्चलं लोमाभिरेकान्तीताश्रामभिलाषाः १५ विषादमगामत्स्वसिमन्न राजवैरस्यो मदा
वनात् १६ कश्चित्त्वो मं न मत्यमिति शेषः १७ १८ विषादं दंपती राज्यभ्रंशोऽगमतामिलरूपानिष्ठत्वकामनेन

स्वनिष्ठे सभगाकारे सौभाग्येन विकल्पसे ॥ चञ्चलं हित वसौभाग्येन घाःस्वीत स्वो स्मगे ॥ १५
एवमुक्त्वा तु कैकेयीं रूक्षया परुषं वचः ॥ कुब्जा पापापदर्शिन्या विषादमगमत्परम् ॥ १६ ॥ कै-
केयी चैव तीत्कुब्जां कश्चित्त्वो मं न मंथरे ॥ विषसाव दनो हि त्वां त्वत्प्रियेन प्रदुःखिताम् ॥ १७ ॥
मंथरा तु वचः श्रुत्वा कैकेय्या मधुरादरम् ॥ उवाच क्रोधसंरब्धा वाक्यं वाक्यविशारदा ॥ १८
सा विषमतरं श्रुत्वा कुब्जा तस्या हितैषिणी ॥ विषाददंपतीशो वाचमेदंपती च राघवम् ॥ १९ ॥
अत्यन्तं हि महद्देवि प्रवृत्तं त्वद्विनाशनम् ॥ रामं दशरथो राजा यौवराज्येऽभिषेक्ष्यति ॥ २० ॥।।

कैकेय्या विषादं जनपतीराघवं मेदंपतीतामंश्रुतिकैकेय्या विरोधं जनपतीत्सर्यः १९ अत्यन्तमशुभं प्रवृत्ती कारं त्वद्विनाशं

समग्राकारे सुप्रभान्वाकारे स्वनिष्ठे भर्तरि प्रिये सौभाग्येन पतिवल्लभत्वेन विकत्थसे श्लाघसे आत्मानं च या कृत्वा घसे उक्तमेव नोच्यते स्वौ
रुतिं न घाः स्वोतः स्वतव सौभाग्यं चञ्चलं त मा भिषे कान्ती राज्ञा न मिलाप भूपः १५ विषादमगमत्तस्य स्मिन् राजवैरस्योन्म
वनात् १६ कश्चित् त्वां मनसा मत्यमिति श्रोषः १७ १८ विषाद दंपती राज्य भिल्लयोर्गामि लरूपानि वृक्षकाष्ठानेन

ऽवनिष्ठे समग्राकारे सौभाग्येन विकत्थसे ॥ चपलं हि तव सौभाग्यं न घाः स्वोतः स्वोऽस्म गे ॥ १५
एवमुक्तास्तु केकेयी रुक्षया परुषं वचः ॥ कुब्जया पापदर्शिन्या विषादमगमत्परम् ॥ १६ ॥ के
केयी त्वब्रवीत्कुब्जां कच्चिद्देमं न मन्यसे ॥ विषण्णवदनां हि त्वां लक्षये भृशदुःखिताम् ॥ १७ ॥
मन्थरा तु वचः श्रुत्वा केकेय्या मधुराक्षरम् ॥ उवाच क्रोधसंयुक्ता वाक्यं वाक्यविशारदा ॥ १८
सा विषण्णतरा भूत्वा कुब्जा तस्या हितैषिणी ॥ विषादयन्ती प्रोवाच भेदयन्ती च राघवम् ॥ १९ ॥
अक्षयं सुमहद्देवि प्रवृत्तं त्वद्विनाशनम् ॥ रामं दशरथो राजा यौवराज्येऽभिषेक्ष्यति ॥ २० ॥

केकेय्या विषादं जनयन्ती राघवं भेदयन्ती रामं प्रति केकेय्या विरोधं जनयन्ती मन्थरा १७ अक्षयम् अशक्यप्रतीकारं त्वद्विना

जनस्यायमत्यंतप्रहर्षश्च किं किंनिमित्तं महीपतिः किं कर्म कारयिष्यति ९ उदीर्यमाणा उपचितगात्रा राघवे रामेऽन्यस्य मानो भूयसीं श्रियं राज्यलक्ष्मीम् ॥ १० ॥ अनघं क्रोध्यकारागोध्यारहितम् ॥ ११ ॥ प्रावरोहत अवारोहत ॥ १२ ॥ पापदर्शिनी

अतिमात्रं प्रहर्षोऽयं किं जनस्य च शंस मे ॥ कारयिष्यति किं वापि संप्रहृष्टो महीपतिः ॥ ९ ॥
उदीर्यमाणा हर्षेण धात्री परमया मुदा ॥ आचचक्षेऽथ कुब्जायै भूयसीं राघवे श्रियम् ॥ १० ॥
श्वः पुष्येण जितक्रोधं यौवराज्येन राघवम् ॥ राजा दशरथो राममभिषेचयितानघम् ॥ ११ ॥
धात्र्यास्तु वचनं श्रुत्वा कुब्जा क्षिप्रममर्षिता ॥ कैलासशिखराकारात्प्रासादादवरोहत ॥ १२ ॥
सा दह्यमाना कोपेन मंथरा पापदर्शिनी ॥ शयानामेत्य कैकेयीमिदं वचनमब्रवीत् ॥ १३ ॥
उत्तिष्ठ मूढे किं शेषे भयं त्वामभिवर्तते ॥ उपप्लुतमघौघेन किमात्मानं न बुध्यसे ॥ १४ ॥

रामाभिषेके कैकेय्या भरतविषयपापदर्शिका ॥ १३ ॥ अघौघेन दुःखपरंपरया उपप्लुतं पीडितमात्मानं किं न बुध्यसे किं न जानासि ॥ १४ ॥

चंदनयुक्ततोयैः सिक्तां शिरःस्नातजनैः कृतमंगलस्नानैर्जनैर्वृतां माल्यमोदकहस्तैः श्रीरामोपायनार्थं माल्यमोदकहस्त मंगलद्रव्याणि हस्ते दधानैरित्यर्थः शुक्लानि शुभ्राणि वस्त्राणि देवगृहाणां द्वाराणि यस्यां तां ४ ब्रह्मघोषो।

सिक्तां चंदनतोयैश्च शिरःस्नातजनैर्युताम् ॥ माल्यमोदकहस्तैश्च द्विजेन्द्रैरभिनादिताम् ॥ प्रफुल्लदेवगृहद्वारां सर्ववादित्रनादिताम् ॥ ४ ॥ संप्रहृष्टजनाकीर्णां ब्रह्मघोषाभिनादिताम् ॥ प्रहृष्टवरहस्त्यश्वां संप्रणर्दितगोवृषाम् ॥ ५ ॥ प्रहृष्टमुदितैः पौरैरुच्छ्रितध्वजमालिनीम् ॥ अयोध्यां मंथरा दृष्ट्वा परं विस्मयमागता ॥ ६ ॥ साहर्षोत्फुल्लनयनां पाण्डुरक्षौमवासिनीम् ॥ अविदूरे स्थितां दृष्ट्वा धात्रीं पप्रच्छ मंथरा ॥ ७ ॥ उत्तमेनाभिसंयुक्ता हर्षेणार्थपरा सती ॥ राममाता धनं किं नु जनेभ्यः संप्रयच्छति ॥ ८ ॥

वेदघोषः ३ हृष्टवरेत्यादिना तिरश्चामपि श्रीरामाभिषेकाद्धर्षः सूचितः ५ हृष्टैर्जातरोमांचादिभिः प्रमुदितैरानंदयुक्तैः पौरैरुपलक्षितां ६ धात्रीं रामस्येति शेषः ७ अर्थपरा अर्थसंग्रहपरापि प्रीतिहेतोराह किं नु किं कारणम् ८

रा०३१

पूर्वसर्गे गतेपुरोहिते रामस्तत्पारम्य पूर्वसिध्याम् पासीनः स्वं तेनतस्त्वं पसदृशै रात्सूर्पोदयपर्यंते स्त्रीरामवृत्तांतम नुवर्णयं संप्रतिकैकेय्याः पूर्वदिवसवृत्तांतमनुसंधत्ते ज्ञातिदासीत्यादिना कैकेय्याः ज्ञातीनो वधूनां दासीत्यपत्रकुत्रचिज्ज्ञाताना प्रविज्ञातवेश्म मातृपितृकैस्यपैः सहोषिता कैकेय्या सह स्थिता चंद्रसंकाशं स्वधा

ज्ञातिदासीयतोजाता कैकेय्यास्तु सहोषिता॥ प्रासादं चंद्रसंकाशमारुरोह यदृच्छया॥१॥ सिक्तराजपथां कृत्स्नां प्रकीर्णकमलोत्पलां॥ अयोध्यां मंथरा तस्मात्प्रासादादन्ववैक्षत॥२॥ पताकाभिर्वराहाभिर्ध्वजैश्च समलंकृतां॥ वृतां छन्नपथैश्चापि सिक्तदकपथैर्वृतां॥३॥

धवलितत्वात् प्रक्षुपाध्य कस्मात् तदृक्षं पक्षपुरातो मे यातनाम का पर्यंमपरा प्रेषितातस्यैः दासी कांचनकैकेय्या दत्ता कैकेयमनूपतेति कायार्थंशवला वर्धरूपका थेति॥१॥ प्रकीर्णानि कमलानि उत्पलानि च यस्यां पा सादात् प्रासादम धिरुह्य तस्यर्पौः॥२॥ वराहाभिः श्रेष्ठाभिः पताकाभिः छन्नपथैः परितनिम्नोन्नतप्रदेशैः कृता मंलंकृतां सवदकपथैः उत्सवादिषु जनतमधस्त्वेनत्वैरप्रवेशा

रा०म०
३१

विश्रुतवृत्तान्ताः दिग्भ्यः प्राप्ता जानपदा जनाः एवंविधं कथयतां पौराणां कथाः शुश्रुवुरित्यन्वयः २५ ते जानपदा रामस्य पुरीमित्यन्वयः २६ विसर्पद्भिः प्रवेशार्थं उदीर्णवेगस्य उत्थवेगस्य २७ इंद्रक्षयं इंद्रनिवासः अयोध्यापुरस्यामरावतीसादृश्येन वक्ष्यते तस्या रम्यत्वं द्रुमवनदृष्ट्या तीकरणादयोध्यायाः प्रतिरमणीयता घोषे

एवंविधं कथयतां पौराणां शुश्रुवुस्तदा ॥ दिग्भ्यो विश्रुतवृत्तान्ताः प्राप्ता जानपदा जनाः ॥ २५

६ ते तु दिग्भ्यः पुरीं प्राप्ता द्रष्टुं रामाभिषेचनम् ॥ रामस्य पूरयामासुः पुरीं जानपदा जनाः ॥ २६ ॥ जनौघैस्तैर्विसर्पद्भिः शुश्रुवे तत्र निस्वनः ॥ पर्वसूदीर्णवेगस्य सागरस्येव निस्वनः ॥ २७ ॥ ततस्तदिंद्रक्षयसन्निभं पुरं दिदृक्षुभिर्जानपदैरुपागतैः ॥ समंततः सस्वनमाकुलं बभौ समुद्रयादोभिरिवार्णवोदकम् ॥ २८ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये अयोध्याकाण्डे षष्ठः सर्गः ६

ते जानपदैः समंततः सस्वनमाकुलमिति संबंधः समुद्रयादोभिः समुद्रांतर्वर्तिभिस्तिमितिमिंगिलादिभिर्जलजंतुभिः सस्वनमर्णवोदकमिव २८ इति विषमपदव्याख्याने षष्ठः सर्गः रामासीतारामासीता

॥ अ०३० ॥

अभिषेकानंतरगजस्कंधाधिरूढस्यनगरालंकारदर्शनार्थं निर्गमनात्पूर्वं यद्दिनिशासात्तदा तदलं
कारदर्शनार्थं स्वयं रामे दृष्टे च दीपवज्ज्वालनवत्ताकारदीपवत्मान अन्तरप्यासुरे प्याप्यार्श्वे योऽस्त्रकुं

प्रकाशाकारतार्थं च निशागमनशंकया ॥ दीपवृक्षांस्तथा चक्रुरनुरथ्यासु सर्वशः ॥ १८
अलंकारं पुरस्यैवं कृत्वा तत्पुरवासिनः ॥ आकांक्षमाणा रामस्य यौवराज्याभिषेचनम् ॥ १९
समेत्य संघशः सर्वे चत्वरेषु सभासु च ॥ कथयंतो मिथस्तत्र प्रशशंसुर्जनाधिपम् ॥ २० ॥ अ
हो महात्मा राजायमिक्ष्वाकुकुलवर्द्धनः ॥ ज्ञात्वा यो वृद्धमात्मानं रामं राज्येऽभिषेक्ष्यति ॥ २१
सर्वे ह्यनुगृहीताः स्म यन्नो रामो महीपतिः ॥ चिराय भविता गोप्ता दृष्टलोकपरावरः ॥ २२
अनुद्धतमना विद्वान् धर्मात्मा भ्रातृवत्सलः ॥ यथा च भ्रातृषु स्निग्धस्तथास्मास्व ॥
पि राघवः ॥ २३ ॥ चिरं जीवतु धर्मात्मा राजा दशरथोऽनघः ॥ यत्प्रसादेनाभिषिक्तं रामं
द्रक्ष्यामहे वयम् ॥ २४ ॥ १८ । १९ । २० प्रशंसामेवाह अहो इति । २१ । अनुगृहीताः इत्यत्र हेतुः यत् इति गोप्ता
परावरश्चाद्वैभावस्थानीयपावदवाततत्तज्ज्ञानप्राशास्यापाप्रास्यः । २२ । २३ । २४ ॥ २ । ५ ॥ २५ । २५ ॥

॥ रा०अ० ३० ॥

शुभ्राणामभ्राणां शिखराणां च शोभा कांतिर्येषु तेषु देवतायतनेष्वित्यर्थः अट्टालकाः प्राकारोपरितनगृहस्थानानि ११ १२ शालभित्तिषु सर्वतो लक्षितेषु चत्वरेषु चेति यावत् ध्वजाः सचिन्हाः पता

शुभ्राभ्रशिखराभेषु देवतायतनेषु च॥ चतुष्पथेषु रथ्यासु चैत्येष्वट्टालकेषु च॥ ११॥ नानापण्यसमृद्धेषु वणिजामापणेषु च॥ कुटुंबिनां समृद्धेषु श्रीमत्सु भवनेषु च॥ १२॥ सभासु चैव सर्वासु वृक्षेष्वालक्षितेषु च॥ ध्वजाः समुच्छ्रिताः साधु पताकाश्चाभवंस्तदा॥ १३॥ नटनर्तकसंघानां गायकानां च गायतां॥ मनःकर्णसुखा वाचः शुश्रुवुश्च ततस्ततः॥ १४॥ रामाभिषेकयुक्ताश्च कथाश्चक्रुर्मिथो जनाः॥ रामाभिषेके संप्राप्ते चत्वरेषु गृहेषु च॥ १५॥ बाला अपि क्रीडमाना गृहद्वारेषु संघशः॥ रामाभिषेकसंयुक्ताश्चक्रुरेवं मिथः कथाः॥ १६॥ कृतपुष्पोपहारश्च धूपगंधाधिवासितः॥ राजमार्गः कृतः श्रीमान्पौरै रामाभिषेचने॥ १७

काश्चिन्न्हरहिताः १३ नटाः सूत्रधाराः जनता जनसमूहः ततस्त त्रश्रयो ध्वापां शुश्रुवुः जना इति शेषः १४ १५ रामाभिषेके रामाभिषेकः भवे दमिषेकः स्नानमिति विश्वः १५

६

॥ अ०२६ ॥

सूताः पौराणिकाः मागधा वंशशंसकाः वंदिनः स्तुतिपाठकाः संध्यां संध्याधिदेवतां सूर्यं उपासीनो ध्याय
न नियतमनस्को जजाप गायत्रीमिति शेषः ६ संध्योपासनानंतरं मधुसूदने सूर्यान्तर्वर्तिनि नारायणे तु

ततः श्रुत्वा सुखा वाचः सूतमागधवंदिनाम् ॥ पूर्वां संध्यामुपासीनो जजाप यतमानसः ६
तुष्टाव प्रणतश्चैव शिरसा मधुसूदनम् ॥ विमलक्षौमसंवीतो वाचयामास स द्विजान् ७ ॥
तेषां पुण्याहघोषोऽथ गंभीरमधुरस्तदा ॥ अयोध्यां पूरयामास तूर्यघोषानुनादितः ८ ॥ पा
कृतोपवासं तु तदा वैदेह्या सह राघवम् ॥ अयोध्यानिलयः श्रुत्वा सर्वः प्रमुदितो जनः ९
ततः पौरजनः सर्वः श्रुत्वा रामाभिषेचनम् ॥ प्रभातां रजनीं दृष्ट्वा चक्रे शोभयितुं पुरम् ॥ १० ॥

तुष्टाव मित्रस्येत्यादिनेति शेषः वाचयामास स्वस्तिवाचनं पुण्याहं च ७ । तूर्यघोषेण सेजातानुनादः ८
प्रमुदितः संतुष्टोऽभवत् ॥ ९ ॥ पुरं शोभयितुं चक्रे पुरशोभोत्पादनार्थं संमार्जनालेपनवितानमालिका
बंधनादिकमकरोदित्यर्थः ॥ १० ॥

रामा० ॥
२९

जीवनार्हेऽसीति परमाविप्सत्वं प्रकाशितं तदेव दर्शयति यं मुहूर्तमिति मुहूर्तं अल्पकालम् अपि ते तव वचनक्रियां वचनक
रणं प्रतितेन रामेण प्राप्ये ।७। आत्मनात्वेन आत्मजैः पुत्रैः अन्यैः प्राणिभिरपि यं वरो आत्मानमात्मजानितं प्र

यं मुहूर्तमपश्यंस्तु न जीवेयमहं ध्रुवम् । तेन रामेण कैकेयि शपे ते वचनक्रियाम् ॥ ७ ॥ आत्म
ना चात्मजैश्चान्यैर्वृणेयं मनुजर्षभम् ॥ तेन रामेण कैकेयि शपे ते वचनक्रियाम् ॥ ८ ॥ भद्रे हृ
दयमप्येतदनुमृश्योद्धरस्व मे ॥ एतत्समीक्ष्य कैकेयि ब्रूहि यत्साधु मन्यसे ॥ ९ ॥ बलमात्म
नि पश्यंती न विशंकितुमर्हसि ॥ करिष्यामि तव प्रीतिं सुकृतेनापि ते शपे ॥ १० ॥ सीताराम

विहायापि यो वरणीयस्तेन रामेणात्मन्वयः ।८। हे भद्रे मे हृदयमपि एतदेतादृशं वागानुसारि त्वमनुस्मृत्य विचार्य त्व
द्धीष्ठ कथनेन मामुद्धरस्व अस्मात् दुःखादुद्धर अपि च एतन्मदुद्धरणमपि कर्तव्यं न वेति समीक्ष्य विचार्य । अपरं
यत्साधु तव हितं मन्यसे तद्ब्रूहि ।९। नात्र संशयितिष्ठि शंकाकर्तव्येत्याह बलमिति । आत्मनि त्वयि बलं सामर्थ्यमप्रप
श्यंती जानती मां शंकितुं नार्हसि मदीयं कार्यं करिष्यति न वेति संदेहमा कार्षीरित्यर्थः ।१०। सीतारामाभ्यां नमः

शपे

०४ यजमानस्याभिषेकसन्नाहं दर्शयति गतइत्यादिना स्नातइति कायशुद्धिः नियतमानसइति मनःशुद्धिः सहप
त्न्येति दीक्षादिनियमस्य पत्नीसहायतोक्तेः नारायणं स्वात्मानं उपागमत् अनुसंदध्यौ १ शिरसा पात्रीं प्रग
ृह्य नमस्कारपूर्वं प्रगृह्येति यावत् महते देवताय नारायणाय २ हविषः शेषं रक्षितशिष्टं प्राशनमपिला

गते पुरोहिते रामः स्नातो नियतमानसः। सह पत्न्या विशालाक्ष्या नारायणमुपागमत्॥ १॥
प्रगृह्य शिरसा पात्रीं हविषो विधिवत्तदा। महते दैवतायाज्यं जुहाव ज्वलितेऽनले॥ २॥
शेषं च हविषस्तस्य प्राश्याशास्यात्मनः प्रियम्। ध्यायन्नारायणं देवं स्वास्तीर्णे कु
शसंस्तरे॥ ३॥ वाग्यतः सह वैदेह्या भूत्वा नियतमानसः। श्रीमत्यायतने विष्णोः शिश्येन
रवरात्मजः॥ ४॥ एकयामावशिष्टायां रात्र्यां प्रतिबुध्य वै। अलंकारविधिं कृत्स्नं
कारयामास वेश्मनः॥ ५॥

आत्मनः प्रियं रावणवधफलकवनरूपं आशास्य अनुसंधाय कुशसंस्तरे कुशमये शयनीये ३ नियत
मात्ममात्रविषये विष्णोरायतने निजभवनवर्तिनि देवपूजालये ४ अलंकारविधिम् अलंकारविधानम् ५

जनानां संबाधो यस्मिन् तं राजमार्गं प्रपन्नेति शेषः तं जनौघं व्यूहन्निव विभजन्निव ॥ २१ ॥ सिताभ्रस
दृशं हिमगिरिशिखरसदृशं ॥ २२ ॥ राजासनं हित्वा अभ्युत्थायेत्यर्थः स्वमतं स्वानुमतं कृत्यं पप्रच्छेत च य

एवं तं जनसंबाधं राजमार्गं पुरोहितः ॥ व्यूहन्निव जनौघं तं शनै राजकुलं ययौ ॥ २१ ॥ सि
ताभ्रशिखरप्रख्यं प्रासादमधिरुह्य सः ॥ समीयाय नरेंद्रेण शक्रेणेव बृहस्पतिः ॥ २२ ॥ त
मागतमभिप्रेक्ष्य हित्वा राजासनं नृपः ॥ पप्रच्छ स्वमतं तस्मै कृतमित्यभ्यचोदयत् ॥ २३ ॥
तेन चैव तदा तुल्यं सहासीनाः सभासदः ॥ आसनेभ्यः समुत्तस्थुः पूजयंतः पुरोहितम् ॥ २४ ॥ गु
रुणा त्वभ्यनुज्ञातो मनुजौघं विसृज्य तम् ॥ विवेशांतःपुरं राजा सिंहो गिरिगुहामिव ॥ २५ ॥ त
दग्र्यवेषप्रमदाजनाकुलं महेंद्रवेश्मप्रतिमं निवेशनम् ॥ व्यदीपयंश्चारु विवेश पार्थि
वः शशीव तारागणसंकुलं नभः ॥ २६ ॥ इत्यार्षे रामायणे वाल्मीकीये अयोध्याकाण्डे पंचमः सर्गः ॥ ५ ॥

दासत्वं तत्कृतमिति न्यवेदयत् ॥ २३ ॥ तुल्यं तुल्यकालं ॥ २४ ॥ अभ्यनुज्ञातः सर्वस्य कर्तव्यस्य कृतत्वाद्धि स्वमयतामि
युक्तः ॥ २५ ॥ अग्र्य उत्तमः ॥ २६ ॥ इति पंचमः सर्गः ॥ ५ ॥

वेदानां वंदैः अभिसंबाधाः संमर्दयुक्ताः कुतूहलजनैः रामाभिषेकदर्शनजकौतुकसंपन्नैर्वृताः युक्ताः राजमार्गाः बभूवुः १६ जनवृंदान्येवोर्मयस्तेषां संघर्षोन्योन्यसंघर्षेण तेन हर्षेण जातो यः स्वनस्त द्वतः १७ सिक्ताः सुगंधिसलिलैः सिक्ताः संमृष्टाः धूपोधिताः रथ्यावीथ्यो यस्याः सा तदहः तस्मिन्नहनि च

वेदवृंदैरयोध्यायां राजमार्गाः समंततः ॥ बभूवुरभिसंबाधाः कुतूहलजनैर्वृताः ॥ १६ ॥
जनवृंदोर्मिसंघर्षहर्षस्वनवतस्तदा ॥ बभूव राजमार्गस्य सागरस्येव निःस्वनः ॥ १७ ॥ सि
क्तसंमृष्टरथ्या च तदहर्वनमालिनी ॥ आसीदयोध्यानगरी समुच्छ्रितगृहध्वजा ॥ १८ ॥
तदा ह्ययोध्यानिलयः सस्त्रीबालाबलो जनः ॥ रामाभिषेकमाकांक्षन्नाकांक्षन्नुदयं रवेः ॥
१९ ॥ प्रजालंकारभूतं च जनस्यानंदवर्द्धनम् ॥ उत्सुकोभूज्जनो द्रष्टुं तमयोध्यामहोत्सवम् ॥ २० ॥

नमालिनी कदलीक्रमुकादिविरचितप्रतोलीयुक्ता समुच्छ्रितगृहध्वजा समुच्छ्रिता गृहेषु ध्वजा यस्यां तादृशी अयोध्या आसीत् १८ सस्त्रीबालाबलः अबलाः बलरहिताः वृद्धा इति यावत् स्त्रीबालवृद्धस हितो जनः उदयं रवेः रामाभिषेकमाकांक्षन् रवेरुदयमाकांक्षन् अभूदिति शेषः १९ प्रजालंकारभूतं प्र

दृष्टु मिश्रन

॥ र॰पु॰ २७ ॥

१ समभिषेक्ष्यत्यद्य १० राममुपवासं तत्सं कल्पं कारयामासेति वृ श्रीरिति हि कर्म कल्प्यं ११ काकुत्स्थमभ्य

द्य मन्त्रस्ते पिता राम प्रीयते राज्यवाप्स्यसि । उपवासं भवान् द्यकरोतु सह सीतया ॥ ९ ॥ प्रातस्त्वा
मभिषेक्ता हि यौवराज्ये नराधिपः । पिता दशरथः प्रीत्या ययातिं नहुषो यथा ॥ १० ॥ इत्युक्त्वा
स तदा रामम् उपवासं यतव्रतम् । मन्त्रवित्कारयामास वैदेह्या सहितं शुचिः ॥ ११ ॥ ततो यथाव
द्रामेण स राज्ञो गुरुरर्चितः । अभ्यनुज्ञाप्य काकुत्स्थं ययौ रामनिवेशनात् ॥ १२ ॥ सुहृद्भिस्त
त्र रामोपि सहासीनः प्रियंवदैः । सभाजितो विवेशाथ ताननुज्ञाप्य सर्वशः ॥ १३ ॥ हृष्टनर
नारीकं रामवेश्म तदा बभौ । यथा मत्तद्विजगणं प्रफुल्लनलिनं सरः ॥ १४ ॥ स राजभवन
प्रख्यातस्माद्रामनिवेशनात् । निःसृत्य ददृशे मार्गं वसिष्ठो जनसंवृतम् ॥ १५ ॥

नुज्ञाप्य स्वनन्तरं ते
रामनिवर्तस्वेत्युक्त्वा ययौ निर्धया विसर्जितः ॥ २२ ॥ प्रियंवदैः सुहृद्भिः सभाजितः पूजितः विवेशास्ववेश्मतानन्

व्याले

२ ब्राह्मं ब्राह्मणारोहयोग्यं युक्तं वाजिभिः आस्थाय प्रययाविति पूर्वेणान्वयः ४ पांडुराभ्रवत् निबिडप्रभं कक्ष्याः द्वा
राणि ५ त्वरन्निव त्वरन्नेव ससंभ्रमं सादरं मानयिष्यन् संमानार्हः तोः त्वरमाणः त्वोः क्रियायां इति हेत्वर्थे
च

तथेतिस राजानमुक्त्वा वेदविदां वरः ॥ स्वयमेव त्रिपिष्टोमगवान्प्रययौ रामनिवेशनम् ॥ ३ ॥ उपवा
सयितु रामे काकुत्स्थं मंत्रकोविदं ॥ ब्राह्मरं थवरं युक्त मास्थायसुदृढव्रतः ॥ ४ ॥ सरामभवनं
प्राप्य पांडुराभ्रघनप्रभं तिस्रः कक्ष्या रथेनैव विवेश मुनिसत्तमः ॥ ५ ॥ तमागतमृषिं रामस्त्वर
न्निव ससंभ्रमं ॥ मानयिष्यन्समानार्हं निश्चक्राम निवेशनात ॥ ६ ॥ अभ्येत्य त्वरमाणश्च रथाभ्याशं मनीषिणः ॥ ततोवतारयामास परिगृह्य रथात्स्वयम् ॥ ७ ॥ सचैनं प्रश्रितं दृष्ट्वा संभा
ष्याभिप्रसाद्य च ॥ प्रियार्हं हर्षयन्राममित्युवाच पुरोहितः ॥ ८ ॥

रथात् अवरोप्य ६ परिगृह्य हस्तेन हस्ते धृ
त्वा ७ प्रश्रितं विनीतं संभाष्य वत्सेत्यादि संबोध्य अभिप्रसाद्य स्तुतिभिरिति शेषः प्रियार्हं प्रियकरणार्हं

५

त्वन्निविष्टं राज्यं सौमित्रीणामाधारणां करोति लक्ष्मणेति खं अन्तरात्मानं प्राणम् ४३ इष्टान् मनोनुकूलान् भोगा
न् विषयान् राज्यफलानि अनर्घ्यरत्नवस्त्राभरणादीनि त्वदर्थं न स्वप्रयोजनाय अभिकामये प्रार्थये

लक्ष्मणेमां मया सार्धं प्रशाधि त्वं वसुंधराम्॥ द्वितीयं मेऽन्तरात्मानं त्वामियं श्रीरुपस्थिता ४३
सौमित्रे भुंक्ष्व भोगांस्त्वमिष्टान्राज्यफलानि च॥ जीवितं चापि राज्यं च त्वदर्थमभिकामये
॥४४॥ इत्युक्त्वा लक्ष्मणं रामो मातरावभिवाद्य च॥ अभ्यनुज्ञाप्य सीतां च जगाम स्वं निवेशनम्
॥४५॥ इत्यार्षे रामायणे वाल्मीकीये अयोध्याकाण्डे चतुर्थः सर्गः॥४॥ संदिश्य रामं नृपतिः श्वो
॥ भाविन्यभिषेचने॥ पुरोहितं समाहूय वसिष्ठमिदमब्रवीत्॥१॥ गच्छोपवासं काकुत्स्थं कार
॥ याद्य तपोधन॥ श्रेयसे राज्यलाभाय वध्वा सह यतव्रतम्॥२॥

अस्य प्रासंवैनिष्प्रयोजनमेवेति भा
वः ४४ सीतां च स्वं च अभ्यनुज्ञाप्य सीतायै स्वक्षेमं च अनुज्ञां कारयित्वा मातृभ्यामिति शेषः ४५॥ इति च
तुर्थः सर्गः॥४॥ संदिश्य वनोपवासादिकं कुर्विति अनुज्ञाप्य॥१॥ गच्छेति उपवासं कल्याणः पुरोहितसाध्यत्वा

चिरकाल्लाभिकांक्षितं एतदभिषेकरूपं ३९ हताः मयं क्षितिप्रोषः मेममसुमित्रायाश्च सातीनवं धूनमिनंद
प ३७ कल्याणेन त्वत्रे गुभपुक्के काले जातो जनितः येन प्र भकात्व जननेन ४० वते तिहर्षे पुष्करेद

एतच्छ्रुत्वा तु कैकेय्या चिरकालाभिकांक्षितम्। हर्षबाष्पाकुलेना कयमिदं रामम भाषत॥ ३८
वत्स राम चिरं जीव हतास्ते परिपंथिनः॥ ज्ञातीन्मे त्वं श्रियाप्युक्तः सुमित्रायाश्च नंदय॥ ३९ का॥॥
ल्याणे वत न नक्षत्रे मयि जातो सि पुत्रक॥ येन त्वयादशरथो गुरोणाधितः पिता॥ ४०॥ श्रमो॥॥
ने घं वमितां तेषु रघेषु पुष्करेक्षणो॥ यमिक्ष्वाकुराज्यश्रीः पुत्रत्वां संश्रयिष्यति॥ ४१॥ इत्येवमु॥॥
क्तो मात्रेदं रामो भ्रातरमब्रवीत॥ प्रांजलिं प्रह्वमासीनमभिवीक्ष्य स्मयन्निव॥ ४२॥ ४२॥ ४२

रोपुंडरीकाद्दे पुरुषे परम पुरुष विषये मे तांतं व्रतोपवास सहने श्रमोपि च सफले जाते साफल्ये हेतु र्येयमिति
इदमभाषतेत्यन्वयः ४१ स्मयन्निव ईषद्धसन्निव ४२ रामा सीता रामा रामा मामा रामा रामा रामा रामा सीता सा

॥ रा॰
२५ ॥

त्रानापिताकौशल्यायेतिशेषः॥ ३१॥ तस्मिन्कालेरामागमनविशिष्टकालेकौसल्यापिपुत्रस्ययौवराज्या
भिषेचनंश्रुत्वासुमित्रादिभिरन्वास्यमानाउपास्यमानाप्राणायामेनप्राणायामपूर्वकेपुरुषंजनार्दनंना

प्रागेवचागतात्तत्रसुमित्रात्नेतत्समागात्ततदा॥ सीताचानापिताश्रुत्वाप्रियंरामाभिषेचनं॥
३१॥ तस्मिन्कालेतुकौशल्यातस्थावामीलितेक्षणा॥ सुमित्रयान्वास्यमानासीतयालक्ष्म
णेनच॥ ३२॥ श्रुत्वापुष्येणपुत्रस्ययौवराज्याभिषेचनं॥ प्राणायामेनपुरुषंध्यायमानाजनार्द
नम्॥ ३३॥ तथासनियमामेवसोभिगम्याभिवाद्यच॥ उवाचवचनंरामोहर्षयंस्तामिदंतदा॥
३४॥ अंबपित्रानियुक्तोस्मिप्रजापालनकर्मणि॥ भवितास्वोभिषेकोमेयथामेशासनंपितुः
३५॥ सीतयाप्युपवस्तव्यारजनीयंमयासह॥ एवमृत्विग्उपाध्यायैः सहमामुक्तवान्पिता॥ ३६
यानियानिचयोग्यानिश्वोभाविन्यभिषेचने॥ तानिमेमंगलान्यद्यवैदेह्याश्चैवकारय॥ ३७

तयतांध्यायमानाध्यायंतीन्यामीलितेक्षणातस्थौ॥ ३२॥ पुष्येणेतिपुष्येणस्थर्क्षः अधिकरणस्यपुष्ययुक्त
कालस्यकारणत्वविवक्षयातृतीया॥ ३३॥ ३४॥ यथामेपितुः शासनमाज्ञातथाश्वोमेअभिषेकोभवितेतिसंबंधः॥ ३५॥ ३६॥

रा॰
२५ ॥

किन्तु तथापि स्थिरत्वं चित्तं चंचलं नन्वस्मन्मनुष्याणामेव चित्तं चंचलं न तु सतामित्याशंक्यापरकृतभेदबोधनादिना सतामपि चित्तस्य चांचल्यप्राप्तिः संभावितेत्याह सतां चेति धर्मनित्यानां धर्मनिरतानामपि चित्तं कृतशोभि कृतेन परकृतरागद्वेषादिना क्षोभमेति उत्पन्नत इति कृतशोभि न तु सर्वेषां स्वतो नियतं किंचित्स्वभावमित्यर्थः यद्वा कृतशोभि कृतेनैव कार्येण शोभमानं तेन न तु करिष्यमाणेन अयं भावः यदीदानीमेव रामाभिषेकः क्रियते तर्हि

किन्तु चित्तं मनुष्याणामनित्यमिति मे मतिः। सतां च धर्मनित्यानां कृतशोभि हि राघव॥ २७॥
इत्युक्तः सोऽभ्यनुज्ञातः श्वोभाविन्यभिषेचने। व्रजेति रामः पितरमभिवाद्याभ्ययाद्गृहम्॥ २८॥
प्रविश्य चात्मनो वेश्म राज्ञोद्दिष्टेऽभिषेचने। तत्क्षणेन स निष्क्रम्य मातुरन्तःपुरं ययौ॥ २९॥
तत्र तां प्रवणामेव मातरं क्षौमवासिनीम्। वाग्यतां देवतागारे ददर्श याचतीं श्रियम्॥ ३०॥

भरतचित्तस्यापि स्थैर्यं भवेत् यदि करिष्यते तदा भरतस्यापि रागाद्यभावः स्यादिति अतस्त्वरितमात्मानमभिषिंचयेति कु र्वित्यर्थः २७ अभिषेचने अभिषेचनविषये इत्युक्तोऽभ्यनुज्ञातः इति संबंधः २८ राज्ञोद्दिष्टे राज्ञोप दिष्टेऽभिषेचने सीतायै तदुपेक्षितं राज्ञोपदिष्टं सभार्योपवासानुष्ठाननिवेदनाय स्वगृहं प्रविश्य तत्र सीताम् दृष्ट्वा तत्क्षणादेव मातुरन्तःपुरं ययौ २९ प्रवणां देवताराधने तत्परां श्रियं रामाय राज्यलक्ष्मीम् ३० ३० ३०

स्वमिषिंचस्व अभिषिक्तो भव त्वरयतीवेतीव शब्द एवार्थे: मे मनश्चित्तं मां त्वरयस्येव त्वरयति वे कार्यमिति
प्रोषः २२ अद्यप्रभृतिप्रदोषमारभ्य अनेन द्विर्भोजनरूपप्राग्दिननियमो दर्शितः दर्भप्रस्तरे दर्भास्तरणे

ततः पुष्येऽभिषिंचस्व मनस्त्वरयतीव माम्। श्वस्त्वाहमभिषेक्ष्यामि यौवराज्ये परंतप ॥२२॥ तस्मात्त्वयाद्यप्रभृति निशेयं नियतात्मना। सह वध्वोपवस्तव्या दर्भप्रस्तरशायिना ॥२३॥ सुहृदश्चाप्रमत्तास्त्वां रक्षंत्वद्य समंततः। भवंति बहुविघ्नानि कार्याण्येवंविधानि हि ॥२४॥ विप्रोषितश्च भरतो यावदेव पुरादितः। तावदेवाभिषेकस्ते प्राप्तकालो मतो मम ॥२५॥ कामं खलु सतां वृत्ते भ्राता ते भरतः स्थितः। ज्येष्ठानुवर्ती धर्मात्मा सानुक्रोशो जितेंद्रियः ॥२६॥

२३ एवंविधानि प्रभोदर्कीणि बहुविघ्नानीति बहुव्रीहिः २४ केकयराजाय राज्यशुल्कं दत्वा कैकेयीविवाहं कृतवानतो वृत्तांतं हृदि कृत्वाह विप्रोषित इति प्राप्तकालः योग्यः २५ ननु स कुलाविरोधे भरते नैवं शंकायुक्तेत्यत आह काममिति अद्यपीत्यर्थैव वृत्ते मार्गे २६

रा० स०
२६

देव खहं केनचिद्विप्रकृता त्रियापराभूता नास्मि अवमानिता नातिरस्कृता च नास्मि मे कश्चिदभिप्रायो
ऽभिप्रार्थनीयोऽस्ति त्वद्देकसंपाद्यस्तं त्वया कृतं संपादितमिच्छामि ॥२॥ यदि त्वं कर्तुमिच्छसि मदभिप्रेतं तत्
दातुमिच्छसि प्राक् प्रतिज्ञां प्रतिजानीष्व कुरु अथ पश्चात् तं मयाभिप्रेतं स्वप्रार्थितं प्रवक्ष्यामि ॥

नास्मि विप्रकृता देव केनचिन्नावमानिता ॥ अभिप्रायस्तु मे कश्चित्तमिच्छामि त्वया कृतम् ॥२॥ प्रतिज्ञां प्रतिजानीष्व यदि त्वं कर्तुमिच्छसि ॥ अथ तद्व्याहरिष्यामि यदभिप्रार्थितं मया ॥३॥ तामुवाच महाराजः कैकेयीमीषदुत्स्मितः ॥ कामी हस्तेन संगृह्य मूर्द्धजेषु शुचिस्मिताम् ॥४॥ अवलिप्ते न जानासि त्वत्तः प्रियतरो मम ॥ मनुजो मनुजव्याघ्राद्रामादन्यो न विद्यते ॥५॥ तेनाजय्येन मुख्येन राघवेण महात्मना ॥ शपे ते जीवनार्हेण ब्रूहि यन्मनसेच्छसि ॥६॥ [illegible]

कारकेत प्रावद्यामीत्यर्थः ॥३॥ स्मास्ता कामी करिणमपि प्राप्यपाकौ ताव च ये
मूर्द्धजेषु तस्मितः मूर्द्धजेषु केशेषु संगृह्य शिरोकेशेषु लेति प्रावत ॥४॥ अवलिप्ते सौभाग्यगर्विते रामादन्यस्त्वत्तोऽधिकः प्रियतरो
मम नेत्यर्थः ॥५॥ तेनत्व जोपि प्रियतरेण शजय्येन राज्ञां जेतुमशक्येन मुख्येन श्रेष्ठेन जीवनार्हेण मम जीवनेन

१६ अविलंबकारणोहेत्वंतरमाह अपिचेति अपूभात अपूभरूचकान् दारुणानसमयेकरान सनि
र्घाताः अपूनिपातसहिताद्दिवोल्काः दिवउल्काः संध्यिरार्थेः दिवादिवसेरत्यन्येउल्काः ज्वालाः १७ स

अद्यप्रकृतयः सर्वास्त्वामिच्छंतिनराधिपम् अतस्त्वांपुवराजानमभिषेक्ष्यामिपुत्रक॥ १६
अपिचाद्यापूभान्स्वप्नानरामपश्यामिदारुणान्॥ सनिर्घाताद्दिवोल्काश्चपतंतिचमहास्व
नाः॥ १७॥ अवष्टब्धंचमेरामनक्षत्रंदारुणौर्ग्रहैः॥ आवेदयंति दैवज्ञाः सूर्यांगारकराहुभिः॥
१८॥ प्रायेणहिनिमित्तानामीदृशानांसमुद्भवे॥ राजाहिमृत्युमाप्नोतिघोरांवापदमृच्छति॥ १९
तद्यावदेवमेचेतोनविमुह्यतिराघव॥ तावदेवाभिषिंचस्वचलाहिप्राणिनांमतिः॥ २०॥ अ
द्यचंद्रोभ्युपगतःपुष्यात्पूर्वंपुनर्वसुं॥ श्वःपुष्ययोगंनियतंवक्ष्यंतेदैवचिंतकाः॥ २१॥

सत्रेजन्मर्क्षेग्रहवष्टब्धमाक्रांतं १८ १९ तत्तस्माद्यावन्मेचेतोनविमुह्यतितावदभिषेकविघ्नंवनभवतितावत्तः पूर्वमेवाभिषिंचस्वचलातामभिषेकमात्मानंकुरु २० पुष्ययोगंचंद्रस्यनियतंश्वअभिषेकेप्रशस्तंज्योतिर्वि

भूपः पुनस्तेयदागमनहर्षतस्तद्ब्रूहीतिसंबंधः ६ ततः एमवाक्यश्रवणानंतरं सूतउवाच हेरामराजात्वां द्रष्टुं
मिच्छतिराजवाक्यं श्रुत्वातत्रागमनायरतत्सायश्रीगमनायचत्वं श्रमाणेनिर्गोतारतराशब्दस्यासर्वनाम

प्रवेश्यचैनं त्वरितं एमोवचनमब्रवीत् ॥ यदागमनकार्यंतेभूपस्तद्ब्रूहिशोधतः ६ ॥ तमुवाच
ततः सूतोराजात्वांद्रष्टुमिच्छति ॥ श्रुत्वाश्रमाशंतत्रत्वंगमनायेतरोप्रचा ७ ॥ इतिसूतवचः
श्रुत्वारामोथत्वरयान्वितः ॥ प्रययौराजभवनंपुनर्द्रष्टुं नरेश्वरम् ॥ च तं श्रुत्वासमनुप्राप्तंरा
मंदशरथोनृपः प्रवेशयामासगृहं विविक्तः प्रियमुत्तमम् ॥ ८ ॥ प्रविशन्नेवच श्रीमान्राघ
वोभवनेपितुः ॥ ददर्शपितरं दूरात्प्रणिपत्यकृतांजलिः ॥ १० ॥ प्रणामंतंसमुत्थाप्यतंपरि
ष्वज्यभूमिपः ॥ प्रदिश्यचास्मैरुचिरमासनंपुनरब्रवीत् ॥ ११ ॥

त्वमाबं ॥ ७८ प्रियंसुप्रियंराघवः
पितुर्भवनंप्रविशन्नेवदूरात्प्रणिपत्यकृतांजलिः सन्पितरं ददर्श दूरात्प्रणिपाततोविनयातिशयात् १०
समीपेपुनः प्रणामंतमित्यर्थः प्रदिश्यहस्तेनदर्शयित्वा चाद्यचसाप्यकृत्वा अस्मैरामाय ११

इति तृतीयः सर्गः ३ एवं पूर्वं विचारितमपि रामाभिषेकं मंत्रिभिः कालविशेषनिर्णयपूर्वकं पुनर्विचार्य राममा हूय पुनः सविशेषमुपदिशति गतेत्विच्चित्यादिना ख्यपत्तः तत्तत्कार्यार्हदेशकालनिश्चयपत्तः निश्चयं रामाभि षेककाविषयनिश्चयं चक्रे इति संबंधः १ तदाहस्वयमेवेति इति प्रभृः निश्चयं चक्रे इति पूर्वेणान्वयः २ रामं

इत्यार्षे श्रीमद्रामायणे अयोध्याकांडे वाल्मीकीये तृतीयः सर्गः ॥ ३ ॥ चतुर्थे दिवसे कथाप्रसंगः समागते च पनः पोभूयः पौरेषु सहमंत्रिभिः ॥ मंत्रयित्वा ततश्चक्रे निश्चयज्ञः सनिश्चयम् ॥ १ ॥ श्व एव पुष्यो भविता श्वोभिषिच्येत मे सुतः ॥ रामो राजीवताम्राक्षो यौवराज्य इति प्रभुः ॥ २ ॥ अथांत र्गृहमाविश्य राजा दशरथस्तदा ॥ सूतमामंत्रयामास रामं पुनरिहानय ॥ ३ ॥ प्रतिगृह्य तु तद्वाक्यं सूतः पुनरुपाययौ ॥ रामस्य भवनं शीघ्रं राममानयितुं पुनः ॥ ४ ॥ द्वाःस्थैरावेदितं तस्य रामायागमनं पुनः ॥ श्रुत्वैव चापि रामस्तं प्राप्तं शंकान्वितोभवत् ॥ ५ ॥

पुनरिहानयेत्यामंत्रयामास नियोजयामासेत्यर्थः ३ पुनः आनयितुमानेतुमित्यर्थः इत्यर्थः ४ तस्य सुमंत्रस्य पुनरागमनं रामाय द्वाःस्थैरावेदितं राम श्वापि प्राप्तं पुनरागतं तं

स्वसदृशः स्वस्मिन्ननुरक्ताः प्रकृतयः प्रजा यस्य सदृशानुरक्तप्रकृतिः तादृशो यस्तस्मिन् आशि राम तं लब्ध्वा
मराद्वते लब्ध्वानंदति आत्मानं मनः ॥४५॥ ततः प्रभिषेकप्रयोजनं पितुरुपदेशम् ॥४६॥ प्रियाख्येभ्यः प्रियं

दृष्टानुरक्तप्रकृतिर्यः पालयति मेदिनीम् ॥ तस्य नंदति मित्राणि लब्ध्वा मत्तमिवामराः ॥ त
स्मात्पुत्रत्वमात्मानं नियम्यैव समाचर ॥४५॥ तच्छ्रुत्वा सुहृदस्तस्य रामस्य प्रियकारिणः ॥ त्वरि
ताः शीघ्रमभ्येत्य कौसल्यायै न्यवेदयन् ॥४६॥ सा हिरण्यं च गाश्चैव रत्नानि विविधानि च ॥ व्या
दिदेश प्रियाख्येभ्यः कौसल्या प्रमदोत्तमा ॥४७॥ अथाभिवाद्य राजानं रथमारुह्य राघवः ॥ प्र
ययौ स्वं द्युतिमद्वेश्म जनौघैः प्रतिपूजितः ॥४८॥ ते चापि पौरा नृपतेर्वचस्तच्छ्रुत्वा तदा लाभमिवे
ष्टमात्मनः ॥ नरेंद्रमामंत्र्य गृहाणि गत्वा देवान्समानर्चुरतिप्रहृष्टाः ॥४९॥ सीताराम सीता

श्रीरामाभिषेकरूपं यच्च दत्ते रति प्रियाख्यास्तेभ्यः ॥४७॥४८॥ इष्टलाभमिवेष्टवस्तुप्राप्तिरूपमिव तद्रामाभि
षेकपरं वचनं श्रुत्वा निर्विघ्नतायै देवान्समानर्चुः ॥४९॥

भूयोऽधिकं विनयमास्थाय कामजानि स्त्रीद्यूतमृगयामधुसेवनानि क्रोधजानि वाक्पारुष्योग्रदण्डत्वार्थदूषणानि व्य
सनानि त्यजेथाः। तत्रार्थदूषणं पित्रादिसंचितार्थस्य नाशनं ॥४२॥ परोक्षया चारमुखतः परोक्षानुभवसिद्धया
वृत्त्या परराष्ट्रविचारो राष्ट्रत्यक्तयाःस्वदासभार्यादौ स्थित्वा स्वप्रत्यक्षया वृत्त्या प्रजान्यायादि विचारो राष्ट्रकोशभव।

ते

भूयो विनयमास्थाय भवान्निर्जितेंद्रियः॥ कामक्रोधसमुत्थानि त्यजेथा व्यसनानि च॥४२॥ परो
क्षया वर्तमानो वृत्त्या प्रत्यक्षया तथा॥ अमात्यप्रभृतीः सर्वाः प्रकृतीश्चानुरंजय॥४३॥ कोष्ठागा
रायुधागारैः कृत्वा सन्निचयान् बहून्॥४४॥

अमात्यप्रभृतीः सर्वाः प्रकृतीः। अमात्यसेनानीपुरस्थकपौरजानपदसर्वप्रजाश्चा नुरंजय॥४३॥ कोष्ठागारा॥
णि धान्यागाराणि आयुधागाराणि शस्त्रागाराणि तैः सहसन्निचयान्सतां प्रशस्तवस्तूनां निचया
न्कृत्वा संपादय प्रजाश्चानुरंजयेति पूर्वेणान्वयः॥४४॥

वि

स्वलंकृतमादर्शतलप्रतिबिंबितमात्मानं दृष्ट्वा यथा तुष्यति जनः तथाद्य दशरथः श्रीरामं दृष्ट्वा तुतोषेत्यर्थः ।३७। स्वाभाष्य स्मितं संबोध्य ।३८। यदुवाच तदाह ज्येष्ठायामिति गुणैः श्रेष्ठः त एव मम प्रियः ।३९। यतस्त्वया इमाः प्रजाः स्वगुणैः रंजिताः तस्मात्त्वं पुष्ययोगेन चंद्रमसः पुष्यनक्षत्रोपलक्षिते काले श्वः प्रकरिष्यमाणं करणात्वं विवशाप्नोतीया ।४०। प्र

ते पश्यमानो नृपतिस्तु तोष प्रियमात्मजम् ॥ स्वलंकृतमिवात्मानमादर्शतलसंस्थितम् ॥३७॥ स तं सस्मितमाभाष्य पुत्रपुत्रवतां वरः ॥ उवाचेदं वचो राजा देवेंद्रमिव कश्यपः ॥३८॥ ज्येष्ठायामसि मे पत्न्यां सदृश्यां सदृशः सुतः ॥ उत्पन्नस्त्वं गुणैः श्रेष्ठो मम रामात्मजः प्रियः ॥३९॥ त्वया यतः प्रजाश्चेमाः स्वगुणैरनुरंजिताः ॥ तस्मात्त्वं पुष्ययोगेन यौवराज्यमवाप्नुहि ॥४०॥ कामतस्त्वं प्रकृत्यैव विनीतो गुणवानसि ॥ गुणवत्यपि तु स्नेहात्पुत्र वक्ष्यामि ते हितं ॥४१॥

त

कृत्या स्वभावेन कामतः अत्यर्थं विनीतो गुणवांश्चासि अतो गुणवत्यपि त्वयि न मयोपदेष्टव्यं अपि तु स्नेहाद्धितं तव वक्ष्यामीति योजना ।४१।

सहसूतेन सुमंत्रेणासह ॥ ३१ ॥ स प्रांजलिः प्रविश्यैव संप्राप्य प्रणतः कृतसाष्टांगनमस्कारः स्वनाम श्रावयन् रामोहम
स्मीत्येवं पितुश्च राघो ववंदे ॥ ततः पितुरंतिके पार्श्वे तस्याविर्निशोषः ॥ ३२ ॥ तं प्रियमात्मजं कृतांजलिपुटं पार्श्वे प्रणतं
तं दृष्ट्वाभ्यंजलौ गृह्य जलिपुटे प्रोक्तवाहमेव गाढं हि त्वा समाकृष्य सस्वजे प्रालिलिंग ॥ ३३ ॥ प्रभ्युद्यतं उपस्थापितं ॥ ३४ ॥ ग्रा॰

स तं कैलासशृंगाभं प्रासादं नरपुंगवः ॥ आरुरोह नृपं द्रष्टुं सहसूतेन राघवः ॥ ३१ ॥ स प्रांजलिरभि
प्रेत्य प्रणतः पितुरंतिके ॥ नाम स्वं श्रावयन् रामो ववंदे चरणौ पितुः ॥ ३२ ॥ तं दृष्ट्वा प्रणतं पार्श्वे कृतां
जलिपुटं नृपः ॥ गृह्यांजलौ समाकृष्य सस्वजे प्रियमात्मजम् ॥ ३३ ॥ तस्मै चाभ्युद्यतं सम्यङ्म
णिकांचनभूषितं ॥ दिदेश राजा रुचिरं रामाय परमासनम् ॥ ३४ ॥ तदासनवरं प्राप्य व्यदीपयत
राघवः ॥ स्वयैव प्रभया सौम्य उदये विमलो रविः ॥ ३५ ॥ तेन विभ्राजता तत्र सा सभाभिव्यरोचत
विमलग्रहनक्षत्रा शारदी द्यौरिवेंदुना ॥ ३६ ॥

तदासनवरं प्राप्य तदासनं स्वयैव प्रभया स्वशरीरकांत्या
व्यदीपयत् भासमानं चकारेत्यर्थः विमलो रविरुदये मेरुमिव ३५ सवसिष्ठदारणादिब्रह्मर्षिभिर्भ्राजिता सभापि
राजर्षि

तेन रामेणैव व्यरोचत विशेषेण च काशो गह
न दीप्ताऽदि पुरुषमप्याकाशमिंदुनेव ॥ ३६ ॥

चंद्रकांताननमिति चंद्राननमित्यनेनाह्लादकरत्वसिद्धेर्नि रतिशयाह्लादकत्वं द्योतयितुं कांतपदं तेन प्रत्यक्षवपप्रत्योभा वत्वं दर्शितं राममिति गुरोः स्वरूपगुरोः स्वरमपंतं सम्यदापप्रत्योभावत्वमाह मतीवप्रियदर्शनमिति वचनागोचरप रमप्रेमास्पदमित्यर्थः रूपौदार्यगुणैः रूपं विग्रहः औदार्यमनुभवितुं योग्यानुभावदानं गुणाः गुणापतेः सदानुसंधीयते इ ति गुरोः सदानुसंधीयमानं सौशील्यमहानुभावमस्मात् प्रत्योद्भवति पामरेष्वपि तिसंश्लेषेणावर्तत इति सदानुसंधीयमा

चंद्रकांताननं राममतीवप्रियदर्शनम् ॥ रूपौदार्यगुणैः पुंसां दृष्टिचित्तापहारिणाम् ॥ २८ ॥ घर्मा भितप्ताः पर्जन्यं ह्लादयंतमिव प्रजाः ॥ न ततर्प समायांतं पश्यमानो नराधिपः ॥ २९ ॥ अवता र्यसमेवन्तु राघवं स्यंदनात्तदा ॥ पितुः समीपमागच्छं तप्रांजलिः पृष्ठतोन्वगात् ॥ ३० ॥ ३०० ॥

न त्वात् पुंसामतिकठिनचित्तानां दृष्टिचित्तापहारिणां किमुत स्त्रीणामिति भावः ॥ २८ ॥ घर्माभि तप्ताः ग्रीष्मसंत प्ताः प्रजाः ह्लादयंतं पर्जन्यमिव समायांतं पश्यमानो नराधिपो न ततर्प इत्रि निशाय मत्र पश्यमानस्त्वनेन नि मेषदर्शनमुक्तं न ततर्पेत्यनेन प्रतिक्षणमनुभवेन नवनवप्रेमास्पदतया तृप्तिर्नाभूदित्यर्थः ॥ ३० ॥ ३० ॥ एएएए

श्रयतमुमंत्रनिर्गमनानंतरं तत्रप्रासादे समासीनांसम्यगुपविष्टाः। २४। आर्यामध्यदेशवासिनः वनशैलांतवासिनो वनशैलप्रदेशवासिनः प्राच्यादि दिशोत्थांतवासिनरस्तेतेनमूल्यमत्युग्रेरिताहहुहिष्पाटविक्रमितिषड्धिधवल्गोपास्य त्वरूपसार्वभौमस्थिनःमुक्रमः। २५। गंधर्वराजेत्यादिश्लोकत्रयमेकंवाक्यं गंधर्वराजप्रतिमंगांधर्वेषुस्वेच्छंदर्शनकेव

॥ श्रयतत्रसमासीनास्तदा देरथेनप्रम ॥ प्राच्योदीच्याःप्रतीच्याश्च दाक्षिणात्याश्च भूमिपाः

२४ ॥ म्लेच्छाश्चार्याश्च ये चान्ये वनशैलांतवासिनः ॥ उपासां चक्रिरे सर्वे तं देवा इव वासवम्

२५ ॥ तेषाम् मध्ये स राजर्षिर्मरुतामिव वासवः ॥ प्रासादस्थो रथस्थं तं ददर्श पातमात्मजम् ॥ २६

गंधर्वराजप्रतिमं लोके विख्यातपौरुषम् ॥ दीर्घबाहुं महासत्वं मत्तमातंगगामिनम् ॥ २७ ॥

त्नभोगप्रसिकत्वमेव किंतु वीररसाभिज्ञत्वमपीत्याह लोके विख्यातपौरुषमिति। पौरुषोपयुक्तं संहननत्वमाह वा दीर्घबाहुमिति नकेवलं शिरीषकुसुमसुकुमारमहाबाहुत्वमेवापितु महाबलशालित्वमपीत्याह माहास त्वमिति महच्चंडीशास्त्रमप्यधनुःखंडनप्रचंडसत्वं बलंयस्यतं तदनुगुणामहामत्तमातंगगामिनमिति मदालस

दीर्घोसि बद्धाः बद्धदीर्घोसपः सच्छवासमः धौतौ वनः महान् श्रीरामाभिषेकरूप उद्योगोपस्मिन्नित्यंगतावि
शेषसंतो विप्रौ वसिष्ठवामदेवौ एवं व्यादिश्य एषधिकारिणामाज्ञाप्य तत्र न्यपवेश्मनि स्थितौ क्रियाः पुरो

दीर्घोसि वद्धायोधा म्बसन्नद्धाम्वुवासमः॥ महतः राजगांम वैश्रविशांतु महोदयम्॥ १९॥
एवं व्यादिश्य विप्रौतौ क्रियात्तत्रविनिष्ठितौ॥ चक्रतुश्चैव यत्सर्व्वेदं पार्थिवाय निवेद्य च॥ २०॥
कृतमित्येव चाब्रूतामभिगम्य जगत्पतिम्॥ यथोक्तवचनं प्रीतो हर्षयुक्तौ द्विजर्षभौ॥ २१॥ ततः
सुमंत्रं द्युतिमान् राजा वचनमब्रवीत्॥ रामः कृतात्मा भवता शीघ्रमानीयतामिति॥ २२॥ सत
थेति प्रतिज्ञाय सुमंत्रो राजशासनात्॥ रामं तत्रानयांचक्रे रथेन रथिनां वरम्॥ २३॥ २३॥

हित कर्तव्याश्च क्रतुरित्यन्वयः। यच्चैव शेषं राजोक्तादन्यदवशिष्टं कर्तव्यं तदपि पार्थिवाय निवेद्य च क्रतुः। २०। ततो ज
गत्पतिमभिगम्य यथोक्तवचनं उक्तवचनमनतिक्रम्य सर्वं कृतमित्येवं जातमित्यब्रूतां। प्रीतिमान् सप्तम्यानंदः तद्दुन्तायकोमुख

रा

टि॰ स्त्री॰ का॰ २१ कृतमा॰ कि॰ टि॰
२३ स्त्री॰ २२ रा॰ टि॰

अत्र तत्र जातं द्रव्यमपि मदधीनमेव ॥३७॥ आयासेन भूशायनायासेन ॥३८॥ ततः भयनिमित्तं रश्मिमान् सूर्यः ॥३९॥ समाश्वस्ता विश्वासं प्रापिता भूयः परिपीडयितुं निजभूशयनादिना पूर्वं पीडितमेव भर्तारमप्रियवचनेन पुनः परिपी-

वेगां गमागा धामतस्याः समस्ताः काशिकोशलाः ॥ तत्र जातं बहु द्रव्यं धनधान्यमजाविकम् ॥३७॥ ततस्त्व[illegible] कैकेयि प्रदास्ये त्वं मनसेच्छसि ॥ किमायासेन ते भीरु उत्तिष्ठोत्तिष्ठ शोभने ॥३८॥ तत्त्वं मे ब्रूहि कैकेयि यतस्ते भयमागतम् ॥ तत्ते व्यपनयिष्यामि नीहारमिव रश्मिवान् ॥३९॥ तथोक्ता सा समाश्वस्ता वक्तुकामा तदप्रियम् ॥ परिपीडयितुं भूयो भर्तारमुपचक्रमे ॥४०॥ इत्यार्षे रामायणेऽयोध्याकाण्डे दशमः सर्गः ॥१०॥ तं मन्मथशरैर्विद्धं कामवेगवशानुगम् उवाच पृथिवीपालं कैकेयी दारुणं वचः ॥१॥ १॥ १॥ २॥ १॥

डयितुमुपचक्रान्तवतीत्यर्थः ॥४०॥ इति दशमः सर्गः ॥१०॥ अथ मन्मथशरैरित्यादि [illegible] मन्मथशरैरा विद्धमत एव कामवेगवशं तस्मात्तदनुगामिनं किंकरं पृथिवीपालं कैकेयी दारुणं वचो वचनमुवाच ॥१॥१॥१॥

पुष्कलोः संपूर्णाः १४ । १६ । ताश्चापचाराः तालेरपचरंति जीवंतीतितथा कल्पांघ्रितीर्यां ग्रंतः कल्पापा
ममिषेकस्याते वालराणांनामेववासादितिभावः । १७ ॥ देवायतनचैत्येषु देवगेहेषु रथ्यावृक्षेषु च

घृतेचदधिलाजांश्च दक्षिणाश्चापिपुष्कलाः सूर्यमुदितमात्रे श्वोभविता
स्वस्तिवाचनम ॥ १५ ॥ बालराणाश्चनिमंत्र्यंतां कल्प्यंतामासनानिच ध्वजाश्चबध्यंतां
पताकाश्चराजमार्गश्चसिच्यताम् ॥ १६ ॥ सर्वेच तालापचरगणिकाश्चस्वलंकृ
ताः ॥ कल्पांघ्रितीयामासाद्यतिष्ठंतुनृपवेश्मनः ॥ १७ ॥ देवायतनचैत्येषु सान्न
भक्ष्याः सदक्षिणाः उपस्थापयितव्याः स्युर्माल्ययोग्याः पृथक्पृथक् ॥ १८ ॥ १८ ॥ ८

सान्नमोदनेभक्ष्यं चतत्सहिताः सदक्षिणाः माल्ययोग्याः माल्यमर्हतिमाल्यमर्चनंतद्योग्याः गंधपुष्पा
द्यः पृथक्पृथगुपस्थापयितव्याः तत्र देवतापूजापूर्वकं तत्रतत्र ब्राह्मणतर्पणमितितात्पर्यम् । १८

काषी

॥रा०म०॥
१८

शातकुंभानांसौवर्णानाम् । समंमंत्रवादिसहितमखंडं । ११ । शतैरेतानिमहीपतेः । अग्न्यगारे
अग्निहोत्र गृहे उपस्थापयेत्प्रयत्नतः । पश्चाच्च दत्तु क्रमपि मंगल्ल द्रव्यमेव ख्यमव श्यापेदि
तं तत्सर्वमुपकल्प्य तोस्थापयेत्ताम् । १२ । श्वेतः पुरोराजवेश्म घ्राणहारिभिरतिसुगंधैः । १३
शतेच शातकुंभानां कुंभानामग्निवर्चसाम् । हिरण्यशृंगो वृषभः समग्रं व्याघ्रचर्म च
। ११ । उपस्थापयेत्शत रत्नागारं महीपतेः । पश्चात्सर्वकिंचिद्देवश्वेतं तत्सर्वमुपकल्प्यतो
। १२ । श्वेतः पुरस्य द्वाराणि सर्वसनागारस्य च । चंदनैस्तलभिर्लिप्तं तां धूपैश्च घ्राणहारिभिः । १३
प्रशस्तमंत्रेण गुणवद्भिर्दीक्षितैः पौरैश्च तैर्द्विजानां शातसाहस्रं यत्र कामफलं भवेत् । सत्कृत
द्विजमुख्यानां श्वः प्रभाते प्रदीपयताम् । १४ । प्रशस्तमंत्रेण [illegible] धान्ये दध्याज्ञी रेणा च उपवेच्चने
संस्कारोपस्थितत् । सहस्रमेवसाहस्रं शतंचतत्साहस्रं च शतसाहस्रं द्विजानां । शतसाहस्रंप्रतिपत्स्वका
ममभिमतं स्वत्वेश्वर्यात्र । च भवेत्तत्तं पापघ्नद्विजमुख्यैभ्यः सत्कृत्य प्रात दीपताम् । १५ । सीतोसीनासा

वसिष्ठमितिवामदेवोपलक्षणं ४ ॥ एवंव्यादिरूपविप्रोनातिसृक्तः ६ । सपरिच्छदं सोपकरणं ७ । पुक्कान्साव
धानानमंत्रिणाइतिशेषः ८ । बलीनपूजाद्रव्याणिविघ्नशामकैवल्यवानि [illegible] पोत्रीहिमुद्गादयः ९

प्रातैस्तस्मिन्तथा प्राते च जनघोषेनराधिपः ॥ वसिष्ठं मुनिशार्दूलं राजा वचनमब्रवीत्
॥ ६ ॥ अभिषेकाय रामस्य यत्कर्म सपरिच्छदम् ॥ तदद्य भगवन्सर्वमाज्ञापयितुमर्हसि
॥ ७ ॥ तच्छ्रुत्वा भूमिपालस्य वसिष्ठो द्विजसत्तमः ॥ आदिदेशाग्रतो राज्ञः स्थितान्युक्तान्कृतांज
लीन् ॥ ८ ॥ सुवर्णादीनि रत्नानि बलीन्सर्वौषधीरपि ॥ शुक्लमाल्यानि लाजांश्च पृथ
क्च मधुसर्पिषी ॥ अहतानि च वासांसि रथं सर्वायुधान्यपि ॥ ९ ॥ चतुरंगबलं चैव गजं
च शुभलक्षणं ॥ चामरव्यजने श्वेते ध्वजं छत्रं च पांडुरम् ॥ १० ॥ ॥ ॥

पृथक्मधुसर्पिषी परस्परमसंमिलिते द्वौ द्रव्ये अहतानि ईषद्धौतं नवं श्वेतं सदशं प्रावरणं धारितम् अहतं
तद्विजातीयानि [illegible] च कर्मणी [illegible] लक्षणानि ९ । चामरव्यजने चमरपुच्छनिर्मिते व्यजने । १० । १० । १०

इति द्वितीयः सर्गः ॥२॥ अंजलिपद्मानि अंजलिरूपाणि पद्मानि प्रगृहीतानि प्रकर्षेण शिरसि बद्धानि प्रतिगृह्य वीक्षणवचनादिभिः अंगीकृत्य ॥१॥ अहोस्मीति संधिरार्षः ॥२॥ राजा दशरथः ॥३॥ इति पूर्वोक्तरीत्या तान्प्रत्यर्च्य

इत्यार्षे रामायणे वाल्मीकीये अयोध्याकाण्डे द्वितीयः सर्गः ॥२॥ तेषामंजलिपद्मानि प्रगृहीतानि सर्वशः। प्रतिगृह्याब्रवीद्राजा तेभ्यः प्रियहितं वचः ॥१॥ अहोस्मि परमप्रीतः प्रभावश्चातुलो मम। यन्मे ज्येष्ठं प्रियं पुत्रं यौवराज्यस्थमिच्छथ ॥२॥ इति प्रत्यर्च्य तान्राजा ब्राह्मणानिदमब्रवीत्। वसिष्ठं वामदेवं च तेषामेवोपशृण्वताम् ॥३॥ चैत्रः श्रीमानयं मासः पुण्यः पुष्पितकाननः। यौवराज्याय रामस्य सर्वमेवोपकल्प्यताम् ॥४॥ राज्ञस्तूपरते वाक्ये जनघोषो महानभूत् ॥५॥

नापरान्प्रत्यर्च्य मधुरवचनैः संमान्य तेषामेवोपशृण्वताम् ते शृण्वत्सु सत्सु वसिष्ठवामदेवं च इतरब्राह्मणांश्चेदमब्रवीदित्यन्वयः ॥३॥ तदेवाह चैत्र इति ॥४॥ जनघोषः रामाभिषेकसंभारोपकल्पनाज्ञाश्रवणासंतोषजः ॥५॥

रा० २६

असौ नेव वत्सो दिव्यायाः स्वद्वारेपन श्रेयसि प्रजारक्षणारूपे समर्थो जातः किंच असौ राघवः तव दिव्या मरीचि पुत्रः कश्यपस्य पुत्र गरुडोऽप्युक्तो जातः इत्यर्थः ॥४९॥५०॥ आक्रांसते प्रार्थयते आभ्यंतरः सेवकः ॥५१॥ रामस्यार्थे रामा

वत्सः श्रेयसि जातस्ते दिव्यासौ तव राघवः ॥ दिव्या पुत्रं गरुडोऽयुक्तो मारीचस्य कश्यपः ॥४९॥
बलमारोग्यमायुश्च रामस्य विदितात्मनः ॥ देवासुरमनुष्येषु सगंधर्वोरगेषु च ॥५०॥ ॥
आपूंासते जनः सर्वो राष्ट्रे पुरवरे तथा ॥ आभ्यंतरश्च बाह्यश्च पौरजानपदो जनः ॥५१॥
स्त्रियो वृद्धास्तरुण्यश्च सायंप्रातः समाहिताः ॥ सर्वान्देवान्नमस्यंति रामस्यार्थे मनस्विनः ॥५२॥
तेषामायाचितं देव त्वत्प्रसादात्समृध्यताम् ॥५३॥ राममिंदीवरश्यामं सर्वशत्रुनिबर्हणम् ॥
पश्यामो यौवराज्यस्थं तव राजोत्तमात्मजम् ॥५४॥ तं देवदेवोपममात्मजं ते सर्वस्य लोकस्य हिते निविष्टं ॥ हिताय नः क्षिप्रमुदारजुष्टं मुदाभिषेक्तुं वरद त्वमर्हसि ॥५५॥५५॥५५॥

अभ्युदयविषये ५२ आयाचितं अभिप्रार्थितं रामाभिषेकरूपं समृध्यतां संपाद्यतां ५३ राजोत्तमेति संबोधनं ५४
देवदेवोपमं विष्णुतुल्यं उदारजुष्टं उदारैर्गुरुभिर्जुष्टं युक्तं उदारैर्महद्भिर्जुष्टं सेवितं च ५५

राम० २६

शौर्यं युद्धे निर्भयेन प्रवेशः सामर्थ्यं वीर्यं स्वस्याविकारे एव परस्य विकारापादनं पराक्रमो युद्धे त्वपुसंचारः ॥ ४३
रागो विषयेच्छा ॥ ४४ ॥ ४५ ॥ यत्र यस्मिन्पुरुषे तुष्यति तुष्टः सोतमर्थैरभिलषितपदार्थैः पुनक्ति योजयति ॥ ४६

ता

सुमन्त्र राम तस्मात्त्वं साक्षाद्विष्णुरिव स्वयम् ॥ रामो लोकाभिरामोयं शौर्यवीर्यपराक्रमैः ॥ ४३ ॥
प्रजापालनसंयुक्तो न रागोपहतेन्द्रियः ॥ शक्तस्त्रैलोक्यमप्येष भोक्तुं किन्तु महीमिमाम् ॥ ४४
नास्य क्रोधः प्रसादश्च निरर्थोस्ति कदाचन ॥ ४५ ॥ हन्त्येष नियमाद्वध्यानवध्येषु न कुप्यति ॥ युनक्त्यर्थैः प्रहृष्टश्च तमसौ यत्र तुष्यति ॥ ४६ ॥ दान्तैः सर्वप्रजाकान्तैः प्रीतिसंजननैर्नृणाम् गुणैर्विरुरुचे रामो दीप्तः सूर्य इवांशुभिः ॥ ४७ ॥ तमेवंगुणसंपन्नं रामं सत्यपराक्रमम् ॥ लोकपालोपमं नाथमकामयत मेदिनी ॥ ४८ ॥

दान्तैः स्वमनोदमनैः सर्वप्रजानां कान्तैः काम्यमानैः सार्वजनभोग्यैरित्यर्थः अत एव प्रीतिसंजननैः दीप्तः रश्म्यादिकालीनः ॥ ४७ ॥ मेदिनी तस्यो जनः ॥ ४८ ॥ एमराम

३३ आत्मनो जीवितेनहे तुनापि ते तवाभिप्रायं अभिप्रेतं मनोरथो किंचिन्मात्रमपि व्याहर्तुमहं नोत्सहे अतो यन्मनसी वर्त्तसे तद्ब्रूहि ॥ ३४ ॥ आत्मनि स्वस्मिन्बलं सामर्थ्यमहं रूपं जानती अयं मद्दुःखं करिष्यति न वेत्ति तु मां प्राकिं तु नार्हि

दरिद्रः को भवेदाढ्यो द्रव्यवान्को प्यकिंचनः ॥ अहं चैव मदीयाश्च सर्वे तव वशानुगाः ॥ ३३
न ते किंचिदभिप्रायं व्याहर्तुमहमुत्सहे ॥ आत्मनो जीवितेनापि ब्रूहि यन्मनसी वर्त्तसि ॥ ३४
बलमात्मनि जानंती न मां प्राकिं तुमर्हसि ॥ करिष्यामि तव प्रीतिं सुकृतेनापि ते शपे ॥ ३५ ॥
यावदावर्त्तते चक्रं तावती मे वसुंधरा ॥ प्राचीनाः सिंधुसौवीराः सौराष्ट्रा दक्षिणापथाः ॥ ३६

सुकृतेनापि स्वपुण्येनापि ते तव शपे शपथं ददामि यदि त्वद्दुःखं न कुर्मि तर्हि सर्वं सुकृतं मे नश्येति शपथं ददामीत्यर्थः ॥ ३५ ॥ आत्मनि दुष्करसंपादनसामर्थ्यं दर्शयति यावदिति । चक्रं सूर्यमंडलं आवर्त्तते प्रकाशयति तावती सर्वापि वसुंधरा मे मदधीना प्राचीनसिंध्वादयो देशा अपि मदधीना एव ॥ ३६ ॥ सीतारामाय नमः

हे देवि केनाभियुक्ता कृतपराभवा विमानिता निंदितासि तत्सर्वं कथय यतः इदं एवं प्रकारेण हे कल्याणि मम दुःखा
य पांसुषु प्रोषे ।२८। किंच कल्याणि त्वां चेतसि स्थितां न पकारिणीमपि जीवति सति किमर्थं भूतोपहतचित्तेव मम हृ
दि विष्यव भूमौ प्रोषे प्राषितासि ।२९। कुशलाः सर्वव्याधिनिवारणदक्षाः अभितुष्टाः सत्कृताः सत्कारैरिति शेषः व्या

देवि केनाभियुक्तासि केन वासि विमानिता । यदिदं मम दुःखाय प्रोषे कल्याणि पांसुषु ॥२८॥
भूमौ शेषे किमर्थं त्वं मयि कल्याणि चेतसि । भूतोपहतचित्तेव मम चित्तप्रमाथिनी ॥२९॥
संति मे कुशला वैद्यास्त्वभितुष्टाश्च सर्वशः । सुखितां त्वां करिष्यंति व्याधिमाचक्ष्व भामि
नि ॥३०॥ कस्य वा ते प्रियं कार्यं केन वा विप्रियं कृतम् । कः प्रियं लभतामद्य को वा सुम
हदप्रियम् ॥३१॥ मा रौत्सीर्मा च कार्षीस्त्वं देवि संपरिशोषणम् । अवध्यो वध्यतां को वा वध्यः ।
को वा विमुच्यताम् ॥३२॥

धिमाचक्ष्व व्याधिं कृतं चेत् कथयनमिति शेषः ।३०। किंच त्वया कस्य वा प्रियं कार्यं तव केन वा विप्रियं कृतं यदा इदय।
निमित्तोपि क्रोधो मास्त्वित्याह कः प्रियमिति ।३१। मा रौत्सीः स्वात्मनो निग्रहं मा कार्षीः कायस्य संपरिशोषणं
मा कार्षीः तदेव प्रपंचयति अवध्य इत्यादि ।३२।